चेट (कुम्भीलक)—An attendant of Vasantasená.

बन्धुल—A bastard, parasite of Vasantasenà.

विट—An attendant of Vasantasená.

रोहसेन—The son of Chárudatta.

आर्यक—A cowherd and insurgent, later the king of Ujjayinî.

वीरक, चन्दनक—Two officers of the city's police.

शोधनक—A beadle of the law-court.

श्रेष्ठिन्, कायस्थ—Two assessors.

अधिकरणिक—A Judge.

चाण्डालौ (आहीन्त and गोह)—Two executioners.

FEMALES.

नटी—The wife of the Sútradhâra.

वसन्तसेना—The heroine of the play, a courtesan who loves Chârudatta.

रदनिका (चेटी)—Châ*r*udatta's maid-servant.

मदनिका (चेटी)—Vasantasenâ's maid-servant.

धूता—The wife of Chârudatta.

छत्रधारिणी—An attendant of Vasantasenâ.

वृद्धा—The old mother of Vasantasená.

OTHER PERSONS MENTIONED.

चूर्णवृद्ध—A friend of Chárudatta.

पालक—The king of Ujjayinî, afterwards dethroned and killed by Âryaka.

रेभिल—A merchant of Ujjayinî, and a friend of Chárudatta.

The brother of Vasantasená (p. 106).

SCENE.

The city of Ujjayinî and its environs (including the *Pushpakaraṇḍaka* garden).

Prakarana

A species of Rupaka ~ Drama. Visvanatha says

IMPORTANT ABBREVIATIONS.

A. G.—Apte's Guide to Sanskrit Composition.

A.-K.—Amarakośa.

Bg.—Bhagavadgîtâ.

Bh.—Bhartṛihari's Śatakas.*

Bhaṭṭ.—Bhaṭṭikâvya.*

Bṛih.-Up.—Bṛihadâraṇyakopanishad.

Br.-Sû.—Brahmasûtras.

Chár.—Chârudatta of Bhása.

Chhán.-Up.—Chhándogyopanishad.

Com.—Commentary; commentator.

D.-K.—Daśakumáracharita.*

D.-R.—Daśarûpaka.

Gît.—Gîtagovinda.

Hitop.—Hitopadeśa.*

J. V.-Jîvánand Vidyâságara.

Kád.—Kádambarî.*

Káv.-D.—Kávyâdarśa.

Káv.-S.—Kávyálaṃkára-Sútras of Vámana.

Kir.—Kirátárjunîya.*

K.-P.—Kávya Prakáśa.

Kum.—Kumárasaṃbhava.*

L.-D.-Lallá-Dīkshita.

Mah.-.Bh—Mahábhárata.

Málav.—Málavikágnimitra.*

Malli.—Mallinâtha.

Mál.-Mádh.—Málatî-Mádhava.*

Megh.—Meghadûta*.

Mṛich.—Mṛichchhakaṭika.*

M.-S.—Manusmṛiti.

Mud.—Mudrárákshasa.*

Nág.—Nágánanda.*

Páṇ.—Páṇini's Ashṭádhyâyî.

Pṛi.-Pṛithvîdhara.

Pt.—Pañchatantra.*

Ragh.—Raghuvaṃśa.*

Râmá.—Rámáyaṇa.

Ratn.—Ratnâvalî.*

Ṛig.-V.—Ṛig-Veda.

Ṛitu.—Ṛitusaṃhára.*

S'âk.—Śákuntala.*

S.-D.—Sáhitya-Darpaṇa.

Sid.-K.—Siddhánta-Kaumudî.

S'is'.—Śiśupálavadha.

Up.—Upanishad.

Uttar.—Uttararámacharita.*

Várt.—Várttika.

Veṇî.—Veṇîsaṃhára.*

Vik.—Vikramorvaśîya.*

V.-P.—Vishṇu-Puráṇa.

---

*Annotated by the Editor.

भूमिका ।

शूद्रकेणासकृज्जित्वा स्वच्छया खड्गधारया ।
जगद्भूयोऽभ्यवष्टब्धं वाचा स्वचरितार्थया ॥

—आचार्यश्रीदण्डिनः ।

इह खलु सकलविद्याकलाकलापादिपीठेऽस्मिन्भारते वर्षे निजयशःपरिमलसुरभीकृतदिगन्ताः प्रतिभाशालिनः परःशताः कवीश्वरा भासकालिदासादयो निजकृत्याभरणैर्वाग्वधूं सुरुचिरं मण्डयन्ति स्म । तेषां च केचन प्रबन्धप्रमोदितरसिककदम्बाः शब्दसर्जनावर्जितोर्जितयशस्का विदग्धपुंगवाः प्रतापसंतापितारातिचक्राश्चक्रवर्तिनो राजानोऽभूवन्नित्यहो निर्माणचातुरी विधेः । एतेषु श्रीमद्धर्षयशोवर्मभीमटभोजादिष्वग्रेसरीभूतः श्री**शूद्रका**भिधो नृपतिरितो वर्षशतैकविंशतेः प्रागुज्जयिनीं प्रशशास । यमुद्दिश्य प्रसस्रुर्नानाकवीनां प्रशंसामधुरा वाक्प्रवाहाः । यश्चैतद्रसभावनिरन्तरं रूपकमूर्धन्यपदप्रतिष्ठितं **मृच्छकटिका**ख्यं चारुतरं प्रकरणं निबबन्ध । यद्यपि कविनृपतेरस्य भूपतेर्विषये किमपीतिवृत्तादि जिज्ञासुभिः स्फुटं निश्चिततया नोपलभ्यते तथाऽपि शताधिकद्विसहस्रमितवर्षेभ्यः प्रागन्ध्रभृत्यराजवंशं बद्धमूलं कृतवताऽन्ध्रभृत्यानामादिमनृपेण सिमुकाभिधेनास्याविभिन्नत्वमुपस्थापयन्ति भूयांसः संख्यावन्तः प्राचीनवार्ताभिज्ञाः । तेषां च मतमिदं केचन प्रत्यवतिष्ठन्ते । तदभिप्रायेण कविरयमाचार्यश्रीदण्डिविरचितावन्तिसुन्दरीकथासारे समुपवर्णिताच्छूद्रकान्नान्यः संभवतीत्यस्तीह महती विप्रतिपत्तिः । श्रीशूद्रकस्य किमपि चरितमत्रैव प्रकरणे प्रस्तावनायां त्रिभिः श्लोकैरुपनिबद्धं दृश्यते । अथ तु तस्यापि यातातथ्यविषये भूयांसो विकल्पाः पाश्चात्त्यविद्वद्भिः प्रदर्शिताः कदर्थयन्ति चेतः शिष्टानाम् । वयं तु मन्यामहे यदिदं श्लोकत्रयोपवर्णितं वृत्तं न कथमप्यनृतत्वपदवीमारोहेदिति । अथ चात्र प्रस्ताविता ये नानाविधाः कल्पनोपजल्पा न तेषामिह परीक्षणमावश्यकमित्यलं पल्लवितेन । मृच्छकटिकं विहाय नान्यः कोऽपि शूद्रकविरचितो ग्रन्थो दृष्टिपथमारूढः । यत्किल **पद्मप्राभृतक-वत्सराजचरित-कामदत्ता**दिरूपकाण्यपि शूद्रकेण व्यरच्यन्तेति कैश्चिद्दाक्षिणात्यविपश्चिद्भिरुपन्यस्तं न तत्प्रायोऽद्ययावद्विश्वसनीयत्वकक्षामवगाढम् ।

श्रीमाञ्शूद्रको नाटककृच्चक्रवर्तिनः श्रीभासस्य कृतिष्वेकतमं **चारुदत्ता**ख्यं खण्डितरूपकं समुपजीव्यैवात्मनः प्रबन्धं प्रणिनायेति सर्वैरभ्युपगतप्रायोऽयमर्थः । दृश्यते च चारुदत्तमृच्छकटिकयोः प्रतिपदं च प्रतिवाक्यं च प्रतिश्लोकं च बंहिष्ठं साम्यम् । तत्रभवाञ्शूद्रको भासीयचारुदत्तादेव चतुर्ष्वङ्केषु ग्रथितं वस्तु तथैवाविकृतं संगृह्य तस्य परतोऽसमाप्ततया स्वयमेवोर्वरितं वस्तु सम्यक्प्रकल्प्य शेषाञ्षडङ्कान्विरचयांबभूवेति लेशतोऽपि नास्ति संदेहावकाशः । रूपकेऽस्मिन्कविप्रवरः श्रीशूद्रको वैदर्भीं रीतिमेव परिगृहीतवानिति सुविशदमेवावलोकयताम् । यां च रीतिं श्रीबिल्हण

इत्थमुपवर्णयति—“ अनभ्रवृष्टिः श्रवणामृतस्य सरस्वतीविभ्रमजन्मभूमिः । वैदर्भरीतिः कृतिनामुदेति सौभाग्यलाभप्रतिभूः पदानाम् ॥ ” इति । श्लेषप्रसादमाधुर्यादिकाव्यगुणैः प्रगुणीकृतसरसत्वं सरलत्वमस्य कृतौ समुल्लसतितराम् । पद्ये ह्यसमस्तपदप्राचुर्याद्गद्ये च सुस्पष्टायाः सरलाया वाचो निबन्धनात्कविरयं भासकालिदासादिकविवरश्रेण्यामेव प्रधानमास्पदमलंकरोतीति न केषांचन न संमतम् । अस्मिन्प्रकरणे दशभिरङ्कैरुज्जयिनीवास्तव्यस्यौदार्यगुणनिधेर्दैवादवाप्तदारिद्र्यस्य कुलपुत्रशेखरस्य श्रीमतश्चारुदत्तस्य तत्रत्याया रूपयौवनविभवादिशालिन्या वसन्तसेनाभिधाया गुणानुरागित्वाच्चारुदत्तबद्धभावायाः प्रधानगणिकायाश्च प्रेमप्रधानं चारित्र्यं प्रपञ्चितम् । तदिदं कथावस्तु पिपठिषूणां सुखावबोधार्थं सारांशतोऽङ्कानुक्रमेण विभक्तमत्र प्रदर्श्यते—

प्रथमाङ्के तावदादौ नान्दीपठनम् । ततः प्रस्तावनायामादौ नाटकस्य कर्तृत्वाभिधानाद्युपनिबद्धम् । पश्चात्सूत्रधारनटीप्रवेशेन कथारम्भत्वेन विदूषकमैत्रेयस्य प्रवेशः संसूचितः । तदनन्तरं मैत्रेयः प्रविश्य बलिकर्मव्यापृताय स्वप्रियवयस्याय चारुदत्ताय तत्सुहृदा चूर्णवृद्धेनानुप्रेषितं प्रावारकमार्पयत् । चारुदत्तश्च प्रस्तावत आत्मनो दारिद्र्यजनितां मानसीमाधिमुपवर्णितवान् । ततो विटचेटाभ्यां सहितेन राजश्यालकसंस्थानकेन शकारेण प्रार्थ्यमानाया वसन्तसेनाया गणिकायाः प्रवेशः । तदभ्यर्थनामनङ्गीकृत्य चारुदत्तगृहं प्रविष्टायां वसन्तसेनायां शकारादयोऽपसृताः । अथ सा तत्र बलीयसाऽनुरागेण परवशीकृता किमपि मनीषितमुद्दिश्य चारुदत्तहस्त आत्मनोऽलंकारं न्यासत्वेन निक्षेप्तुमुद्युक्ताऽऽसीत् । ‘ नेदं वित्तहीनस्य गृहं न्यासस्य योग्यम् ’ इति च प्रत्यादेशपरं तं ‘ आर्य अलीकम् । पुरुषेषु न्यासा निक्षिप्यन्ते न पुनर्गेहेषु ’ इति निजस्नेहानुकूलं प्रतिभाष्यालंकारं तत्रैव न्यस्य पश्चात्स्वगृहं प्रतिनिवृत्ता ।

द्वितीयाङ्के–आदौ वसन्तसेनायास्तच्चेट्या मदनिकायाश्च प्रवेशे वसन्तसेनाऽऽत्मनो हृदि निगूढं चारुदत्तनिबन्धनं भावमुपवर्ण्य ‘ सहसाऽभिसार्यमाणः प्रत्युपकारदुर्बलतया [illegible]ऽसौ प्रियजनो दुर्लभदर्शनः पुनर्भविष्यति ’ इत्येवंरूपं चात्मनोऽलंकारस्य [illegible]सकारणं प्रख्यापितवती । ततो द्यूतं शीलयित्वा दशसुवर्णकस्य कृते रुद्धस्य प्रपलायितस्य प्रधानसभिकेन माथुरेणान्विष्यमाणस्य द्यूतकरसंवाहकस्य प्रवेशः । अन्यतमद्यूतकरसाहाय्येन संवाहको माथुरगृहीतोऽपि तद्धस्तादपक्रम्य वसन्तसेनागृहं प्रविवेश । तस्मै चाभयं प्रदायोदारशीलाऽसौ गणिका तेन धारितं सुवर्णं माथुराय प्रतिपाद्य तमुपकृतवती । आत्मनो द्यूतकरभावेन निर्विण्णः संवाहकः शाक्यश्रमणको बुभूषुर्निष्क्रान्तः । समनन्तरमेव वसन्तसेनायाः किंकरः कर्णपूरकः प्रविश्य संवाहकस्य मत्तहस्तिदंष्ट्रान्तरादात्मकृतं मोचनं तद्विलोक्य च चारुदत्तेन स्वप्रावारकस्य तस्मै पारितोषिकतया प्रदानं हृष्टः संकथयामास । अनेन चित्तचमत्कारिवृत्तान्तश्रवणेन च वसन्तसेना चारुदत्ते दृढतरमनुरागिणी बभूव ।

तृतीयाङ्के–तत्रभवांश्चारुदत्तो गान्धर्वं श्रोतुं सार्थवाहरेभिलस्य गृहं मैत्रेयेण समं गतवानासीत् । अतिक्रान्तायामर्धरजन्यां ततः प्रतिनिवृत्य स्वगृहमागत्योभावपि सुखेन निद्रामारेभतुः । अथ शर्विलकाख्यः कश्चिद्दरिद्रो ब्राह्मणयुवा वसन्तसेनाचेट्यां मदनिकायां बद्धभावस्तामभुजिष्यां कर्तुमिच्छन्नपि स्वस्य वित्तविहीनतामवलोक्य तत्सं[illegible]ा-

दनार्थं चौरमार्गमङ्गीकृत्य गृहीततत्तत्साधनश्चारुदत्तस्य गृहं प्राप्तः। तत्र च स संधिं कृत्वा प्रविश्य यः पूर्वं वसन्तसेनया न्यासीकृतस्तमेवालंकारं विदूषकेण रात्रौ रक्ष्यमाणं तस्य हस्तादपाच्छिद्य निश्चक्राम। अथ जागरितेषु सर्वेषु तमलंकारं चौरेणापहृतं श्रुत्वा 'कथममुं न्यासं प्रतिनिर्यातयिष्ये' इति चारुदत्तस्य भूयसी चिन्ता समजनि। किं तु ज्ञातैतद्वृत्तान्तया तदीयब्राह्मण्याऽऽर्याधूतया निजकण्ठादेका बहुमूल्या रत्नमालाऽवतारिता विदूषकस्य च हस्ते समर्पिता यां मैत्रेयः 'इदं ते सदृशदारसंग्रहस्य फलम्' इत्युपन्यस्य चारुदत्तायार्पयामास। तदनु वीतचिन्तश्चारुदत्तः 'गच्छ रत्नावलीमिमामादाय वसन्तसेनायाः सकाशम्। वक्तव्या च सा यत्खल्वस्माभिः सोऽलंकार आत्मीय इति कृत्वा विस्रम्भाद् द्यूते हारितः। तस्य कृते गृह्यतामियमिति।' इति संदिश्य विदूषकं गणिकासमीपं प्रेषयांचकार।

चतुर्थाङ्के–अथ प्रभाते शर्विलकश्चोरितालंकारं गृहीत्वा वसन्तसेनाभवनं प्रतियातः। तत्र च मदनिकया संगत्य यावदसौ तत्सुवर्णभाण्डं तस्यै दर्शयति तावत्तया दृष्टपूर्वं तत्स्वस्वामिन्याः संबन्धीत्यभिज्ञातम्। तदनु निर्बन्धपृष्टः शर्विलकः स्वस्तेयं प्राख्यापयत्। प्रिययाऽनुनीतश्च तद्वचनानुसारेण तद्वसन्तसेनायै प्रत्यर्पयितुकामः स चारुदत्तसंबन्धीत्यात्मानं संदर्श्य 'सार्थवाहस्त्वां विज्ञापयति–जर्जरत्वाद्गृहस्य दूरक्ष्यमिदं भाण्डम्। तद्गृह्यताम्' इति वसन्तसेनायै तमलंकारं प्रतिप्रदाय गन्तुमुद्युक्तः। अथ तु मदनिकाशर्विलकयोः संलापमादित एवामूलं श्रुतवती वसन्तसेना तमलीकदूतं विज्ञायाप्युदारशीलतया मदनिकां दास्यान्मोचयित्वा तस्मै दत्तवती। अथ परितुष्टे गते तस्मिन्विदूषको रत्नावलीमादायाष्टप्रकोष्ठं बहुविधसंपन्निचितं वसन्तसेनाभवनं प्राप्य यथादेशं ससंदेशं तां रत्नमालां तस्या हस्ते स्थापितवान्। अथ गणिकाऽपि तामादाय 'कथं चौरेणापहृतमपि शौण्डीरतया द्यूते हारितमिति भणति। अत एव काम्यते' इति स्वगतमाभाष्य 'आर्य विज्ञापयार्यचारुदत्तम्–अहमपि प्रदोष आर्यं प्रेक्षितुमागच्छामि' इति प्रतिसंदिश्य विदूषकं विसर्जयांचकार।

पञ्चमाङ्के–अथोन्नमति दुर्दिने प्रसृते भीषणान्धकारे गर्जत्सु मेघेषु विद्योतमानासु तडित्सु वसन्तसेना यथाप्रतिज्ञमभिसारिकावेषेण चारुदत्तभवनं गत्वा तेन सह संगता भूत्वा परं मोदमवाप। चारुदत्तोऽपि प्रियया संगत्य हृष्टमना विस्मृतदारिद्र्यव्यथो धन्यमात्मानं मेने। अनन्तरमुभावप्यभ्यन्तरं प्रविश्य सुखेन निशामनयताम्।

षष्ठाङ्के–अथान्येद्युः प्रभाते चारुदत्तः पूर्वं प्रस्थायोज्जयिनीबहिर्भूतं पुष्पकरण्डकं नाम जीर्णोद्यानं गतः। अथ प्रबुद्धायां वसन्तसेनायां चारुदत्तदारको रोहसेनः सौवर्णशकटिकां क्रीडार्थमिच्छंस्तामलभमानस्तत्स्थाने मृन्निर्मितां शकटिकां प्रदत्तामस्वीकुर्वन्नुदन्नेव तस्याः समीपं प्राविशत्। तत उदारचरिता वसन्तसेना स्वदेहादात्मनोऽलंकारानवतार्य 'गृहाणैतान्। कारय सौवर्णशकटिकाम्' इति सास्रं च सस्नेहं च भणित्वा तं हृष्टं विसर्जयामास। [तदेवेदं वृत्तमधिकृत्य **मृच्छकटिक**मिति यथार्थं स्वप्रबन्धाभिधानं कृतवान्कविः।] तदनु वसन्तसेनामुद्यानं नेतुं प्रवहणं योजयित्वा वर्धमानकश्चेट उपस्थित आत्मानं तस्यै निवेदयामास। किं तु यानास्तरणानि विस्मृतानीत्युपलभ्य तान्यानेतुमकथयित्वैव तां पुनः सप्रवहणो निर्यातः।

एतदन्तरे शकारस्यापि प्रवहणवाहकश्चेटः स्थावरकस्तेनैव पथा प्रवहणं वाहयंश्च रुदत्तस्य पक्षद्वारकनिकटे क्षणं तत्स्थापयित्वा कुत्रचिद्यातः। तदेव प्रवहणं चारुदत्तीयमिति मत्वा वसन्तसेना तस्मिन्नारूढा स्थावरकोऽपि प्रत्यागत्य अविज्ञाततया निजं प्रवहणं शून्यमेव मन्वानस्तद्वाहयन्नपक्रान्तः। अत्रान्तरे कोऽप्यार्यकनामा गोपालो राजा भविष्यतीति सिद्धादेशपरित्रस्तेन पालकेन राज्ञा गूढकारागारे बद्ध आसीत्। स गुप्तिं भङ्क्त्वा सनिगडमपक्रामन्यातप्रतिनिवृत्तस्य वर्धमानकस्यैव प्रवहणं पृष्ठतोऽधिरूढः। चेटोऽपि पश्चादनवलोक्यार्यकमेव गणिकां मन्वानस्तथैव प्रवहणमवाहयत्। तच्च प्रवहणं नगररक्षिणामेकतमेन चन्दनकेन प्रलोकितमार्यकश्चाभिज्ञातः। किं तु जातकारुण्यः स तस्मा अभयं दत्त्वा न तद्रहस्यं प्राकाशयद्येन वर्धमानकोऽपि तदजानन्नेव प्रवहणं वाहयन्नपचक्राम।

सप्तमाङ्के—पुष्पकरण्डकोद्याने प्रियां प्रतिपालयंश्चारुदत्तस्तस्याः स्थान आर्यकमुपस्थितं विलोक्य भृशं विस्मितस्तस्मा अभयं प्रदाय तेन सह सौहृदं संपाद्य ‘ एवमेवानेन प्रवहणेन शीघ्रमपक्रामतु भवान् ’ इति तं सुरक्षितं प्रास्थापयत्। नृपतेः कृतव्यलीकतया तत्र परतोऽवस्थानमयुक्तं मत्वा स्वयं चापससार।

अष्टमाङ्के—अथ पुष्पकरण्डकोद्याने स्वप्रवहणेनागतां वसन्तसेनामालोक्य परं मोदमापन्नः शकारस्तामनुनेतुं बहुप्रकारं येते। किं तु चारुदत्त एव दृढबद्धभावां तां परिज्ञाय जातरोषोऽसौ तां गले निपीड्य मारयितुं प्रावर्तत। अथ तां निश्चेष्टां भूमौ पतितां निरूप्य मृतेत्येव तामवगच्छंस्तन्महापापं चारुदत्ते पातयितुं निश्चित्य शकारो द्रुतमपचक्राम। अत्रान्तरे संवाहकेन शाक्यभिक्षुभूतेन यदृच्छया तत्रागतेन वसन्तसेना प्रत्युज्जीविता समाश्वासनार्थं समीपवर्तिविहारं प्रापिता च।

नवमाङ्के—शकारोऽधिकरणमण्डपं गत्वा व्यवहारमलेखयद्यथा किल चारुदत्तेनाकार्यकारिणा वसन्तसेनाऽर्थस्य कारणात्पुष्पकरण्डकोद्यानं प्रवेश्य बाहुपाशेन मारितेति। अधिकरणिकैराकारितश्चारुदत्त आर्यकवृत्तान्तं गोपायितुमिच्छन्न किंचित्सभ्युत्तरं ददौ। ततस्तत्स्त्रीवधपातकं तस्मिन्नेव सुलभतया निर्णीतं बभूव येन पालकेन राज्ञा ‘ डिण्डिमं ताडयित्वा दक्षिणश्मशानं नीत्वा कृतमहापापमेनं शूले भङ्क्त ’ इति तस्य शारीरो दण्डः प्रतिपन्नः।

दशमाङ्के—अथ चाण्डालाभ्यामनुगम्यमानो धृतवध्यचिह्नश्चारुदत्तः शूलमारोपयितुं श्मशानमनीयत। मार्गे च स्थाने स्थाने तस्य पापं चाण्डालैर्डिण्डिमघोषणापूर्वकमुदघोष्यत। तच्छ्रुत्वा शकारस्य चेटः स्थावरकः स्वस्वामिना रहस्यभेदशङ्कया निगडैर्बद्धोऽपि प्रासादादवप्लुत्य रथ्यायामागत्य शकारमेव स्त्रीवधपातकिनमुद्घोषयामास। किं तु न कोऽपि तस्मिन्विशश्वास। एतदन्तरे वसन्तसेना भिक्षुणा समं तत्रैव प्राप्ता यामवलोक्य चारुदत्तस्यानपराधित्वं सुव्यक्तमेवासीत्सर्वेषाम्। अत्रान्तरे शर्विलकोऽपि पालकं हत्वाऽऽर्यकस्य राज्यारोहणं प्रख्यापयंस्तत्रोपस्थितः। आर्यकश्च चारुदत्ताय कुशावत्या राज्यमतिसृष्टवान्वसन्तसेनामपि वधूशब्देनालंचकार। एवं चारुदत्तेनापि कारुणिकेन शकारोऽभयं दत्त्वा मृत्युभयाद्रक्षितः। एवं सर्वं स्वन्तमुपन्यस्य कविरन्ते भरतवाक्येन स्वकृतिं समाप्तिं नीतवान्।

The play is named after a play cart made of clay [illegible] Sena (Act VII) as it forms the turning point of the development of the plot.

अथ

मृच्छकटिकम् ।

प्रथमोऽङ्कः ।

पर्यङ्कग्रन्थिबन्धाद्द्विगुणितभुजगाश्लेषसंवीतजानो-
रन्तःप्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य ।
आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्त्वदृष्ट्या
शंभोर्वः पातु शून्येक्षणघटितलयब्रह्मलग्नः समाधिः ॥ १ ॥

शेमुषीप्रौढजीवातुर्विवृतिर्मृच्छकटिके ।
पृथ्वीधरैश्चिकीर्षद्भिर्गणेशो गण्यते गुरुः ॥

तथा—

बालानां सुखबोधाय गुरूणां वचनं शुभम् ।
लिख्यते गहनेऽप्यत्र हेरम्बावनतिस्थिरः ॥

प्रकरणं चेदम् । तस्य च लक्षणम्—' यत्र कविरात्मबुद्ध्या वस्तु शरीरं च नायकं च । विरचयति समुत्पाद्य तज्ज्ञेयं प्रकरणं नाम ॥ चतस्रो वृत्तयः पञ्च संधयोऽष्टरसादयः । प्रकरणतो नाटकं विहाय नृपनायकम् ॥' (इत्यादि) । आदिशब्दात्षड्सादिग्रहणम् । नाटकादौ बहुप्रकारप्राकृतप्रपञ्चेषु चतस्र एव भाषाः प्रयुज्यन्ते—शौरसेन्यवन्तिकाप्राच्यामागध्यः । अपभ्रंशप्रपञ्चेषु चतस्र एव भाषाः प्रयुज्यन्ते—शकारीचाण्डालीशाबरीढक्कदेशीयाः । मृच्छकटिके तु शबरपात्राभावाच्छाबरी नास्ति । प्राकृते—' मागध्यवन्तिजा प्राच्या शौरसेन्यर्धमागधी । बाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः ॥ ' महाराष्ट्र्यादयः काव्य एव प्रयुज्यन्ते । अपभ्रंशे—'शकाराभीरचाण्डालशबरद्राविडोड्रजाः । हीना वनेचराणां च विभाषाः सप्त कीर्तिताः ॥ ' विविधा भाषाः विभाषाः । हीनपात्रप्रयोज्यत्वाद्धीनाः । वनेचराणां चेति ढक्कभाषासंग्रहः । तत्रास्मिन्प्रकरणे प्राकृतपाठकेषु सूत्रधारो नटी रदनिका मदनिका वसन्तसेना तन्माता चेटी कर्णपूरकश्चारुदत्तब्राह्मणी शोधनकः श्रेष्ठी एते एकादश शौरसेनीभाषापाठकाः । सूत्रधारोऽप्यत्र प्राकृती ' कार्यवशात् ' इति वक्ष्यते । अवन्तिभाषापाठकौ वीरकचन्दनकौ । प्राच्यभाषापाठको विदूषकः । संवाहकः शकारवसन्तसेनाचारुदत्तानां चेटकत्रितयं भिक्षुश्चारुदत्तदारकः एते षण्मागधीपाठकाः । अपभ्रंशपाठकेषु शकारीभाषापाठको राष्ट्रियः । चाण्डालीभाषापाठकौ चाण्डालौ । ढक्कभाषापाठकौ माथुरद्यूतकरौ । तथा—शौरसेन्यवन्तिजा प्राच्या एतासु दन्त्यसकारता । तत्रावन्तिजा रेफवती लोकोक्तिबहुला । प्राच्या स्वार्थिकककारप्राया । मागधी तालव्यशकारवती । शकारीचाण्डाल्योस्तालव्यशकारता । रेफस्य च लकारता ।

अपि च ।

पातु वो नीलकण्ठस्य कण्ठः श्यामाम्बुदोपमः ।
गौरीभुजलता यत्र विद्युल्लेखेव राजते ॥ २ ॥

(नान्द्यन्ते ।)

सूत्रधारः—अलमनेन परिषत्कुतूहलविमर्दकारिणा परिश्रमेण[1]। एवमहमार्यमिश्रान्प्रणिपत्य विज्ञापयामि—यदिदं वयं मृच्छकटिकं नाम प्रकरणं प्रयोक्तुं व्यवसिताः । एतत्कविः किल

वकारप्राया ढक्कविभाषा । संस्कृतप्रायत्वे दन्त्यतालव्यसशकारद्वययुक्ता च । ' अपार्थमक्रमं व्यर्थं पुनरुक्तं हतोपमम् । लोकन्यायाविरुद्धं च शकारवचनं विदुः ॥ ' अपार्थं निरर्थकम् । व्यर्थं विरुद्धार्थम् । यद्वा । निश्चितानन्वयं पदजातं वाक्यजातं चापार्थकम् । व्यर्थं निरर्थकमेव । हतोपमं व्याहतोपमम् । ' शकारप्रायभाषित्वाच्छकारो राष्ट्रियः स्मृतः । एकविद्यो विटश्चान्यो हास्यकृच्च विदूषकः ॥ ' स्वार्थिकः ककारः सर्वत्र । द्विवचनं चतुर्थीविभक्तिश्च नास्त्येव । द्वित्वे तु बहुवचनम् । चतुर्थ्यर्थे षष्ठी । परस्मैपदात्मनेपदाविपर्ययः । पूर्वनिपातानियमश्च । बहुलं छन्दसो निदर्शनमप्रसिद्धच्छन्दोज्ञानार्थम् । पाठविप्लवनिरासार्थं च । [चिकीर्षितस्य प्रकरणस्य निर्विघ्नपरिसमाप्त्यर्थं ' तथाऽप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये । ' इति वचनानुसारेण 'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥' इत्युक्तलक्षणां नान्दीं तावदवतारयति—] **पर्यङ्केत्यादि** । पर्यङ्कः पर्यस्तिका तस्य [ग्रन्थिः रचनं तस्य] बन्धेन द्विगुणितो यो भुजगस्तस्य [आश्लेषेण] संबन्धेन [संवीते] स्थगिते जानुनी यस्य । [अन्तः अन्तःशरीरे यः प्राणानां प्राणापानादिवायूनामवरोधः नियमनं तेन व्युपरतं निवृत्तं सकलं बाह्यविषयज्ञानं येषां तानि तथा रुद्धानि संयतानि इन्द्रियाणि यस्य । तदुक्तं योगसागरे–'करणान्यबहिष्कृत्य स्थाणुवन्निश्चलात्मकः । आत्मानं हृदये ध्यायेन्नासाग्रन्यस्तलोचनः ॥' इति ।] आत्मनि शरीर एव [व्यपगतं स्वव्यापाराद्] उपरतं करणमिन्द्रियं यथा स्यादेवं तत्त्वदृष्ट्याऽनारोपितज्ञानेन [ब्रह्मैवाहमिति निर्विकल्पज्ञानेनेत्यर्थः । आत्मानं पश्यतः साक्षात्कुर्वतः । एतादृशः शंभोः ईशस्य] शून्येक्षणे निराकारालोचने घटितोऽत्यन्तसंबद्धो यो लयस्तत्प्रवणताविशेषस्तेन ब्रह्मणि परमे रूप आसक्तः समाधिर्ध्यानं [शून्यं बाह्यप्रपञ्चासंयुक्तं यदीक्षणं तेन घटितः संपादितः य लयः एकतानताप्रवाहः तेन ब्रह्मणि लग्नः समाधिः चित्तैकाग्रतया चिन्तनं] वो युष्मान्रक्षतु । [स्रग्धरावृत्तम् । तल्लक्षणं–'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।' इति] ॥ १ ॥ **पात्विति** । [नीलकण्ठस्य श्यामश्चासौ अम्बुदश्च श्यामाम्बुदः तेन उपमा यस्य सः कण्ठः वः पातु । यत्र यस्मिन् गौर्याः भुजः लता इव । कण्ठाश्लेषे वेष्टनसाम्यात् । विद्युल्लेखा इव विराजते ॥ २ ॥ **सूत्रधारः**–'वर्तनीयतया सूत्रं प्रथमं येन सूच्यते । रङ्गभूमिं

---

१ परिश्रमेण.

द्विरदेन्द्रगतिश्चकोरनेत्रः परिपूर्णेन्दुमुखः सुविग्रहश्च ।
द्विजमुख्यतमः कविर्बभूव प्रथितः शूद्रक इत्यगाधसत्त्वः ॥३॥

अपि च ।

ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं हस्तिशिक्षां
ज्ञात्वा शर्वप्रसादाद्व्यपगततिमिरे चक्षुषी चोपलभ्य ।
राजानं वीक्ष्य पुत्रं परमसमुदयेनाश्वमेधेन चेष्ट्वा
लब्ध्वा चायुः शताब्दं दशदिनसहितं शूद्रकोऽग्निं प्रविष्टः ४

अपि च ।

समरव्यसनी प्रमादशून्यः ककुदं वेदविदां तपोधनश्च ।
परवारणबाहुयुद्धलुब्धः क्षितिपालः किल शूद्रको बभूव ॥ ५ ॥

समाक्रम्य सूत्रधारः स उच्यते ॥' इति संगीतसर्वस्वे उक्तलक्षणः । विमर्दकारिणा ज्ञानिकरेण । परिश्रमेण अधिकतरनान्दीपठनायासेन ।] आर्यान्मान्यान् मिश्रान-भ्यस्तबहुशास्त्रान् । चारुदत्तपुत्ररोहसेनक्रीडनार्थं षष्ठेऽङ्क उक्तं मृच्छकटमत्रास्ति । 'अत इनिठनौ' इति ठन् । मृदः शकटिकाऽस्मिन्निति वा बहुव्रीहिः । **द्विरदेन्द्रेति** । द्विजमुख्यतमः क्षत्रजातिश्रेष्ठः । 'त्रयो वर्णा द्विजातयः' इति स्मृतेः क्षत्रियेऽपि द्विजप्रयोगः । [द्वौ रदौ येषां ते द्विरदाः तेषु इन्द्र इव द्विरदेन्द्रः तस्य इव गति-र्यस्य । चकोरस्य इव नेत्रे यस्य । शोभनः विग्रहः शरीरं यस्य । अगाधं सत्त्वं बलं यस्य सः । उपमालंकारः । औपच्छन्दसिकं वृत्तम्]॥ ३ ॥ **ऋग्वेदमिति** । वेशोऽत्र कार्त्स्न्येन वेश्यापरः । तत्र भवा विद्यमाना । अध्यात्मादित्वाट्ठक् । यद्वा वेशोऽग्नि-निवेशाख्यो राजा तेन कृताम् । कलां चतुःषष्टिकलाप्रतिपादकं प्रबन्धम् । [यद्वा वेशः नेपथ्यग्रहणं तत्संबन्धिनीं कलां नाट्यशास्त्रमित्यर्थः ।] शर्वो महादेवः । [तस्य प्रसादात् व्यपगतं तिमिरं अज्ञानं यस्मात्तथाविधं ज्ञानस्वरूपं चक्षुः प्राप्य । पुत्रं राजानं वीक्ष्य राज्ये स्थापयित्वेत्यर्थः । परमः श्रेष्ठः समुदयः उत्कर्षः यस्मात् तेन । अश्वस्य मेधः पशुत्वेनोपालम्भनं यत्र सोऽश्वमेधस्तेन इष्ट्वा ।] लब्ध्वा चायुः शताब्दमग्निं प्रविष्ट इति जातकादिगणितद्वारा ज्ञात्वा । आगामिसूत्रधारवचनापेक्षया 'अग्निं प्रविष्टः' इत्या-दिभूतकालप्रत्ययो न विरुद्ध इति मर्मज्ञाः । अग्निप्रवेशोऽपि सर्वस्वारनामके यज्ञ-विशेषे यथा शरभङ्गेण कृतस्तथा बोद्धव्यम् । [स्रग्धरा छन्दः । लक्षणं तूक्तम्] ॥ ४ ॥ **समरेति** । [समरेषु व्यसनं यस्य । महावीर इत्यर्थः । प्रमादेन अनवधान-तया शून्यः । स्वकार्यदक्ष इत्यर्थः । वेदविदां ककुदं श्रेष्ठः । तप एव धनं यस्य स तपोधनः तपोनिष्ठः । परा उत्कृष्टा वारणा गजास्तैः सह बाहुयुद्धे लुब्धः । यद्वा परेषां वारणाः । यद्वा परेषां शत्रूणां वारणौ निवारकौ यौ बाहू ताभ्यां युद्धे लुब्धः ।] ककुदं चिह्नभूतं प्राधान्ये वा । तथा चामरः–' प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम्' इति । वारणो हस्ती । [औपच्छन्दसिकं वृत्तम्] ॥ ५ ॥ **अवन्तीति** । अवन्तिपुर्यु-

१ वैशिखीं.

अस्यां च तत्कृतौ

अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः किल चारुदत्तः ।
गुणानुरक्ता गणिका च यस्य वसन्तशोभेव वसन्तसेना ॥६॥
तयोरिदं सत्सुरतोत्सवाश्रयं नयप्रचारं व्यवहारदुष्टताम् ।
खलस्वभावं भवितव्यतां तथा चकार सर्वं किल शूद्रको नृपः ॥ ७ ॥

(परिक्रम्यावलोक्य च ।) अये शून्येयमस्मत्संगीतशाला । क नु गताः कुशीलवा भविष्यन्ति । (विचिन्त्य ।) आं ज्ञातम् ।

शून्यमपुत्रस्य गृहं चिरशून्यं नास्ति यस्य सन्मित्रम् ।
मूर्खस्य दिशः शून्याः सर्वं शून्यं दरिद्रस्य ॥ ८ ॥

कृतं च संगीतकं[1] मया । अनेन चिरसंगीतो[2]पासनेन ग्रीष्मसमये प्रचण्डदिनकरकिरणोच्छुष्कपुष्करबीजमिव प्रचलिततारके क्षुधा ममाक्षिणी खटखटायेते । तद्यावद्[3]गृहिणीमाहूय पृच्छामि, अस्ति किं[4]मपि प्रातराशो न वेति । एषोऽस्मि भोः कार्यवशात्प्रयोगवशाच्च प्राकृत-

---

ज्जयिनी । 'अस्यां च तत्कृतौ अवन्ति-' इत्यादावस्तिद्वयानुषङ्गः । [अवन्तिपुर्यां द्विजश्चासौ वणिक्कर्मकारित्वात्सार्थवाहश्च द्विजसार्थवाहः । यद्वा सार्थं समूहं वाहयतीति सार्थवाहः । द्विजश्रेष्ठ इत्यर्थः । चारुदत्त आसीत् किल । यस्य च गुणैः दयादाक्षिण्यादिभिः अनुरक्ता वसन्तशोभा मधुलक्ष्मीरिव वसन्तसेना नाम गणिका च आसीत् । उपेन्द्रवज्रा वृत्तम् । 'उपेन्द्रवज्रा जतजास्ततो गौ' इति तल्लक्षणम्] ॥६॥ **तयोरिति** । [तयोः तत्संबद्ध-मित्यर्थः । सत् श्लाघ्यं सुरतमेवोत्सवः स आश्रयः यस्य तम्] नयः नीतिस्तस्य प्रचारो व्यवहारस्तं नयप्रचारम् । [व्यवहारस्य दुष्टता चारुदत्तस्य वसन्तसेनाघातकत्वेन निर्णयदानात् दुष्टतां सदोषतां खलानां शकारादीनां स्वभावं तथा भवितव्यतां च इदं सर्वं अस्यां तत्कृतौ शूद्रको नृपः चकार । वंशस्थविलं वृत्तम् ।] स्वहितं व्यवहारः ॥ ७ ॥ [**शून्यमिति** ।] चिरशून्यमिति कर्मधारयः । चिरं दीर्घः कालो निरवधिः समयः । शून्यमभिमतकार्यरहितम् । सन्मित्रस्य हि ससहायत्वेन कार्यनिष्पत्तेः सदा पूर्ण इव समयोऽवभासते । [आर्या छन्दः] ॥८॥ [प्रचण्डः यो दिनकरः तस्य किरणैः उच्छुष्कं यत्पुष्करबीजं कमलबीजं तद्वत् । खटखट इत्यव्यक्तशब्द इव आचरतः खटखटायते ।] खडित्यव्यक्तानुकरणम् । संगीतकेन चक्षुषी खटखटायेते इत्यसंबद्धप्रलापेन भाविनः शकारासंबद्धभाषणस्य सूचनम् । प्रातराशः कल्यभोजनम् । कार्यवशात्प्रयोगवशाच्चेति । कार्यं बोध्यायाः स्त्रियो झटिति ज्ञानम् । यदुच्यते–' स्त्रीषु ना प्राकृतं वदेत् ' इति । सुकुमारत्वेन सुप्रयोगत्वं प्राकृतस्य । यदुक्तम्— 'पुरिसा सक्कअजप्पा पाउअगुम्फो वि होइ सुउमारो ' (पुरुषाः संस्कृतजल्पाः प्राकृतगुम्फोऽपि

---

१ संगीतक॰. २ संगीतको॰. ३ गृहं गत्वा गृहिणी॰. ४ किंचित्.

Sudraka composed this Drama based upon their happy love & enjoym... and exibited the efficacy of righteous conduct, vallainy of law, the temparament of wicked and mutableness of fate.

भाषां संवृत्तः ।—अविद अविद भोः । चिरसंगीतोपासनेन शुष्कपुष्करनालानीव मे बुभुक्षया म्लानान्यङ्गानि । तद्यावद्गृहं गत्वा जानामि, अस्ति किमपि कुटुम्बिन्योपपादितं न वेति । (परिक्रम्यावलोक्य च ।) इदं तदस्माकं गृहम् । तत्प्रविशामि । (प्रविश्यावलोक्य च ।) आश्चर्यम् । किं नु खल्वस्माकं गृहेऽन्यदिव संविधानकं वर्तते । आयामितण्डुलोदकप्रवाहा रथ्या लोहकटाहपरिवर्तनकृष्णसारा कृतविशेषकेव युवत्यधिकतरं शोभते भूमिः । स्निग्धगन्धेनोद्दीप्यमानेवाधिकं बाधते मां बुभुक्षा । तत्किं पूर्वार्जितं निधानमुत्पन्नं भवेत् । अथ वाऽहमेव बुभुक्षातोऽन्नमयं जीवलोकं पश्यामि । नास्ति किल प्रातराशोऽस्माकं गृहे । प्राणात्ययं बाधते मां बुभुक्षा । इह सर्वं नवमिव संविधानकं वर्तते । एका वर्णकं पिनष्टि अपरा सुमनसो गुम्फति । (विचिन्त्य ।) किं न्विदम् । भवतु । कुटुम्बिनीं शब्दाय्य परमार्थं ज्ञास्यामि । (नेपथ्याभिमुखमवलोक्य ।) आर्ये इतस्तावत् । (क) There is indirect Reference of plot.

(क)आविदं अविद भोः । चिरसंगीदोवासणेण सुक्खपोक्खरणालाइं विअ मे बुभुक्खाए मिलाणाइं अङ्गाइं । ता जाव गेहं गदुअ जाणामि, अत्थि किं पि कुटुम्बिणीए उववादिदं ण वेत्ति । एदं तं अम्हाणं गेहम् । ता पविसामि । हीमाणहे । किं णु क्खु अम्हाणं गेहे अण्णं विअ संविहाणअं वट्टदि । आआमितण्डुलोदअप्पवाहा रच्छा लोहकडाहपरिवत्तणकसणसारा किदविसेसआ विअ जुअदी अहिअदरं सोहदि भूमी । सिणिद्धगन्धेण उद्दीविअन्ती विअ अहिअं बाधेदि मं बुभुक्खा । ता किं पुव्वज्जिदं णिहाणं उववण्णं भवे । आदु अहं जेव बुभुक्खादो अण्णमअं जीअलोअं पेक्खामि । णत्थि किल पादरासो अम्हाणं गेहे । पाणच्चअं बाधेदि मं बुभुक्खा । इध सव्वं णवं विअ संविहाणअं वट्टदि । एक्का वण्णअं पीसेदि अवरा सुमणाओ गुम्फेदि । किंणेदम् । भोदु । कुडुम्बिणिं सद्दाविअ परमत्थं जाणिस्सम् । अज्जे इदो दाव ।

भवति सुकुमारः ।) तथा षष्ठेऽङ्के प्रवहणविपर्यासे वीरकचन्दनकयोः कलहसंभ्रमागतवचनसंवरणार्थं भाषाव्यत्यासाच्चन्दनकस्य पाठः संस्कृतेन । तथा पञ्चमाङ्के दुर्दिने कार्यवशाद्वसन्तसेनायाः श्लोकपाठः संस्कृतेन । चारुदत्तस्य दारिद्र्यवर्णनासूचनयोग्यप्राकृतपरिग्रहः । यदाहुः--' कार्यतश्चोत्तमादीनां कार्यो भाषाव्यतिक्रमः । ' इति । एतत्सर्वमनेन सूचितमिति । अविद अविदेति निर्वेदे । कष्टं कष्टमित्यर्थः । ' अदृष्टा-

---

१ अविद भोः, अविहा भो भोः. २ संगीदकोवास॰. ३ कटाह; परिअत्तण, परिअन्तण (परियन्त्रण). ४ उद्दीवन्ती: ५ उववण्णं (उपपन्नम्). ६ पादरासो बि. ७ पाणाधिभं (टी॰). ८ संविहाणं.

०७६२ ... " The God continues untill all the actors leave the stage.

नटी—(प्रविश्य ।) आर्य इयमस्मि । (क)

सूत्रधारः—आर्ये स्वागतं ते । (ख)

नटी—आज्ञापयत्वार्यः को नियोगोऽनुष्ठीयतामिति । (ग)

सूत्रधारः—आर्ये । ('चिरसंगीदोवासणेण' इत्यादि पठित्वा ।) अस्ति किमप्यस्माकं गेहेऽशितव्यं न वेति । (घ)

नटी—आर्य सर्वमस्ति । (ङ)

सूत्रधारः—किं किमस्ति । (च)

नटी—तद्यथा गुडौदनं घृतं दधि तण्डुला आर्येणात्तव्यं रसायनं सर्वमस्तीति । एवं तव देवा आशासन्ताम् । (छ)

सूत्रधारः—आर्ये किमस्माकं गेहे सर्वमस्ति । अथ वा परिहससि । (ज)

(क) अज्जे इअं म्हि । (ख) अज्जे साअदं दे ।
(ग) आणवेदु अज्जो को णिओओ अणुचिट्ठीअदु त्ति ।
(घ) अज्जे अत्थि किं पि अम्हाणं गेहे असिदव्वं ण वेत्ति ।
(ङ) अज्ज सव्वं अत्थि । (च) किं किं अत्थि ।
(छ) तं जधा गुडोदणं घिअं दहीं तण्डुलाइं अज्जेण अत्तव्वं रसाअणं सव्वं अत्थि त्ति । एव्वं दे देवा आसासेन्तु ।
(ज) अज्जे किं अम्हाणं गेहे सव्वं अत्थि । आदु परिहससि ।

श्रुतसंप्राप्तावविदाविदभोःपदम्' इति च प्राञ्चः । ह्रीमाणहे विस्मये । [संविधीयते सम्यग् निष्पाद्यते इति संविधानं भोज्यवस्तुनिर्माणसंरम्भः ।] आयामी दीर्घस्तण्डुलप्रक्षालनजलप्रवाहो यत्र तादृशी रथ्या । लोहस्य कटाहो भाजनविशेषस्तत्परिवर्तनेन [इतस्ततश्चालनात् घर्षणेन] मार्जनेन कृष्णसारा [कृतः विशेषको यथा सा कृतविशेषका] कृततिलका युवतिवद्भूमिरधिकं शोभते । कृष्णसारा भूमिरित्यनेन चतुर्थाङ्के भवनकोष्ठकस्य विशेषसूचनम् । तत्किं पूर्वार्जितं निधानं बहुसंख्यं धनमुत्पन्नं भवेत् । आदु अथ वेत्यर्थः । पाठान्तरे ओदनमयम् । [प्राणात्ययं प्राणानामत्ययो नाशो यथा स्यात्तथा । क्रियाविशेषणम् ।] प्राणाधिकं प्राणेष्वधिकं यथा स्यादेवम् । एका वर्णकं कस्तूर्यादिकं समालम्भनं पिनष्टि । अपरा सुमनसः पुष्पाणि ग्रथ्नाति । इत्यनेनापि कोष्ठकस्यैव सूचनम् । असिदव्वं अन्नरूपं द्रव्यम् । अत्तव्वं रसाअणमिति प्रायेणात्तव्यं रसायनमस्तीति । [रसानामयनमाश्रयभूतं सरसमन्नजातमित्यर्थः ।] एवं तव देवा आशासन्तामिति संदिग्धवाक्योपन्यासः । आर्य

---

१ पटति, पूर्वोक्तं पठित्वा. २ अज्जउत्त. ३ अज्जउत्तो. ४ अज्जउत्त. ५ पिअं (प्रियं). ६ अज्जउत्तेण. ७ आसासेन्तु.

नटी—(स्वगतम् ।) परिहसिष्यामि तावत् । (प्रकाशम् ।) आर्य अस्त्यापणे । (क)

सूत्रधारः—(सक्रोधम् ।) आः अनार्ये एवं तवाशा छेत्स्यते । अभावं च गमिष्यासि । यदिदानीमहं वरण्डलम्बुक इव दूरमुत्क्षिप्य पातितः । (ख)

नटी—मर्षतु मर्षत्वार्यः । परिहासः खलु मया कृतः । (ग)

सूत्रधारः—तत्किं पुनरिदं नवमिव संविधानकं वर्तते । एका वर्णकं पिनष्टि अपरा सुमनसो गुम्फति इयं च पञ्चवर्णकुसुमोपहार-शोभिता भूमिः । (घ)

नटी—अद्योपवासो गृहीतः । (ङ)

सूत्रधारः—किंनामधेयोऽयमुपवासः । (च)

नटी—अभिरूपपतिर्नाम । (छ)

सूत्रधारः—आर्ये इहलौकिकोऽथ वा पारलौकिकः । (ज)

नटी—आर्य पारलौकिकः ।(झ)

(क) परिहसिस्सं दाव । अज्ज[1] अत्थि आवणे ।

(ख) आः अणज्जे एव्वं दे आसा छिज्जिस्सदि । अभावं अ गमिस्ससि । जं दाणिं अहं वरण्डलम्बुओ[2] विअ दूरं उक्खिविअ पाडिदो ।

(ग) मरिसेदु मरिसेदु अज्जो[3] । परिहासो क्खु[4] मए कदो ।

(घ) ता किं उण इदं णवं विअ संविहाणअं वट्टदि । एक्का वण्णअ पीसेदि अवरा[5] सुमणाओ गुम्फेदि इअं अ पञ्चवण्णकुसुमोवहारसोहिदा भूमी ।

(ङ) अज्ज उववासो गहिदो ।

(च) किंणामधेओ अअं उववासो । (छ) अहिरूअवदी णाम ।

(ज) अज्जे इहलोइओ आदु पारलोइओ । (झ) अज्ज[6] पारलोइओ ।

अस्त्यापणे वणिग्वीथ्याम् । एवं तवाशा छेत्स्यति । अभावं च गमिष्यसीत्यनेन वसन्तसेनायाः प्रवहणात्रिपर्यासमोटनयोः सूचनम् । वरण्डो दीर्घकाष्ठं तस्य लम्बुकस्तत्प्रान्तनिबद्धो मृत्तिकास्थूणः । स हि द्रोण्यां पानीयोद्धारे दूरमुत्थाप्यावः पात्यते । केचिदाहुः—वरण्ड इष्टकागृह उन्नतीभूतो दीर्घो भित्तिप्रदेशस्तत्र लम्बुकोऽवयवभूत इष्टकासंघः । सोऽपि हि संयोजनार्थं दूरमुत्थाप्यते । अनन्तरं निपतत्यपीति । उपवासः । उपवासरूपं व्रतमित्यर्थः । अधिकरणघञन्तोऽयम् ।

---

१ अज्जउत्त. २ घरण्डु. ३ अज्जउत्तो. ४ क्खु एसो. ५ अण्णा कुसुमाइं. ६ अज्जउत्त.

सूत्रधारः—(सरोषम् ।) प्रेक्षन्तां प्रेक्षन्तामार्यमिश्राः । मदीयेन भक्तपरिव्ययेन पारलौकिको भर्ताऽन्विष्यते । (क)

नटी—आर्य प्रसीद प्रसीद । त्वमेव जन्मान्तरे भविष्यसीति । (ख)

सूत्रधारः—अयमुपवासः केन तवोपदिष्टः । (ग)

नटी—आर्यस्यैव प्रियवयस्येन चूर्णवृद्धेन । (घ)

सूत्रधारः—(सकोपम् ।) आः दास्याःपुत्र चूर्णवृद्ध कदा नु खलु त्वां कुपितेन राज्ञा पालकेन नववधूकेशकलापमिव सुगन्धं छेद्यमानं प्रेक्षिष्ये । (ङ)

नटी—प्रसीदत्वार्यः । नन्वार्यस्यैव पारलौकिकोऽयमुपवासोऽनुष्ठीयते । (च) (इति पादयोः पतति ।)

सूत्रधारः—आर्ये उत्तिष्ठ उत्तिष्ठ । कथय कथयात्रोपवासे केन कार्यम् । (छ)

(क) पेक्खन्तु पेक्खन्तु अज्जमिस्सा । ममकेरकेण[1] भत्तपरिव्वएण[2] पारलोइओ भत्ता अण्णेसीअदि ।

(ख) अज्जे[3] पसीद पसीद । तुमं ज्जेव जम्मन्तरे भविस्ससि त्ति ।

(ग) अअं उववासो केण दे उवदिट्ठो ।

(घ) अज्जस्स[4] ज्जेव पिअवअस्सेन चुण्णवुड्ढेण[5] ।

(ङ) आः दासीएपुत्ता[6] चुण्णवुड्ढा कदा णु क्खु[7] तुमं कुविदेण रण्णा पालएण णववहूकेसकलावं[8] विअ सुअन्धं कप्पिज्जन्तं पेक्खिस्सम् ।

(च) पसीददु[10] अज्जो[11] । णं अज्जस्स ज्जेव पारलोइओ अअं उववासो अणुचिट्ठीअदि ।

(छ) अज्जे उट्ठेहि उट्ठेहि । कधेहि कधेहि एत्थ उववासे[12] केण[13] कज्जम् ।

पारलौकिक इत्यनेन पालकव्युदासेन नायकान्तरलाभसूचनम् । ममकेरकेण मदीयेन । भत्तपरिव्वएण भक्तपरिव्ययेन । ओदनव्ययेनेत्यर्थः । यद्वा । भर्तृपरित्यागेन । पारलौकिको भर्ताऽन्विष्यते । त्वमेव जन्मान्तरे भविष्यसीति । आः आक्षेपे । छयं आदुल्या आकारान्तादेशे कृते चूर्णवृद्धा इति । एवं च ' दूआ तीआ ' इत्यादौ च बोद्धव्यम् । कप्पिन्तं छेद्यमानम् । वधूपक्षे कल्प्यमानं संसज्यमानम् । नववधूकेशहस्तमिव वासितं सुगन्धम् । ' वज्जन्तम् ' इति पाठे वध्यमानम् । अनेन संहाराङ्के

---

१ मइएण, ममकेरेण. २ परिअएण. ३ अज्जउत्त. ४ अज्जउत्तस्स. ५ जूण्ण० इति सर्वत्र. ६ उत्ता. ७ हू. ८ ०एण बन्धिज्जन्तं (बध्यमानं) सुअन्धं पेक्खि०. ९ हत्पं. १० पसीदु पसी०. ११ अज्जउत्तो. १२ उपवासए. १३ केण केण.

नटी—अस्मादृशजनयोग्येन ब्राह्मणेनोपनिमन्त्रितेन । (क)

सूत्रधारः—तेन हि गच्छत्वार्या । अहमप्यस्मादृशजनयोग्यं ब्राह्मणमुपनिमन्त्रयामि । (ख)

नटी—यदार्य आज्ञापयति । (इति निष्क्रान्ता ।) (ग)

सूत्रधारः—(परिक्रम्य ।) आश्चर्यम् । तस्मात्कथं मयैवं सुसमृद्धायामुज्जयिन्यामस्मादृशजनयोग्यो ब्राह्मणोऽन्वेष्टव्यः । (विलोक्य ।) एष चारुदत्तस्य मित्रं मैत्रेय इत एवागच्छति । भवतु । प्रक्ष्यामि तावत् । आर्य [अद्य] मैत्रेय अस्माकं गृहेऽशितुमग्रणीर्भवत्वार्यः । (घ)

(नेपथ्ये ।)

भो अन्यं ब्राह्मणमुपनिमन्त्रयतु भवान् । व्यापृत इदानीमहम् । (ङ)

सूत्रधारः—आर्य संपन्नं भोजनं निःसपत्नं च । अपि च दक्षिणा काऽपि ते भविष्यति । (च)

(क) अम्हारिसजणजोग्गेण बम्हणेण उवणिमन्तिदेण ।

(ख) तेण हि गच्छदु अज्जा । अहं पि अम्हारिसजणजोग्गं बम्हणं उवणिमन्तेमि

(ग) जं अज्जो आणवेदि ।

(घ) हीमाणहे । ता कधं मए एव्वं सुसमिद्धाए उज्जइणीए अम्हारिसजणजोग्गो बम्हणो अण्णेसिदव्वो । एसो चारुदत्तस्स मित्तं मित्तेओ इदो जेव्व आअच्छदि । भोदु । पुच्छिस्सं दाव । अज्ज मित्तेअ अम्हाणं गेहे असिदुं अग्गणी भोदु अज्जो ।

(ङ) भो अण्णं बम्हणं उवणिमन्तेदु भवं । वावुडो दाणिं अहं ।

(च) अज्ज संपण्णं भोअणं णीसवत्तं अ । अवि अ दक्खिणा का वि दे भविस्सदि ।

चारुदत्तनिग्रहसूचनम् । अम्हारिसजणजोग्गेण अस्मत्सदृशेन ब्राह्मणेन । अहमप्युपनिमन्त्रयामि । ईदृश्यामुज्जयिन्यां समृद्धायाम् । कोऽर्थः । यदा दुःस्थिता भवन्ति ब्राह्मणास्तदा चारणादीनामपि गृहे कुर्वन्ति भोजनम् । भवतु इममुपनिमन्त्रयिष्ये । अद्य मैत्रेय अस्माकं गृहे भोक्तुम् । अग्रणीः । प्रष्ठोऽग्रगामीति यावत् ' अदिधी भोदु ' इत्यपि पाठः । तत्रातिथिः भवत्वित्यर्थः । वावडो व्यापृतः । अहमिदानीं कार्यान्तरव्यासक्तः । दाणिं इदानीम् । संपन्नं मृष्टम् । णीसवतं च । पितॄणां समुत्सृष्टं घृतादिसहिततण्डुलपूर्णपात्रम् । ' निःस्राव ' इति यस्य प्रसिद्धिः । ' णीसवत्तं निःसपत्नम् । विपक्षस्यापरस्याभावात् ' इति केचित् । अपि च दक्षिणाऽपि ते भविष्यति । एकोऽपिः संभावनायाम्, अपरः समुच्चये । मं माम् । पदे पदे

---

१ अदो (अतः), ता. २ अज्जउत्तो. ३ ईरिसाए (ईदृश्यां). ४ एणं दाव उवणिमन्तिस्सं (इमं तावदुपनिमन्त्रयिष्ये). ५ अदिधी (आतिथिः). ६ भवं. ७ ओअणं. ८ णीसवणं (निःश्रावकं).

(पुनर्नेपथ्ये ।)

भो यदिदानीं प्रथममेव प्रत्यादिष्टोऽसि तत्क इदानीं ते निर्बन्धः पदे पदे मामनुबन्द्धुम् । (क)

सूत्रधारः—प्रत्यादिष्टोऽस्म्येतेन । भवतु । अन्यं ब्राह्मणमुपनिमन्त्रयामि । (ख) (इति निष्क्रान्तः ।)

प्रस्तावना or **इत्यामुखम्** । prelude or prologue : See note page II of Introduction

---

(प्रविश्य प्रावारहस्तः ।) cloak.

मैत्रेयः—(' अण्णं बम्हणं ' इति पूर्वोक्तं पठित्वा ।) अथ वा मयाऽपि मैत्रेयेण परस्यामन्त्रणकानि प्रेक्षितव्यानि । हा अवस्थे तुलयासि । यो नामाहं तत्रभवतश्चारुदत्तस्य ऋद्ध्याऽहोरात्रं प्रयत्नसिद्धैरुद्गारसुरभिगन्धिभिर्मोदकैरेवाशितोऽभ्यन्तरचतुःशालकद्वार उपविष्टो मल्लकशतपरिवृतश्चित्रकर इवाङ्गुलीभिः स्पृष्ट्वा स्पृष्ट्वाऽपनयामि नगरचत्वरवृषभ इव रोमन्थायमानस्तिष्ठामि स इदानीमहं तस्य दरिद्रतया यत्र तत्र चरित्वा गृहपारावत इवावासनिमित्तमत्रागच्छामि । एष चार्यचारुदत्तस्य प्रियवयस्येन चूर्णवृद्धेन जातीकुसुमवासितः प्रावारकोऽनुप्रेषितः सिद्धी-

---

(क) भो जं[1] दाणिं पढमं ज्जेव पच्चादिट्ठोसि ता को दाणिं दे णिब्बन्धो पदे पदे मं अनुबन्धेदुम् ।

(ख) पच्चादिट्ठोम्हि एदिणा । भोदु । अण्णं बम्हणं उवणिमन्तेमि ।

अणुबन्धेदुं अनुरोद्धुम् । प्रस्तावनेत्यामुखसंधिपर्यायः । यदुक्तम्—' सूत्रधारेण सहिताः संलापं यत्र कुर्वते । नटी विदूषको वाऽपि पारिपार्श्वक एव वा ॥ आमुखं नाम तस्यैव सैव प्रस्तावना मता ॥ ' प्रावारः उत्तरीयं हस्ते यस्य । आमन्तणआइं आमन्त्रणकानि । पच्छिदव्वाइं समीहितव्यानि । [उद्गारेषु सुरभिः गन्धो येषां तैः] मोदकैरेवाशितस्तृप्तः । मल्लकशतपरिवृतः । मल्लकः पात्रविशेषः पत्रपुटो वा । 'दोना' इति प्रसिद्धो विदूषकपक्षे । चित्रकरपक्षे वर्णिकापात्रं मल्लकः । अभ्यन्तरचतुःशालकद्वारे उपविष्टः । चित्रकर इव छिविअ छिविअ स्पृष्ट्वा स्पृष्ट्वाऽङ्गुल्यग्रैरपनयामि न भक्षयामि । अत्यन्तं तृप्तत्वादित्यर्थः । चित्रकरोऽप्यङ्गुलीसंस्थितलेखनिकया वर्णिकाभाण्डं स्पृष्ट्वा स्पृष्ट्वाऽपनयति विक्षिपति । अन्यथा वर्णिकाबिन्दुपातः स्यादिति । नवबद्धवृषभ इव रोमन्थायमानस्तिष्ठामि । ' आपणे नगरचत्वरवृषभ इव ' इति पाठान्तरेऽपि व्याख्या । यत्र कुत्रापि चरित्वा गृहपारावत इवावासनिमित्तं शयनार्थं-

---

१ जधा. २ अणुसंधिदुं (अनुसंधातुं).

Vidushaka, lover of sweetmeats and burly in appearance is often comp. to such bull.

कृतदेवकार्यस्यार्यचारुदत्तस्योपनेतव्य इति । तद्यावदार्यचारुदत्तं पश्यामि । (परिक्रम्यावलोक्य च ।) एष आर्यचारुदत्तः सिद्धीकृतदेवकार्यो गृहदेवतानां बलिं हरन्नित एवागच्छति । (क)

(ततः प्रविशति यथानिर्दिष्टश्चारुदत्तो रदनिका च ।)

चारुदत्तः—(ऊर्ध्वमवलोक्य सनिर्वेदं निःश्वस्य ।) Sighingly He is a rigid performer religious duties.

यासां बलिः सपदि मद्गृहदेहलीनां
हंसैश्च सारसगणैश्च विलुप्तपूर्वः ।
तास्वेव संप्रति विरूढतृणाङ्कुरासु having no servants to look af
बीजाञ्जलिः पतति कीटमुखावलीढः ॥ ९ ॥

(इति मन्दं मन्दं परिक्रम्योपविशति ।) walks slowly and sits.

विदूषकः—एष आर्यचारुदत्तः । तद्यावत्सांप्रतमुपसर्पामि । (उपसृत्य ।) स्वस्ति भवते । वर्धतां भवान् । (ख)

(क) अध वा मए वि मित्तेएण परस्स आमन्तणआइं पाच्छिदव्वाइं[1] । हा अवत्थे तुलीअसि । जो णाम[2] अहं तत्तभवदो चारुदत्तस्य रिद्धीए अहोरत्तं पअतणसिद्धेहिं उग्गारसुरहिगन्धेहिं मोदकेहिं ज्जेव असिदो अब्भन्तरचदुस्सालअदुआए[3] उवविट्ठो मल्लकसद[4]परिवुदो चित्तअरो विअ अङ्गुलीहिं[5] छिविअ छिविअ अवणेमि णअरच्चत्तरवुसहो विअ रोमन्थाअमाणो चिट्ठामि सो दाणिं अहं तस्स दलिद्ददाए जहिं[6] तहिं चरिअ गेहपारावदो विअ आवासणिमित्तं इध आअच्छामि । एसो अ अज्जचारुदत्तस्य पिअवअस्सेण चुण्णवुट्ठुण[7] जादीकुसुमवासिदो पावीरओ[8] अणुप्पेसिदो सिद्धीकिददेवकज्जस्स अज्जचारुदत्तस्स उवणेदव्वो त्ति। ता जाव अज्जचारुदत्तं पेक्खामि । एसो अज्जचारुदत्तो सिद्धीकिददेवकज्जो गिहदेवदाणं बलिं हरेन्तो[9] इदो ज्जेव आअच्छदि ।

(ख) एसो अज्जचारुदत्तो । ता जाव संपदं उवसप्पामि[10] । सोत्थि भवदे । वड्ढदु भवं ।

मत्रागच्छामि । सिद्धीकिददेवकज्जस्स निष्पादितदेवकार्यस्य [देवकार्यं देवतार्चनम्]। पाठान्तरे तु—षष्ठीव्रतकृतदेवकार्यस्येत्यर्थः । बलिं पूजाम् । **यासामिति** । [यासां मम गृहं मद्गृहं तस्य देहल्यः तासां उदुम्बर 'उमरठा' इति ख्यातानाम् । तत्र दत्त इत्यर्थः । बलिः हंसैश्च सारससमूहैश्च । पूर्वं विलुप्तः विलुप्तपूर्वः । तासु एव संप्रति दारिद्र्यात्किंकराभावान्मृजाविरहात् विरूढतृणाङ्कुरासु] विरूढा उपचितास्तृणाङ्कुरा यासु । कीटमुखास्वादितो बीजाञ्जलिः पतति । [वसन्ततिलका वृत्तम् । 'उक्ता वसन्ततिलका तभजा जगौ गः' इति तल्लक्षणम्] ॥ ९ ॥

---

१ भाक्खिदव्वाइं (भक्षितव्यानि). २ दाणिं. ३ चतुःसाल. ४ गल्लक; उणो उणो चेडजणादिण्णं सव्वोवक्करजुत्तं णिज्जिदसुवण्णवण्णाणेअपत्तघाडिदं तम्बोलं चव्विज्जन्तो (पुनः पुनश्चेटजनदत्तं सर्वोपस्करयुक्तं निर्जितसुवर्णवर्णानेकपत्रघाटितं ताम्बूलं चर्वयन्). ५ अग्गङ्गुलीहिं. ६ तहिं तहिं. ७ जूण्ण०. ८ पावरओ. ९ करेन्तो (कुर्वन्). १० पविसामि.

चारुदत्तः—अये सर्वकालमित्रं मैत्रेयः प्राप्तः । सखे स्वागतम् । आस्यताम् ।

विदूषकः—यद्भवानाज्ञापयति । (उपविश्य ।) भो वयस्य एष ते प्रियवयस्येन चूर्णवृद्धेन जातीकुसुमवासितः प्रावारकोऽनुप्रेषितः सिद्धीकृतदेवकार्यस्यार्यचारुदत्तस्य त्वयोपनेतव्य इति । (क) (समर्पयति ।)

चारुदत्तः—(गृहीत्वा सचिन्तः स्थितः ।)

विदूषकः—भोः किमिदं चिन्त्यते । (ख)

चारुदत्तः—वयस्य ।

सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति १०

विदूषकः—भो वयस्य मरणाद्दारिद्र्याद्वा कतरत्ते रोचते । (ग)

चारुदत्तः—वयस्य ।

दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम् ।
अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम् ॥ ११ ॥

विदूषकः—भो वयस्य अलं संतप्तेन । प्रणयिजनसंक्रामितविभवस्य सुरजनपीतशेषस्य प्रतिपच्चन्द्रस्येव परिक्षयोऽपि तेऽधिकतरं रमणीयः । (घ)

(क) जं भवं आणवेदि । भो वअस्स एसो दे पिअवअस्सेण चुण्णवुड्ढेण जादीकुसुमवासिदो पावारओ अणुप्पेसिदो सिद्धीकिददेवकज्जस्स अज्जचारुदत्तस्स तुए उवणेदव्वो त्ति । (ख) भो किं इदं चिन्तीअदि ।

(ग) भो वअस्स मरणादो दालिद्दादो वा कदरं दे रोअदि ।

(घ) भो वअस्स अलं संतप्पिदेण । पणइजणसंकामिदविहवस्स सुरजणपीदसेसस्स पडिवच्चन्दस्स विअ परिक्खओ वि दे अहिअदरं रमणीओ ।

सुखमित्यादि । दुःखान्यनुभूय सुखं शोभते । न तु सुखमनुभूय दुःखमिति तात्पर्यम् । [घनान्धकारेषु निबिड तमसि । सुखात्सौख्यमनुभूय । 'ल्यब्लोपे कर्मण्यधिकरणे च' इति पञ्चमी ।] स मृत एव जीवति । शरीरेण धृतः शरीरेण वेष्टितः । चर्मभस्त्रावदित्यर्थः । [उपमालंकारः । वंशस्थविलं वृत्तम्] ॥१०॥ **दारिद्र्यादिति** । अल्पसमयदुःखदत्वान्मरणमल्पक्लेशम् । बहुसमयव्यापित्वादाकाङ्क्षितापगमाद्दारिद्र्यमनन्तकं दुःखम् ॥ ११ ॥ अलं संतप्तेन । यद्यसद्व्ययेनार्थाः स्वदोषेण नाश्यन्ते तदा संतापः क्रियते । तव तु न तथेति भावः । प्रणयी जनः स्निग्धबान्धवोऽर्थी च । प्रणयिजने संक्रामितः अर्थः येन

---

१ सार्वकाल. २ मृतः शरीरेण धृतः. ३ अज्जस्स. ४ संतावितेण.

चारुदत्तः—वयस्य । न ममार्थान्प्रति दैन्यम् । पश्य ।

एतत्तु मां दहति यद्गृहमस्मदीयं
क्षीणार्थमित्यतिथयः परिवर्जयन्ति ।
संशुष्कसान्द्रमदलेखमिव भ्रमन्तः
कालात्यये मधुकराः करिणः कपोलम् ॥ १२ ॥

विदूषकः—भो वयस्य एते खलु दास्याःपुत्रा अर्थकल्यवर्ता वरटाभीता इव गोपालदारका अरण्ये यत्र यत्र न खाद्यन्ते तत्र तत्र गच्छन्ति । (क)

चारुदत्तः—वयस्य ।

सत्यं न मे विभवनाशकृताऽस्ति चिन्ता
भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।
एतत्तु मां दहति नष्टधनाश्रयस्य
यत्सौहृदादपि जनाः शिथिलीभवन्ति ॥ १३ ॥

अपि च ।

दारिद्र्याद्ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो
निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते ।
निर्विण्णः शुचमेति शोकविहतो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥ १४ ॥

(क) भो वअस्स एदे क्खु दासीएपुत्ता अत्थकल्लवत्ता वरडाभीदा विअ गोवालदारआ अरण्णे जहिं जहिं ण खज्जन्ति तहिं तहिं गच्छन्ति ।

तस्य तव । एतदिति । क्षीणार्थमिति कृत्वाऽस्मद्गृहमतिथयः संत्यजन्ति इति यद् एतन्मां दहति । कालात्यये मदसमयापगमे धनलाभसमयापगमे च [संशुष्का शोषं प्राप्ता सान्द्रा मदलेखा यस्य तं करिणः कपोलं भ्रमन्तः मधुकरा इव । उपमालंकारः । वसन्ततिलका वृत्तम्] ॥१२॥ दासीपुत्रा अर्थरूपप्रातराशाः । वरटा 'वीरणी' इति ख्याता । ततस्त्रस्ताः । अरण्ये गोपालपुत्रका इव यत्र यत्र न खाद्यन्त उपभुज्यन्ते तत्र तत्र यान्ति । सत्यमिति । विभवनाशकृता मम चिन्ता नास्ति । कथमित्यत आह—भाग्यक्रमेण लब्धव्ययक्रमेण धनानि भवन्ति । तर्हि चिन्ता कुत इत्यत आह—एतत्तु मां दहति यन्नष्टधनाश्रयस्य मम सौहृदादपि मैत्रीतोऽपि जनाः शिथिलीभवन्ति । अर्थशून्येन समं प्रयोजनाभावान्मैत्रीमपि न केऽपि कुर्वते । [काव्यलिङ्गमलंकारः । वसन्ततिलका वृत्तम्] ॥१३॥ दारिद्र्यादिति । [नरः दारिद्र्यात्] लज्जां गच्छति । आकाङ्क्षितासामर्थ्यात् । यदा लज्जां गतः [लज्जापहृत इत्यर्थः] तदा तेजसः प्रभ्रष्टो भवति यावत्तावत्कारणात् । तेजःशून्यः परिभूयते भयाभावात् । परिभवान्निर्वेदं गच्छति मानम्लानेः । ततः शुचमेति वृथा जीवनमिति । ततस्त्यज्यते बुद्ध्या । निर्बुद्धिः क्षयं गच्छति । तदुक्तम्—'बुद्धिनाशात्प्रणश्यति' इति । अत एव सर्वासा-

१ तत्परि०. २ पिहितः. ३ परिभ्रश्यते.

विदूषकः—भो वयस्य तमेवार्थकल्यवर्तं स्मृत्वाऽलं संतापितेन। (क)

चारुदत्तः—वयस्य दारिद्र्यं हि पुरुषस्य

निवासश्चिन्तायाः, परपरिभवो, वैरमपरं,
जुगुप्सा मित्राणां, स्वजनजनविद्वेषकरणम्।
वनं गन्तुं बुद्धिर्भवति, च कलत्रात्परिभवो,
हृदिस्थः शोकाग्निर्न च दहति संतापयति च॥ १५॥

तद्वयस्य कृतो मया गृहदेवताभ्यो बलिः। गच्छ त्वमपि चतुष्पथे मातृभ्यो बलिमुपहर।

विदूषकः—न गमिष्यामि। (ख)

चारुदत्तः—किमर्थम्।

विदूषकः—यत एवं पूज्यमाना अपि देवता न ते प्रसीदन्ति तत्को गुणो देवेष्वर्चितेषु। (ग)

चारुदत्तः—वयस्य मा मैवम्। गृहस्थस्य नित्योऽयं विधिः।

तपसा मनसा वाग्भिः पूजिता बलिकर्मभिः।
तुष्यन्ति शमिनां नित्यं देवताः किं विचारितैः॥ १६॥

(क) भो वअस्स तं जेव अत्थकल्लवत्तअं सुमरिअ अलं संतप्पिदेण। (ख) ण गमिस्सं। (ग) जदो एव्वं पूइज्जन्ता वि देवदा ण दे पसीदन्ति ता को गुणो देवेसु अच्चिदेसु।

मापदां स्थानमित्युपसंहरति। [कारणमालालंकारः। 'यथोत्तरं चेत्पूर्वस्य पूर्वस्यार्थस्य हेतुता। तदा कारणमाला स्यात्' इति तल्लक्षणम्। शार्दूलविक्रीडितं वृत्तम्]॥१४॥ कल्यवर्तं प्रातराशः। एतद्रूपत्वे चार्थस्य तावद्रूपद्रव्यत्वाज्जनान्तरानवगाहितत्वाच्च तद्विस्मृत्य धर्मचित्ताः साधवो भवन्तीत्याशयः। **निवास इति**। चिन्ताया निवासः कथं मम निर्वाहः स्यादित्येवंरूपायाः। परस्य परिभव इति षष्ठीसमासः। कर्मधारयो वा। एतच्चाविश्वसनीयतया निर्धनानां ज्ञेयम्। जुगुप्सा मित्राणामिति। प्रत्युपकारासमर्थत्वात्। स्वजनानां बन्धूनाम्। जनानामन्येषामुदासीनानाम्। विद्वेषस्य करणं कृतिः [साधनं वा]। कर्तरि करणे वा ल्युट्। भवति चेति चकारो हेतौ। वनगमने कलत्रपरिभवो हेतुः। [मालारूपकम्। शिखरिणी वृत्तम्। 'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी' इति लक्षणम्]॥ १५॥ न [प्रसीदन्ति] फलं दर्शयन्ति। नित्योऽयं विधिः। अकरणे प्रत्यवायात्। **तपसेति**। [तपसा व्रताद्याचरणेन। बलिकर्मभिश्च पूजिताः देवताः शमिनां शमवतां फलाप्राप्तौ अकुप्यतामित्यर्थः। नित्यं तुष्यन्ति। विचारितैः वितर्कैः किम्। न कोऽपि लाभ इत्यर्थः।] तुष्यन्ति परलोकमुत्कृष्टं प्रयच्छन्ति। यतः श्राद्धकृदतिथिप्रियो गृहस्थोऽपि मुच्यत इति भावः॥ १६॥

---

१ वाऽपि. २ सुमरिअ सुमरिअ. ३ पसादं देन्ति.

Vita ;-(Sensualist) in a drama is the companion of a prince, dissipated young man or of a courtesan. He is expert in singing, music and poetry, a parasite, much esteemed in company.

तद्गच्छ । मातृभ्यो बलिमुपहर ।

विदूषकः—भोः न गमिष्यामि । अन्यः कोऽपि प्रयुज्यताम् । मम पुनर्ब्राह्मणस्य सर्वमेव विपरीतं परिणमति । आदर्शगतेव छाया वामतो दक्षिणा दक्षिणतो वामा । अन्यच्चैतस्यां प्रदोषवेलायामिह राजमार्गे गणिका विटाश्चेटा राजवल्लभाश्च पुरुषाः संचरन्ति । तस्मान्मण्डूकलुब्धस्य कालसर्पस्य मूषिक इवाभिमुखापतितो वध्य इदानीं भविष्यामि । त्वमिहोपविष्टः किं करिष्यसि । (क)

1st watch of the night

चारुदत्तः—भवतु । तिष्ठ तावत् । अहं समाधिं निर्वर्तयामि ।

(नेपथ्ये ।)

तिष्ठ वसन्तसेने तिष्ठ । शृंगारस्य सहाया विटचेटविदूषकाद्याः स्युः ।

(ततः प्रविशति विटशकारचेटैरनुगम्यमाना वसन्तसेना ।)

विटः—वसन्तसेने तिष्ठ तिष्ठ । They are pleasure companions Sakara.

किं त्वं भयेन परिवर्तितसौकुमार्या
नृत्यप्रयोगविशदौ चरणौ क्षिपन्ती ।
उद्विग्नचञ्चलकटाक्षविसृष्टदृष्टि-
र्व्याधानुसारचकिता हरिणीव यासि ॥ १७ ॥

(क) भो ण गमिस्सं । अण्णो को वि पउञ्जीअदु । मम उण बम्हणस्स सव्वं ज्जेव विपरीदं परिणमदि । आदंसगदा विअ छाआ वामादो दक्खिणा दक्खिणादो वामा । अण्णं अ एदाए पदोसवेलाए इध रामअग्गे गणिआ विडा चेडा राअवल्लहा अ पुरिसा संचरन्ति । ता मण्डूअलुद्धस्स कालसप्पस्स मूसिओ विअ अहिमुहावदिदो वज्झो दाणिं भविस्सं । तुमं इध उवविट्ठो किं करिस्ससि ।

विपरीतमुपनमति [अनिष्टं पर्यवस्यतीत्यर्थः ।] आदर्शगता छायेव । आदर्शस्थप्रतिबिम्बे वामो भागो दक्षिणे दृश्यते दक्षिणश्च वाम इति वस्तुगतिः । संचरन्ति । एतेन विटादीनां प्रवेशं सूचयति । 'नासूचितस्य प्रवेशः' इति । **किं त्वमिति** । [परिवर्तितं त्वरितगमनार्थमन्यथाकृतं परित्यक्तमिति यावत् सौकुमार्यं यया । नृत्यप्रयोगेण] विशदौ संचरणलाघवगुणान्वितौ । पटू इति यावत् । उद्विग्नचञ्चलकटाक्षरूपेण [यद्वा उद्विग्ना व्याकुला चञ्चलाश्च कटाक्षा अपाङ्गदर्शनानि यस्मिन्कर्मणि तथा] विसृष्टा दृष्टिर्यया सा तथा । अनुसारोऽनुगमनम् । व्याधेन यदनुगमनं तेन त्रस्ता मृगीव [किं किमर्थं यासि । उपमा । वसन्ततिलका वृत्तम्] ॥ १७ ॥ शकारभाषायां चवर्गाशिरःस्थितोऽन्तस्थो यकारो लेख्यः । 'पूस्पृष्टा तालव्य' इति वचनात् । स च संयोगः प्रयत्नलाघवात्पूर्वस्य गुरुत्वं न करोति ।

१ वार्जित. २ मुहावत्थिदो.

eta: is a servant who assists in love affairs.

शकारः—तिष्ठ वसन्तसेनिके तिष्ठ । (क)

किं यासि धावसि पलायसे प्रस्खलन्ती
वासु प्रसीद न मरिष्यसि तिष्ठ तावत् ।
कामेन दह्यते खलु मे हृदयं तपस्वि
अङ्गारराशिपतितमिव मांसखण्डम् ॥ १८ ॥

चेटः—आर्यके तिष्ठ तिष्ठ । (ख)

उत्रासिता गच्छस्यन्तिकान्मम संपूर्णपक्षेव ग्रीष्ममयूरी ।
अववल्गति स्वामिभट्टारको मम वने गतः कुक्कुटशावक इव ॥१९॥

विटः—वसन्तसेने तिष्ठ तिष्ठ ।

किं यासि बालकदलीव विकम्पमाना
रक्तांशुकं पवनलोलदशं वहन्ती ।
रक्तोत्पलप्रकरकुड्मलमुत्सृजन्ती
टङ्कैर्मनःशिलगुहेव विदार्यमाणा ॥ २० ॥

(क) चिश्ट वसन्तशेणिए चिश्ट ।
किं याशि धावाशि पलाअशि पक्खलन्ती
वाशू पशीद ण मेलीहिशि चिश्ट दाव ।
कामेण दज्झदि हु मे हडके तवश्शी
अङ्गाललाशिपडिद विअ मंशखण्डे ॥

(ख) अज्जुए चिट्ठ चिट्ठ ।
उत्ताशिता गच्छशि अन्तिकाँ मे शंपुण्णपुच्छा विअ गिम्हमोरी ।
ओवग्गदी शामिअभश्टके मे वणे गडे कुक्कुडशावके व्व ॥

चिष्ठ तिष्ठ । **किं यासीत्यादि** । वसन्ततिलकच्छन्दसा श्लोकः । प्रस्खलन्ती । प्रस्खलनं निम्नोन्नतादौ गतिविघटनम् । ‘ बाला स्याद्वासूः ’ इत्यमरः । न म्रियसे । तिष्ठ तावत् । हडके हृदयम् । तपस्वि वराकम् । अङ्गारराशिपतितं मांसखण्डमिव कामेन दह्यते ॥ १८ ॥ अज्जुके गणिके । **उत्रासितेत्यादि** । उपजातिच्छन्दसा श्लोकः । उत्रासिता गच्छस्यन्तिकान्मम । यद्वा । अत्तिका ज्येष्ठा मे भगिनी । ‘ अत्तिका भगिनी ज्येष्ठा ’ इत्यमरः । संपूर्णपक्षेव ग्रीष्ममयूरी । ओवग्गदी अववल्गति । ससंभ्रममागच्छतीत्यर्थः । शामिअभश्टके स्वामिभट्टारकः । वने गतः कुक्कुटशावक इव । गडे इति प्रथमान्तस्यैकारान्तत्वम् । ‘ गतभृतकृतानां डः ’ इति डः ॥ १९ ॥ **किं यासीति** । [पवनेन लोला दशा यस्य तादृशं रक्तांशुकं वहन्ती । रक्तोत्पलानां प्रकरः । तद्घटितमाल्यमिति यावत् । तद्गतं कुड्मलं ससंभ्रमगमनाद् उत्सृजन्ती पातयन्ती । पक्षे रक्तोत्पलप्रकरवत् कुड्मलान् कुड्मलसदृशप्रस्तरखण्डान् उत्क्षिपन्ती ।] ‘ टङ्कः पाषाणदारणः ’ इत्यमरः । विदारणक्षणे हि निर्मला दीप्तिः प्रसरतीति । कुड्मलं कलिका । मनःशिलगुहेति । महाभारते मनःशिलशब्दोऽपि दृश्यत इति तथा प्रयुक्तः । ‘ मनःशिला तु कुनटी’ इत्यमरः ।

---

१ कुण्डलं. २ मलीहशि, मालिश्शसि. ३ अज्जए, अज्जुके. ४ अत्तिका. ५ कुक्कुर.

शकारः—तिष्ठ वसन्तसेने तिष्ठ । (क)

मम मदनमनङ्गं मन्मथं वर्धयन्ती
निशि च शयनके मम निद्रां प्रक्षिपन्ती ।
प्रसरसि भयभीता प्रस्खलन्ती स्खलन्ती
मम वशमनुयाता रावणस्येव कुन्ती ॥ २१ ॥

विटः—वसन्तसेने

किं त्वं पदैर्मम पदानि विशेषयन्ती
व्यालीव यासि पतगेन्द्रभयाभिभूता ।
वेगादहं प्रविसृतः पवनं निरुन्ध्यां
त्वन्निग्रहे तु वरगात्रि न मे प्रयत्नः ॥ २२ ॥

शकारः—भाव भाव

एषा नाणकमोषिकामकशिका मत्स्याशिका लासिका
निर्नासा कुलनाशिका अवशिका कामस्य मञ्जूषिका ।

(क) चिश्ट वशन्तशेणिए चिश्ट ।

मम मअणमणङ्गं मन्मैथं वड्ढअन्ती
णिशि अ शअँणके मे णिद्दअं पक्खिवन्ती ।
पशलशि भअभीदा पक्खलन्ती खलन्ती
मम वशमणुजादा लावणश्शेव कुन्ती ॥

[वसन्ततिलका वृत्तम्] ॥ २० ॥ **मम मदनमित्यादि** । मालिनीछन्दसा श्लोकः । मम मदनमनङ्गं मन्मथं वर्धयन्ती निशि च शयनके मम निद्रामाक्षिपन्ती । प्रसरसि प्रगच्छसि । ‘ प्रस्नरसि दात्यूहवद्विरौषि ’ इति केचित् । भयभीतेति । भयशब्दोऽयमपार्थकः । मदनमनङ्गमित्यादि पुनरुक्तम् । रावणस्येव कुन्तीति हतोपमम् । तथा चोक्तम्—‘ आगमलिङ्गविहीनं देशकलान्यायविपरीतम् । व्यर्थैकार्थमपार्थं भवति हि वचनं शकारस्य ॥ ’ इति ॥ २१ ॥ **किं त्वमिति** । विशेषयन्ती अतिशयाना । [पतगेन्द्रः गरुडस्तस्माद्भयं तेन पीडिता त्रस्ता] व्याली सर्पी [इव यासि । अनेन तस्याः शीघ्रगतित्वं वक्रगमनं च सूचितम् ।] प्रविसृतः प्रचलितः [वातं निरुन्ध्यां गृह्णीयाम् । न रुन्ध्यामिति पाठे] वातं न रुणध्मि अपि तु रुणध्म्येव । नकारः काकौ । हे वरगात्रि त्वन्निग्रहे मम प्रयत्नः न । अनायासेनैव त्वां निगृह्णीयामित्यर्थः । यद्वा एवं सत्यपि त्वन्निग्रहे बलात्कारेण ग्रहणे मम प्रयत्नः न । अपि तु अनुनये एव । उपमालंकारः । वसन्ततिलका वृत्तम्] ॥ २२ ॥ ‘भावो विद्वान्’ इत्यमरः । **एषा नाणकेत्यादि** । शार्दूलविक्रीडितच्छन्दसा श्लोकः । एषा । नाणं शिवाङ्कं टङ्कनादिवित्तं तस्य मोषणशीलः कामो यस्य तस्य कशिका चर्मकाष्ठिका । चौराणां किंचित्तया चोपकरणं

---

१ न रुन्ध्यां (टी०). २ वम्महं. ३ शअणए. ४ आक्खिव०.

एषा वेशवधूः सुवेशनिलया वेशाङ्गना वेशिका (क)
एतान्यस्या दश नामकानि मया कृतान्यद्यापि मां नेच्छति २३

विटः—

प्रसरसि भयविक्लवा किमर्थं प्रचलितकुण्डलघृष्टगण्डपार्श्वा।
विटजननखघट्टितेव वीणा जलधरगर्जितभीतसारसीव ॥ २४ ॥

शकारः—

झणज्झणायमानबहुभूषणशब्दमिश्रं
किं द्रौपदीव पलायसे रामभीता।
एष हरामि सहसेति यथा हनूमा-
न्विश्वावसोर्भगिनीमिव तां सुभद्राम् ॥ २५ ॥ (ख)

(क) भावे भावे

एशा णाणकमूशिकामकाशिका मच्छाशिका लाशिका
णिण्णाशा कुलणाशिका अवशिका कामस्स[2] मञ्जूशिका।
एशा वेशवहू शुवेशणिलआ वेशङ्गणा वेशिआ
एशे शे दश णामके मइ कले अज्जावि मं णेच्छदि ॥

(ख) झाणज्झणन्तबहुभूशणशद्दमिश्शं[3] किं दोव्वदी[4] विअ पलाअशि लामभीदा।
एशे हलामि शहशत्ति जधा हणूमे विश्शावशुश्श बहिणिं[5] विअ तं शुभद्दं ॥

भवति। तदत्र कशोक्ता। कशा चाश्वताडनी। चर्मसडिकोच्यते। मच्छाशिका मत्स्यभक्षिका। 'मच्छं शुष्कमांसम्' इत्येके। लाशिका नर्तकी। णिण्णाशा निम्ननासा। कुलणाशिका कुलं वंशस्तन्नाशयति पातित्यजननात्। 'णीशाशा' [निःस्वाशा] इति पाठे निःस्वानामाशा। कुलनाशिकेत्यर्थः। न वशिका [अवशिका] अनायत्ता दानेनापि कस्याप्यायत्ता न भवति। कामस्य मञ्जूषिका पात्रविशेषः। कन्दर्पभाजनमिव। वर्तुलीभूतः काम इवेत्यर्थः। एषा वेशवधूः। 'वेशो वेश्याजनाश्रयः' इत्यमरः। सुवेशनिलया शोभनानां वेशानामलंकाराणां निलय आश्रयो यस्यां सा। वेशाङ्गना। वेशिका। वेशोऽस्यास्तीति वेशिका। एतान्यस्या दश नामकानि मया कृतानि अद्यापि मां नेच्छति। यदि देवताया अष्टौ दश द्वादश नामानि पठ्यन्ते तदा सा प्रसन्ना भवति। इयं त्वेतावताऽपि न प्रसन्नेति भावः। अत्र पूर्वार्धोत्तरार्धयोः एषैषेति पुनरुक्तं न्यूनमधिकं वा कृतम्। दशेति व्यर्थम् ॥ २३ ॥ **प्रसरसीत्यादि**। प्रचलिताभ्यां कुण्डलाभ्यां घृष्टं गण्डयोः पार्श्वं यस्याः सा। अत एव विटनखपरिमृष्टवीणातुल्या। मनोहरत्वाच्छब्दवत्त्वाद्वा वीणातुल्यत्वम्। विटसदृशौ कुण्डलौ। [जलधरस्य गर्जितं तेन भीता सारसी इव। मालोपमालंकारः। पुष्पिताग्रा वृत्तम्] ॥ २४ ॥ **झणज्झणायेति**। वसन्ततिलकं छन्दः। झाणज्झणन्तेत्यव्यक्तानुकरणम्। अव्यक्तशब्दविशेषयुक्तबहुभूषणशब्देन मिश्रं यथा स्यादेवम्। किं द्रौपदीव पलायसे रामभीता। एष हरामि झटिति यथा हनुमान्विश्वावसोर्भगिनीमिव तां सुभ-

---

१ परिघाटितेव, नखखण्डितेव. २ कामाह. ३ झणज्झ०. ४ दोवदी. ५ वहिणिं.

the cheṭa's speech too although not full of absurdities and irrelevances like that of his master, is full of quaint expressions and strange similies.

चेटः— By getting these two fish and flesh even dogs feed not on dead bodies.

रमय च राजवल्लभं ततः खादिष्यसि मत्स्यमांसकम् ।
एताभ्यां मत्स्यमांसाभ्यां श्वानो मृतकं न सेवन्ते ॥ २६ ॥ (क)

विटः—भवति वसन्तसेने girdle zone.

किं त्वं कटीतटनिवेशितमुद्वहन्ती
ताराविचित्ररुचिरं रशनाकलापम् ।
वक्रेण निर्मथितचूर्णमनःशिलेन
त्रस्तां द्रुतं नगरदैवतवत्प्रयासि ॥ २७ ॥

शकारः— (ख)

अस्माभिश्चण्डमभिसार्यमाणा वने शृगालीव कुक्कुरैः ।
पलायसे शीघ्रं त्वरितं सवेगं सवृन्तं मम हृदयं हरन्ती ॥२८॥

(क) लामेहि अ लाअवल्लहं तो[2] खाहिशि मच्छमंशकम्[3] ।
एदेहिं मच्छमंशकेहिं[4] शुणआ मडअं[5] ण शेवन्ति ॥

(ख) अम्हेहि चण्डं अहिशालिअन्ती वणे शिआली विअ कुक्कुलेहिं ।
पलाशि शिग्घं तुलिदं शवेग्गं शवेण्टणं[6] मे हलअं हलन्ती ॥

द्राम् । विश्वावसोः सिद्धराजविशेषस्य न भगिनी सुभद्रा किं तर्हि कृष्णस्य । यथा इवेति पुनरुक्तम् ॥ २५ ॥ **रमयेत्यादि** । प्रतिपादं चतुर्दशमात्रत्वान्मात्रासमकं छन्दः । लामेहि अ रमय च । चकारो भिन्नक्रमः । राजवल्लभं चेत्यर्थः । तो खाहिशि ततः खादिष्यसि मत्स्यमांसकम् । 'तो इत्योकारो लघुश्छन्दोनुरोधात्' इत्याहुः । 'एओकारौ हलन्तस्थौ शुद्धौ वाऽप्यपदान्वितौ । दीर्घात्परौ लघू स्यातां छन्दोविचितिभाषया ॥' इत्युक्तम् । एदेहिं मच्छमंशकेहिं एताभ्यां मत्स्यमांसाभ्यां हेतुभ्याम् । 'मश्कलेहिं' इति पाठे मत्स्यशुष्कमांसाभ्यामित्यर्थः । ककारः स्वार्थे । शुणआ श्वानः । मृतकं न सेवन्ते । नकारः शिरश्चालने । न सेवन्ते इति न अपि तु सेवन्त एवेत्यर्थः ॥ २६ ॥ **किं त्वमिति** । [ताराभिः मुक्ताभिः विचित्रश्चासौ रुचिरश्च तम् ।] वक्रेण लक्षिता नगरदेवतावत्प्रयासि । कीदृशेन वक्रेण । [निर्मथितः अत एव चूर्णः मनःशिलस्तेन लक्षणया] निर्मथितचूर्णमनःशिलातुल्येन [यद्वा निर्मथिता पराभूता चूर्णमनःशिला येन तेन । नगरदैवतेन तुल्यं नगरदैवतवत् । द्रुतं प्रयासि । तद्धितोपमा । वसन्ततिलका वृत्तम्] ॥ २७ ॥ **अस्माभिरिति** । उपेन्द्रवज्रा छन्दः । अस्माभिश्चण्डं शीघ्रमभिसार्यमाणा वने शृगालीव कुक्कुरैः । पलायसे शीघ्रं त्वरितं सवेगं शवेण्टणं सवृन्तं समूलबन्धम् । मे हलअं मम हृदयम् । हरन्ती । 'शवेठणं सवेष्टनमित्यर्थः' इत्येके ॥ २८ ॥ पल्लवकः परभृतिका च वसन्तसेनायाः परिचारकः परि-

---

१ त्रस्ताद्रुतं. २ ता. ३ मंशमच्छकम्. ४ मंशमच्छकेहिं. ५ मलअं. ६ शवेठणं.

वसन्तसेना—पल्लवक पल्लवक परभृतिके परभृतिके । (क)

शकारः—(सभयम् ।) भाव भाव मनुष्या मनुष्याः । (ख)

विटः—न भेतव्यं न भेतव्यम् ।

वसन्तसेना—माधविके माधविके । (ग)

विटः—(सहासम् ।) मूर्ख परिजनोऽन्विष्यते ।

शकारः—भाव भाव स्त्रियमन्विष्यति । (घ)

विटः—अथ किम् ।

शकारः—स्त्रीणां शतं मारयामि । शूरोऽहम् । (ङ)

वसन्तसेना—(शून्यमवलोक्य ।) हा धिक् हा धिक् । कथं परिभ्रष्टः परिजनः । अत्र मयाऽऽत्मा स्वयमेव रक्षितव्यः । (च)

विटः—अन्विष्यतामन्विष्यताम् ।

शकारः—वसन्तसेनिके विलप विलप परभृतिकां वा पल्लवकं वा सर्वं वा वसन्तमासम् । मयाऽभिसार्यमाणां त्वां कः परित्रास्यते । (छ)

किं भीमसेनो जमदग्निपुत्रः कुन्तीसुतो वा दशकन्धरो वा ।
एषोऽहं गृहीत्वा केशहस्ते दुःशासनस्यानुकृतिं करोमि ॥२९॥

(क) पल्लवआ पल्लवआ परहुदिए परहुदिए । (ख) भावे भावे मणुश्शे मणुश्शे ।

(ग) माहविए माहविए । (घ) भावे भावे इत्थिआं अण्णेशदि ।

(ङ) इत्थिआणं शदं मालेमि । शूले हग्गे । (च) हद्धी हद्धी । कधं परिब्भट्टो परिअणो[1] । एत्थ मए अप्पा सअं ज्जेव रक्खिदव्वो ।

(छ) वसन्तशेणिए विलव विलव परहुदिअं वा पल्लवअं वा शव्वं वा[2] वशन्तमाशं । मए अहिशालिअन्तीं तुमं के पलित्ताइश्शदि ।

किं भीमशेणे जमदग्गिपुत्ते कुन्तीशुदे वा दशकन्धले[3] वा ।
एशे हगे गेण्हिय केशहस्ते[4] दुश्शाशणश्शाणुकिदिं कलेमि ॥

चारिका च । माधविका अपरा परिचारिका । भावे भावे इति संबोधनम् । मणुश्शे मनुष्यः । स्त्रीनामश्रवणेन सगर्वमाह—स्त्रीणां शतं मारयामि । हद्धी हद्धी हा धिक् हा धिक् । विलप । किमेकदेशविलापेन सकलं वसन्तमासं वा । अत्र पक्षे एको वाशब्दः शकारवचनतया व्यर्थ एव प्रयुक्तः । अनेकार्थत्वान्निपातानामवधारणे वा । सर्वमेव वसन्तमासमित्यर्थः । कः तुमं त्वां परित्रायते । **किं भीमसेन इत्यादि** । इन्द्रवज्राश्लोकः । किं भीमसेनो जमदग्निपुत्रः कुन्तीसुतो वा दशकन्धरो वा । एते चत्वारः । एषोऽहं गृहीत्वा केशहस्ते दुःशासनस्यानुकृतिं करोमि ॥२९॥ णं ननु । पेक्ख प्रेक्षस्व ।

---

१ परिअणो वि मे परि०. २ एव्व. ३ कन्धलो. ४ हत्थे.

The poetry in the mouth of Vita is however is of high ... and his speeches are more sensible.

ननु प्रेक्षस्व ननु प्रेक्षस्व । (क)

असिः सुतीक्ष्णो वलितं च मस्तकं कल्पये शीर्षमुत मारयामि वा ।
अलं तवैतेन पलायितेन मुमूर्षुर्यो भवति न स खलु जीवति ॥ ३० ॥

वसन्तसेना—आर्य अबला खल्वहम् । (ख)

विटः—अत एव ध्रियसे ।

शकारः—अत एव न मार्यसे । (ग)

वसन्तसेना—(स्वगतम् ।) कथमनुनयोऽप्यस्य भयमुत्पादयति । भवतु । एवं तावत् । (प्रकाशम् ।) आर्य अस्मात्किमप्यलंकरणं तर्क्यते । (घ)

विटः—शान्तं पापम् । भवति वसन्तसेने न पुष्पमोषमर्हत्युद्यानलता । तत्कृतमलंकरणैः ।

वसन्तसेना—तत्किं खल्विदानीम् । (ङ)

शकारः—अहं देवपुरुषो मनुष्यो वासुदेवः कामयितव्यः । (च)

वसन्तसेना—(सक्रोधम् ।) शान्तं शान्तम् । अपेहि । अनार्य मन्त्रयसि । (छ)

(क) णं पेक्ख णं पेक्ख ।

अशी शुतिक्खे वलिदे अ मश्तके कप्पेम[2] शीशं उद मालएम[3] वा ।
अलं तवेदेण पलाइदेण मुमुक्खु जे होदि ण शे क्खु जीअदि ॥

(ख) अज्ज अबला क्खु अहम् । (ग) अदो ज्जेव ण मालीअशि[4] ।

(घ) कथं अणुणओ वि शे भअं उप्पादेदि । भोदु । एव्वं दाव । अज्ज इमादो किंपि अलंकरणं तक्कीयदि । (ङ) ता किं क्खु दाणिम् ।

(च) हग्गे देवपुलिशे[5] मणुश्शे वाशुदेवके कामइदव्वे ।

(छ) शन्तं शन्तम्[6] । अवेहि । अणज्जं मन्तेसि ।

असिरिति । वंशस्थेन्द्रवज्रादिभिर्द्वादशैकादशवर्णैर्विजात्युपजातिः । असिः सुतीक्ष्णो वलितो लालितः । मस्तकम् । कल्पये छिनद्मि । तव शीघ्रं मारयामि वा ॥ ३० ॥ [न बलं यस्याः सा] अबला [दीनेत्यर्थः] खल्वहम् । अत एव ध्रियसे जीवसि । बलवान्धारयितुं न शक्यत एवेति तात्पर्यम् । अत एव न मार्यसे । तक्कीअदि अन्विष्यते । कृतं निष्फलमलंकरणैः । यत उद्यानलता पुष्पमोषं नार्हति । अहं वरपुरुषमनुष्यो वासुदेवः कामयितव्य इति तर्क्यत इत्याशयः । सन्तं शान्तम् ।

---

१ शान्तम्; शान्तं पापं शान्तं पापम्. २ कप्पेध. ३ मालएध. ४ मालीहशि. ५ वरपुलिशमनुश्शो. ६ पावं (पापम्).

शकारः—(सहस्ततालं[1] विहस्य ।) भाव भाव प्रेक्षस्व तावत् । अन्तरेण सुस्निग्धैषा गणिकादारिका ननु । येन मां भणति—'एहि । श्रान्तोऽसि । क्लान्तोऽसि' इति । अहं न ग्रामान्तरं न नगरान्तरं वा गतः । आर्यके [भट्टालिके] शपे भावस्य शीर्षमात्मीयाभ्यां पादाभ्याम् । तवैव पृष्ठानुपृष्ठिकयाऽऽहिण्डमानः श्रान्तः क्लान्तोऽस्मि संवृत्तः । (क)

विटः—(स्वगतम् ।) अये कथं शान्तमित्यभिहिते श्रान्त इत्यवगच्छति मूर्खः । (प्रकाशम् ।) वसन्तसेने वेशवासविरुद्धमाभिहितं भवत्या । पश्य ।

तरुणजनसहायश्चिन्त्यतां वेशवासो
विगणय गणिका त्वं मार्गजाता लतेव ।
वहसि हि धनहार्यं पण्यभूतं शरीरं
सममुपचर भद्रे सुप्रियं चाप्रियं[2] च ॥ ३१ ॥

अपि च ।

वाप्यां स्नाति विचक्षणो द्विजवरो मूर्खोऽपि वर्णाधमः
फुल्लां नाम्यति वायसोऽपि हि लतां या नामिता बर्हिणा ।
ब्रह्मक्षत्रविशस्तरन्ति च ययां[3] नावा तयैवेतरे
त्वं वापीव लतेव नौरिव जनं वेश्याऽसि सर्वं भज ॥ ३२ ॥

(क) भावे भावे पेक्ख दावं[4] । अन्तलेण[5] शुशिणिद्धा एशा गणिआदालिआ[6] णं । जेण मं भणादि—' एहि । शन्तेशि । किलिन्तेशि ' त्ति । हगे ण ग्गामन्तलं[7] ण णगलन्तलं वा गडे । अज्जुके शवामि भावश्श शीशं अत्तणकेहिं[8] पादेहिं । तव ज्जेव पश्चाणुपाश्चिआए आहिण्डन्ते शन्ते किलिन्ते म्हि शंवुत्ते ।

अनार्यमनर्हम् । सतालिकम् । विटस्य हस्ते तालदानं कृत्वेत्यर्थः । मं अन्तरेण । ' मयीत्यर्थः ' इत्येके । अन्तरेण चित्तेन अन्योन्यं सुस्निग्धैषा गणिकादारिका ननु । हगे अहं न ग्रामान्तरगतो न नगरान्तरागतः । ग्रामान्तरागतो नगरान्तरगतश्च श्रान्तः क्लान्तश्च भवति । न त्वहमीदृश इत्याशयः । अज्जुके भट्टालिके । भावस्य विटस्य । शीर्षेणात्मीयाभ्यां पादाभ्यां शपे । यदग्रे वक्ष्यमाण तत्सत्यमित्यर्थः । तवैव पृष्ठानुपृष्ठिकया । आहिण्डन्ते उद्भ्राम्यन् । श्रान्तः क्लान्तोऽस्मि संवृत्तः । **तरुणेत्यादि** । वेशो वेश्याजनवासस्थानं [तरुणजनः सहायो यस्य तथा । तरुणजनापेक्षीत्यर्थः । इति चिन्त्यतामवधार्यताम् । विगगण विजानीहि । धनेन हार्यं धनहार्यम् । केनापि तरुणजनेनेति शेषः । सुप्रियं च अप्रियं च नरं सममविशेषेण उपचर । उपमा काव्यलिङ्गं च अलंकारौ । मालिनी वृत्तम्] ॥ ३१ ॥ **वाप्यामित्यादि** । [वर्णेनाधमः वर्णाधमः शूद्रादिः ।] नाम्यति नमयति । नाम्यतीति कण्ड्वादिपाठात् ' नामं करोति ' इत्यर्थे यक्यकारलोपे च रूपम् । यथा मगधशब्दे मागध्यतीति भवति । ' नामं करोतीत्यर्थे णिचि संज्ञापूर्वको विधिरनित्य इति गुणमकृत्वा यणादेशे नाम्य-

१ सतालकम्. २ वाऽप्रियं वा. ३ यथा...तथै०. ४ दाव मं. ५ मं अन्त०. ६ गणिकादारिकेत्यादि नास्ति पुस्तकान्तरे. ७ अण्णग्गाम०; न्तलं गडे. ८ अत्तणकेलकेहिं, ०केरोहिं.

The love of Vasantasena may be compared with that of Rupa... Katha Sarit Sagara and of Raga manjari of Dasakumara Charita

वसन्तसेना—गुणः खल्वनुरागस्य कारणं न पुनर्बलात्कारः । (क)

शकारः—भाव भाव एषा गर्भदासी कामदेवायतनोद्यानात्प्रभृति तस्य दरिद्रचारुदत्तस्यानुरक्ता न मां कामयते । वामतस्तस्य गृहम् । यथा तव मम च हस्तान्नैषा परिभ्रश्यति तथा करोतु भावः । (ख)

विटः—(स्वगतम् ।) यदेव परिहर्तव्यं तदेवोदाहरति मूर्खः । कथं वसन्तसेनाऽऽर्यचारुदत्तमनुरक्ता । सुष्ठु खल्विदमुच्यते रत्नं रत्नेन संगच्छत इति । तद्गच्छतु । किमनेन मूर्खेण । (प्रकाशम् ।) काणेलीमातः वामतस्तस्य सार्थवाहस्य गृहम् ।

शकारः—अथ किम् । वामतस्तस्य गृहम् । (ग)

वसन्तसेना—(स्वगतम् ।) आश्चर्यम् । वामतस्तस्य गृहमिति यत्सत्यमपराध्यताऽपि दुर्जनेनोपकृतं येन प्रियसंगमं प्रापिता । (घ)

शकारः—भाव भाव बलीयसि खल्वन्धकारे माषराशिप्रविष्टेव मसीगुटिका दृश्यमानैव प्रनष्टा वसन्तसेना । (ङ)

विटः—अहो बलवानन्धकारः । तथा हि ।

आलोकविशाला मे सहसा तिमिरप्रवेशविच्छिन्ना ।
उन्मीलिताऽपि दृष्टिर्निमीलितेवान्धकारेण ॥ ३३ ॥

(क) गुणो क्खु[1] अणुराअस्स कारणं ण उण बलक्कारो ।
(ख) भावे भावे एशा गब्भदाशी कामदेवाअदणुज्जाणादो पहुदि तस्स[2] दलिद्दचालुदत्तस्स अणुलत्ता ण मं कामेदि । वामदो तश्श घलम् । जधा तव मम अ हस्तादो ण एशा पलिब्भंशदि तधा कलेदु भावे । (ग) अध इं । वामदो तश्श घलम् । (घ) अम्महे । वामदो तश्श गेहं त्ति जं सच्चं अवरज्झन्तेण वि दुज्जणेण[3] उवकिदं जेण पिअसंगमं पाविदा[4] । (ङ) भावे भावे बालए क्खु अन्धआले माशलाशिपविश्टा विअ मशीगुडिआ दीशन्दी[5] ज्जेव पणश्टा वशन्तशेणिआ ।

तीति रूपम्' इत्येके । 'ण्यन्तात्संपदादिपाठमभ्युपेत्य क्विपि क्यचि रूपम्' इत्यपरे ॥३२॥ गर्भदासी जन्मप्रभृतिचेटी । [कामदेवायतनोद्यानात् कामदेवायतनोद्यानगतात् चारुदत्तदर्शनादारभ्येत्यर्थः ।] वामतः पार्श्वे तस्य चारुदत्तस्य गृहम् । परिहर्तव्यम् । चारुदत्तवासोऽतिनिकट इति वसन्तसेनायाः कथयितुं नार्हतीति तदेव च तेनोक्तम् । तद्वचनं परिहारविषयः । काणेलीमातः । 'काणेली कन्यकामाता' इति देशीप्रकाशः । 'असती काणेली' इत्येके । भाव बलीयानन्धकारः । माषराशिप्रविष्टेव मसीगुटिका दृश्यमानैव प्रनष्टा वसन्तसेना । **आलोकेति** । आलोके दर्शने । विशाला महती । [तिमिरे प्रवेशस्तेन विच्छिन्ना लुप्ता । निमी-

---

१ गुणा. २ तस्स...दत्तस्स. ३ णेण पिअशंगमं (प्रियसंगमः). ४ पाविदं. ५ दीशन्दी दीशन्दी.

अपि च ।

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ ३४ ॥

शकारः—भाव भाव अन्विष्यामि वसन्तसेनिकाम् । (क)

विटः—काणेलीमातः अस्ति किंचिच्चिह्नं यदुपलक्षयसि ।

शकारः—भाव भाव किमिव । (ख)

विटः—भूषणशब्दं सौरभ्यानुविद्धं माल्यगन्धं वा ।

शकारः—शृणोमि माल्यगन्धम् । अन्धकारपूरितया पुनर्नासिकया न सुव्यक्तं पश्यामि भूषणशब्दम् । (ग)

विटः—(जनान्तिकम् ।) वसन्तसेने ।

कामं प्रदोषतिमिरेण न दृश्य[3]से त्वं
सौदामनीव जलदोदरसंधिलीना[4] ।
त्वां सूचयिष्यति तु माल्यसमुद्भवोऽयं
गन्धश्च भीरु मुखराणि च नूपुराणि ॥ ३५ ॥

श्रुतं वसन्तसेने ।

वसन्तसेना—(स्वगतम् ।) श्रुतं गृहीतं च । (नाट्येन नूपुराण्युत्सार्य माल्यानि चापनीय किंचित्परिक्रम्य हस्तेन परामृश्य ।) अहो भित्तिपरामर्शसूचितं पक्षद्वारकं खल्वेतत् । जानामि च संयोगेन गेहस्य संवृतं पक्षद्वारकम् । (घ)

(क) भावे भावे अण्णेशामि वशन्तशेणिअं । (ख) भावे भावे किं विअ । (ग) शुणामि मल्लगन्धं । अन्धआलपूलिदाए उण णाशिआए ण शुव्वत्तं पेक्खामि भूशणशद्दं । (घ) सुदं गहिदं अ । अम्मो भित्तिपरामरिससूइदं पक्खदुआरअं क्खु एदं । जाणामि अ संजोएण गेहस्स संवुदं पक्खदुआरअं ।

लिता इवेति उत्प्रेक्षा ।] ॥ ३३ ॥ **लिम्पतीत्यादि** । [असत्पुरुषसेवेवेत्यनेन शकारसेवाया निष्फलत्वं[1] ध्वनितम् । विगतं फलं यस्याः सा विफला तस्या भावः विफलता ताम् । उपमोत्प्रेक्षयोः संसृष्टिः] ॥ ३४ ॥ चिह्नं भूषणशब्दादि । उपलक्षणं माल्यगन्धादि । 'अस्ति किंचिच्चिह्नमुपलक्षयसि' इति पाठान्तरार्थो व्यक्त एव । किं विअ । कीदृशमिवेत्यर्थः । 'शुणामि मल्लगन्धम्' इत्यादिना लोकविरुद्धोक्तिः । **काममित्यादि** । [प्रदोषतिमिरेण निशामुखान्धकारेण । जलदोदरसंधौ लीना । वसन्ततिलका वृत्तम् ।] ॥ ३५ ॥ श्रुतमवधारितम् । गृही-

---

१ निष्फ०. २ किं चिह्नं. ३ दृश्यते. ४ संविलीना.

चारुदत्तः—वयस्य समाप्तजपोऽस्मि । तत्सांप्रतं गच्छ । मातृभ्यो बलिमुपहर ।

विदूषकः—भोः न गमिष्यामि । (क)

चारुदत्तः—धिक्कष्टम् ।

दारिद्र्यात्पुरुषस्य बान्धवजनो वाक्ये न संतिष्ठते
सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्यापदः ।
सत्त्वं ह्रासमुपैति शीलशशिनः कान्तिः परिम्लायते
पापं कर्म च यत्परैरपि कृतं तत्तस्य संभाव्यते ॥ ३६ ॥

अपि च ।

सङ्गं नैव हि कश्चिदस्य कुरुते संभाषते नादरा-
त्संप्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ।
दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया
मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम् ॥ ३७ ॥

अपि च ।

दारिद्र्य शोचामि भवन्तमेवमस्मच्छरीरे सुहृदित्युषित्वा ।
विपन्नदेहे मयि मन्दभाग्ये ममेति चिन्ता क्व गमिष्यसि त्वम् ॥ ३८ ॥

विदूषकः—(सवैलक्ष्यम् ।) भो वयस्य यदि मया गन्तव्यं तदेषाऽपि मम सहायिनी रदनिका भवतु । (ख)

(क) भो ण गमिस्सम् ।
(ख) भो वअस्स जइ मए गन्तव्वं ता एसा वि मे सहाइणी रदणिआ भोदु ।

तमस्य तात्पर्यमप्याकलितम् । अये मातः भित्तिपरामर्शसूचितं पक्षद्वारं खल्वेतत् । जानामि संयोगेन स्पर्शनेन्द्रियानुभवेन गृहस्य संवृतं पक्षद्वारकम् । **दारिद्र्यादित्यादि** । बान्धवजनो वाक्ये न संतिष्ठते । वचनं न करोतीत्यर्थः । प्रतापाभावात् । स्फारीभवन्त्येकीभवन्ति [ततो विस्तारं यान्तीत्यर्थः ।] तत्तस्य संभाव्यते चौर्यादिकमिदमस्य नार्शादिदानीं कथमित्यादि ॥ ३६ ॥ **सङ्गमित्यादि** । [सङ्गं सङ्गतिम् । अवज्ञया सहितं यथा तथा सावज्ञं सातिरस्कारम् ।] अल्पच्छदो वस्त्रविहीनः । [षष्ठं–पञ्चमहापातकानि मनुनोक्तानि यथा–'ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः । महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥' इति । उत्प्रेक्षालंकारः । उभयोः शार्दूलविक्रीडितं वृत्तम्] ॥ ३७ ॥ **दारिद्र्येति** । भवन्तमेवं [भवन्तमेव इ. पा.] शोचामि । [विपन्नः देहः यस्य तस्मिन् विपन्नदेहे] विनष्टदेहे मयि क्व यास्यसि । अस्मत्सदृशमार्दविकः सहृत्कोऽपि नास्तीत्यर्थः । अर्थपरत्वात्पुंलिङ्गत्वम् । यद्वा ' तमेवं भवमुत्पत्तिं स्मरामि ' इति कुव्याख्या । सुहृन्मित्रम् । अतो हेतोः मयि विनष्टदेहे क्व यास्यसि त्वमिति मे चारुदत्तस्य चिन्ता । उपजातिच्छन्दः] ॥ ३८ ॥ सहायिनी द्वितीया । अभ्युपपत्तिरनुग्रहः ।

---

१ सहसा. २ परं. ३ संभाष्यते. ४ मेव द्य०.

चारुदत्तः—रदनिके मैत्रेयमनुगच्छ ।

चेटी[1]—यदार्य आज्ञापयति । (क)

विदूषकः—भवति रदनिके गृहाण बलिं प्रदीपं च । अहमपावृतं पक्षद्वारकं करोमि । (तथा करोति ।) (ख)

वसन्तसेना—ममाभ्युपपत्तिनिमित्तमिवापावृतं पक्षद्वारकम् । (दृष्ट्वा ।) तद्यावत्प्रविशामि । हा धिक् हा धिक् । कथं प्रदीपः । (पटान्तेन निर्वाप्य प्रविष्टा ।) (ग)

चारुदत्तः—मैत्रेय किमेतत् ।

विदूषकः—अपावृतपक्षद्वारकेण पिण्डीभूतेन वातेन निर्वापितः प्रदीपः। भवति रदनिके निष्क्राम त्वं पक्षद्वारकेण । अहमप्यभ्यन्तरचतुःशालातः प्रदीपं प्रज्वाल्यागच्छामि । (इति निष्क्रान्तः ।) (घ)

शकारः—भाव भाव अन्वेषयामि वसन्तसेनिकाम् । (ङ)

विटः—अन्विष्यतामन्विष्यताम् ।

शकारः—(तथा कृत्वा ।) भाव भाव गृहीता गृहीता । (च)

विटः—मूर्ख नन्वहम् ।

शकारः—इतस्तावद्भूत्वैकान्ते भावस्तिष्ठतु । (पुनरन्विष्य चेटं गृहीत्वा ।) भाव भाव गृहीता गृहीता । (छ)

(क) जं अज्जो आणवेदि ।

(ख) भोदि रदणिए गेण्ह बलिं पदीवं अ । अहं अपावुदं पक्खदुआरअं करेमि ।

(ग) मम अब्भुववत्तिणिमित्तं विअ अवावुदं पक्खदुआरअम् । ता जाव पविसामि । हद्धी हद्धी । कधं पदीवो ।

(घ) अवावुदपक्खदुआरएण पिण्डीभूदेन वादेण णिव्वाविदो पदीवो । भोदि रदणिए णिक्कम तुमं पक्खदुआरएण । अहं पि[3] अब्भन्तरचदुस्सालादो पदीवं पज्जालिअ आअच्छामि । (ङ) भावे भावे अण्णेशामि वशन्तशेणिअम् ।

(च) भावे भावे गहिदा गहिदा ।

(छ) इदो दाव भविअ एअन्ते भावे चिश्टदु । भावे भावे गहिदा गहिदा ।

स्थगितद्वारेणापसरणाभावात्पिण्डीभूतेनैकीभूतेन प्रतिबन्धकत्वादपावृते पक्षद्वारे सति निर्वापितो दीपः । गृहीता प्राप्ता । तत इत एकप्रदेशे भूत्वैकान्ते हे भाव

---

१ रदनिका. २ किरणेण (कृतेन). ३ पि.

चेटः—भट्टारक चेटोऽहम् । (क)

शकारः—इतो भाव इतश्चेटः । भावश्चेटश्चेटो भावः । युवां तावदेकान्ते तिष्ठतम् । (पुनरन्विष्य रदनिकां केशेषु गृहीत्वा ।) भाव भाव सांप्रतं गृहीता गृहीता वसन्तसेनिका ।

अन्धकारे पलायमाना माल्यगन्धेन सूचिता ।
केशहस्ते परामृष्टा चाणक्येनेव द्रौपदी ॥ ३९ ॥ (ख)

विटः—

एषाऽसि वयसो दर्पात्कुलपुत्रानुसारिणी ।
केशेषु कुसुमाढ्येषु सेवितव्येषु कर्षिता ॥ ४० ॥

शकारः—

एषाऽसि वासु शिरसि गृहीता केशेषु बालेषु शिरोरुहेषु ।
आक्रोश विक्रोश लपाधिचण्डं शंभुं शिवं शंकरमीश्वरं वा ४१ (ग)

रदनिका—(सभयम् ।) किमार्यमिश्रैर्व्यवसितम् । (घ)

विटः—काणेलीमातः अन्य एवैष स्वरसंयोगः ।

(क) भट्टके चेडे हगे ।

(ख) इदो भावे इदो चेडे । भावे चेडे चेडे भावे । तुम्हे दाव एअन्ते चिट्ठ । भावे भावे शंपदं गहिदा गहिदा वशन्तशेणिआ ।

अन्धआले पलाअन्ती मल्लगन्धेण शूइदा ।
केशहस्ते पलामिट्ठा चाणक्केणेव्व दोव्वदी ॥

(ग) एशाशि वाशू शिलशि ग्गेहीदा केशेशु बालेशु शिलोलुहेशु ।
अक्कोश विक्कोश लवाहिचण्डं शंभुं शिवं शंकलमीशलं वा ॥

(घ) किं अज्जमिस्सेहिं ववसिदम् ।

तिष्ठ । इदो भाव इत्यादि भ्रमव्युदासाय सुनिश्चयं करोति । युवां द्वावपि तावदेकान्ते तिष्ठतम् । संपदं सांप्रतम् । **अन्धकार इत्यादि** । अनुष्टुप् । [माला एव माल्यम् । चतुर्वर्णादिष्यञ् । तस्य गन्धेन] माल्यगन्धेन सूचिता । केशहस्ते केशवृन्दे परामृष्टा [स्पृष्टा] ॥ ३९ ॥ **एषेति** । कुलपुत्रानुसारिणी चारुदत्तानुरक्ता ।] कुसुमाढ्येषु पुष्पैः । समृद्धेषु । भूषितेष्वित्यर्थः । सेवितव्येष्वलंकार्येषु ॥४०॥ **एषाऽसीति** । इन्द्रवज्रायाः श्लोकः । एषाऽसि बाला । [वासु बाले [अधिचण्डमत्युच्चैः । हिशब्द एव वा । चण्डं महादेवं च ॥ ४१ ॥ आर्यमिश्रैर्मान्यैः । [आर्याश्च ते मिश्राश्चेति समासः । व्यवसितं कर्तुमारब्धम् । अन्यः वसन्तसेनाया भिन्नः ।]

---

१ विन्दे (वृन्दे). २ ग्गिहीदा.

शकारः—भाव भाव यथा दधिशरपरिलुब्धाया मार्जारिकायाः स्वरपरिवृत्तिर्भवति तथा दास्याःपुत्र्या स्वरपरिवृत्तिः कृता । (क)

विटः—कथं स्वरपरिवर्तः कृतः । अहो चित्रम् । अथ वा किमत्र चित्रम् ।

इयं रङ्गप्रवेशेन कलानां चोपशिक्षया ।
वञ्चनापण्डितत्वेन स्वरनैपुण्यमाश्रिता ॥ ४२ ॥

(प्रविश्य ।)

विदूषकः—आश्चर्यं भोः प्रदोषमन्दमारुतेन पशुबन्धोपनीतस्येव छागलस्य हृदयं फुरफुरायते प्रदीपः । (उपसृत्य रदनिकां तथा दृष्ट्वा ।) भो रदनिके । (ख)

शकारः—भाव भाव मनुष्यो मनुष्यः । (ग)

विदूषकः—युक्तं न्विदं सदृशं न्विदं यदार्यचारुदत्तस्य दरिद्रतया सांप्रतं परपुरुषा गेहं प्रवेश्यन्ते । (घ)

रदनिका—आर्य मैत्रेय प्रेक्षस्व मे परिभवम् । (ङ)

विदूषकः—किं तव परिभवः । अथ वाऽस्माकम् । (च)

रदनिका—ननु युष्माकमेव । (छ)

(क) भावे भावे जधा दहिशरपलिलुद्धाए मज्जालीए शलपलिवत्ते होदि तधा दाशीएधीए शलपलिवत्ते कडे ।

(ख) ही ही भोः पदोसमन्दमारुदेण पसुबन्धोवणीदस्स विअ छागलस्स हिअअं फुरफुराअदि पदीवो । भो रदणिए । (ग) भावे भावे मणुश्शे मणुश्शे ।

(घ) जुत्तं ण्णेदं सरिसं ण्णेदं जं अज्जचारुदत्तस्स दलिद्ददाए संपदं परपुरिसा गेहं पविसीअन्ति । (ङ) अज्ज मित्तेअ पेक्ख मे परिहवम् ।

(च) किं तव परिहवो । आदु अम्हाणम् । (छ) णं तुम्हाणं ज्जेव्व ।

भाव यथा दधिभक्तलुब्धायां मार्जारिकायां स्वरपरिवृत्तिर्भवति तथैतया स्वरपरिवृत्तिः [ध्वनेरन्यथाकरणं] कृता । 'दहिशर' इति पाठे ' छलि ' इति पाठेऽपि शरो दध्न उपरिभागः । **इयमिति** । [रङ्गः नृत्यशाला तत्र प्रवेशेन । तत्र भिन्नभिन्नस्वरानुकरणशिक्षयेत्यर्थः । वञ्चना प्रतारणा तस्यां पण्डितत्वेन पाटवेन । स्वरनैपुण्यं स्वरविकृतिचातुर्यम् । समुच्चयालंकारः] ॥४२॥ ही ही भो इति परितोषे । पशुबन्धोपनीतस्येव छागलस्य हृदयं फुरफुरायति अत्यर्थं प्रकम्पते प्रदीपः । युक्तं नेदम् । नः काकौ ।

---

१ दहिछलि. २ पविशन्ति.

विदूषकः—किमेष बलात्कारः । (क)

रदनिका—अथ किम् । (ख)

विदूषकः—सत्यम् । (ग)

रदनिका—सत्यम् । (घ)

विदूषकः—(सक्रोधं दण्डकाष्ठमुद्यम्य ।) मा तावत् । भोः स्वके गेहे कुक्कुरोऽपि तावच्चण्डो भवति किं पुनरहं ब्राह्मणः । तदेतेनास्मादृशजनभागधेयकुटिलेन दण्डकाष्ठेन दुष्टस्येव शुष्कवेणुकस्य मस्तकं ते प्रहारैः कुट्टयिष्यामि । (ङ)

विटः—महाब्राह्मण मर्षय मर्षय ।

विदूषकः—(विटं दृष्ट्वा ।) नात्रैषोऽपराध्यति । (शकारं दृष्ट्वा ।) एष खल्वत्रापराध्यति । अरे रे राजश्यालक संस्थानक दुर्जन दुर्मनुष्य युक्तं न्विदम् । यद्यपि नाम तत्रभवानार्यचारुदत्तो दरिद्रः संवृत्तः तत्किं तस्य गुणैर्नालंकृतोज्जयिनी येन तस्य गृहं प्रविश्य परिजनस्येदृश उपमर्दः क्रियते । (च)

(क) किं एसो बलक्कारो । (ख) अध इं । (ग) सच्चं ।
(घ) सच्चम् । (ङ) मा दाव । भो सके गेहे कुक्कुरो वि दाव चण्डो भोदि किं उण अहं बम्हणो । ता एदिणा अम्हारिसजणभाअधेअकुडिलेण दण्डकट्ठेण दुट्ठस्स विअ सुक्खोणवेणुअस्स मत्थअं दे पहारेहिं कुट्टइस्सम् ।

(च) ण एत्थ एसो अवरज्झदि । एसो क्खु एत्थ अवरज्झदि । अरे रे राअसालअ संठाणअ दुज्जण दुम्मणुस्स जुत्तं ण्णेदम् । जइ वि णाम तत्तभवं अज्जचारुदत्तो दलिद्दो संवुत्तो ता किं तस्स गुणेहिं ण अलंकिदा उज्जइणी जेण तस्स गेहं पविसिअ परिअणस्स ईरिसो उवमद्दो करीअदि ।

किं एसो । किं प्रश्ने । स्वकीयगृहसमीपे कुक्कुरोऽपि बलीयान्भवति । एतेनास्मादृशजनभागधेयवक्रेण दण्डकाष्ठेन । दुष्टस्येव । कृतद्रोहस्य वैरिणो महादुष्टस्यानिग्रहेऽपि ममापराधो भवत्येवेत्यर्थः । यद्वा । दुष्टश्चानपराधोऽपि निग्रहं प्राप्नोत्येवेत्यर्थः । पाठान्तरे चोडे कर्णनासिकाशून्यः । शुष्कवंशप्रहारेण । शुष्कोऽतिदीर्घत्वप्रतिपादनाय । एवंभूतस्य शिरः कुट्यते । तथा तव शिरः कुट्टिष्यामि । राजस्यालकेत्यादि । संस्थानक

---

१ छुक्खवेणु. २ पाडइस्सं.

मा दुर्गत इति परिभवो नास्ति कृतान्तस्य दुर्गतो नाम।
चारित्रेण विहीन आढ्योऽपि च दुर्गतो भवति ॥ ४३ ॥ (क)

विटः—(सवैलक्ष्यम्।) महाब्राह्मण मर्षय मर्षय। अन्यजनशङ्कया खल्विदमनुष्ठितं न दर्पात्। पश्य।

सकामाऽन्विष्यतेऽस्माभिः

विदूषकः—किमियम्। (ख)

विटः—शान्तं पापम्।

काचित्स्वाधीनयौवना।
सा नष्टा शङ्कया तस्याः प्राप्तेयं शीलवञ्चना ॥ ४४ ॥

सर्वथेदमनुनयसर्वस्वं गृह्यताम्। (इति खड्गमुत्सृज्य कृताञ्जलिः पादयोः पतति।)

विदूषकः—सत्पुरुष उत्तिष्ठोत्तिष्ठ। अजानता मया त्वमुपालब्धः। सांप्रतं पुनर्जानन्ननुनयामि। (ग)

विटः—ननु भवानेवात्रानुनेयः। तदुत्तिष्ठामि समयतः।

विदूषकः—भणतु भवान्। (घ)

विटः—यदीमं वृत्तान्तमार्यचारुदत्तस्य नाख्यास्यसि।

विदूषकः—न कथयिष्यामि। (ङ)

विटः—

एष ते प्रणयो विप्र शिरसा धार्यते मया।
गुणशस्त्रैर्वयं येन शस्त्रवन्तोऽपि निर्जिताः ॥ ४५ ॥

(क) मा दुग्गदोत्ति परिहवो णत्थि कअन्तस्स दुग्गदो णाम।
चारित्तेण विहीणो अड्डो वि अ दुग्गदो होइ ॥

(ख) किं इअम्।

(ग) सप्पुरिस उट्ठेहि उट्ठेहि। अआणन्तेण मए तुमं उवालद्धे। संपदं उण आणन्तो अणुणेमि। (घ) भणादु भवम्। (ङ) ण कधइस्सम्।

इति तस्य नाम। उपमर्दो निग्रहः। **मा दुर्गत इति।** गाथा। कृतान्तस्य दैवस्य दुर्गतो नाम। नाम संभावनायाम्। चारित्रेण विहीन आढ्योऽपि दुर्गतो दरिद्रो भवति ॥ ४३ ॥ महाब्राह्मणश्चाण्डालः। **सकामेति।** सकामा स्वाधीनयौवनेतिपदाभ्यामस्या धारणं नापराधाय। सा वेश्या तिष्ठति न स्त्रियमित्याशयः। शीलवञ्चना दुश्चरितसंभावना [शीलस्य सद्‌वृत्तस्य वञ्चना प्रतारणा। परस्त्रीपरामर्शरूपवृत्तलोप इत्यर्थः।] ॥ ४४ ॥ जानन्ननुनयामि। आदरविषयताऽनुनयः। समयः क्रियाबन्धः। समयमेवाह—यदीममिति। **एष इति।** [प्रणयः मत्प्रार्थना-

---

१ शान्तं पापं शान्तं पापम्. २ भ्रष्टा. ३ आर्येति नास्ति क्वचित्. ४ माख्यापयसि.

शकारः—(सासूयम् ।) किंनिमित्तं पुनर्भाव एतस्य दुष्टबटुकस्य कृपणाञ्जलिं कृत्वा पादयोर्निपतितः । (क)

विटः—भीतोऽस्मि ।

शकारः—कस्मात्त्वं भीतः । (ख)

विटः—तस्य चारुदत्तस्य गुणेभ्यः ।

शकारः—के तस्य गुणा यस्य गृहं प्रविश्याशितव्यमपि नास्ति । (ग)

विटः—मा मैवम् ।

सोऽस्मद्विधानां प्रणयैः कृशीकृतो
न तेन कश्चिद्विभवैर्विमानितः ।
निदाघकालेष्विव सोदको ह्रदो
नृणां स तृष्णामपनीय शुष्कवान् ॥ ४६ ॥

शकारः—(सामर्षम् ।) कः स गर्भदास्याःपुत्रः ।

शूरो विक्रान्तः पाण्डवः श्वेतकेतुः
पुत्रो राधाया रावण इन्द्रदत्तः ।
आहो कुन्त्यां तेन रामेण जातः
अश्वत्थामा धर्मपुत्रो जटायुः ॥ ४७ ॥ (घ)

All persons referred here are distinguished for their val[our]. Shakara knows the history [but] was confused in the matter.

विटः—मूर्ख आर्यचारुदत्तः खल्वसौ ।

दीनानां कल्पवृक्षः स्वगुणफलनतः सज्जनानां कुटुम्बी
ओदर्शः शिक्षितानां सुचरितनिकषः शीलवेलासमुद्रः ।

(क) किंणिमित्तं उण भावे एदश्श दुट्ठबडुअश्श किविणंअञ्जलिं कदुअ पाएशु णिवडिदे । (ख) कश्श तुमं भीदे । (ग) के तश्श गुणा जश्श गेहं पविशिअ अशिदव्वं पि णत्थि । (घ) के शे गब्भदासीएपुत्ते ।

शूले विक्कन्ते पण्डवे शेदकेदू पुत्ते लाधाए लावणे इन्ददत्ते ।
आहो कुन्तीए तेण लामेण जादे अश्शत्थामे धम्मपुत्ते जडाऊ ॥

नुमातिरूपः ।] गुणशस्त्रैः गुणा एव शस्त्राणि तैः ॥ ४५ ॥ किविणं कृपणम् । अशितव्यं भोक्तव्यमपि नास्ति । यद्वा अन्हिअदव्वं पि आह्निकद्रव्यमद्य भोक्तव्यमपीत्यर्थः । **स इति** । [अस्माकमिव विधा प्रकारो येषां तेऽस्मद्विधाः । अर्थिनः । तेषां] प्रणयैः प्रार्थनाभिः [प्रार्थनानुरूपार्थदानैः ।] ‘ स्नेहप्रकारैः समयोचितदानैरित्यर्थः ’ इत्येके । [विभवैः संपद्गर्वादित्यर्थः । वंशस्थं वृत्तम्] ॥४६॥ **शूर इति** । श्लोको वैश्वदेव्या वृत्तेन । आहो उषायास्तेन रामेण जातः इदं व्यर्थं विरुद्धार्थम् । श्वेतकेतुरौद्दालकिर्दुर्वाससो मातुलः ऋषिविशेषः । इन्द्रदत्तो बृहत्कथाप्रलम्बके स्त्र्यंशे संस्थितः ॥४७॥ **दीनानामिति** । [स्वस्य गुणाः स्वगुणाः । स्वगुणा एव फलानि तैः नतः नम्रः कल्पवृक्षः ।] सज्जनानां

---

१ चादर्शः, २ किं विणअं अ॰.

सत्कर्ता नावमन्ता पुरुषगुणनिधिर्दक्षिणोदारसत्त्वो
ह्येकः श्लाघ्यः स जीवत्यधिकगुणतया चोच्छ्वसन्तीव चान्ये ४८

तदितो गच्छामः ।

शकारः—अगृहीत्वा वसन्तसेनाम् । (क)

विटः—नष्टा वसन्तसेना ।

शकारः—कथमिव । (ख)

विटः—

अन्धस्य दृष्टिरिव पुष्टिरिवातुरस्य,
मूर्खस्य बुद्धिरिव सिद्धिरिवालसस्य ।
स्वल्पस्मृतेर्व्यसनिनः परमेव विद्या
त्वां प्राप्य सा रतिरिवारिजने प्रनष्टा ॥ ४९ ॥

शकारः—अगृहीत्वा वसन्तसेनां न गमिष्यामि । (ग)

विटः—एतदपि न श्रुतं त्वया ।

आलाने गृह्यते हस्ती वाजी वल्गासु गृह्यते ।
हृदये गृह्यते नारी यदीदं नास्ति गम्यताम् ॥ ५० ॥

शकारः—यदि गच्छसि गच्छ त्वम् । अहं न गमिष्यामि । (घ)

विटः—एवम् । गच्छामि । (इति निष्क्रान्तः ।)

(क) अगेण्हिअ वशन्तशेणिअम् । (ख) कधं विअ ।
(ग) अगेण्हिअ वशन्तशेणिअं ण गमिश्शम् ।
(घ) यदि गच्छशि गच्छ तुमम् । हगे ण गमिश्शम् ।

कुटुम्ब्युपजीव्यः । [आदर्शः मुकुर इव निदर्शनभूतः । सुचरितस्य निकषः कषपट्टिकेव स्थितः । शीलमेव वेला तस्याः समुद्रः । समुद्रवेलामिव न कदापि शीलमतिक्रामतीत्यर्थः । दीनानां नावमन्तेत्यर्थः । पुरुषगुणानां दयादाक्षिण्यादीनां निधिः । दक्षिणं सरलमुदारं महत् च सत्त्वं यस्य स तथा । अधिका इतरातिशायिनो गुणा यस्य स तस्य भावस्तया । अन्ये केवलमुच्छ्वसन्ति चर्मभस्त्रेवेति शेषः । मालारूपकम् । स्रग्धरा वृत्तम्] ॥४८॥ नष्टा अदर्शनं गता । **अन्धस्येति** । [आतुरस्य रुग्णस्य । सिद्धिः कार्यसफलता । स्वल्पा मन्दा स्मृतिर्यस्य तस्य । तथा च व्यसनिनः आपद्गतस्य मृगयादिव्यसनपरस्य वा । परमा उत्कृष्टा विद्या वेदान्तविद्या वा । रतिरनुरागः । वसन्ततिलका वृत्तम्]॥४९॥ **आलान इति** । [आलाने बन्धनस्तम्भे गृह्यते निरुध्यते । वल्गासु खलीनाकर्षणेन । हृदये तस्या अनुरागपूर्णं हृदयं चेदित्यर्थः ।] यदि चेदर्थे । चेन्नास्ति । यदिदं इति पाठे यद् यस्मादिदं अनुरक्तं हृदयं] नास्ति ततः तदा गम्यताम् ॥ ५० ॥

---

१ यदिदं.

शकारः—गतः खलु भावोऽभावम् । (विदूषकमुद्दिश्य ।) अरे काकपदशीर्षमस्तक दुष्टबटुक उपविशोपविश । (क)

विदूषकः—उपवेशिता एव वयम् । (ख)

शकारः—केन । (ग)

विदूषकः—कृतान्तेन । (घ)

शकारः—उत्तिष्ठोत्तिष्ठ । (ङ)

विदूषकः—उत्थास्यामः । (च)

शकारः—कदा । (छ)

विदूषकः—यदा पुनरपि दैवमनुकूलं भविष्यति । (ज)

शकारः—अरे रुदिहि रुदिहि । (झ)

विदूषकः—रोदिता एव वयम् । (ञ)

शकारः—केन । (ट)

विदूषकः—दुर्गत्या । (ठ)

शकारः—अरे हस हस । (ड)

विदूषकः—हसिष्यामः । (ढ)

शकारः—कदा । (ण)

विदूषकः—पुनरपि ऋद्ध्याऽऽर्यचारुदत्तस्य । (त)

(क) गडे क्खु भावे अभावम् । अले काकपदशीशमश्तका दुश्टबडुका उवविश उवविश । (ख) उववेसिदा ज्जेव अम्हे । (ग) केण । (घ) कअन्तेण ।
(ङ) उट्ठेहि उट्ठेहि । (च) उट्ठिस्सामो । (छ) कदा ।
(ज) जदा पुणो वि देव्वं अणुऊलं भविस्सदि । (झ) अले लोद लोद ।
(ञ) रोदाविदा ज्जेव अम्हे ।
(ट) केण । (ठ) दुग्गदीए । (ड) अले हश हश ।
(ढ) हसिस्सामो ।
(ण) कदा । (त) पुणो वि रिद्धीए अज्जचारुदत्तस्स ।

अभावमदर्शनम् । काकपदशीशमश्तका इति । द्यूताद्यकार्यप्रवृत्तौ काकपदाकारा ये धूर्तास्तेषां शीर्षप्राया ग्रामण्यस्तेषां मस्तकभूत धूर्तचक्रवर्तिनामपि प्रधानभूत । एतेनाचारकुलयोराक्षेपः कृतः । केचित्तु—'काकपदशीर्षं काकपदवत्पञ्चधा शीर्षं मस्तकं यस्य । पञ्चेत्युपलक्षणम् । अष्टकपालः [तेनालक्षणयुक्तमस्तक इत्यर्थः]' इत्याहुः । अत्र च मते शीशमश्तका इति शकारवाणीत्वेन पुनरुक्तत्वं न दोषः ।

---

१ पदमस्तशीशक. २ सिद्धीए. ३ अज्ज इति नास्ति क्वचित्.

शकारः—अरे रे दुष्टबटुक भणिष्यसि मम वचनेन तं दरिद्रचारुदत्तकम्—'एषा ससुवर्णा सहिरण्या नवनाटकदर्शनोत्थिता सूत्रधारीव वसन्तसेना नाम गणिकादारिका कामदेवायतनोद्यानात्प्रभृति त्वामनुरक्ताऽस्माभिर्बलात्कारानुनीयमाना तव गेहं प्रविष्टा । तद्यदि मम हस्ते स्वयमेव प्रस्थाप्यैनां समर्पयसि ततोऽधिकरणे व्यवहारं विना लघु निर्यातयतस्तव मयाऽनुबद्धा प्रीतिर्भविष्यति । अथ वाऽनिर्यातयतो मरणान्तिकं वैरं भविष्यति । अपि च प्रेक्षस्व प्रेक्षस्व । (क)

कूष्माण्डी गोमयलिप्तवृन्ता शाकं च शुष्कं तलितं खलु मांसम् ।
भक्तं च हैमन्तिकरात्रिसिद्धं लीनायां च वेलायां न खलु भवति पूतिः ५१

शोभनं भणिष्यसि । सकपटं भणिष्यसि । तथा भणिष्यसि यथाऽहमात्मकीयायां प्रासादबालाग्रकपोतपालिकायामुपविष्टः शृणोमि । अन्यथा

(क) अले ले दुस्टबडुका भणेशि मम वअणेण तं दलिद्दचालुदत्तकम्—' एशा शशुवण्णा शहिलण्णा णवणाडअदंशणुट्टिदा शुत्तधालिव्व वशन्तशेणा णाम गणिआदालिआ कामदेवाअदणुज्जाणादो पहुदि तुमं अणुलत्ता अम्हेहिं बलक्कालाणुणीअमाणा तुह गेहं पविस्टा । ता जइ मम हस्ते शअं ज्जेव पट्ठाविअ एणं शमप्पेशि तदो अधिअलणे ववहालं विणा लहुं णिज्जादमाणाह तव मए अणुबद्धा पीदी हुविश्शदि । अ‍ादु अणिज्जादमाणाह मलणन्तिके वेले हुविश्शदि । अवि अ पेक्ख पेक्ख ।

कश्चालुका गोच्छडलित्तवेण्टा शाके अ शुक्खे तलिदे हु मंशे ।
भत्ते अ हेमन्तिअलत्तिशिद्धे लीणे अ वेले ण हु होदि पूदी ॥ '

दुष्टबटो । ततोऽधिकरणे व्यवहारं विना इत्यनेन व्यवहारनाम्नो नवमाङ्कस्य सूचनम् । [अधिकरणे न्यायसभायाम् । व्यवहारं निर्णयकरणम्] । लघु शीघ्रम् । णिज्जादमाणाह निर्यातयतः । तव मयाऽनुबद्धा प्रीतिर्भविष्यति । **कूष्माण्डीत्यादि** । उपजातिच्छन्दसा । कूष्माण्डी गोमयलिप्तवृन्ता शाकं च शुष्कं पलिरं प्रचुरप्रलेहं मांसम् । [तलितं घृतपक्वम् । तदुक्तं भावप्रकाशे—' शुद्धमांसविधानेन मांसं सम्यक्प्रसाधितम् । पुनस्तदाज्ये संभृष्टं तलितं प्रोच्यते बुधैः ॥' इति ।] ' तलिदं स्नेहपक्वे देशी ' इत्येके । ' भडिदे ' इति पाठे भटित्रमित्यर्थः । ' शूलाकृतं भटित्रं च ' इत्यमरः । भक्तं च हैमन्तिकरात्रिसिद्धं लीणे अ [वेले लीनायां च वेलायाम् । गते समये इत्यर्थः । लीणे वेले इति पुंलिङ्गं शकारवचनत्वेन न दोषः । अतः पूर्वमेवोक्तं— 'आगमलिङ्गविहीनम्' इत्यादीति ध्येयं सुधीभिः । न खलु भवति पूतिर्दुर्गन्धताऽपि तु भवत्येव इति काकुः—इति लल्लादीक्षिताः ।] ऋणं च वैरं च न भवति । पूदी पूति । चिरंतनत्वेन प्रशिथिलं स्वकार्यम् ॥ ५१ ॥ शोश्तकं शोभनम् । लश्तकं सकपटम् । भणिष्यसि । तथा भणिष्यसि । भणेशीति भविष्यद्वर्तमानयोस्तुल्यं

---

१ अले. २ हत्थे. ३ कक्कालुका (कर्कालुका). ४ पलिरं.

यदि भणसि तदा कपाटप्रविष्टकपित्थगुलिकामिव मस्तकं ते मडमडायिष्यामि । (क)

विदूषकः—भणिष्यामि । (ख)

शकारः—(अपवार्य ।) चेट गतः सत्यमेव भावः । (ग)

चेटः—अथ किम् । (घ)

शकारः—तच्छीघ्रमपक्रमावः । (ङ)

चेटः—तद्गृह्णातु भट्टारकोऽसिम् । (च)

शकारः—तवैव हस्ते तिष्ठतु । (छ)

चेटः—एष भट्टारकस्य । गृह्णात्वेनं भट्टारकोऽसिम् । (ज)

शकारः—(विपरीतं गृहीत्वा ।)

निर्वल्कलं मूलकपेशिवर्णं स्कन्धेन गृहीत्वा च कोशसुप्तम् ।
कुक्कुरैः कुक्कुरीभिश्च बुक्कयमानो यथा शृगालः शरणं प्रयामि ५२ (झ)

(परिक्रम्य निष्क्रान्तौ ।)

(क) शोस्तकं[1] भणेशि । लस्तकं[2] भणेशि । तधा भणेशि जधा हगे अत्तणकेलिकाए पाशादबालग्गकवोदवालिआए उवविश्टे शुणामि । अण्णधा[3] जदि भणेशि ता कवालप[4]विश्ठकवित्थगुडिअं विअ मस्तअं दे मडमडाइश्शम् ।

(ख) भणिस्सम् । (ग) चेडे गडे शच्चकं ज्जेव भावे ।

(घ) अध इं । (ङ) ता शिग्घं अवक्कमम्ह ।

(च) ता गेण्हदु[5] भट्टके अशिम् । (छ) तव ज्जेव हत्थे चिश्ठदु ।

(ज) एशे भट्टालकस्स । गेण्हदु णं भट्टके अशिम् ।

(झ) णिव्वक्कलं मूलकपेशिवण्णं खन्धेण घेत्तूण अ कोशशुत्तम्[6] ।
कुक्केहिं कुक्कीहिं अ बुक्कअन्ते[7] जधा शिआले शलणं पलामि ॥

रूपम् । यथाऽहमात्मकीयायां प्रासादस्य बालाग्रलक्षितायां कपोतपालिकायां विटङ्के । 'बालाग्रं मत्तवारणम् । कपोतपालिका उपरिगृहश्रेणीति दक्षिणापथे लोकोक्तिरियम्' इति प्राचीनटीका । तस्यामुपविष्टः शृणोमि । अन्यथा यदि भणसि तदा कपाटप्रविष्टकपित्थगुलिकामिव मस्तकं तव शब्दविशेषयुक्तं [मडमड इति शब्दयुक्तं] तथा भक्षयिष्यामि लोकोक्त्या मडमडायिश्शमिति व्याख्यायते । कपित्थं फलविशेषः । 'लस्तकं शोस्तकं द्वयमपि शोभनार्थम्' इति प्राचीनटीका । [अपवार्येति । तल्लक्षणं—'तद्भवेदपवारितम् । रहस्यं तु यदन्यस्य परावृत्य प्रकाशते ॥' इति ।] गतो भावो विटः सत्यम् । एषोऽसिः । भट्टारकः स्वामिकः । **निर्वल्कलमित्यादि** । उपजातिच्छन्दसा । निर्वल्कलं [निर्गतं वल्कलं लक्षणया कोशः यस्य तं विकोशमित्यर्थः ।] मूलकपेशिवर्णम् । पेशी त्वक् । मूलकत्वग्वर्णम् । आलोहितमित्यर्थः । [एतादृशमसि] स्कन्धेन गृहीत्वा च कोशीसुप्तम् । अल्पार्थे स्त्रीत्वम् । कोशावस्थितमित्यर्थः । कोशावस्थितं कृत्वेति यावत् ।] कुक्कुरैः कुक्कुरीभिश्च शब्दायमानो यथा शृगालस्तथा स्वगृहं प्रयामि । विदूषकरदनिके कुक्कुरकुक्कुरीस्थाने ॥ ५२ ॥ [संयतमुखी

---

१ शोट्टकं (स्वस्तिकं). २ लट्ठुअं (लघुकं). ३ तधा जाव ण. ४ कमालतल. ५ गेण्ह मं. ६ कोशि॰. ७ भुक्क.

विदूषकः—भवति रदनिके न खलु तेऽयमपमानस्तत्रभवतश्चारुदत्तस्य निवेदयितव्यः। दौर्गत्यपीडितस्य मन्ये द्विगुणतरा पीडा भविष्यति। (क)

रदनिका—आर्य मैत्रेय रदनिका खल्वहं संयतमुखी। (ख)

विदूषकः—एवं न्विदम्। (ग)

चारुदत्तः—(वसन्तसेनामुद्दिश्य।) रदनिके मारुताभिलाषी प्रदोषसमयशीतार्तो रोहसेनः। ततः प्रवेश्यतामभ्यन्तरमयम्। अनेन प्रावारकेण छादयैनम्। (इति प्रावारकं प्रयच्छति।)

वसन्तसेना—(स्वगतम्।) कथं परिजन इति मामवगच्छति। (प्रावारकं गृहीत्वा समाघ्राय च स्वगतं सस्पृहम्।) आश्चर्यम्। जातीकुसुमवासितः प्रावारकः। अनुदासीनमस्य यौवनं प्रतिभासते। (अपवारितकेन प्रावृणोति।) (घ)

चारुदत्तः—ननु रदनिके रोहसेनं गृहीत्वाऽभ्यन्तरं प्रविश।

वसन्तसेना—(स्वगतम्।) मन्दभागिनी खल्वहं तवाभ्यन्तरस्य। (ङ)

चारुदत्तः—ननु रदनिके प्रतिवचनमपि नास्ति। कष्टम्।

यदा तु भाग्यक्षयपीडितां दशां नरः कृतान्तोपहितां प्रपद्यते।
तदाऽस्य मित्राण्यपि यान्त्यमित्रतां चिरानुरक्तोऽपि विरज्यते जनः॥५३॥

(क) भोदि रदणिए ण क्खु दे अअं अवमाणो तत्तभवदो चारुदत्तस्स णिवेदइदव्वो। दोग्गच्चपीडिअस्स मण्णे दिउणदरा पीडा हुविस्सदि।

(ख) अज्ज मित्तेअ रदणिआ क्खु अहं संजदमुही। (ग) एव्वं ण्णेदम्।

(घ) कधं परिअणोत्ति मं अवगच्छदि। अम्हहे। जादीकुसुमवासिदो पावारओ। अणुदासीणं से जोव्वणं पडिभासेदि।

(ङ) मन्दभाईणी क्खु अहं तुम्हे अब्भन्तरस्स।

नियन्त्रितवदना। नाहं कथंचिन्निवेदयामीत्यर्थः।] एवं ण्णेदमिति एवार्थे। रोहसेनश्चारुदत्तसुतः। अम्हहे विस्मये। अनुदासीनं साभिलाषम्। तदनुरूपचेष्टायोगात्। अभ्यन्तरगमनस्याभागिनी। वेश्यात्वात्। **यदेति**। भाग्यं शोभनं कर्म [यदा नरः भाग्यक्षयेण विभवनाशेन पीडितां संकटां कृतान्तेन दैवेन उपहितां प्रा-

---

१ समय०। शीता०.

(उपसृत्य रदनिका विदूषकश्च ।)

विदूषकः—भो इयं सा रदनिका । (क)

चारुदत्तः—इयं सा रदनिका । इयमपरा का ।

अविज्ञातावसक्तेन दूषिता मम वाससा ।

वसन्तसेना—(स्वगतम् ।) ननु भूषिता । (ख)

चारुदत्तः— It is clear from this that C was also stirred by sim[...] passion for Vasanta at her sight.

छादिता शरदभ्रेण चन्द्रलेखेव दृश्यते ॥ ५४ ॥

अथ वा न युक्तं परकलत्रदर्शनम् ।

विदूषकः—भोः अलं परकलत्रदर्शनशङ्कया । एषा वसन्तसेना कामदेवायतनोद्यानात्प्रभृति भवन्तमनुरक्ता । (ग)

चारुदत्तः—अये इयं वसन्तसेना । (स्वगतम् ।)

यया मे जनितः कामः क्षीणे विभवविस्तरे ।
क्रोधः कुपुरुषस्येव स्वगात्रेष्वेव सीदति ॥ ५५ ॥

विदूषकः—भो वयस्य एष खलु राजश्यालो भणति । (घ)

(क) भो इअं सा रदणिआ । (ख) णं भूसिदा ।

(ग) भो अलं परकलत्रदंसणसङ्काए । एसा वसन्तसेणा कामदेवाअदणुज्जाणादो पहुदि भवन्तमणुरत्ता ।

(घ) भो वअस्स एसो क्खु राअसालो भणादि ।

पितां दशां प्रतिपद्यते तदा । विरज्यते विरक्तो भवति । वंशस्थं वृत्तम्] ॥ ५३ ॥ **अविज्ञातेति** । [अविज्ञाता यथार्थतोऽज्ञाता । अत एव अवसक्तेनाङ्गलग्नेन मम वाससा दूषिता । यद्वा अविज्ञातायामवसक्तेन लग्नेन इति एकं पदम् । अविज्ञातं यथा तथा अवसक्तेनेति वा । ननु भूषिता इत्यनेन औदार्याख्यो नायिकालंकारः प्रदर्शितः । 'औदार्यं विनयः सदा' इति लक्षणात् ।] दूषिता परपुरुषत्वात् ॥ ५४ ॥ **ययेति** । [क्षीणे नष्टे विभवविस्तरे संपन्निधौ सति यया जनितः मम कामः साफल्याभावात् । कुत्सितः पुरुषः कुपुरुषः निस्तेजस्कः पुमांस्तस्य क्रोध इव स्वगात्रेष्वेव] सीदति कर्तव्यासामर्थ्यात्प्रव्यक्तो न भवति । [तत्रैव विलीयते इत्यर्थः ।] अत्र 'अलं परकलत्रशङ्कया' इत्यारभ्य 'अये इयं वसन्तसेना' इत्यन्तेन नायकोपकारिकाया अर्थसंपत्तेरवगमात्प्रथमं पताकास्थानमिदम् । तदुक्तं 'सहसैवार्थसंपत्तिर्नायकस्योपकारिका । पताकास्थानकं संधौ प्रथमे तन्मतम्' इति ॥ ५५ ॥ एषेत्यादि पूर्वोक्तमेव भणति । अलंकृताऽस्मीति । ममान्यत्रा-

---

१ विदूषकः रदनिकामुपसृत्य. २ अये इति नास्ति क्वचित्.

चारुदत्तः—किम् ।

विदूषकः—एषा ससुवर्णा सहिरण्या नवनाटकदर्शनोत्थिता सूत्रधारीव वसन्तसेना नाम गणिकादारिका कामदेवायतनोद्यानात्प्रभृति त्वामनुरक्ताऽस्माभिर्बलात्कारानुनीयमाना तव गेहं प्रविष्टा । (क)

वसन्तसेना—(स्वगतम् ।) बलात्कारानुनीयमानेति यत्सत्यमलंकृताऽस्म्येतैरक्षरैः । (ख)

विदूषकः—तद्यदि मम हस्ते स्वयमेव प्रस्थाप्यैनां समर्पयसि ततोऽधिकरणे व्यवहारं विना लघु निर्यातयतस्तव मयाऽनुबद्धा प्रीतिर्भविष्यति । अन्यथा मरणान्तिकं वैरं भविष्यति । (ग)

चारुदत्तः—(सावज्ञम् ।) अज्ञोऽसौ । (स्वगतम् ।) अये कथं देवतोपस्थानयोग्या युवतिरियम् । तेन खलु तस्यां वेलायां

> **प्रविश गृहमिति प्रतोद्यमाना**
> **न चलति भाग्यकृतां दशामवेक्ष्य ।**
> **पुरुषपरिचयेन च प्रगल्भं**
> **न वदति यद्यपि भाषते बहूनि ॥ ५६ ॥**

(प्रकाशम् ।) भवति वसन्तसेने अनेनाविज्ञानादपरिज्ञातपरिजनोपचारेणापराद्धोऽस्मि । शिरसा भवतीमनुनयामि ।

(क) एसा ससुवण्णा सहिलण्णा णवणाडअदंसणुट्ठिदा सुत्तधालिव्व वसन्तसेणा णाम गणिआदालिआ कामदेवाअदणुज्जाणादो पहुदि तुमं अणुलत्ता अम्हेहिं बलक्कालाणुणीअमाणा तुह गेहं पविठ्ठा ।

(ख) बलक्कालाणुणीअमाणेत्ति जं सच्चं अलंकिदम्हि एदेहिं अक्खरेहिं ।

(ग) ता जइ मम हत्थे सअं जेव्व पट्ठाविअ एणं समप्पेसि तदो अधिअलणे ववहालं विणा लहुं णिज्जादमाणाह तव मए अणुबद्धा पीदी हुविस्सदि । अण्णधा मलणन्तिके वेले हुविस्सदि ।

भिलाषो नास्तीत्यर्थः] । देवतेवोपस्थानं [स्तुत्योपचरणम् । यद्वा देवतया उपस्थानं समागमः । तस्य योग्या । तस्यां वेलायां रोहसेनस्य गृहप्रवेशाज्ञादानकाले ।] [अनेन विलोभनं नामाङ्गमुपक्षिप्तम् । 'गुणाख्यानं विलोभनम्' इति तल्लक्षणम् ।] **प्रविश गृहमिति** । [प्रतोद्यमाना सपरुषाक्षरमनुरुध्यमानाऽपि । भाग्यकृतां मद्दैवकृतामवस्थामवेक्ष्य दाक्षिण्यात् न चलति अन्यत्र न गता । यद्यपि गणिकात्वेन लब्धपाटवत्वाद्बहूनि भाषते तथाऽपि अधुना पुरुषपरिचयेन मादृशस्य पुरुषस्य संगत्या प्रगल्भं धृष्टं न भाषते । सविनयमेव वर्ततीत्यर्थः ।] पुष्पिताग्रा वृत्तम् ॥ ५६ ॥ [अज्ञानात् अपरिज्ञातायां त्वयि यः परिजनवदुपचारः आज्ञाकरणादिरूपः तेन ।]

वसन्तसेना—एतेनानुचितभूमिकारोहणेनापराद्धाऽऽर्यं शीर्षेण प्रणम्य प्रसादयामि । (क)

विदूषकः—भो द्वावपि युवां सुखं प्रणम्य कलमकेदारावन्योन्य शीर्षेण शीर्षं समागतौ । अहमप्यधुना करभजानुसदृशेन शीर्षेण द्वावपि युवां प्रसादयामि । (इत्युत्तिष्ठति ।) (ख)

चारुदत्तः—भवतु । तिष्ठतु प्रणयः ।

वसन्तसेना—(स्वगतम् ।) चतुरो मधुरश्चायमुपन्यासः । न युक्तमद्येदृशेनेहागतया मया प्रतिवस्तुम् । भवतु । एवं तावद्भणिष्यामि । (प्रकाशम् ।) आर्य यद्येवमहमार्यस्यानुग्राह्या तदिच्छाम्यहमिममलंकारकमार्यस्य गेहे निक्षेप्तुम् । अलंकारस्य निमित्तमेते पापा अनुसरन्ति । (ग)

चारुदत्तः—अयोग्यमिदं न्यासस्य गृहम् ।

वसन्तसेना—आर्य अलीकम् । पुरुषेषु न्यासा निक्षिप्यन्ते न पुनर्गेहेषु । (घ)

चारुदत्तः—मैत्रेय गृह्यतामयमलंकारः ।

वसन्तसेना—अनुगृहीताऽस्मि । (इत्यलंकारमर्पयति ।) (ङ)

विदूषकः—(गृहीत्वा ।) स्वस्ति भवत्यै । (च)

चारुदत्तः—धिङ् मूर्ख न्यासः खल्वयम् ।

(क) एदिणा अणुचिदभूमिआरोहणेण अवरज्झा अज्जं सीसेण पणमिअ पसादेमि ।

(ख) भो दुवेवि तुम्हे सुखं पणमिअ कलमकेदारा अण्णोण्णं सीसेण सीसं समाअदा । अहं पि इमिणा करहजाणुसरिसेण सीसेण दुवेवि तुम्हे पसादेमि ।

(ग) चदुरो मधुरो अ अअं उवण्णासो । ण जुत्तं अज्ज एरिसेण इध आअदाए मए पडिवसिदुम् । भोदु । एव्वं दाव भणिस्सम् । अज्ज जइ एव्वं अहं अज्जस्स अणुग्गेज्झा ता इच्छे अहं इमं अलंकारअं अज्जस्स गेहे णिक्खिविदुम् । अलंकारस्स णिमित्तं एदे पावा अणुसरन्ति ।

(घ) अज्ज अलीअम् । पुरुसेसु णासा णिक्खिविअन्ति ण गेहेसु ।

(ङ) अणुग्गहिदम्हि । (च) सोत्थि भोदीए ।

अनुचितं भूमिसमारोहणं पक्षद्वारेणावासप्रवेशादिकम् । [कलमः शालिविशेषः केदारः क्षेत्रं च ताविव ।] करभ उष्ट्रशिशुः तस्य जानु तत्सदृशेन । अवर्तुलेन निम्नोन्नतेन चेति भावः । तिष्ठतु प्रणयः आस्तामियं प्रणयोक्तिः । अयं प्रणयः स्नेहः तिष्ठतु स्थिरो भवत्विति गूढाभिसंधिः ।] प्रणय इत्यनेन संभोगप्रार्थना कटाक्षिता । ईदृशेन गृहीतसंभोगोपकरणादिना । पापा अकार्यकारिणः । भग्नत्वाद्रक्षकाभावाच्चायोग्यता ।

---

१ सुसंपण्णा-सुसंपुण्णा-विअ. २ पसादेमि उट्ठेध त्ति. ३ अज्जगेहे.

विदूषकः—(अपवार्य ।) यद्येवं तदा चौरैर्ह्रियताम्–(क)

चारुदत्तः—अचिरेणैव कालेन–

विदूषकः—एषोऽस्या अस्माकं विन्यासः । (ख)

चारुदत्तः—निर्यातयिष्ये ।

वसन्तसेना—आर्य इच्छाम्यहमनेनार्येणानुगम्यमाना स्वकं गेहं गन्तुम् । (ग)

चारुदत्तः—मैत्रेय अनुगच्छ तत्रभवतीम् ।

विदूषकः—त्वमेवैतां कलहंसगामिनीमनुगच्छन्राजहंस इव शोभसे । अहं पुनर्ब्राह्मणो यत्र तत्र जनैश्चतुष्पथोपनीत इवोपहारः कुक्कुरैरिव खाद्यमानो विपत्स्ये । (घ)

चारुदत्तः—एवं भवतु । स्वयमेवानुगच्छामि तत्रभवतीम् । तद्राजमार्गविश्वासयोग्याः प्रज्वाल्यन्तां प्रदीपिकाः ।

विदूषकः—वर्धमानक प्रज्वालय प्रदीपिकाः । (ङ)

चेटी—(जनान्तिकम् ।) अरे तैलेन विना प्रदीपिकाः प्रज्वाल्यन्ते । (च)

विदूषकः—(जनान्तिकम् ।) आश्चर्यम् । ताः खल्वस्माकं प्रदीपिका अपमानितनिर्धनकामुका इव गणिका निःस्नेहा इदानीं संवृत्ताः । (छ)

(क) जइ एव्वं ता चोरेहिं हरिज्जउ— (ख) एसो से अम्हाणं विण्णासो । (ग) अज्ज इच्छे अहं इमिणा अज्जेण अणुगच्छिज्जन्ती सकं गेहं गन्तुम् । (घ) तुमं ज्जेव एदं कलहंसगामिणीं अणुगच्छन्तो राअहंसो विअ सोहसि । अहं उण बम्हणो जहिं तहिं जणेहिं चउप्पहोवणीदो विअ उवहारो कुक्कुरेहिं विअ खज्जमाणो विवज्जिस्सम् । (ङ) वड्ढमाणअ पज्जालेहि पदीविआओ । (च) अले तेल्लेण विणा पदीविआओ पज्जालीअन्ति । (छ) ही । ताओ क्खु अम्हाणं पदीविआओ अवमाणिदणिद्धणकामुआ विअ गणिआ णिस्सिणेहाओ दाणिं संवुत्ता ।

अत्यन्तप्रश्रयवत्त्वादनुग्रहः । चोरेहिं हरिज्जउ इति संधिच्छेदनाम्नस्तृतीयाङ्कस्य सूचनम् । [तेन चेह तृतीयं पताकास्थानकमुक्तम् । 'अर्थोपक्षेपकमनुलीनं सविनयं भवेत् । श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ॥ ' इति ।] चतुष्पथोपनीत इवोपहारो देवताबलिरूपः । ही आश्चर्ये । यत एव निर्धनोऽत एवापमानितः [कामुकः याभिः ।] निःस्नेहा निरनुरागा निस्तैलाश्च । स्नेहोऽनुरागस्तैलं च । भवत्वित्युपसंहा-

---

१ अणु गच्छ॰.

चारुदत्तः—मैत्रेय भवतु । कृतं प्रदीपिकाभिः[1] । पश्य ।

उदयति हि शशाङ्कः कामिनीगण्डपाण्डु-
ग्रहगणपरिवारो राजमार्गप्रदीपः ।
तिमिरनिकरमध्ये रश्मयो यस्य गौराः
स्रुतजल इव पङ्के क्षीरधाराः पतन्ति ॥ ५७ ॥

(सानुरागम्[2]।) भवति वसन्तसेने इदं भवत्या गृहम् । प्रविशतु भवती ।

वसन्तसेना—(सानुरागमवलोकयन्ती[3] निष्क्रान्ता ।)

चारुदत्तः—वयस्य गता वसन्तसेना । तदेहि । गृहमेव गच्छावः ।

राजमार्गो हि शून्योऽयं रक्षिणः संचरन्ति च ।
वञ्चना परिहर्तव्या बहुदोषा हि शर्वरी ॥ ५८ ॥

(परिक्रम्य ।) इदं च सुवर्णभाण्डं रक्षितव्यं त्वया रात्रौ वर्धमानकेनापि दिवा ।

विदूषकः—यथा भवानाज्ञापयति । (क)

(इति निष्क्रान्तौ ।)

इति मृच्छकटिके[4]ऽलंकारन्यासो नाम प्रथमोऽङ्कः ।

(क) जधा भवं आणवेदि ।

रोक्तिः । **उदयतीति** । [कामिन्या गण्ड इव पाण्डुः स्निग्धोज्ज्वलः । ग्रहगणः परिवारः अस्य । राजमार्गस्य प्रदीप इवेति रूपकम् । न तु दीपिकावदल्पप्रदेशवर्तिप्रकाशः । उदयति ।] यस्य हिमांशोस्तमोवृन्दमध्ये शुभ्रा रश्मयः पतन्ति । यथा प्रभूतजले कर्दमे दुग्धधाराः । [मालिनी वृत्तम्] ॥ ५७ ॥ [**राजमार्ग इति** ।] शून्यः जनसंचाररहितः । केवलं रक्षिणः संचरन्ति । तथाऽपि वञ्चना प्रतारणा । वसन्तसेनालंकारापहाररूपेति यावत् । हि यतः शर्वरी रात्रिः बहवः दोषाः स्तेयादिरूपा यस्यां सा तथोक्ता ॥ ५८ ॥

इति महोपाध्यायश्रीपृथ्वीधरकृतौ मृच्छकटिकविवृतौ
न्यासार्पणो नाम प्रथमोऽङ्कः ॥

---

१ दीपिकाभिः. २ उत्थाय सानु०. ३ पश्यन्ती. ४ मृच्छकटिकायाम्.

द्वितीयोऽङ्कः ।

(प्रविश्य ।)

चेटी—मात्राऽऽर्यासकाशं संदेशेन प्रेषिताऽस्मि । तद्यावत्प्रविश्यार्यासकाशं गच्छामि ।(परिक्रम्यावलोक्य च ।) एषाऽऽर्या हृदयेन किमप्यालिखन्ती तिष्ठति । तद्यावदुपसर्पामि । (क)

(ततः प्रविशत्यासनस्था सोत्कण्ठा वसन्तसेना मदनिका च ।)

वसन्तसेना—चेटि ततस्ततः । (ख)

मदनिका—आर्ये न किमपि मन्त्रयसे । किं ततस्ततः । (ग)

वसन्तसेना—किं मया भणितम् । (घ)

चेटी—ततस्तत इति । (ङ)

वसन्तसेना—(सभ्रूक्षेपम् ।) आ एवम् । (च)

(उपसृत्य ।)

प्रथमा चेटी[1]—आर्ये माताऽऽदिशति स्नाता भूत्वा देवतानां पूजां निर्वर्तयेति । (छ)

वसन्तसेना—चेटि विज्ञापय मातरम् । अद्य न स्नास्यामि तद्ब्राह्मण एव पूजां निर्वर्तयत्विति । (ज)

(क) अत्ताए अज्जआसआसं संदेसेण पेसिदम्हि । ता जाव पविसिअ अज्जआसआसं गच्छामि । एसा अज्जआ हिअएण किं पि आलिहन्ती चिट्ठदि । ता जाव उपसप्पामि ।
(ख) हञ्जे तदो तदो । (ग) अज्जए ण किं पि मन्तोसि । किं तदो तदो ।
(घ) किं मए भणिदम् । (ङ) तदो तदो त्ति । (च) आं एव्वम् ।
(छ) अज्जए अत्ता आणवेदि ण्हादा भविअ देवदाणं पूअं णिव्वत्तेहि त्ति ।
(ज) हञ्जे विण्णवेहि अत्तम् । अज्ज ण ण्हाइस्सं ता बम्हणो ज्जेव्व पूअं णिव्वत्तदु त्ति ।

[इत आरभ्य चतुर्थाङ्कसमाप्तिं यावत्प्रतिमुखसंधिः । तल्लक्षणं–'फलप्रधानोपायस्य मुखसंधिनिवेशिनः । लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत् ॥' इति । तदत्र मदनिकामैत्रेयाभ्यां ज्ञाततया वसन्तसेनामात्रादिभिरज्ञाततया च अनुरागरूप बीजस्य लक्ष्यालक्ष्यतयोद्भेदः ।] अत्ताए वसन्तसेनामात्रा । [अत्ता इति मातुः श्वश्र्वाश्च प्राकृते संज्ञा ।] अज्जआसआसं वसन्तसेनासकाशम् । संदेशेन प्रयोजनार्थम् ।[संदेशं दत्त्वेत्यर्थः।] [हञ्जे इति चेटीसंबोधनम् । 'हण्डे हञ्जे हलाऽऽह्वाने नीचां चेटीं सखीं प्रति ' इत्यमरः । 'हञ्जे तदो तदो' इत्युन्माददशारीत्युपन्यासः । अत्र विप्रलम्भशृङ्गाराङ्गभूतः प्रलाप उपक्षिप्तः । तल्लक्षणम्–'अलक्ष्यवाक् प्रलापः स्याच्चेतसो भ्रमणाद्भृशम् ' इति ।

---

1 चेटी.

Love is mighty God who holds his holidays in youthful breasts.

चेटी—यदार्याऽऽज्ञापयति । (इति निष्क्रान्ता ।) (क) fault find

मदनिका—आर्ये स्नेहः पृच्छति न पुरोभागिता । तत्किं न्विदम् । (ख)

वसन्तसेना—मदनिके कीदृशीं मां प्रेक्षसे । (ग)

मदनिका—आर्यायाः शून्यहृदयत्वेन जानामि हृदयगतं कमप्यार्योऽभिलषतीति । (घ)

वसन्तसेना—सुष्ठु त्वया ज्ञातम् । परहृदयग्रहणपण्डिता मदनिका खलु त्वम् । (ङ)

मदनिका—प्रियं मे प्रियम् । कामः खलु नामैष भगवाननुगृहीतो महोत्सवस्तरुणजनस्य । तत्कथयत्वार्या किं राजा राजवल्लभो वा सेव्यते । (च)

वसन्तसेना—चेटि रन्तुमिच्छामि न सेवितुम् । (छ)

मदनिका—विद्याविशेषालंकृतः किं कोऽपि ब्राह्मणयुवा काम्यते । (ज)

वसन्तसेना—पूजनीयो मे ब्राह्मणजनः । (झ)

मदनिका—किमनेकनगराभिगमनजनितविभवविस्तारो वाणिजयुवा वा काम्यते । (ञ)

(क) जं अज्जआ आणवेदि ।

(ख) अज्जए सिणेहो पुच्छदि ण पुरोभाइदा । ता किं णेदम् ।

(ग) मदणिए केरिसिं मं पेक्खसि । (घ) अज्जआए सुण्णहिअअत्तणेण जाणामि हिअअगदं कं पि अज्जआ अहिलसदि त्ति ।

(ङ) सुट्ठु[1] तुए जाणिदम् । परहिअअग्गहणपण्डिआ मदणिआ क्खु तुमम् ।

(च) पिअं मे पिअम् । कामो क्खु णाम एसो भअवं अणुगहिदो[2] महूसवो तरुणजणस्स । ता कधेदु अज्जआ किं राआ राअवल्लहो वा सेवीअदि ।

(छ) हञ्जे रमिदुमिच्छामि ण सेविदुम् ।

(ज) विज्जाविसेसालंकिदो किं को वि बम्हणजुआ[3] कामीअदि ।

(झ) पूअणीओ[4] मे बम्हणजणो ।

(ञ) किं अणेअणअराहिगमणजणिदविहववित्थारो वाणिअजुआ वा कामीअदि ।

अज्जआ वसन्तसेनैव । [स्नेहः पृच्छति स्नेहात्पृच्छामीत्यर्थः ।] पुरोभाइदा पुरोभागिता दोषदर्शिता । ' दोषैकदृक्पुरोभागी ' इत्यमरः । दोषशून्यत्वेनेति भावः । [भगवान् कामः खलु य एवं विकारयति इत्यर्थः । यद्वा भगवान् काम एवाद्यानुगृहीतः इति वाक्यम् ।] ' भअवदा ' इत्यपि पाठः । भगवता हरेण । स्वीकृतोऽनुगृहीतो वा । ण सेविदुम् । कामोपभोगरसिकाऽस्मि न द्रव्यार्थिनीत्यर्थः । पूजनीयाश्च ये भवन्ति

---

१ सुट्ठु क्खु. २ अणवगहीदो. ३ बम्हणो. ४ हञ्जे पूअ०.

'Love at first sight at Kamadevayatana Garden"

वसन्तसेना—हञ्जे उपारूढस्नेहमपि प्रणयिजनं परित्यज्य देशान्तरगमनेन वाणिजजनो महद्वियोगजं दुःखमुत्पादयति । (क)

मदनिका—आर्ये न राजा न राजवल्लभो न ब्राह्मणो न वाणिजजनः । तत्क इदानीं स भर्तृदारिकया काम्यते । (ख)

वसन्तसेना—हञ्जे त्वं मया सह कामदेवायतनोद्यानं गताऽऽसीः । (ग)

मदनिका—आर्ये गताऽस्मि । (घ)

वसन्तसेना—तथाऽपि मामुदासीनेव पृच्छसि । (ङ)

मदनिका—ज्ञातम् । किं स एव येनार्या शरणागताऽभ्युपपन्ना । (च)

वसन्तसेना—किंनामधेयः खलु सः । (छ)

मदनिका—स खलु श्रेष्ठिचत्वरे प्रतिवसति । (ज)

वसन्तसेना—अयि नामास्य पृष्टासि । (झ)

मदनिका—स खल्वार्ये सुगृहीतनामधेय आर्यचारुदत्तो नाम । (ञ)

वसन्तसेना—(सहर्षम् ।) साधु मदनिके साधु । सुष्ठु त्वया ज्ञातम् । (ट)

(क) हञ्जे उवारूढसिणेहं पि पणइजणं परिच्चइअ देसन्तरगमणेण वाणिअजणो महन्तं विओअजं[1] दुक्खं उप्पादेदि । (ख) अज्जए ण राआ ण राअवल्लहो ण बम्हणो ण वाणिअजणो । ता को दाणिं सो भट्टिदारिआए कामीअदि । (ग) हञ्जे तुमं मए सह कामदेवाअदणुज्जाणं गदा आसि । (घ) अज्जए गदम्हि । (ङ) तह वि मं उदासीणा विअ पुच्छसि । (च) जाणिदम् । [2]किं सो ज्जेव्व जेण अज्जआ सरणाअदा अब्भुववण्णा । (छ) किंणामहेओ क्खु सो । (ज) सो क्खु सेट्ठिचत्तरे पडिवसदि । (झ) अइ णाम से[3] पुच्छिदासि । (ञ) सो क्खु अज्जए सुगहिदणामहेओ अज्जचारुदत्तो णाम । (ट) साहु मदणिए साहु । सुट्ठु तुए जाणिदम् ।

तेषां विलासवैमुख्यं सदेति भावः । उवारूढसिणेहं विवृद्धस्नेहम् । भट्टिदारिआए ईश्वरसुतया । [उदासीना मध्यस्था वृत्तान्तमजानतीत्यर्थः । शरणागता गृहं प्रविष्टा ।] सुहिदा सुखयुक्ता । अभ्युपपन्ना स्वीकृता । सुगृहीतनामधेयो दातृत्वेन ।

---

१ विओअदुक्खं. २ अज्जुए किं. ३ संपुच्छि.

मदनिका—(स्वगतम्।) एवं तावत्। (प्रकाशम्।) आर्ये दरिद्रः खलु स श्रूयते। (क)

वसन्तसेना—अत एव काम्यते। दरिद्रपुरुषसंक्रान्तमनाः खलु गणिका लोकेऽवचनीया भवति। (ख)

मदनिका—आर्ये किं हीनकुसुमं सहकारपादपं मधुकर्यः पुनः सेवन्ते। (ग)

वसन्तसेना—अत एव ता मधुकर्य उच्यन्ते। (घ)

मदनिका—आर्ये यदि स मनीषितस्तात्किमर्थमिदानीं सहसा नाभिसार्यते। (ङ)

वसन्तसेना—चेटि सहसाऽभिसार्यमाणः प्रत्युपकारदुर्बलतया मा तावज्जनो दुर्लभदर्शनः पुनर्भविष्यति। (च)

मदनिका—किमत एव सोऽलंकारस्तस्य हस्ते निक्षिप्तः। (छ)

वसन्तसेना—हञ्जे सुष्ठु त्वया ज्ञातम्। (ज)

(क) एव्वं दाव। अज्जए दलिद्दो क्खु सो सुणीअदि।

(ख) अदो ज्जेव्व कामीअदि। दलिद्दपुरिससंकन्तमणा क्खु गणिआ लोए अवअणीआ भोदि।

(ग) अज्जए किं हीणकुसुमं सहआरपादवं महुअरीओ उण सेवन्ति।

(घ) अदो ज्जेव्व ताओ महुअरीओ वुच्चन्ति।

(ङ) अज्जए जइ सो मणीसिदो ता कीस दाणिं सहसा ण अहिसारीअदि।

(च) हञ्जे सहसा अहिसारिअन्तो पच्चुअआरदुब्बलदाए मा दाव जणो दुल्लहदंसणो पुणो भविस्सदि।

(छ) किं अदो ज्जेव्व सो अलंकारओ तस्स हत्थे णिक्खित्तो।

(ज) हञ्जे सुट्ठु दे जाणिदम्।

दरिद्रपुरुषदत्तमना अवचनीया भवति अर्थानभिलाषित्वात्। [अवचनीयऽार्थानभिलाषेण गुणमात्रानुरागेण च वागगोचरमाहात्म्यानुशालिनीत्यर्थः—इति लल्लादीक्षिताः।] अतिस्वश्वारुदत्तो ब्राह्मणः अनध्यापकत्वेन विलासी। अन्यश्च श्रोत्रियः तर्कतन्त्रप्रवीणः पूजनीयः न काम्यो विलासवैमुख्यादित्याशयः। महुअरीओ इति। मधु कुर्वन्ति सेवन्ते। मत्ता इत्यर्थः। [मधु कुर्वन्त्येव केवलं न स्वयं सेवन्ते। तथा गणिका धनार्थमेव केवलं स्वदेहं परोपकरणीकृत्य अलब्धरतयो वृथाजन्मभाजो भवन्तीत्यर्थः। सहसा विस्रम्भोत्पादनात्प्रागभिसार्यमाणः प्रत्युपकारे दुर्बलतया अक्षमतया पुनरात्मानं न दर्शयिष्यति एवं दुर्लभदर्शनः स्यादिति सहसा न गम्यते।]

Thura, a keeper of gambling house shouts - Thus on seeing Samvahak escape.

(नेपथ्ये ।)

अरे भट्टारक दशसुवर्णस्य रुद्धो द्यूतकरः प्रपलायितः प्रपलायितः । तद्गृहाण गृहाण [तिष्ठ तिष्ठ । दूरात्प्रदृष्टोऽसि । (क)

(प्रविश्यापटीक्षेपेण संभ्रान्तः ।)

संवाहकः—आश्चर्यम् । कष्ट एष द्यूतकरभावः । (ख)

नवबन्धनमुक्तयेव गर्दभ्या हा ताडितोऽस्मि गर्दभ्या ।
अङ्गराजमुक्तयेव शक्त्या घटोत्कच इव घातितोऽस्मि शक्त्या १
लेखकव्यापृतहृदयं सभिकं दृष्ट्वा झटिति प्रभ्रष्टः ।
इदानीं मार्गनिपतितः कं नु खलु शरणं प्रपद्ये ॥ २ ॥

तद्यावदेतौ सभिकद्यूतकरावन्यतो मामन्विष्यतः तावदहं विपरीताभ्यां पादाभ्यामेतच्छून्यदेवकुलं प्रविश्य देवीभविष्यामि । (बहुविधं नाट्यं कृत्वा तथा स्थितः ।) (ग)

(क) अले भट्टा दशसुवण्णाह लुद्धु जूदकरु पपलीणु पपलीणु । ता गेण्ह[1] गेण्ह । चिट्ठ चिट्ठ । दूलात्पदिट्ठो सि ।

(ख) हीमाणहे । कट्ठे एशे जूदिअलभावे ।

णवबन्धणमुक्काए[2] विअ गद्दहीए हा ताडिदो म्हि गद्दहीए ।
अङ्गलाअमुक्काए विअ शत्तीए घडुक्को विअ घादिदो म्हि शत्तीए ॥
लेखअवावडहिअअं शहिअ दट्ठूण[3] झत्ति पब्भट्ठे ।
एण्हिं मग्गणिवडिदे कं णु क्खु शलणं पपज्जे ॥

(ग) ता जाव एदे शहिअजूदिअला अण्गदो मं अण्णेशन्ति ताव हंक्के[4] विप्पडीवेहिं पादेहिं एदं शुण्णदेउलं पविशिअ देवीभविश्शम् ।

भट्टेति द्यूतकरस्य संबोधनम् । दशसुवर्णकृते लुद्धु रुद्धः । दश सुवर्णा लभ्या यस्य पार्श्वे स द्यूतकरः प्रपलायितः । अतो गृहाण धारय । 'लब्धः' इति पाठे दशसुवर्णानां द्यूतकरो लब्धः प्रपलायित इत्यर्थः । ['नासूचितस्य पात्रस्य प्रवेशो निर्गमोऽपि च' इत्युक्तेः अत्र संवाहकस्य तिरस्करिणीमाक्षिप्य प्रवेशः सूचनाभावात् ।] सभ्यानुद्दिश्य ब्रूते । हीमाणहे इति विस्मये । कष्ट एष द्यूतकरभावः । **नवबन्धनेत्यादि** । चित्रजातिः । गद्दहीए गर्दभीनामधेय्या । हा कष्टम् । ताडितोऽस्मि । गद्दहीति वराटिकानाम । गर्दभीशक्तिके आर्थी इति प्रसिद्धद्यूतके कपर्दकनामधेये । नवबन्धनान्मुक्तयेव गर्दभ्या पशुविशेषेण ताडितोऽस्मि गर्दभ्या [वराटिकया] । ताडनस्वभावा सा यतः । अङ्गराजेन कर्णेन मुक्तयेव शक्त्या अस्त्रविशेषेण घटोत्कचो भीमसेनसुत इव ताडितोऽस्मि शक्त्या ॥ १ ॥ **लेखकेत्यादि** । गाथा । [लेख एव लेखकः । स्वार्थे कन् । यद्वा लिखतीति लेखकः । तत्र व्यापृतहृदयमासक्तचित्तं] लेखकव्यापृतहृदयं सभिकं दृष्ट्वा [तस्य दर्शनपथं विहायेत्यर्थः ।] झटिति प्रभ्रष्टः । मार्गनिपतितः तन्मार्गगतः] । कं नु खल्विति विमर्शे ॥ २ ॥ विप्रतीपाभ्यां विपरीताभ्याम् । देवीभविष्यामि । [देवतावत्प्रतिमास्थाने स्थास्यामि ।]

---

१ गेण्हध गेण्हध. २ मुक्कापुए. ३ दश्शूण...पब्भश्टे. ४ इदो.

(ततः प्रविशति माथुरो द्यूतकरश्च ।)

माथुरः—अरे भट्टारक दशसुवर्णस्य रुद्धो द्यूतकरः प्रपलायितः प्रपलायितः । तद्गृहाण गृहाण । तिष्ठ तिष्ठ । दूरात्प्रदृष्टोऽसि । (क)

द्यूतकरः—

यदि व्रजसि पातालमिन्द्रं शरणं च सांप्रतं यासि ।
सभिकं वर्जयित्वैकं रुद्रोऽपि न रक्षितुं तरति ॥ ३ ॥ (ख)

माथुरः—

कुत्र कुत्र सुसभिकविप्रलम्भक पलायसे रे भयपरिवेपिताङ्गक ।
पदे पदे समविषमं स्खलन्कुलं यशोऽतिकृष्णं कुर्वन् ॥ ४ ॥ (ग)

द्यूतकरः—(पदं वीक्ष्य ।) एष व्रजति । इयं प्रनष्टा पदवी । (घ)

माथुरः—(आलोक्य सवितर्कम् ।) अरे विप्रतीपौ पादौ । प्रतिमाशून्यं देवकुलम् । (विचिन्त्य ।) धूर्तो द्यूतकरो विप्रतीपाभ्यां पादाभ्यां देवकुलं प्रविष्टः । (ङ)

द्यूतकरः—ततोऽनुसरावः । (च)

माथुरः—एवं भवतु । (छ)

(उभौ देवकुलप्रवेशं निरूपयतः । दृष्ट्वाऽन्योन्यं संज्ञाप्य ।)

(क) अले भट्टा दशसुवण्णाह लुद्धु जूदकरु पपलीणु पपलीणु । ता गेण्ह गेण्ह । चिट्ठ चिट्ठ । दूलात्पदिट्ठो सि ।

(ख) जइ वज्जसि पाआलं इन्दं शलणं च संपदं जासि ।
सहिअं वज्जिअ एक्कं रुद्दो वि ण रक्खिदुं तरइ ॥

(ग) कहिं कहिं सुसहिअविप्पलम्भआ पलासि ले भअपालिवेविदङ्गआ ।
पदे पदे समो[2]विसमं खलन्तआ कुलं जसं अदिकसणं कलेन्तआ ॥

(घ) एसो वज्जदि । इअं पणट्ठा पदवी ।

(ङ) अले विप्पदीवु पादू । पडिमाशुण्णु देउलु । धुत्तु जूदकरु विप्पदीवेहिं पादेहिं देउलं पविट्ठो । (च) ता अणुसरेम्ह । (छ) एव्वं भोदु ।

देवीति च्व्यन्तम् । **यदि व्रजसीत्यादि** । आर्या । [तरति समर्थो भवेदित्यर्थः] ॥ ३ ॥ **कुत्र कुत्रेत्यादि** । रुचिरा वृत्तम् । [विप्रलम्भक प्रतारक ।] रे भयपरिवेपमानाङ्गक । पदे पदे समविषमं यथा स्यादेवं स्खलन्कुलं यशश्चातिकृष्णं कुर्वन् ॥ ४ ॥ [पदं संवाहकचरणचिह्नम् । विप्रतीपेति । ढक्कभाषायामस्यामुकारान्तानि प्रथमान्तादीनीत्यवधेयम्–इति ल. दी.]। अरे विप्रतीपपादशून्यं देवकुलम् । प्रयोजनाभावेन नात्र मानुष इति भावः । 'धूर्तो द्यूतकरो विप्रतीपाभ्यां पादाभ्यां देवकुलं प्रविष्टः' इत्येके । [संज्ञाप्येति–अयं संवाहक

---

१ नाटयतः. २ शमाविशमम्.

द्यूतकरः—कथं काष्ठमयी प्रतिमा । (क)

माथुरः—अरे न खलु न खलु । शैलप्रतिमा । (इति बहुविधं चालयति । संज्ञाप्य च ।) एवं भवतु । एहि । द्यूतेन क्रीडावः । (इति बहुविधं द्यूतं क्रीडतः ।) (ख)

संवाहकः—(द्यूतेच्छाविकारसंवरणं बहुविधं कृत्वा । स्वगतम् ।) अरे !

कत्ताशब्दो निर्नाणकस्य हरति हृदयं मनुष्यस्य ।
ढक्काशब्द इव नराधिपस्य प्रभ्रष्टराज्यस्य ॥ ५ ॥

जानामि न क्रीडिष्यामि सुमेरुशिखरपतनसंनिभं द्यूतम् ।
तथाऽपि खलु कोकिलमधुरः कत्ताशब्दो मनो हरति ॥६॥ (ग)

द्यूतकरः—मम पाठे मम पाठे । (घ)

माथुरः—न खलु । मम पाठे मम पाठे । (ङ)

(क) कधं कट्ठमयी पडिमा ।

(ख) अले ण हु ण हु । शैलपडिमा । एव्वं भोदु । एहि । जूदं किलेम्ह ।

(ग) अले ।

कत्ताशद्दे णिण्णाणअश्श हलइ हडकं मनुश्शश्श ।
ढक्काशद्दे व्व णडाधिवश्श पब्भट्टलज्जश्श ॥

जाणामि ण कीलिश्शं शुमेलुशिहलपडणशण्णिहं जूअम् ।
तह वि हु कोइल्मडुले कत्ताशद्दे मणं हलदि ॥

(घ) मम पाठे मम पाठे ।

(ङ) ण हु । मम पाठे मम पाठे ।

एव प्रतिमारूपेणात्मानं निह्नुवान इह तिष्ठतीति संज्ञापनं कृत्वेत्यर्थः ।] संज्ञापनं प्रतिमायाम् । [शिलाया इयं शैली सा चासौ प्रतिमा च शैलप्रतिमा । संवरणं गोपनं स्वस्य प्रतिमारूपेण स्थितत्वात्—इति ल. दी.]। **कत्तेति** । द्यूतकरणं यया सा कत्ता । काड ·(उ) इति प्रसिद्धः । नान्दीपूरा इति प्रसिद्धे द्यूत इत्यन्ये । [नान्दी नक्की इति भाषायाम् । पूर्वः पूरा इति भाषया प्रसिद्धः । निर्गतं नाणकमपि यस्य यस्माद्वा स तथा तस्य निर्नाणकस्य । इति ल. दी]। कत्ताशब्दो निर्नाणकस्य निर्धनस्य ॥५॥ **जानामीति** । सुमेरुशिखरपतनसंनिभं द्यूतम् । [सुमेरोः शृङ्गात्पतनवत्] सुखविनाशकमित्यर्थः । कोकिलमधुरः [कोकिलशब्दवन्मधुरः] ॥ ६ ॥ मम पाठ इत्यार्थी

---

१ चालयतः. २ क्रीडति.

संवाहकः—(अन्यतः सहसोपसृत्य ।) ननु मम पाठे । (क)

द्यूतकरः—लब्धः पुरुषः । (ख)

माथुरः—(गृहीत्वा ।) अरे लुप्तदण्डक गृहीतोऽसि । प्रयच्छ तद्दशसुवर्णम् । (ग)

संवाहकः—अद्य दास्यामि । (घ)

माथुरः—अधुना प्रयच्छ । (ङ)

संवाहकः—दास्यामि । प्रसादं कुरु । (च)

माथुरः—अरे ननु सांप्रतं प्रयच्छ । (छ)

संवाहकः—शिरः पतति । (इति भूमौ पतति ।) (ज)

(उभौ बहुविधं ताडयतः ।)

माथुरः—एष त्वं खलु द्यूतकरमण्डल्या बद्धोऽसि । (झ)

संवाहकः—(उत्थाय सविषादम् ।) कथं द्यूतकरमण्डल्या बद्धोऽस्मि। कष्टम् । एषोऽस्माकं द्यूतकराणामलङ्घनीयः समयः । तस्मात्कुतो दास्यामि । (ञ)

माथुरः—अरे गण्डः क्रियतां क्रियताम् । (ट)

संवाहकः—एवं करोमि । (द्यूतकरमुपस्पृश्य ।) अर्धं तुभ्यं ददामि अर्धं मे मुञ्चतु । (ठ)

द्यूतकरः—एवं भवतु । (ड)

(क) णं मम पाठे ।

(ख) लद्धे गोहे । (ग) अले पेदण्डा गहीदो सि । पअच्छ तं दशसुवण्णम् ।

(घ) अज्ज दइश्शम् । (ङ) अहुणा पअच्छ ।

(च) दइश्शं । पशादं कलेहि । (छ) अले णं संपदं पअच्छ ।

(ज) शिलु पडदि । (झ) एसुं तुमं हु जूदिअरमण्डलीए बद्धो सि ।

(ञ) कधं जूदिअलमण्डलीए बद्धो म्हि । ही । एशे अम्हाणं जूदिअलाणं अलङ्घणीए शमए । ता कुदो दइश्शम् । (ट) अले गंण्डे कुलु कुलु ।

(ठ) एव्वं कलेमि । अद्धं ते देमि अद्धं मे मुञ्चदु । (ड) एव्वं भोदु ।

द्यूतकरोक्तिविशेषः । गोहे पुरुषः मनुष्यः । पेदण्डा लुप्तदण्डक । उभे अपि देशी । शिरः पतति । भ्रमतीत्यर्थः । इति भूमौ निपत्य स्थितः । ही कष्टम् । अस्माभिः सर्वः समय उल्लङ्घ्यते । एषोऽस्माकं द्यूतकराणामलङ्घ्यः समयः । 'गण्डं गण्डो लम्भकः' इति पूर्वटीका । [उपस्पृश्य करे धृत्वा ।] अर्धं सभिकेन

---

१ एसु तुहं जूदिमण्डलीए बद्धोसि । इति द्यूतमण्डलीं कृत्वा तथा करोति. २ गन्धु.

संवाहकः—(सभिकमुपगम्य ।) अर्धस्य गण्डं करोमि । अर्धमपि म आर्यो मुञ्चतु । (क)

माथुरः—को दोषः । एवं भवतु । (ख)

संवाहकः—(प्रकाशम् ।) आर्य अर्धं त्वया मुक्तम् । (ग)

माथुरः—मुक्तम् । (घ)

संवाहकः—(द्यूतकरं प्रति ।) अर्धं त्वयाऽपि मुक्तम् । (ङ)

द्यूतकरः—मुक्तम् । (च)

संवाहकः—सांप्रतं गमिष्यामि । (छ)

माथुरः—प्रयच्छ तद्दशसुवर्णम् । कुत्र गच्छसि । (ज)

संवाहकः—प्रेक्षध्वं प्रेक्षध्वं भट्टारकाः । हा सांप्रतमेव एकस्यार्धे गण्डः कृतः अपरस्यार्धं मुक्तम् । तथाऽपि मामबलं सांप्रतमेव याचते । (झ)

माथुरः—(गृहीत्वा ।) धूर्त माथुरोऽहं निपुणः । अत्र नाहं धूर्तयामि । तत्प्रयच्छ तल्लुप्तदण्डक सर्वं सुवर्णं सांप्रतम् । (ञ)

संवाहकः—कुतो दास्यामि । (ट)

माथुरः—पितरं विक्रीय प्रयच्छ । (ठ)

संवाहकः—कुतो मे पिता । (ड)

(क) अद्धश्श गण्डे[1] कलेमि । अद्धं पि मे अज्जो मुञ्चदु ।

(ख) को दोसु । एव्वं भोदु । (ग) अज्ज अद्धे[2] तुए मुक्के ।

(घ) मुक्के । (ङ) अद्धे तुए वि मुक्के । (च) मुक्के ।

(छ) संपदं गमिश्शम् । (ज) पअच्छ तं दशसुवण्णम् । कहिं गच्छसि ।

(झ) पेक्खध पेक्खध भट्टालआ । हा शम्पदं ज्जेव्व एक्काह अद्धे गण्डे कडे अवलाह अद्धे मुक्के । तह वि मं अबलं शम्पदं ज्जेव्व मग्गदि ।

(ञ) धुत्त माथुरु अहं णिउणु । एत्थ[3] ण अहं धुत्तिज्जामि । ता पअच्छ तं पेदण्डआ सव्वं सुवण्णं संपदम् । (ट) कुदो दइश्शम् ।

(ठ) पिदरु विक्किणिअ पअच्छ । (ड) कुदो मे पिदा ।

मुक्तम् । अर्धं द्यूतकरेण । उभाभ्यां राशिरेव मुक्तः । इति मुक्तदेयत्वाद्यामीति ब्रूते । भट्टारका इति मध्यस्थान्संबोधयति । अद्धे अर्धेन । गण्डे कडे । एकस्य सभिकस्यार्धे गण्डः कृतः । अपराह अद्धेण मुक्के इत्यपरस्य द्यूतकरस्यार्धेन मुक्तोऽस्मि । तच्च सभिकेनैवोपेक्षितम् । अत्र माथुरोऽहं निपुणः । एत्थ तुए अत्र त्वया । धुत्तिज्जामि धूर्त्यें प्रतार्ये । पेदण्डा लुप्तदण्डक । कुत इति लाभोपायप्रश्ने । [आकाशे–'असंबोध्याऽ-

---

१ गन्धु. २ अद्धं. ३ एहिं.

'The Gambler is a King without a Throne'

माथुरः--मातरं विक्रीय प्रयच्छ । (क)

संवाहकः---कुतो मे माता । (ख)

माथुरः--आत्मानं विक्रीय प्रयच्छ । (ग)

संवाहकः--कुरुत प्रसादम् । नयत मां राजमार्गम् । (घ)

माथुरः--प्रसर । (ङ)

संवाहकः--एवं भवतु । (परिक्रामति ।) आर्याः क्रीणीध्वं मामस्य सभिकस्य हस्ताद्दशभिः सुवर्णकैः । (दृष्ट्वा । आकाशे ।) किं भणथ-- ' किं करिष्यसि ' इति । गेहे ते कर्मकरो भविष्यामि । कथमदत्त्वा प्रतिवचनं गतः । भवत्वेवम् । इममन्यं भणिष्यामि । (पुनस्तदेव पठति ।) कथमेषोऽपि मामवधीर्य गतः । हा आर्यचारुदत्तस्य विभवे विघटिते एष वर्ते मन्दभाग्यः । (च)

माथुरः--ननु देहि । (छ)

संवाहकः--कुतो दास्यामि । (इति पतति ।) (ज)

(माथुरः कर्षति ।)

संवाहकः--आर्याः परित्रायध्वं परित्रायध्वम् । (झ)

(ततः प्रविशति दर्दुरकः ।)

दर्दुरकः--भोः द्यूतं हि नाम पुरुषस्यासिंहासनं राज्यम् ।

न गणयति पराभवं कुतश्चिद्धरति ददाति च नित्यमर्थजातम् ।
नृपतिरिव निकाममायदर्शी विभववता समुपास्यते जनेन ॥ ७ ॥

(क) मादरु विक्किणिअ पअच्छ । (ख) कुदो मे मादा । (ग) अप्पाणं विक्किणिअ पअच्छ । (घ) कलेध पशादम् । णेध मं लाजमग्गम् । (ङ) पसरु । (च) एव्वं भोदु । अज्जा क्किणिध मं इमश्श शहिअश्श हत्थादो दशेहिं शुवण्णकेहिं । किं भणाध--'किं कलइश्शशि' त्ति । गेहे दे कम्मकले हुविश्शम् । कधं अदइअ पडिवअणं गदे । भोदु एव्वम् । इमं अण्णं भणइस्सम् । कधं एशे वि मं अवधीलिअ गदे । हा अज्जचालुदत्तस्स विहवे विहडिदे एशे वट्टामि मन्दभाए । (छ) णं देहि । (ज) कुदो दइश्शम् । (झ) अज्जा पलित्ताअध पलित्ताअध ।

दृष्टवक्री वाक्स्यादाकाशभाषितम्' इत्युक्तम् । प्रकृते त्वसंबोध्या (न विद्यते संबोध्यो यस्यां) वागियमिति बोध्यम् इति ल.दी.] । सहिअस्स हत्थादो सभिकस्य पार्श्वादित्यर्थः । हा आर्यचारुदत्तस्य विभवे विघटिते तस्मिन्निर्धने एष एतादृशावस्थो वर्ते । नेति । [कुतश्चित्क-

अपि च ।

द्रव्यं लब्धं द्यूतेनैव दारा मित्रं द्यूतेनैव ।
दत्तं भुक्तं द्यूतेनैव सर्वं नष्टं द्यूतेनैव ॥ ८ ॥

अपि च । Technical terms of playing.

त्रेताहृतसर्वस्वः पावरपतनाच्च शोषितशरीरः ।
नर्दितदर्शितमार्गः कटेन विनिपातितो यामि ॥ ९ ॥

(अग्रतोऽवलोक्य ।) अयमस्माकं पूर्वसभिको माथुर इत एवाभिवर्तते । भवतु । अपक्रमितुं न शक्यते । तदवगुण्ठयाम्यात्मानम् ।

(बहुविधं नाट्यं कृत्वा स्थितः । उत्तरीयं निरीक्ष्य ।)

अयं पटः सूत्रदरिद्रतां गतो ह्ययं पटश्छिद्रशतैरलंकृतः ।
अयं पटः प्रावरितुं न शक्यते ह्ययं पटः संवृत एव शोभते ॥ १० ॥

अथ वा किमयं तपस्वी करिष्यति । यो हि

पादेनैकेन गगने द्वितीयेन च भूतले ।
तिष्ठाम्युल्लम्बितस्तावद्यावत्तिष्ठति भास्करः ॥ ११ ॥

माथुरः—दापय दापय । (क)

संवाहकः—कुतो दास्यामि । (ख)

माथुरः—(कर्षति ।)

(क) दापय दापय । (ख) कुदो दइस्सम् ।

स्माच्चिदपि पराभवं न गणयति चिन्तयति । नृपः स्वसामर्थ्यात् । द्यूतमपि द्यूतप्रसक्तस्य मानावमानविगणनादित्यर्थः । नृपः व्यवहारानुरोधेन द्यूतं च जयापजययोरनियमात् नित्यमर्थगतिं हरति ददाति च । निकाममत्यन्तमायं लाभं पश्यतीति आयदर्शी नृपः] अतिशयनायस्य दर्शको राजेश्वरेणापि पुरुषेण सेव्यते । उपमा । पुष्पिताग्रा छन्दः] ॥ ७ ॥ द्रव्यं लब्धमित्यादि । [कारकदीपकमलंकारः ।] विद्युन्माला वृत्तम् ॥ ८ ॥ त्रेतेति । त्रेता 'तीया' इति प्रसिद्धः । पावरो 'दूआ' इति ख्यातः । नर्दितो 'नान्दी' इति प्रसिद्धः । [नर्दितशतनेन दर्शितो मार्गो यस्य स तादृशः । गृहं गच्छेति मार्गः-लल्ली] कटेन 'पूरा' इति प्रसिद्धेन । 'पावरः पूरा कटो दूआ' इति केचित् ॥९॥ अयमिति । [अयं पटः सूत्राणां दरिद्रता जीर्णतया तत्र तत्र लुप्तता तां गतः । सूत्राणां नाशात् । प्रावरितुं परिधातुम् । वंशस्थं वृत्तम्] ॥१०॥ तपस्वी वराकः । पादेनेति । [एकेन पादेन उन्नमितेनेत्यर्थः । यावत्तिष्ठति भास्करः आसायंकालमित्यर्थः । अनेनैवं क्लेशसहस्य मम माथुरकात्कुतो भयमिति

---

१ जग्धं. २ द्वापर.

दर्दुरकः—अये किमेतदग्रतः । (आकाशे ।) किं भवानाह—अयं द्यूतकरः सभिकेन खलीक्रियते न कश्चिन्मोचयतीति । नन्वयं दर्दुरो मोचयति । (उपसृत्य ।) अन्तरमन्तरम् । (दृष्ट्वा ।) अये कथं माथुरो धूर्तः । अयमपि तपस्वी संवाहकः ।

यः स्तब्धं दिवसान्तमानतशिरा नास्ते समुल्लम्बितो
यस्योद्घर्षणलोष्टकैरपि सदा पृष्ठे न जातः किणः ।
यस्यैतच्च न कुक्कुरैरहरहर्जङ्घान्तरं चर्व्यते
तस्यात्यायतकोमलस्य सततं द्यूतप्रसङ्गेन किम् ॥ १२ ॥

भवतु । माथुरं तावत्सान्त्वयामि । (उपगम्य ।) माथुर अभिवादये ।

माथुरः—(प्रत्यभिवादयते ।)

दर्दुरकः—किमेतत् ।

माथुरः—अयं दशसुवर्णं धारयति । (क)

दर्दुरकः—ननु कल्यवर्तमेतत् ।

माथुरः—(दर्दुरस्य कक्षातरुलुण्ठीकृतं पटमाकृष्य ।) भर्तारः पश्यत पश्यत । जर्जरपटप्रावृतोऽयं पुरुषो दशसुवर्णं कल्यवर्तं भणति । (ख)

दर्दुरकः—अरे मूर्ख नन्वहं दशसुवर्णान्कटकरणेन प्रयच्छामि । तत्किं यस्यास्ति धनं स किं क्रोडे कृत्वा दर्शयति । अरे

(क) अअं दशसुवण्णं धालेदि । (ख) भट्टा पश्शत पश्शत । जज्जरपडप्पावुदो अअं पुलिसो दशसुवण्णं कल्लवत्तं भणादि ।

ध्वनितम्] ॥ ११ ॥ खलीक्रियते भर्त्स्यते । [कर्षणाद्युपमर्दपात्रं क्रियते इत्यर्थः इति ल० दी०] । अन्तरमन्तरमिति जनसंमर्दे प्रवेशायावकाशप्रार्थना । [संवाहकस्य द्यूतक्रीडाकरणाक्षमत्वं द्योतयति—] य इति । [यः । अहमिवेति पूरणीयम् । समुल्लम्बितः सन् दिवसान्तं आनतं शिरो यस्य तथा नास्ते । यस्य मम पृष्ठे इव उद्धर्षणं लोष्ठकैः पणीकृतार्थादाने सभिकादिभिः कृतं पृष्ठघर्षणं तदर्थं लोष्ठकैः कृतः किणः न जातः । यस्य च मम इव जङ्घान्तरदेशः कुक्कुरैः सदा न चर्व्यते । तस्य अस्य संवाहकस्य अत्यायतकोमलस्य अत्यन्तकोमलस्य । यद्वा अत्यायतः विपुलशरीरश्चासौ कोमलश्च तस्य द्यूतप्रसङ्गेन कोऽर्थः । न कोपीऽत्यर्थः । अप्रस्तुतप्रशंसालंकारः । शार्दूलविक्रीडितं वृत्तम् ।] उद्धर्षणः संघर्षणः । किणः 'घाटिः' इति प्रसिद्धः । 'कुक्कुरैश्चर्व्यते' इति पाठो व्यक्त एव । अत्यायतो विपुलशरीरः तथा कोमलश्च । 'व्यायतोऽकृतश्रमः' इति पूर्वटीका ॥ १२ ॥ [लुण्डीकृतं गोलीकृतम् । भट्टा इति संबुद्धिर्जनान्प्रति । ल० दी०] कल्यवर्तं प्रातर्भोजनम् । तत्साधनमेतत् द्रव्यमिदमित्यर्थः । जीर्णपटसंवृतः । [कटकरणेन पूरापतनेन । त्वमधुना देहीति यदि वदेन्माथुरस्तत्राह—तत्किमित्यादि । क्रोडे उत्सङ्गे ।

---

१ मोचयत्येनम्. २ दर्दुरकक्षा०, ०कक्षलुण्डीकृतं.

दुर्वर्णोऽसि विनष्टोऽसि दशस्वर्णस्य कारणात्।
पञ्चेन्द्रियसमायुक्तो नरो व्यापाद्यते त्वया ॥ १३ ॥

माथुरः—भर्तः तव दशसुवर्णं कल्यवर्तः। ममैष विभवः। (क)

दर्दुरकः—यद्येवं श्रूयतां तर्हि। अन्यांस्तावद्दश सुवर्णानस्यैव प्रयच्छ। अयमपि द्यूतं शीलयतु।

माथुरः—तत्किं भवतु। (ख)

दर्दुरकः—यदि जेष्यति तदा दास्यति।

माथुरः—अथ न जयति। (ग)

दर्दुरकः—तदा न दास्यति।

माथुरः—अथ न युक्तं जल्पितुम्। एवमाचक्षाणस्त्वं प्रयच्छ धूर्तक। अहमपि नाम माथुरो धूर्तो द्यूतं मिथ्याऽऽदर्शयामि। अन्यस्मादप्यहं न बिभेमि। धूर्त खण्डितवृत्तोऽसि त्वम्। (घ)

दर्दुरकः—अरे कः खण्डितवृत्तः।

माथुरः—त्वं खलु खण्डितवृत्तः। (ङ)

दर्दुरकः—पिता ते खण्डितवृत्तः। (संवाहकस्यापक्रमितुं संज्ञां ददाति।)

माथुरः—वेश्यापुत्र नन्वेवमेव द्यूतं त्वया सेवितम्। (च)

(क) भट्टा तुए दशसुवण्णु कल्लवत्तु। मए एसु विहवु।

(ख) तत्किं भोदु। (ग) अह ण जिणादि।

(घ) अह ण जुत्तं जंप्पिदुम्। एव्वं अंक्खन्तो तुमं पयच्छ धुत्तआ। अहं पि णाम माथुरु धुत्तु जूदं मिच्छा आदंसआमि। अण्णस्स वि अहं ण बिभेमि। धुत्ता खण्डिअवुत्तो सि तुमम्। (ङ) तुमं हु खण्डिअवुत्तो।

(च) गोसाविआपुत्ता णं एव्वं ज्जेव जूदं तुए सेविदम्।

इति ल० दी०]। **दुर्वर्ण इति**। [दुष्टः वर्णः यस्य स दुर्वर्णः हीनजातिः। नीच इत्यर्थः। यद्वा क्रोधावेशात् दूषितमुखरागः। विनष्टोऽसि क्रूराचरणाद्धतोऽसि। पञ्चेन्द्रियाणि चक्षुरादीनि ज्ञानेन्द्रियाणि। नरः न तु पशुः] ॥ १३ ॥ भट्टा इति संबोधनोक्तिः। तदेवं सति किम्। अथायं न दढं भद्रं जयतु। पाठान्तरे तु—अह अथ। भद्रकं जन्यम्। [खण्डितवृत्तः प्रतारक इत्यर्थः इति ल० दी०]। एवमहं पत्तुआ धुत्तिज्जामि प्रतार्ये। अहमपि नाम मथुराभवो द्यूतकरो द्यूतं मिथ्या दर्शयामि। अन्यस्माच्च नाहं बिभेमि। अहमेवान्यं निर्भयः प्रतारयामि। न तु मामन्य इत्यर्थः। तेन त्वमपि धूर्तोऽसीति भावः। गोसाविआ वेश्या।

---

१ उच्छिन्नोऽसि. २ भट्टारु एदस्श. ३ जाम्पिदुं. ४ आचक्खन्तो. ५ माथुरो.

दर्दुरकः—मयैवं द्यूतमासेवितम् ।

माथुरः—अरे संवाहक प्रयच्छ तद्दशसुवर्णम् । (क)

संवाहकः--अद्य दास्यामि । तावद्दास्यामि । (ख)

(माथुरः कर्षति ।)

दर्दुरकः--मूर्ख परोक्षे खलीकर्तुं शक्यते न ममाग्रतः खलीकर्तुम् ।

(माथुरः संवाहकमाकृष्य घोणायां मुष्टिप्रहारं ददाति । संवाहकः सशोणितं मूर्च्छां नाटयन्भूमौ पतति । दर्दुरकं उपसृत्यान्तरयति । माथुरो दर्दुरं ताडयति । दर्दुरो विप्रतीपं ताडयति ।)

माथुरः--अरे अरे दुष्ट पुंश्चलीपुत्रक फलमपि प्राप्स्यसि । (ग)

दर्दुरकः--अरे मूर्ख अहं त्वया मार्गगत एव ताडितः । श्वो यदि राजकुले ताडयिष्यसि तदा द्रक्ष्यसि ।

माथुरः--एष प्रेक्षिष्ये । (घ)

दर्दुरकः--कथं द्रक्ष्यसि ।

माथुरः—(प्रसार्य चक्षुषी ।) एवं प्रेक्षिष्ये । (ङ)

(दर्दुरो माथुरस्य पांशुना चक्षुषी पूरयित्वा संवाहकस्यापक्रमितुं संज्ञां ददाति । माथुरोऽक्षिणी निगृह्य भूमौ पतति । संवाहकोऽपक्रामति ।)

दर्दुरकः--(स्वगतम् ।) प्रधानसभिको माथुरो मया विरोधितः । तन्नात्र युज्यते स्थातुम् । कथितं च मम प्रियवयस्येन शर्विलकेन यथा किल आर्यकनामा गोपालदारकः सिद्धादेशेन समादिष्टो राजा भविष्यतीति । सर्वश्चास्मद्विधो जनस्तमनुसरति । तदहमपि तत्समीपमेव गच्छामि । (इति निष्क्रान्तः ।)

संवाहकः--(सत्रासं परिक्रम्य । दृष्ट्वा ।) एतत्कस्याप्यपावृतपक्षद्वारकं गेहम् । तदत्र प्रविशामि । (प्रवेशं रूपयित्वा । वसन्तसेनामालोक्य ।) आर्ये शरणागतोऽस्मि । (च)

वसन्तसेना--अभयं शरणागतस्य । चेटि पिधेहि पक्षद्वारकम् । (छ)

(क) अले संवाहआ पअच्छ तं दशसुवण्णम् । (ख) अज्ज दइश्शम् । दाव दइश्शं । (ग) अले अले दुट्ठ छिणालिआपुत्तअ फलं पि पाविहासि ।

(घ) एसु पेक्खिस्सम् । (ङ) एव्वं पेक्खिस्सम् । (च) एशे कश्श वि अपावुदपक्खदुआलके गेहे । ता एत्थ पविशिश्शम् । अज्जे शलणागदे म्हि ।

(छ) अभअं सरणागदस्स । हञ्जे ढक्केहि पक्खदुआरअम् ।

ढक्केहि पिधेहि । तुलिदमाकलितम् । **य आत्मेत्यादि** । वैतालीयं छन्दः । [यः नरः

---

१ दर्दुरः. २ मार्गा०. ३ अले दुह. ४ अपलावुद (अपरावृत); अणपा०.

(चेटी तथा करोति ।)

वसन्तसेना—कुतस्ते भयम् । (क)

संवाहकः—आर्ये धनिकात् । (ख)

वसन्तसेना—चेटि सांप्रतमपावृणु पक्षद्वारकम् । (ग)

संवाहकः—(आत्मगतम् ।) कथं धनिकात्तुलितमस्या भयकारणम् । सुष्ठु खल्वेवमुच्यते ।

य आत्मबलं ज्ञात्वा भारं तुलितं वहति मनुष्यः ।
तस्य स्खलनं न जायते न च कान्तारगतो विपद्यते ॥ १४ ॥

अत्र लक्षितोऽस्मि । (घ)

माथुरः—(अक्षिणी प्रमृज्य । द्यूतकरं प्रति ।) अरे देहि देहि । (ङ)

द्यूतकरः—भर्तः यावदेव वयं दर्दुरेण कलहायितास्तावदेव स पुरुषोऽपक्रान्तः । (च)

माथुरः—तस्य द्यूतकरस्य मुष्टिप्रहारेण नासिका भग्नाऽऽसीत् । तदेहि । रुधिरपथमनुसरावः । (छ)

(अनुसृत्य ।)

द्यूतकरः—भर्तः वसन्तसेनागृहं प्रविष्टः सः । (ज)

माथुरः—भूतानि सुवर्णानि । (झ)

द्यूतकरः—राजकुलं गत्वा निवेदयावः । (ञ)

(क) कुदो दे भअम् । (ख) अज्जे धणिकादो ।

(ग) हञ्जे संपदं अवावुणु पक्खदुआरअम् ।

(घ) कधं धणिकादो तुलिदं शे भअकालणम् । शु् क्खु एव्वं वुच्चदि ।

जे अत्तबलं जाणिअ भालं तुलिदं वहेइ माणुस्से ।
ताह खलणं ण जाअदि ण अ कन्तालगदो विवज्जदि ॥

एत्थ लक्खिदोम्हि । (ङ) अले देहि देहि ।

(च) भट्टा जावदेव अम्हे दद्दुरेण कलहाविदा तावदेव सो गोहो अवक्कन्तो ।

(छ) तस्स जूदकलस्स मुट्टिप्पहालेण णासिका भग्गा आसि । ता एहि । रुहिरपहं अणुसरेम्ह । (ज) भट्टा वसन्तसेणागेहं पविट्ठो सो ।

(झ) भूदाइं सुवण्णाइं । (ञ) लाअउलं गदुअ णिवेदेम्ह ।

तुलितं वोढुं शक्य इति निश्चितं भारं वहति सः कान्तारगतः कृच्छ्रगतोऽपि न विपद्यते] ॥ १४ ॥ तुलितं कलितमिति ' वा पदान्त-' इति बिन्दोर्लघुत्वम् । वसन्तसेनाया अशक्यविषये व्यापार उक्तः । गोहो मनुष्यः । तस्य दुरात्मनो मया मुष्टिप्रहारेण नासा भग्ना । तदागच्छतु । चिरमेतदनुसरावः । एहि तावत् । अदो अतः ।

---

१ लाभं.

माथुरः—एष धूर्तोऽतो निष्क्रम्यान्यत्र गमिष्यति । तदुपरोधेनैव गृह्णीवः । (क)

वसन्तसेना—(मदनिकायाः संज्ञां ददाति ।)

मदनिका—कुत आर्यः । को वाऽऽर्यः । कस्य वाऽऽर्यः । कां वा वृत्तिमार्य उपजीवति । कुतो वा भयम् । (ख)

संवाहकः—श्रृणोत्वार्या । आर्ये पाटलिपुत्रं मे जन्मभूमिः । गृहपतिदारकोऽहम् । संवाहकस्य वृत्तिमुपजीवामि । (ग)

वसन्तसेना—सुकुमारा खलु कला शिक्षिताऽऽर्येण । (घ)

संवाहकः—आर्ये कलेति शिक्षिता । आजीविकेदानीं संवृत्ता । (ङ)

चेटी—अतिनिर्विण्णमार्येण प्रतिवचनं दत्तम् । ततस्ततः । (च)

संवाहकः—तत आर्ये एष निजगेह आहिण्डकानां मुखाच्छ्रुत्वाऽपूर्वदेशदर्शनकुतूहलेनेहागतः । इहापि मया प्रविश्योज्जयिनीमेक आर्यः शुश्रूषितः । यस्तादृशः प्रियदर्शनः प्रियवादी दत्त्वा न कीर्तयत्यपकृतं विस्मरति । किं बहुना प्रलपितेन । दाक्षिणतया परकीयमिवात्मानमवगच्छति शरणागतवत्सलश्च । (छ)

(क) एसो धुत्तो अदो णिक्कमिअ अण्णत्त गमिस्सदि । ता उअरोधेणेव्व गण्हेम्ह ।

(ख) कुदो अज्जो । को वा अज्जो । कस्स वा अज्जो । कं वा विर्त्ति अज्जो उवजीअदि । कुदो वा भअम् ।

(ग) शुणादु अज्जआ । अज्जए पाडलिउत्ते मे जम्मभूमी । गहवइदालके हग्गे । संवाहअश्श विर्त्ति उवजीआमि ।

(घ) सुउमारा क्खु कला सिक्खिदा अज्जेण ।

(ङ) अज्जए कलेत्ति शिक्खिदा । आजीविआ दाणिं संवुत्ता ।

(च) अदिणिव्विण्णं अज्जेण पडिवअणं दिण्णम् । तदो तदो ।

(छ) तदो अज्जए एशे णिजगेहे आहिण्डकाणं मुहादो शुणिअ अपुव्वदेशदंशणकुदूहलेण इह आगदे । इह वि मए पविशिअ उज्जइणिं एक्के अज्जे शुश्शूशिदे । जे तालिशे पिअदंशणे पिअवादी दइअ ण कित्तेदि अवकिदं विशुमलेदि । किं बहुणा पलन्तेण । दक्खिणदाए पलकेलअं विअ अत्ताणअं अवगच्छदि शलणागअवच्छले अ ।

[उपराधेन निर्गमनमार्गावरोधेन । संज्ञां ददाति नामादि सर्वं पृच्छेति कटाक्षेण सूचयतीत्यर्थः इति ल. दी.]। गृहपतिर्ग्रामाध्यक्षः । संवाहकस्य शरीरयन्त्रमर्दकस्य व्यापारमुपजीवामि । स्वगृहपर्यटकानां भिक्षुकादीनां वचनं श्रुत्वा ।

चेटी——क इदानीमार्याया मनोरथान्तरस्य गुणांश्चोरयित्वोज्जयिनी-मलंकरोति । (क)

वसन्तसेना——साधु चेटि साधु । मयाऽप्येवमेव हृदयेन मन्त्रितम् । (ख)

चेटी——आर्य ततस्ततः । (ग)

संवाहकः——आर्ये स इदानीमनुक्रोशकृतैः प्रदानैः——(घ)

वसन्तसेना——किमुपरतविभवः संवृत्तः । (ङ)

संवाहकः——अनाख्यातमेव कथमार्यया विज्ञातम् । (च)

वसन्तसेना——किमत्र ज्ञायते । दुर्लभा गुणा विभवाश्च । अपेयेषु तडागेषु बहुतरमुदकं भवति । (छ)

चेटी——आर्य किंनामधेयः खलु सः । (ज)

संवाहकः——आर्ये क इदानीं तस्य भूतलमृगाङ्कस्य नाम न जानाति । स खलु श्रेष्ठिचत्वरे प्रतिवसति । श्लाघनीयनामधेय आर्य-चारुदत्तो नाम । (झ)

वसन्तसेना——(सहर्षमासनादवतीर्य ।) आर्यस्यात्मीयमेतद्गेहम् । चेटि देह्यस्यासनम् । तालवृन्तकं गृहाण । परिश्रम आर्यस्य बाधते । (ञ)

(क) को दाणिं अज्जआए मणोरहन्तरस्स गुणाइं चोरिअ उज्जइणिं अलंकरेदि ।

(ख) साहु हञ्जे साहु । मए वि एव्वं ज्जेव्व हिअएण मन्तिदम् ।

(ग) अज्ज तदो तदो । (घ) अज्जए शे दाणिं अणुक्कोशकिदेहिं पदाणेहिं—

(ङ) किं उवरदविहवो संवुत्तो । (च) अणाजक्खिदे ज्जेव्व कधं अज्जआए विण्णादम् । (छ) किं एत्थ जाणीअदि । दुल्लहा गुणो विहवा अ । अपेएसु तडाएसु बहुदरं उदअं भोदि । (ज) अज्ज किंणामधेओ क्खु सो ।

(झ) अज्जे के दाणिं तश्श भूदलमिअङ्कस्स णामं ण जाणादि । शो क्खु शेट्ठि-चत्तले पडिवशदि । शलाहणिज्जणामधेए अज्जचालुदत्ते णाम ।

(ञ) अज्जस्स अत्तणकेरकं एदं गेहम् । हञ्जे देहि से आसणम् । तालवेण्ठअं गेण्ह । परिस्समो अज्जस्स बाधेदि ।

मणोरहन्तरस्स मनोरथाभिमुखस्य । अनुक्रोशः करुणा । आजीविका वृत्तिः । [अपेयेषु नीरसत्वात्पानानर्हजलेषु । श्लाघनीयं प्रशंसार्हं नामधेयं यस्य । चारु दत्तं दानं यस्येत्यर्थोऽव्यभिचारित्वादिति भावः । तालवृन्तकं गृहाण गृहीत्वा वीजयेत्यर्थः ।]

---

१ गुणविहवा. २ चउत्तले.

(चेटी तथा करोति ।)

संवाहकः—(स्वगतम् ।) कथमार्यचारुदत्तस्य नामसंकीर्तनेनेदृशो म आदरः । साधु आर्यचारुदत्त साधु । पृथिव्यां त्वमेको जीवसि । शेषः पुनर्जनः श्वसिति । (इति पादयोर्निपत्य ।) भवत्वार्ये भवतु । आसने निषीदत्वार्या । (क)

वसन्तसेना—(आसने समुपविश्य ।) आर्य कुतः स धनिकः । (ख)

संवाहकः—(ग)

सत्कारधनः खलु सज्जनः कस्य न भवति चलाचलं धनम् ।
यः पूजयितुमपि जानाति स पूजाविशेषमपि जानाति ॥ १५ ॥

वसन्तसेना—ततस्ततः । (घ)

संवाहकः—ततस्तेनार्येण सवृत्तिः परिचारकः कृतोऽस्मि । चारित्र्यावशेषे च तस्मिन्द्यूतोपजीव्यस्मि संवृत्तः । ततो भागधेयविषमतया दशसुवर्णं द्यूते हारितम् । (ङ)

माथुरः—उत्सादितोऽस्मि । मुषितोऽस्मि । (च)

संवाहकः—एतौ तौ सभिकद्यूतकरौ मामनुसंधत्तः । सांप्रतं श्रुत्वाऽऽर्या प्रमाणम् । (छ)

(क) कधं अज्जचालुदत्तस्स णामशंकीत्तणेण ईदिशे मे आदले । शाहु अज्जचालुदत्त शाहु । पुहवीए तुमं एक्के जीवशि । शेशे उण जणे शशदि । भोदु अज्जए भोदु । आशणे णिशीददु अज्जआ । (ख) अज्ज कुदो सो धणिओ ।

(ग) शक्कालधणे क्खु शज्जणे काह ण होइ चलाचले धणे ।
जे पूइदुं पि आणादि शे पूआविशेशं पि आणादि ॥

(घ) तदो तदो ।

(ङ) तदो तेण अज्जेण शवित्ती पलिचालके किदो म्हि । चालित्तावशेशे अ तश्शि जूदोवजीवि म्हि शंवुत्ते । तदो भाअधेअविशमदाए दशशुवण्णअं जूदे हालिदम् ।

(च) उच्छादिदो म्हि । मुसिदो म्हि ।

(छ) एदे दे शहिअजूदिअला मं अणुशंधअन्ति । शंपदं शुणिअ अज्जआ पमाणम् ।

सत्कारेति । मात्रासमकम् । प्रतिपादं चलाचले धणे शे इत्येकारत्रयं लघु । छन्दोनुरोधात् । सत्कारधनः [सत्कारः अन्येषामादरदर्शनं धनं यस्य सः । चलाचलमस्थिरम् । कस्य न भवति सर्वस्यापि भवतीत्यर्थः । सज्जनत्वं न धननिबन्धनमित्यर्थः ।] यः पूजितुमपि न जानाति स पूजाविशेषं जानाति । अपि तु न जानात्येव ॥ १५ ॥ सवृत्तिः कृतवर्तनः । चारित्रमात्रावशेषे धनशून्ये तस्मिन् ।

---

१ ण जाणा०.

वसन्तसेना—मदनिके वासपादपविसंष्ठुलतया पक्षिण इतस्ततोऽप्याहिण्डन्ते । चेटि तद्गच्छ । एतयोः सभिकद्यूतकरयोरयमार्य एव प्रतिपादयतीति इदं हस्ताभरणकं त्वं देहि । (इति हस्तात्कटकमाकृष्य चेट्याः प्रयच्छति ।) (क)

चेटी—(गृहीत्वा ।) यदार्याऽऽज्ञापयति । (इति निष्क्रान्ता ।) (ख)

माथुरः—उत्सादितोऽस्मि मुपितोऽस्मि । (ग)

चेटी—यथैतावूर्ध्वं प्रेक्षेते दीर्घं निश्वसितो विचारयतश्चाभिलपतश्च द्वारनिहितलोचनौ तथा तर्कयाम्येतौ तौ सभिकद्यूतकरौ भविष्यतः । (उपगम्य ।) आर्य वन्दे । (घ)

माथुरः—सुखं तव भवतु । (ङ)

चेटी—आर्य कतरो युवयोः सभिकः । (च)

माथुरः—

कस्य त्वं तनुमध्ये अधरेण रतदष्टदुर्विनीतेन ।
जल्पसि मनोहरवचनमालोकयन्ती कटाक्षेण ॥ १६ ॥

नास्ति मम विभवः । अन्यत्र व्रज । (छ)

(क) मदणिए वासपादवविसंठुलदाए पक्खिणो इदो तदो वि आहिण्डन्ति । हञ्जे ता गच्छ । एदाणं सहिअजूदिअराणं अअं अज्जो ज्जेव पडिवादेदि त्ति इमं हत्थाभरणअं तुमं देहि ।

(ख) जं अज्जआ आणवेदि । (ग) उच्छादिदो म्हि । मुसिदो म्हि ।

(घ) जधा एदे उद्धं पेक्खन्ति दीहं णीससन्ति विसूरअन्ति अ अहिलहन्ति अ दुआरणिहिदलोअणा तधा तक्केमि एदे दे सहिअजूदिअरा हुविस्सन्ति । अज्ज वन्दामि ।

(ङ) सुहं तुए होदु । (च) अज्ज कदमो तुम्हाणं सहिओ ।

(छ) कस्स तुहं तणुमज्झे अहरेण रददट्ठदुव्विणीदेण ।
जम्पसि मणहलवअणं आलोअन्ती कडक्खेण ॥

णत्थि मम विहवो । अण्णत व्वज ।

[वासपादपस्य निवासवृक्षस्य विसंष्ठुलतया अस्थिरतया] पक्षिणो भ्राम्यन्ति । दिनान्ते भूतप्राय इत्यर्थः (?) । आर्यः संवाहकः । [प्रतिपादयति ददाति ।] अहिणेन्ति अभिनीयन्ते । दुवारमुले द्वारमूले । सुहवा सुभगा । कस्येति । गाथा । दुर्विनीतेन रते दष्टेनाधरेण जल्पसि । [मनोहरवचनमिति क्रियाविशेषणम्] ॥ १६ ॥

---

१ तुमं.

चेटी—यदीदृशानि ननु मन्त्रयसे तदा न भवसि द्यूतकरः। अस्ति कोऽपि युष्माकं धारकः। (क)

माथुरः—अस्ति। दशसुवर्णं धारयति। किं तस्य। (ख)

चेटी—तस्य कारणादार्येदं हस्ताभरणं प्रतिपादयति। न हि न हि। स एव प्रतिपादयति। (ग)

माथुरः—(सहर्षं गृहीत्वा।) अरे भणसि तं कुलपुत्रम्—भूतस्तव गण्डः। आगच्छ। पुनर्द्यूतं रमस्व। (घ)

(इति निष्क्रान्तौ।)

चेटी—(वसन्तसेनामुपसृत्य।) आर्ये परितुष्टौ गतौ सभिकद्यूतकरौ। (ङ)

वसन्तसेना—तद्गच्छत्वार्यो बन्धुजनं समाश्वासयितुम्। (च)

संवाहकः—आर्ये यद्येवं तदियं कला परिजनहस्तगता क्रियताम्। (छ)

वसन्तसेना—आर्य यस्य कारणादियं कला शिक्ष्यते स एवार्येण शुश्रूषितपूर्वः शुश्रूषितव्यः। (ज)

संवाहकः—(स्वगतम्।) आर्यया निपुणं प्रत्यादिष्टोऽस्मि। कथं प्रत्युपकरिष्ये। (प्रकाशम्।) आर्ये अहमेतेन द्यूतकरापमानेन शाक्यश्रमणको भविष्यामि। तत्संवाहको द्यूतकरः शाक्यश्रमणकः संवृत्त इति स्मर्तव्यान्यार्ययैतान्यक्षराणि। (झ)

वसन्तसेना—आर्य अलं साहसेन। (ञ)

(क) जइ ईदिसाइं णं मन्तेसि ता ण होसि जूदिअरो। अत्थि को वि तुम्हाणं धारओ। (ख) अत्थि। दशसुवण्णं धालेदि। किं तस्स। (ग) तस्स कारणादो अज्जआ इमं हत्थाभरणं पडिवादेदि। ण हि ण हि। सो ज्जेव पडिवादेदि। (घ) अले भणेशि तं कुलवुत्तम्–भूदं तुए गण्डे। आअच्छ। पुणो जूदं रमह। (ङ) अज्जए पडितुट्ठा गदा सहिअजूदिअरा। (च) ता गच्छदु अज्जो बन्धुअणं समस्सासिदुं। (छ) अज्जए जइ एव्वं ता इअं कला पलिअणहत्थगदा कलीअदु। (ज) अज्ज जस्स कारणादो इअं कला सिक्खीअदि सो ज्जेव अज्जेण सुस्सूसिदपुरुव्वो सुस्सूसिदव्वो।

(झ) अज्जआए णिउअं पच्चादिट्ठो म्हि। कधं पच्चुवकलिश्शम्। अज्जए अहं एदिणा जूदिअलावमाणेण शक्कशमणके हुविश्शम्। ता संवाहके जूदिअले शक्कशमणके शंवुत्तेत्ति शुमलिदव्वा अज्जआए एदे अक्खलु। (ञ) अज्ज अलं साहसेण।

धारयति। यस्य पार्श्वलभ्यमीदृशं तं संवाहकं कुलपुत्रम्। भूतो गण्डः। सुविधानमित्यर्थः। 'खण्ड' इति मरहट्टप्रसिद्धः। तत्पुनरपि द्यूतं रमामहे। इयं कला संवाहनरूपा। शाक्यश्रमणकः शाक्यबौद्धभिक्षुः। एतान्यक्षराणि।

---

१ गन्धु. २ अज्ज बन्धुअणो समस्ससदु (अद्य बन्धुजनः समाश्वसितु).

संवाहकः—आर्ये कृतो निश्चयः। (इति परिक्रम्य।)

द्यूतेन तत्कृतं मम यद्विहस्तं जनस्य सर्वस्य।
इदानीं प्रकटशीर्षो नरेन्द्रमार्गेण विहरिष्यामि ॥१७॥ (क)

(नेपथ्ये कलकलः।)

संवाहकः—(आकर्ण्य।) अरे किं न्विदम्। (आकाशे।) किं भणथ—एष खलु वसन्तसेनायाः खुण्टमोडको नाम दुष्टहस्ती विचरतीति। अहो आर्याया गन्धगजं प्रेक्षिष्ये गत्वा। अथ वा किं ममैतेन। यथाव्यवसितमनुष्ठास्यामि। (इति निष्क्रान्तः।) (ख)

(ततः प्रविशत्यपटीक्षेपेण प्रहृष्टो विकटोज्ज्वलवेषः कर्णपूरकः।)

कर्णपूरकः—कुत्र कुत्रार्या। (ग)

चेटी—दुर्मनुष्य किं त उद्वेगकारणं यदग्रतोऽवस्थितामार्यां न प्रेक्षसे। (घ)

कर्णपूरकः—(दृष्ट्वा।) आर्ये वन्दे। (ङ)

वसन्तसेना—कर्णपूरक परितुष्टमुखो लक्ष्यसे। तत्किं न्विदम्। (च)

कर्णपूरकः—(सविस्मयम्।) आर्ये वञ्चिताऽसि ययाऽद्य कर्णपूरकस्य पराक्रमो न दृष्टः। (छ)

(क) अज्जए कले णिच्चए।

जूदेण तं कदं मे जं वीहत्थं जणश्श शव्वश्श।
एण्हिं पाअडशीशे णलिन्दमग्गेण विहलिश्शम् ॥

(ख) अले किं ण्णेदम्। किं भणाध—एशे क्खु वशन्तशेणआए खुण्टमोडके णाम दुट्ठहत्थी विअलेदि त्ति। अहो अज्जआए गन्धगअं पेक्खिश्शं गदुअ। अह वा किं मम एदिणा। जधाववशिदं अणुचिट्ठिश्शम्। (ग) कहिं कहिं अज्जआ।

(घ) दुम्मणुस्स किं ते उव्वेअकालणं जं अग्गदो वट्ठिदं अज्जअं ण पेक्खसि।

(ङ) अज्जए वन्दामि। (च) कण्णऊरअ परितुट्ठमुहो लक्खीअसि। ता किं ण्णेदम्। (छ) अज्जए वञ्चिदासि जाए अज्ज कण्णऊरअस्स परक्कमो ण दिट्ठो।

द्यूतेनेति। गाथा। द्यूतेन तत्कृतं मम सर्वस्माज्जनाद्बिभ्यते यत्। 'यद्बिभ्यतः। सर्वस्य जनस्य' इति प्राचीनटीका। [सर्वजनस्य यद्विहस्तं हस्तशब्देन हस्तशस्त्रं विगतहस्तशस्त्रं भवति निर्भयमित्यर्थः। तन्मम द्यूतेन कृतमिति वाक्यार्थः। ल. दी.] इदानीं द्यूतदेयदशसुवर्णदेयकाले। प्रकटशीर्षो नरेन्द्रमार्गेण विहरिष्यामि। भयविरहादित्याशयः ॥१७॥ [खुण्टमोडकः स्तम्भभञ्जकः।] विअलेदि विचरति। [गन्धप्रधानो गजः गन्धगजः। तदुक्तं पालकाप्ये—'यस्य गन्धं समाघ्राय न तिष्ठन्ति प्रतिद्विपाः। तं गन्धहस्तिनं प्राहुर्नृपतेर्विजयावहम्' इति।] 'विकलयति' इत्येके। गलुअदां गुरुत्वम्। महावैभवशालित्वात्। यथाव्यवसितं परिव्रज्यानुष्ठानरूपम्। [दुर्मनुष्य तस्य संभ्रमपारवश्यादेवमुक्तम्।] अज्जअं वसन्त-

---

१ प्रविश्य कर्णपूरो हृष्टोऽपटी०; प्रविशत्यपटा०.

वसन्तसेना—कर्णपूरक किं किम् । (क)

कर्णपूरकः—शृणोत्वार्या । यः स आर्यायाः खुण्टमोडको नाम दुष्टहस्ती स आलानस्तम्भं भङ्क्त्वा महामात्रं व्यापाद्य महान्तं संक्षोभं कुर्वन्राजमार्गमवतीर्णः । ततोऽत्रान्तरे उद्घुष्टं जनेन—

'अपनयत बालकजनं त्वरितमारोहत वृक्षप्रासादम् ।
किं न खलु प्रेक्षध्वं पुरतो दुष्टो हस्तीत एति' ॥ १८ ॥

अपि च ।

'विचलति नूपुरयुगलं छिद्यन्ते च मेखला मणिखचिताः ।
वलयाश्च सुन्दरतरा रत्नाङ्कुरजालप्रतिबद्धाः' ॥ १९ ॥

ततस्तेन दुष्टहस्तिना करचरणरदनैः फुल्लनलिनीमिव नगरीमुज्जयिनीमवगाहमानेन समासादितः परिव्राजकः । तं च परिभ्रष्टदण्डकुण्डिकाभाजनं शीकरैः सिक्त्वा दन्तान्तरे क्षिप्तं प्रेक्ष्य पुनरप्युद्घुष्टं जनेन—हा परिव्राजको व्यापाद्यत इति । (ख)

वसन्तसेना—(ससंभ्रमम् ।) अहो प्रमादः । अहो प्रमादः । (ग)

(क) कण्णऊरअ किं किम् । (ख) सुणादु अज्जआ । जो सो अज्जआए खुण्टमोडओ णाम दुट्ठहत्थी सो आलाणत्थम्भं[1] भञ्जिअ महमेत्थं वावादिअ महन्तं संखोहं करन्तो राअमग्गं ओदिण्णो । तदो एत्थन्तरे उग्घुट्ठं जणेण—

'अवणेध बालअजणं तुरिदं आरुहध वुक्खपासादम्[2] ।
किं ण[3] हु पेक्खध पुरदो दुट्ठो हत्थी इदो एदि' ॥

अवि अ ।

'विचलइ णेउरजुअलं छिज्जन्ति अ मेहला मणिक्खइआ ।
वलआ अ सुन्दरदरा रअणङ्कुरजालपडिबद्धा' ॥

तदो तेण दुट्ठहत्थिणा कलचलणरदणेहिं फुल्लणलिणिं विअ णअरिं उज्जइणिं अवगाहमाणेण समासादिदो परिव्वाजओ । तं च परिब्भट्ठदण्डकुण्डिआभाअणं सीअरेहिं सिञ्चिअ दन्तन्तरे क्खित्तं पेक्खिअ पुणो वि उग्घुट्ठं जणेण—हा परिव्वाजओ वावादीअदि त्ति । (ग) अहो पमादो । अहो पमादो ।

सेनाम् । आलानस्तम्भं बन्धनस्तम्भम् । महामात्रं हस्त्यारोहम् । **अपनयतेत्यादि** । गाथाद्वयम् ॥ १८ ॥ **विचलतीति** । नूपुरं वलयाश्च विघटन्ते [भयसंभ्रमाद् दूरमपसरन्तीनां स्त्रीणामिति शेषः । रत्नाङ्कुराणां प्रसृमररत्नकिरणानां जालैः प्रतिबद्धाः स्यूताः] ॥ १९ ॥ समासादितः प्राप्तः । परिव्राजकः संवाहक एव भिक्षुकरूपः । फुल्लनलिनीं पुष्पितकमलिनीमिव । कुण्डिका कमण्डलुः । [हस्तिना करशीकरैः सिक्त्वा ।]

---

१ खम्भं. २ रुक्ख. ३ उण.

कर्णपूरकः—अलं संभ्रमेण। शृणोतु तावदार्या। ततो विच्छिन्नविसंष्ठुलशृङ्खलाकलापमुद्वहन्तं दन्तान्तरपरिगृहीतं परिव्राजकमुद्वहन्तं तं प्रेक्ष्य कर्णपूरकेण मया—न हि न हि। आर्याया अन्नपिण्डपुष्टेन दासेन—वामचरणेन द्यूतलेखकं उद्घुष्योद्घुष्य त्वरितमापणाल्लोहदण्डं गृहीत्वाऽऽकारितः स दुष्टहस्ती। (क)

वसन्तसेना—ततस्ततः। (ख)

कर्णपूरकः—

आहत्य सरोषं तं हस्तिनं विन्ध्यशैलशिखराभम्।
मोचितो मया स दन्तान्तरसंस्थितः परिव्राजकः॥ २०॥ (ग)

वसन्तसेना—सुष्ठु त्वया कृतम्। ततस्ततः। (घ)

कर्णपूरकः—तत आर्ये साधु रे कर्णपूरक साधु इत्येतावन्मात्रं भणन्ती विषमभराक्रान्ता इव नौरेकतः पर्यस्ता सकलोज्जयिन्यासीत्। तत आर्ये एकेन शून्यान्याभरणस्थानानि परामृश्योर्ध्वं प्रेक्ष्य दीर्घं निःश्वस्यायं प्रावारको ममोपरि क्षिप्तः। (ङ)

(क) अलं संभमेण। सुणादु दाव अज्जआ। तदो विच्छिण्णविसंठुलसिङ्खलाकलावअं उव्वहन्तं दन्तन्तरपरिग्गहिदं परिव्वाजअं उव्वहन्तं तं पेक्खिअ कण्णऊरएण मए—ण हि ण हि। अज्जआए अण्णपिण्डउट्टेण दासेण—वामचलणेण जूदलेक्खअं उग्घुसिअ उग्घुसिअ तुरिदं आवणादो लोहदण्डं गेण्हिअ आआरिदो सो दुट्ठहत्थी।

(ख) तदो तदो।

(ग) आहाणिऊण सरोसं तं हत्थिं विञ्झसैलसिहराभम्।
मोआविओ मए सो दन्तन्तर[1]संठिओ परिव्वाजवो।

(घ) सुट्ठु दे किदम्। तदो तदो।

(ङ) तदो अज्जए साहु रे कण्णऊरअ साहु त्ति एत्तिअमेत्तं भणन्ती विसमभरक्कन्ता विअ णावा एक्कदो पल्हत्था सअला उज्जइणी आसि। तदो अज्जए एक्केण सुण्णाइं आहरणट्ठाणाइं परामसिअ उद्धं पेक्खिअ दीहं णीससिअ अअं पावारओ मम उवरि [2]क्खित्तो।

[विच्छिन्ना त्रुटिता अत एव विसंष्ठुला स्खलन्ती शृङ्खला तस्याः कलापः गुणमेलकः तम्।] विसंष्ठुलशृङ्खलाकलापमिति क्रियाविशेषणम्। [वामचलनेन वक्रगत्या] द्यूतलेखकमुत्प्राथ्य। आपणात्क्रयविक्रयस्थानात्। [आकारितः स्पर्धयाऽऽहूतः।] **आहत्येति**। गाथा। [आहत्य लोहदण्डेन प्रहृत्य।] स परिव्राजकः ॥२०॥ पल्हत्था

---

१ परिट्ठिदो. २ णिक्खित्तो.

वसन्तसेना—कर्णपूरक जानीहि तावत्किमेष जातीकुसुमवासितः प्रावारको न वेति । (क)

कर्णपूरकः—आर्ये मदगन्धेन सुष्ठु तं गन्धं न जानामि । (ख)

वसन्तसेना—नामापि तावत्प्रेक्षस्व । (ग)

कर्णपूरकः—इदं नाम । आर्यैव वाचयतु । (इति प्रावारकमुपनयति ।)(घ)

वसन्तसेना—आर्यचारुदत्तस्य । (इति वाचयित्वा सस्पृहं गृहीत्वा प्रावृणोति ।) (ङ)

चेटी—कर्णपूरक शोभत आर्यायाः प्रावारकः । (च)

कर्णपूरकः—आं शोभत आर्यायाः प्रावारकः । (छ)

वसन्तसेना—कर्णपूरक इदं ते पारितोषिकम् । (इत्याभरणं प्रयच्छति ।) (ज)

कर्णपूरकः—(शिरसा गृहीत्वा प्रणम्य च ।) सांप्रतं सुष्ठु शोभत आर्यायाः प्रावारकः । (झ)

वसन्तसेना—कर्णपूरक एतस्यां वेलायां कुत्रार्यचारुदत्तः । (ञ)

कर्णपूरकः—एतेनैव मार्गेण प्रवृत्तो गन्तुं गेहम् । (ट)

वसन्तसेना—चेटि उपरितनमलिन्दकमारुह्यार्यचारुदत्तं पश्यामः । (ठ)

(इति निष्क्रान्ताः सर्वे ।)

इति[1] द्यूतकरसंवाहको नाम द्वितीयोऽङ्कः ।

The gambler ...

(क) कण्णऊरअ जाणीहि दाव किं एसो जादीकुसुमवासिदो पावारओ ण वेत्ति ।
(ख) अज्जए मदगन्धेण सुट्ठु तं गन्धं ण जाणामि ।
(ग) णामं पि दाव पेक्ख । (घ) इमं णामं । अज्जआ एव्व वाएदु ।
(ङ) अज्जचारुदत्तस्य । (च) कण्णऊरअ सोहदि अज्जआए पावारओ ।
(छ) आं सोहदि अज्जआए पावारओ । (ज) कण्णऊरअ इदं दे पारितोसिअम् ।
(झ) संपदं सुट्ठु सोहदि अज्जआए पावारओ । (ञ) कण्णऊरअ एदाए वेलाए कहिं अज्जचारुदत्तो । (ट) एदेण ज्जेव मग्गेण पवुत्तो गन्तुं गेहम् ।
(ठ) हञ्जे उवरिदणं ओलिन्दअं आरुहिअ अज्जचारुदत्तं पेक्खेम्ह ।

पर्यस्ता । परामुसिअ परामृश्य । आं सोहदीति । मया साहसार्जितेन न युक्तमेतदिति भावः । प्रवृत्तश्चलितः ॥

इति द्यूतकरसंवाहको नाम द्वितीयोऽङ्कः ।

---

१ इति मृच्छकटिकायां. २ आलि०.

This play is a prakarana, this act is not introduced either by praveshika or a Viskambhaka.

तृतीयोऽङ्कः ।

(ततः प्रविशति चेटः ।)

चेटः—

सुजनः खलु भृत्यानुकम्पकः स्वामी निर्धनकोऽपि शोभते ।
पिशुनः पुनर्द्रव्यगर्वितो दुष्करः खलु परिणामदारुणः ॥ १ ॥

अपि च ।

सस्यलम्पटबलीवर्दो न शक्यो वारयितु-
मन्यकलत्रप्रसक्तो न शक्यो वारयितुम् ।
द्यूतप्रसक्तमनुष्यो न शक्यो वारयितुं
योऽपि स्वाभाविकदोषो न शक्यो वारयितुम् ॥ २ ॥ (क)

(क) सुअणे क्खु भिच्चाणुकम्पके शामिए णिद्धणके वि शोहदि ।
पिशुणे उण दव्वगव्विदे दुक्कले क्खु पलिणामदालुणे ॥

अवि अ ।

शस्शपलक्कबलेद्दे ण शक्कि वालिदुं अण्णकलत्तपशत्ते ण शक्कि वालिदुम् ।
जूदपशत्तमणुश्शे ण शक्कि वालिदुं जे वि शहाविअदोशे ण शक्कि वालिदुम् ॥

[चेटोऽयं वर्धमानकनामा चारुदत्तस्येति बोध्यम्।] **सुजन इति** । वैतालीयम् । ‘सुअणे’ इत्येकारो लघुः छन्दोनुरोधात् । [स्वामी सुजनः तथा भृत्येषु दयावान् निर्धनकोऽपि शोभते खलु । स पिशुनः दुर्जनः चेत् दुष्करः दुःसेव्य इत्यर्थः । परिणामे सुसेवितोऽपि अवसाने फलदानसमये दारुणः च । अनेन शकारः कटाक्षितः । अत्र पूर्वार्धेन चारुदत्तस्योत्तरार्धेन च शकारस्य तादृशप्रस्तुतस्य वर्णनेनावगमादप्रस्तुतप्रशंसालंकारः ।] खलु यस्मादर्थे । दुष्करो यतः अतः परिणामदारुणः ॥१॥ **सस्येत्यादि** । शक्करी जातिः । पलक्को लम्पटः। ‘पडकला’ इति महाराष्ट्रभाषायाम् । योऽपि स्वाभाविको दोषः सोऽपीत्यर्थान्न शक्यो वारयितुम् । अतिरिक्तदातृत्वं दोष एवेति । तं च मम स्वामी न त्यजतीति भावः ॥ २ ॥

---

१ प्रविश्य चेटः. २ एतत्समानार्थकं पाठान्तरं छन्दोभिन्नं च—

सुअणे हु कुभिच्चपालए धणहीणे अपहू वि शोहदि ।
पिशुणे उण दव्वगव्विदे ण अ लच्छीविहवावलंबिदे ॥

(सुजनः खलु कुभृत्यपालको धनहीनोऽप्रभुरपि शोभते ।
पिशुनः पुनर्द्रव्यगर्वितो न च लक्ष्मीविभवावलम्बितः ॥)

! . अस्य ल० दी० कृतं व्याख्यानं—कुभृत्यस्यापि मादृशस्य कार्यकरणासमर्थस्य वर्धमानकादेरपि पालकः । किं पुनर्वाच्यं सुभृत्यपालक इति । ईदृशः सुजनः इ० । पिशुनः पुनः प्रभुः लक्ष्मीविभवावलम्बितो यतोऽनो द्रव्यगर्वितः इत्येवं पौनरुक्त्यं परिहरणीयम् ।

३ अस्मात्परमिदं पद्यद्वयं क्वचित्— तिउसाहु विंट तित्तउ तित्तउ बम्हणे निलक्खले । अलसबहुआ वि त्तित्तिआ ण जणाहदलिद तित्तए ॥ **(त्रपुषस्य वृन्तं तिक्तं तिक्तो ब्राह्मणो निरक्षरः । अलसा वधूरपि तिक्ता न जन्मदरिद्रस्तिक्तः ॥)** अपि च । कुणाडअं ण रोएइ पढुमकालअं असई । सइत्तणे सा गव्वइ अंचलं लंबं पढुम एच्छइ ॥ **(कुनाटकं न रोचते प्रथमकालमसती । सतीत्वे सा गर्वति अञ्चलं दीर्घं प्रथममाच्छादयति ॥).** ४ अण्णपशत्तकलत्ते (अन्यप्रसक्तकलत्रम्).

काऽपि वेलाऽऽर्यचारुदत्तस्य गान्धर्वं श्रोतुं गतस्य । अतिक्रामत्यर्धरजनी । अद्यापि नागच्छति । तद्यावद्बहिर्द्वारशालायां गत्वा स्वप्स्यामि । (इति तथा करोति ।) (क)

(ततः प्रविशति चारुदत्तो विदूषकश्च ।)

चारुदत्तः—अहो साधु साधु रेभिलेन गीतम् । वीणा हि नामासमुद्रोत्थितं रत्नम् । कुतः ।

उत्कण्ठितस्य हृदयानुगुणा वयस्या
संकेतके चिरयति प्रवरो विनोदः ।
संस्थापना प्रियतमा विरहातुराणां
रक्तस्य रागपरिवृद्धिकरः प्रमोदः ॥ ३ ॥

विदूषकः—भो एहि । गृहं गच्छावः । (ख)

चारुदत्तः—अहो सुष्ठु भावरेभिलेन गीतम् ।

विदूषकः—मम तावद्द्वाभ्यामेव हास्यं जायते । स्त्रिया संस्कृतं पठन्त्या मनुष्येण च काकलीं गायता । स्त्री तावत्संस्कृतं पठन्ती दत्तनवनस्येव गृष्टिरधिकं सूसूशब्दं करोति । मनुष्योऽपि काकलीं गायञ्शुष्कसुमनोदामवेष्टितो वृद्धपुरोहित इव मन्त्रं जपन्दृढं मे न रोचते । (ग)

(क) का वि वेला अज्जचारुदत्तश्श गन्धव्वं शुणिदुं गदश्श । अदिक्कमदि अद्धलअणी । अज्ज वि ण आअच्छदि । ता जाव बाहिलदुआलशालाए गदुअ शुविश्शम् ।

(ख) भो एहि । गेहं गच्छेम्ह ।

(ग) मम दाव दुवेहिं ज्जेव्व हस्सं जाअदि । इत्थिआए सक्कअं पठन्तीए मणुस्सेण अ काअलीं गाअन्तेण । इत्थिआ दाव सक्कअं पठन्ती दिण्णणवणस्सा विअ गिट्ठी अहिअं सुसुआअदि । मणुस्सो वि काअलीं गाअन्तो सुक्खसुमणोदामवेट्ठिदो बुड्ढपुरोहिदो विअ मन्तं जवन्तो दिढं मे ण रोअदि ।

गन्धव्वं गन्धर्वम् । गीतमित्यर्थः । उत्कण्ठितस्येति । ['सर्वेन्द्रियसुखास्वादो यत्रास्तीत्यभिमन्यते । तत्प्राप्तीच्छां ससंकल्पामुत्कण्ठां कवयो विदुः ॥' इत्युक्तलक्षणा उत्कण्ठा संजाता अस्य असौ उत्कण्ठितः । विरहोत्सुको वा हृदयानुगुणा मनोनुरूपा वयस्या सखी । संकेतके कृतसंकेते जने चिरयति विलम्बं कुर्वति । प्रवरः उत्कृष्टः विनोदः । विरहातुराणां प्रियतमा अत्यन्तेष्टा संस्थापना शरीरस्वास्थ्यकरणं मनस आश्वासो वा । रक्तस्यानुरक्तस्य रागपरिवृद्धिकरः प्रमोदः । वीणावादनमिति शेषः । प्रथमचरणे रूपकालंकारः । इतरत्र कारणे कार्योपचारादतिशयोक्तिः । वसन्ततिलका वृत्तम्] ॥ ३ ॥ [काकलीं सूक्ष्ममधुरध्वनियुक्तां गीतिम् । दत्ता नस्या नासारज्जुर्यस्याः सा । नासायै हिता नस्या । गृष्टिः सकृत्प्रसूता गौः ।]णस्सा नासिकाविवररज्जुः । सुसुआअदीत्यव्यक्तशब्दानुकरणम् । शुष्कसुमनोदामवेष्टितत्वेन चिरकालजपप्रवणत्व-

---

१ अहो अहो. २ रेभिलकेन. ३ यतः. ४ करप्रमोदः.

चारुदत्तः—वयस्य सुष्ठु खल्वद्य गीतं भावरेभिलेन । न च भवान्परितुष्टः ।

रक्तं च नाम मधुरं च [1]समं स्फुटं च
भावान्वितं च ललितं च मनोहरं च ।
किं वा प्रशस्तवचनैर्बहुभिर्मदुक्तै-
[2]रन्तर्हिता यदि भवेद्वनितेति मन्ये ॥ ४ ॥

अपि च ।

तं तस्य स्वरसंक्रमं [3]मृदुगिरः श्लिष्टं च तन्त्रीस्व[4]नं
वर्णानामपि मूर्छनान्तरगतं तारं विरामे मृदुम् ।
हेलासंयमितं पुनश्च ललितं रा[5]गैर्द्विरुच्चारितं
यत्सत्यं विरतेऽपि गीतसमये गच्छामि शृण्वन्निव ॥ ५ ॥

विदूषकः—भो वयस्य आपणान्तररथ्याविभागेषु सुखं कुक्कुरा अपि सुप्ताः । तद्गृहं गच्छावः । (अग्रतोऽवलोक्य ।) वयस्य पश्य पश्य । एषोऽप्यन्धकारस्येवावकाशं ददद्न्तरिक्षप्रासादादवतरति भगवांश्चन्द्रः । (क)

(क) भो वअस्स आवणन्तररच्छाविहाएसु सुहं कुक्कुरा वि [6]सुत्ता । ता गेहं गच्छेम्ह । वअस्स पेक्ख पेक्ख । एसो वि अन्धआरस्स विअ अवआसं देन्तो अन्तरिक्खपासादादो ओदरदि भअवं चन्दो ।

मुक्तम् । **रक्तमिति** । [रक्तं रागयुक्तम् । मधुरं कर्णस्वादु । समं रागोत्थापकस्वराणां वैपरीत्यराहितम् ।] भावान्वितं रत्यास्पदम् । ललितं लालित्याख्यधर्मविशेषशालि । [किं वा बहुभिः मदुक्तैः प्रशस्तं प्रशस्तिः तस्य वचनैः किम् । अन्तर्हिता पुरुषरूपच्छन्ना वनिता यदि भवेदपि नाम स्यादिति मन्ये ।] पिहिता योषिदेव गायति न पुरुष इति भासते । [वसन्ततिलका वृत्तम्]॥ ४ ॥ **तमिति** । [यद्गीतसमये विरतेऽपि गतेऽपि सर्वमिदं शृण्वन्निवाहं गच्छामि तत्सत्यमित्यन्वयः । इदं किम् । मृदुगिरः कोमलकण्ठस्वरस्य तस्य रेभिलस्य तमिदानीं श्रुतं स्वरसंक्रमं स्वराणां निषादर्षभगान्धारषड्जमध्यमधैवतपञ्चमानां सप्तानां प्रसिद्धानां समीचीनं क्रममारोहावरोहरूपम् । शृण्वन्नित्यत्रान्वयः सर्वद्वितीयान्तानाम् । श्लिष्टं गीताक्षरैरभिन्नतया श्रूयमाणम् । तन्त्री वीणा तस्याः स्वनं च शृण्वन्नित्यर्थः । वर्णानां गानाक्षराणां मूर्छना । 'यथा कुटुम्बिनः सर्वे एकीभूता भवन्ति हि । तथा स्वराणां संदोहो मूर्छनेत्यभिधीयते' इति । तस्या अन्तरगतं मध्यगतम् । तारमुच्चम् । विरामे समाप्तौ मृदुम् । इदं विशेषणत्रयं तन्त्रीस्वनस्येति बोध्यम् । हेला रागस्यारोहावरोहयोरनौचित्यम् । तत्र संयमितं नियमितम् । अनौचित्यान्निवृत्तमिति भावः । पुनश्च ललितं रागेण द्विरुच्चारितं द्वित्रिरुक्तं गीतं शृण्वन्नित्यर्थः । इति ल० दी० । शार्दूलविक्रीडितं छन्दः] ॥ ५ ॥ आपणमध्यरथ्याविभागेषु कुक्कुरा अपि सुप्ताः ।

१ समस्फुटं. २ अन्तर्हितः. ३ मृदुगिरा श्लिष्टं. ४ स्वरं. ५ रागाद्द्वि०. ६ पसुत्ता.

चारुदत्तः—सम्यगाह भवान्।

असौ हि दत्त्वा तिमिरावकाशमस्तं व्रजत्युन्नतकोटिरिन्दुः।
जलावगाढस्य वनद्विपस्य तीक्ष्णं विषाणाग्रमिवावशिष्टम्॥६॥

विदूषकः—भो इदमस्माकं गेहम्। वर्धमानक वर्धमानक उद्घाटय द्वारम्। (क)

चेटः—आर्यमैत्रेयस्य स्वरसंयोगः श्रूयते। आगत आर्यचारुदत्तः। तद्यावद्द्वारमस्योद्घाटयामि। (तथा कृत्वा।) आर्य वन्दे। मैत्रेय त्वामपि वन्दे। अत्र विस्तीर्ण आसने निषीदतमार्यौ। (ख)

(उभौ नाट्येन प्रविश्योपविशतः।)

विदूषकः—वर्धमानक रदनिकामाकारय पादौ धावितुम्। (ग)

चारुदत्तः—(सानुकम्पम्।) अलं सुप्तजनं प्रबोधयितुम्।

चेटः—आर्य मैत्रेय अहं पानीयं गृह्णामि। त्वं पादौ धाव। (घ)

विदूषकः—(सक्रोधम्।) भो वयस्य एष इदानीं दास्याःपुत्रो भूत्वा पानीयं गृह्णाति। मां पुनर्ब्राह्मणं पादौ धावयति। (ङ)

चारुदत्तः—वयस्य मैत्रेय त्वमुदकं गृहाण। वर्धमानकः पादौ प्रक्षालयतु।

(क) भो एदं अम्हाणं गेहम्। वड्ढमाणअ वड्ढमाणअ उग्घाटेहि दुआरअम्।

(ख) अज्जमित्तेआह शलशंजोए शुणीअदि। आगदे अज्जचालुदत्ते। ता जाव दुआलअं शे उग्घाटेमि। अज्ज वन्दामि। मित्तेअ तुमं पि वन्दामि। एत्थ वित्थिण्णे आशणे णिशीदन्तु अज्जा।

(ग) वड्ढमाणअ रअणिअं सद्दावेहि पादाइं धोइदुम्।

(घ) अज्ज मित्तेअ अहं पाणिअं गेण्हे। तुमं पादाइं धोवेहि।

(ङ) भो वअस्स एसो दाणिं दासीएपुत्तो भविअ पाणिअं गेण्हेदि। मं उण बम्हणं पादाइं धोवावेदि।

ओदरदि अवतरति। अस्ताभिमुखं यातीत्यर्थः। **असाविति**। [हि असौ उन्नते कोटी अग्रे यस्य स उन्नतकोटिः इन्दुः। अनेनार्धचन्द्रो गम्यते। तिमिरस्य अवकाशं प्रसरणावसरं दत्त्वा अस्तं व्रजति। जलावगाढस्य जलनिमग्नस्य वनद्विपस्य अवशिष्टं तीक्ष्णं विषाणाग्रमिव दृश्यमान इत्यर्थः। वनपदेन साग्रदन्तवत्त्वं व्यज्यते। तेन च तीक्ष्णं विषाणाग्रं दन्ताग्रमिवेत्युपमाऽपि संगच्छते। वृत्तमुपजातिः]॥ ६॥ संयोगः समवधानम्। द्वारं देमि ददामि। कवाटमुद्धाट्य अवकाशं बिभर्मीत्यर्थः।

---

१ देमि (ददामि).

चेटः—आर्य मैत्रेय देह्युदकम् । (क)

(विदूषकस्तथा करोति । चेटश्चारुदत्तस्य पादौ प्रक्षाल्यापसरति ।)

चारुदत्तः—दीयतां ब्राह्मणस्य पादोदकम् ।

विदूषकः—किं मम पादोदकैः । भूम्यामेव मया ताडितगर्दभेनेव पुनरपि लोठितव्यम् । (ख)

चेटः—आर्य मैत्रेय ब्राह्मणः खलु त्वम् । (ग)

विदूषकः—यथा सर्वनागानां मध्ये डुण्डुभस्तथा सर्वब्राह्मणानां मध्येऽहं ब्राह्मणः । (घ)

चेटः—आर्य मैत्रेय तथाऽपि धाविष्यामि । (तथा कृत्वा ।) आर्य मैत्रेय एतत्तत्सुवर्णभाण्डं मम दिवा तव रात्रौ च । तद्गृहाण । (इति दत्त्वा निष्क्रान्तः ।) (ङ)

विदूषकः—(गृहीत्वा ।) अद्याप्येतत्तिष्ठति । किमत्रोज्जयिन्यां चौरोऽपि नास्ति य एतं दास्याःपुत्रं निद्राचौरं नापहरति । भो वयस्य अभ्यन्तरचतुःशालकं प्रवेशयाम्येनम् । (च)

चारुदत्तः—

अलं चतुःशालमिमं प्रवेश्य प्रकाशनारीधृत एष यस्मात् ।
तस्मात्स्वयं धारय विप्र तावद्यावन्न तस्याः खलु भोः समर्प्यते ७

(निद्रां नाटयन्[1] 'तं तस्य स्वरसंक्रमं–' (३।५) इत्यादि पुनः पठति ।)

विदूषकः—अपि निद्राति भवान् । (छ)

(क) अज्ज मित्तेअ देहि उदअम् ।

(ख) किं मम पादोदएहिं । भूमीए ज्जेव मए ताडिदगद्दहेण विअ पुणो वि लोट्टिदव्वम् ।　　(ग) अज्ज मित्तेअ बम्हणे क्खु तुमम् ।

(घ) जधा सव्वणागाणं मज्झे डुण्डुहो तधा सव्वबम्हणाणं मज्झे अहं बम्हणो ।

(ङ) अज्ज मित्तेअ तधा वि धोइस्सम् । अज्ज मित्तेअ एदं तं शुवण्णभण्डअं मम दिवा तुह लत्तिं च । ता गेण्ह ।

(च) अज्ज वि एदं चिट्ठदि । किं एत्थ उज्जइणीए चोरो वि णत्थि जो एदं दासीए-पुत्तं णिद्दाचोरं ण अवहरदि । भो वअस्स अब्भन्तरचतुस्सालअं पवेसआमि णम् ।

(छ) अवि णिद्दाअदि भवम् ।

अलमिति । प्रकाशनारी वेश्या [तया धृतः परिहितः । अतः कुटुम्बिन्यलंकार-निवेशनस्थाने स्थापयितुमयोग्य इत्यर्थः । उपजातिः छन्दः] ॥ ७ ॥

---

१ नाटयति चारु०.

चारुदत्तः— अथ किम्।

इयं हि निद्रा नयनावलम्बिनी ललाटदेशादुपसर्पतीव माम्।
अदृश्यरूपा चपला जरेव या मनुष्यसत्त्वं परिभूय वर्धते ॥ ८॥

विदूषकः—तत्स्वपिवः[1]। (नाट्येन स्वपिति।) (क)

(ततः प्रविशति शर्विलकः।)

शर्विलकः—

कृत्वा शरीरपरिणाहसुखप्रवेशं
शिक्षाबलेन च बलेन च कर्ममार्गम्।
गच्छामि भूमिपरिसर्पणघृष्टपार्श्वो
निर्मुच्यमान इव जीर्णतनुर्[2]भुजङ्गः ॥ ९॥

(नभोऽवलोक्य। सहर्षम्।) अये कथमस्तमुपगच्छति[3] स भगवान्मृगाङ्कः।

तथा हि।

नृपतिपुरुषशङ्कितप्रचारं परगृहदूषणनिश्चितैकवीरम्।
घनतिमिरनिरुद्धसर्वभावा[4] रजनिरियं जननीव संवृणोति ॥ १०॥

वृक्षवाटिकापरिसरे संधिं कृत्वा प्रविष्टोऽस्मि मध्यमकम्। तद्यावदिदानीं, चतुःशालकमपि दूषयामि। भोः। अ-

(क) ता सुवेम्ह।

इयमिति। मनुष्यसत्त्वं नृसत्ताम्। [मनुष्यसत्त्वं मनुष्यबलं परिभूय तिरस्कृ- उत्प्रेक्षानुप्राणितोपमालंकारः। वंशस्थं वृत्तम्] ॥८॥ **कृत्वेति**। [शिक्षाबलेन विद- मर्थ्येन बलेन शक्त्या च शरीरस्य परिणाहो विशालता तस्य सुखः अक्लिष्टः सुखे प्रवेशो यत्र तादृशं कर्ममार्गं भित्तौ संधिं कृत्वा भूमिपरिसर्पणेन घृष्टौ पार्श्वौ यस्य गच्छामि। जीर्णतनुः कञ्चुकेन निर्मुच्यमानः भुजङ्गः इव गच्छामि। उपमा। वसन्तः तिलका वृत्तम्।] यथा जीर्णतनुः सर्पः मुच्यमानकञ्चुको गच्छति ॥ ९ ॥ **नृपतीति**। [घनं निबिडं च तत्तिमिरं च तेन निरुद्धाः छन्नाः सर्वे भावाः पदार्था यस्यां सा इयं रजनिः। नृपतिपुरुषेभ्यः नगररक्षकेभ्य इत्यर्थः। शङ्कितः शङ्कापूर्वं कृत इत्यर्थः। प्रचारो यस्य तम्। परगृहस्य यद् दूषणं चौर्येण धनहरणं तत्र निश्चितश्चासौ एकवीरश्च तम्। मादृशमिति शेषः। संवृणोति गोपायति। घनं यत्तिमिरं प्रेमान्ध्यं तेन निरुद्धः सर्वभावो यस्याः तादृशी। जननी केवलं वात्सल्यप्रेरितेत्यर्थः। यथा कुटिलगामिनमतिदुर्वृत्तमपि स्वपुत्रं संवृणोति दूषणाद्रक्षति तथा। 'घनपटलतमोनिरुद्धतारा' इति पाठे घनं पटलं समूहो यस्य तथाभूतं तमः तेन निरुद्धाः ताराः नक्षत्राणि यस्यां सा। पक्षे घनं यत्पटलं नेत्ररोगविशेषस्तस्य तमसा निरुद्धा व्याप्ता तारा अक्ष्णः कनीनिका यस्याः तथाभूता जननी पुत्रं संवृणोति आलिङ्गनेनाच्छादयति तथा। उपमालंकारः। पुष्पिताग्रा वृत्तम्] ॥ १० ॥

१ स्वपितः. २ जीर्णतनुं. ३ अस्तं ग०. ४ घनपटलतमोनिरुद्धतारा.

कामं नीचमिदं वदन्तु[1] पुरुषाः स्वप्ने च यद्वर्धते
विश्वस्तेषु च वञ्चनापरिभवश्चौर्यं न शौर्यं हि तत् ।
स्वाधीना वचनीयताऽपि हि वरं बद्धो न सेवाञ्जलि-
र्मार्गो ह्येष नरेन्द्रसौप्तिकवधे पूर्वं कृतो द्रौणिना ॥ ११ ॥

तत्कस्मिन्नु[2]द्देशे संधिमुत्पादयामि ।

देशः को नु जलावसेकशिथिलो यस्मिन्न शब्दो भवे-
द्भित्तीनां च न दर्शनान्तरगतः संधिः करालो भवेत् ।
क्षारक्षीणतया च लोष्टककृशं जीर्णं[3] क्व हर्म्यं भवे-
त्कस्मिन्स्त्रीजनदर्शनं च न भवेत्स्यादर्थसिद्धिश्च मे ॥ १२ ॥

(भित्तिं परामृश्य ।) नि[4]त्यादित्यदर्शनोदकसेचनेन दूषितेयं भूमिः क्षार-क्षीणा । मूषिकोत्करश्चेह । हन्त सिद्धोऽयमर्थः । प्रथममेतत्स्कन्दपुत्राणां सिद्धिलक्षणम् । अत्र कर्मप्रारम्भे कीदृशमिदानीं संधिमुत्पादयामि । इह खलु भगवता कनकशक्तिना चतुर्विधः संध्युपायो दर्शितः ।

ामिति । [यत् चौर्यं स्वप्ने निद्रावस्थायां न तु जाग्रदवस्थायामिति
'वः । वर्धते प्रसरति तद् इदं नीचं कर्म इति तथा च यद् विश्वस्तेषु शङ्कारहि-
वञ्चना प्रतारणा तद्रूपः पराभवः । इति यत् तद् हि न शौर्यमिति पुरुषाः कामं
तु । काममित्यर्धाङ्गीकारे । न मम तत्सर्वथा संमतम् । स्वाधीना स्वायत्ता वच-
ता निन्दाऽपि वरं मनाक् प्रिया । अत्र वचनीयताशब्देन तत्कारणं चौर्यादि
(क्ते । बद्धः सेवाञ्जलिर्न वरम् । श्ववृत्तिः सेवा । तदपेक्षया स्वातन्त्र्योपेतं चौर्यादि-
(य वरमिति भावः । एतदेव पुरावृत्तोपन्यासेनोत्तम्भयति । हि यतः एष मार्गः
लोद्विश्वस्तवञ्चनारूपः पूर्वं द्रौणिना प्रशस्तवीरेणेत्यर्थः । नरेन्द्राणां सौप्तिकवधे सुप्तं निद्रा
तत्र भवः सौप्तिकः वधस्तत्र कृतः अवलम्बितः ।] अश्वत्थाम्ना पाण्डवपक्षपातिनो
राजानो रात्रौ संधिं कृत्वा मारिताः । सौप्तिकमिति भावक्तान्तादध्यात्मादित्वाट्ठञ् ।
शार्दूलविक्रीडितं छन्दः]॥११॥ **देश इति** । [को नु भित्तीनां देशः भागः जलावसे-
केन शिथिलः यस्मिन्खननजन्यः शब्दः न भवेत् । यत्र च संधिः बिलं करालः
तुङ्गः भीषणो वा अत एव दर्शनान्तरगतः न भवेत् । क्षारेण क्षीणतया दुर्बलतया
हर्म्यं लोष्टकैः कृशं शीर्णलोष्टमिति यावत् । अत एव जीर्णमयत्नपाति क्व भवेत् । तथा
च कस्मिन्स्थाने स्त्रीजनदर्शनं न भवेत् । स्त्रीणां स्तेयशास्त्रे निषिद्धत्वादिति भावः ।
मे अर्थसिद्धिश्च भवेत् ।] संधिः किंभूतः । दर्शनान्तरगतो दर्शनान्तरं कनकशक्त्या-
ऽभिमतविशेषस्तदनुगतस्तद्बोधितः । करालो विपरीतः । स्त्रीजनदर्शनं हि तदनिष्टाचरणं
वीरजनगर्हितं संभाव्येत । [शार्दूलविक्रीडितं छन्दः] ॥१२॥ [मूषिकोत्करः मूषकोद्धृतमृ-

---

१ वदन्ति. २ कस्मिन्नु देशे; कस्मिन्देशे. ३ क्षीणं. ४ नित्यादित्यादर्शनोदकसेवनेन.

तद्यथा—पक्केष्ट[1]कानामाकर्षणमामेष्टकाना छेदनं पिण्डमयानां सेचनं काष्ठमयानां पाटनमिति । तदत्र पक्केष्टक इष्टकाकर्षणम् । तत्र

पद्म[2]व्याकोशं भास्करं बालचन्द्रं
वापी विस्तीर्णं स्वस्तिकं पूर्णकुम्भम् ।
तत्कस्मिन्देशे दर्शयाम्यात्मशिल्पं
दृष्ट्वा श्वो यं यद्विस्मयं यान्ति पौराः ॥ १३ ॥

तदत्र पक्केष्टके पूर्णकुम्भ एव शोभते । तमुत्पादयामि ।

अन्यासु भित्तिषु मया निशि पाटितासु
क्षारक्षतासु विषमासु च कल्पनासु ।
दृष्ट्वा प्रभातसमये प्रतिवेशिवर्गो
दोषांश्च मे वदति कर्मणि कौशलं च ॥ १४ ॥

नमो वरदाय कुमारकार्त्तिकेयाय नमः कनकशक्तये ब्रह्मण्यदेवाय देवव्रताय नमो भास्करनन्दिने नमो योगाचार्याय यस्याहं प्रथ[3]मः शिष्यः । तेन च परितुष्टेन योगरो[4]चना मे दत्ता ।

अनया हि समालब्धं न मां द्रक्ष्यन्ति रक्षिणः ।
शस्त्रं च पतितं गात्रे रुजं नोत्पादयिष्यति ॥ १५ ॥

(तथा करोति ।) धिक्कष्टम् । प्रमाणसूत्रं मे विस्मृतम् । (विचिन्त्य ।) आं इदं [5]यज्ञोपवीतं प्रमाणसूत्रं भविष्यति । यज्ञोपवीतं हि नाम ब्राह्मणस्य महदुपकरण[6]द्रव्यं विशेषतो[7]ऽस्माद्विधस्य । कुतः ।

एतेन मापयति भित्तिषु कर्ममार्ग-
मेतेन मोचयति भूषणसंप्रयोगान् ।
उद्घाटको भवति यन्त्रदृढे कपाटे
दष्टस्य कीटभुजगैः परिवेष्टनं च ॥ १६ ॥

त्पुञ्जः । स्कन्दपुत्राणां स्कन्दोपजीविचौराचार्याणाम् । कनकशक्तिना कनकस्य शक्तिः आयुधविशेषो यस्य तेन स्कन्देन । **पद्मव्याकोशमित्यादि** । वैश्वदेवीछन्दः । [पद्मव्याकोशादयः संधिसंज्ञाः ।] वापी विस्तीर्णमिति द्वे नामनी । यदुक्तवान्—'इष्टकाभित्तौ च संस्कारवशेन पद्मव्याकोशादयः सप्त संज्ञाः' इति । भास्करो मण्डलाकारः । अन्येऽपि नामसदृशाः सप्तसंधयः । [आत्मशिल्पं संधिनिर्माणकौशलम् ।] ॥ १३ ॥ **अन्यास्विति** । [क्षारेण क्षतासु जीर्णासु विषमासु कठिनासु च कल्पनासु रचनासु मया पाटितासु । प्रतिवेशिवर्गः आसन्नवर्तिजनसमूहः ।] कौशलं चेति चकारोऽप्यर्थे ॥ १४ ॥ कार्त्तिकेयः परमगुरुः । 'ब्रह्मण्यदेवादयोऽपरगुरवः' इत्याहुः सर्वे । 'कार्त्तिकेयविशेषणम्' इत्येके । 'ब्रह्मण्याय देवाय' इति क्वचित्पाठः । [योगः मायाप्रयोगः तेन साधिता रोचना गोरोचना ।] **अनयेति** । [समालब्धं लिप्तगात्रम् ।] ॥१५॥ **एतेनेति** । कर्मसु संधिरचनासु कर्ममार्गं प्रवेशानुकूलसंधिपरिमाणमिति यावत् । भूषणसंप्रयोगानिति कटकादेर्घर्मावकीलकसुश्लिष्टसंयोजनाभेदान् ।

---

१ पक्केष्टिका. २ पद्मं. ३ आद्यः. ४ रचना. ५ मे यज्ञो०. ६ उपकरणम्. ७ ह्यस्म०.

मापयित्वा कर्म समारभे। (तथा कृत्वाऽवलोक्य च।) एकलोष्टावशेषोऽयं संधिः। धिक्कष्टम्। अहिना दष्टोऽस्मि। (यज्ञोपवीतेनाङ्गुलीं बद्ध्वा विषवेगं नाटयति। चिकित्सां कृत्वा।) स्वस्थोऽस्मि। (पुनः कर्म कृत्वा दृष्ट्वा च।) अये ज्वलति प्रदीपः। तथा हि।

शिखा प्रदीपस्य सुवर्णपिञ्जरा महीतले संधिमुखेन निर्गता।
विभाति पर्यन्ततमःसमावृता सुवर्णरेखेव कषे निवेशिता॥ १७॥

(पुनः कर्म कृत्वा।) समाप्तोऽयं संधिः। भवतु। प्रविशामि। अथ वा न तावत्प्रविशामि। प्रतिपुरुषं निवेशयामि। (तथा कृत्वा।) अये न कश्चित्। नमः कार्त्तिकेयाय। (प्रविश्य दृष्ट्वा च।) अये पुरुषद्वयं सुप्तम्। भवतु। आत्मरक्षार्थं द्वारमुद्घाटयामि। कथं जीर्णत्वाद्गृहस्य विरौति कपाटम्। तद्यावत्सलिलमन्वेषयामि। क्व न खलु सलिलं भविष्यति। (इतस्ततो दृष्ट्वा सलिलं गृहीत्वा क्षिपन्सशङ्कम्।) मा तावद्भूमौ पतच्छब्दमुत्पादयेत्। भवतु। एवं तावत्। (पृष्ठेन प्रतीक्ष्य कपाटमुद्घाट्य।) भवतु। एवं तावत्। इदानीं परीक्षे किं लक्ष्यसुप्तमुत परमार्थसुप्तमिदं द्वयम्। (त्रासयित्वा परीक्ष्य च।) अये परमार्थसुप्तेनानेन भवितव्यम्। तथा हि।

निःश्वासोऽस्य न शङ्कितः सुविशदस्तुल्यान्तरं वर्तते
दृष्टिर्गाढनिमीलिता न विकला नाभ्यन्तरे चञ्चला।
गात्रं स्रस्तशरीरसंधिशिथिलं शय्याप्रमाणाधिकं
दीपं चापि न मर्षयेदभिमुखं स्याल्लक्ष्यसुप्तं यदि॥ १८॥

[वसन्ततिलकं वृत्तम्]॥ १६॥ **शिखेति**। [प्रदीपस्य सुवर्णवत् पिञ्जरा पिङ्गलवर्णा महीतले संधिद्वारेण निर्गता पर्यन्ते यत्तमस्तेन समावृता वेष्टिता कषे निकषपाषाणे निवेशिता सुवर्णरेखेव विभाति। उपमा। वंशस्थं वृत्तम्]॥ १७॥ प्रतिपुरुषं कृत्रिमपुरुषाकृतिम्।] 'प्रतीक्ष्य' इत्यत्र 'प्रतीच्छ्य' इति पाठो दृश्यते। तच्च प्रतीच्छाग्रहणं कृत्वेत्यत्रार्थे णिचि समासे क्त्वाप्रत्यये ल्यपि रूपम्। लक्ष्यसुप्तं व्याजसुप्तम्। **निःश्वास इति**। [अस्य पुरुषद्वयस्य निःश्वासः शङ्कितः संजातशङ्कः न। शङ्कितस्य पुरुषस्य इव नेत्यर्थः। यतः सुविशदः स्फीतः]। तुल्यमविषयमन्तरमन्तरालो यथा स्यादेवं वर्तते। कपटसुप्तस्य विषमान्तरालवत्त्वात्। [दृष्टिः गाढं दृढं यथा तथा निमीलिता न विकला विश्लिष्टा अभ्यन्तरे व्याजसुप्तस्य इव न चञ्चला। गात्रं स्रस्ताश्च ते शरीरसंधयश्च तैः शिथिलं विश्लथम्। शय्यायाः प्रमाणं तस्मादधिकं हस्तपादस्य स्वैरप्रसरणात्। व्याजसुप्तो हि न तथा कुर्यात्। तथा च यदि लक्ष्यसुप्तं स्यादभिमुखं दीपं न मर्षयेत्सहेत। तत्प्रकाशमित्यर्थः। अतः परमार्थसुप्तमिदमिति निश्चयः। अत्रोक्तार्थस्य समर्थनाय कारणसमुदायस्योपादानात्समुच्चयालंकारः। शार्दूलविक्रीडितं

१ हा धिक्क०. २ प्रवेश०. ३ इति प्र०. ४ कपाटः. ५ लक्ष०. ६ स्वप्नान्तरं. ७ नाभ्यन्तरं.

(समन्तादवलोक्य ।) अये कथं मृदङ्गः । अयं दर्दुरः । अयं पणवः । इयमपि वीणा । एते वंशाः । अमी पुस्तकाः । कथं नाट्याचार्यस्य गृहमिदम् । अथ वा भवनप्रत्ययात्प्रविष्टोऽस्मि । तत्किं परमार्थदरिद्रोऽयमुत राजभयाच्चौरभयाद्वा भूमिष्ठं द्रव्यं धारयति । तन्ममापि नाम शर्विलकस्य भूमिष्ठं द्रव्यम् । भवतु । बीजं प्रक्षिपामि । (तथा कृत्वा ।) निक्षिप्तं बीजं न क्वचित्स्फारीभवति । अये परमार्थदरिद्रोऽयम् । भवतु । गच्छामि ।

विदूषकः—(उत्स्वप्नायते ।) भो वयस्य संधिरिव दृश्यते । चौरमिव पश्यामि । तद्गृह्णातु भवानेतत्सुवर्णभाण्डम् । (क)

शर्विलकः—किं न खल्वयमिह मां प्रविष्टं ज्ञात्वा दरिद्रोऽस्मीत्युपहसति । तत्किं व्यापादयामि उत लघुत्वादुत्स्वप्नायते । (दृष्ट्वा ।) अये जर्जरस्नानशाटीनिबद्धं दीपप्रभयोद्दीपितं सत्यमेवैतदलंकरणभाण्डम् । भवतु । गृह्णामि । अथ वा न युक्तं तुल्यावस्थं कुलपुत्रजनं पीडयितुम् । तद्गच्छामि ।

विदूषकः—भो वयस्य शापितोऽसि गोब्राह्मणकाम्यया यद्येतत्सुवर्णभाण्डं न गृह्णासि । (ख)

शर्विलकः—अनतिक्रमणीया भगवती गोकाम्या ब्राह्मणकाम्या च । तद्गृह्णामि । अथ वा ज्वलति प्रदीपः । अस्ति च मया प्रदीपनिर्वापणार्थमाग्नेयः कीटो धार्यते । तं तावत्प्रवेशयामि । तस्यायं देशकालः । एष

(क) भो वअस्स संधी विअ दिज्जदि । चोरं विअ पेक्खामि । ता गेण्हदु भवं एदं सुवण्णभण्डअम् ।

(ख) भो वअस्स साविदोसि गोबम्हणकामाए जइ एदं सुवण्णभण्डअं ण गेह्णसि ।

छन्दः] ॥ १८ ॥ [दर्दुरपणवौ वाद्यभेदौ ।] स्फारीभवति । अभिमन्त्रितो बीजविशेषो धनसहितभूतले क्षिप्तो बहुलीभवतीति प्रसिद्धिः । लघुत्वाच्चपलत्वात् । [लघुः नीचः खलु उत्स्वप्नायते न तु महाशय इति भावः । गोकाम्या गवेच्छा ब्राह्मणकाम्या ब्राह्मणेच्छा । ताभ्यां शापितः शपथं प्रापितः । सति संभवे गोब्राह्मणयोरिच्छा पूरणीयैवास्तिकैरिति धर्मदर्शनराद्धान्तः । गोब्राह्मणयोरिच्छायाः प्रतिघाते महत्पातकमिति निर्णयसिन्धुप्रमुखग्रन्थेषु स्पष्टम् । इति ल. दी.] गोकाम्येति । कामयतेर्लिङ्सामान्ये अचो यति पश्चात्स्त्रीत्वं विवक्षणीयम् । गोब्राह्मणसहिताया भङ्गं त्वं करोषि यदीदं न गृह्णासीति शपथार्थः । प्रणयो-

१ चार्यगृ०. २ तुल्यावस्थकु०. ३ ०क्रमणी मम. ४ तथा कृत्वा । अये निर्वापितः प्रदीपः. ५ संधी विअ दि० संधी विअ दि०.

मुक्तो मया कीटो यात्वैवास्य दीपस्योपरि मण्डलैर्विचित्रैर्विचरति। एष पक्षद्वयानिलेन निर्वापितो भद्रपीठेन। धिक्। कृतमन्धकारम्। अथ वा मयाऽप्यस्मद्ब्राह्मणकुले धिक् कृतमन्धकारम्। अहं हि चतुर्वेदविदोऽप्रतिग्राहकस्य पुत्रः शर्विलको नाम ब्राह्मणो गणिकामदनिकार्थमकार्यमनुतिष्ठामि। इदानीं करोमि ब्राह्मणस्य प्रणयम्। (इति जिघृक्षति।)

विदूषकः—भो वयस्य शीतलस्तेऽग्रहस्तः। (क)

शर्विलकः—धिक्प्रमादः। सलिलसंपर्काच्छीतलो मेऽग्रहस्तः। भवतु। कक्षयोर्हस्तं प्रक्षिपामि। (नाट्येन सव्यहस्तमुष्णीकृत्य गृह्णाति।)

विदूषकः—गृहीतम्। (ख)

शर्विलकः—अनतिक्रमणीयोऽयं ब्राह्मणप्रणयः। तद्गृहीतम्।

विदूषकः—इदानीं विक्रीतपण्य इव वाणिगहं सुखं स्वप्स्यामि। (ग)

शर्विलकः—महाब्राह्मण स्वपिहि वर्षशतम्। कष्टमेवं मदनिकागणिकार्थे ब्राह्मणकुलं तमसि पातितम्। अथ वाऽऽत्मा पातितः।

धिगस्तु खलु दारिद्र्यमनिर्वेदितपौरुषम्।
यदेतद्गर्हितं कर्म निन्दामि च करोमि च ॥ १९ ॥

तद्यावन्मदनिकाया निष्क्रयणार्थं वसन्तसेनागृहं गच्छामि। (परिक्रम्यावलोक्य च।) अये पदशब्द इव। मा नाम रक्षिणः। भवतु। स्तम्भीभूत्वा तिष्ठामि। अथ वा ममापि नाम शर्विलकस्य रक्षिणः। योऽहं

मार्जारः क्रमणे मृगः प्रसरणे श्येनो ग्रहालुञ्चने
सुप्तासुप्तमनुष्यवीर्यतुलने श्वा सर्पणे पन्नगः।

(क) भो वअस्स सीदलो दे अग्गहत्थो। (ख) गहिदम्।
(ग) दाणिं विक्किणिदपण्णो विअ वाणिओ अहं सुहं सुविस्सम्।

ऽभ्यर्थना। **धिगिति।** [निर्वेदः अस्य संजात इति निर्वेदितं न निर्वेदितमनिर्वेदितं प्रकृतार्थेऽकृतनिश्चयमित्यर्थः। तथाभूतं पौरुषं यस्मिन्।] प्रकरणनिश्चयो निर्वेदः तदभावोऽनिर्वेदः ॥ १९ ॥ पदशब्द इत्यनेन रदनिकाप्रवेशसूचनम्। **मार्जार इति।** [क्रमणे लङ्घने मार्जारः प्रसरणे शीघ्रगमने मृगः। ग्रहेण आक्रमणेन लुञ्चनं लक्ष्यस्य छेदने श्येनः। सुप्तस्यासुप्तस्य च मनुष्यस्य वीर्यस्य शक्ते-

१ यात्येवास्य, यात्वेवास्य...रितुम्. २ कीटेन. ३ कक्षायां. ४ इति नास्त्येन. ५ स्वहस्तं ६ ब्रह्मकुलं. ७ आत्माऽपि. ८ निवेदित. ९ गृहा०.

माया रूपशरीरवेशरचने वाग्देशभाषान्तरे
दीपो रात्रिषु संकटेषु डुड्डुभो वाजी स्थले नौर्जले ॥ २० ॥

अपि च ।

भुजग इव गतौ गिरिः स्थिरत्वे पतगपतेः परिसर्पणे च तुल्यः ।
शश इव भुवनावलोकनेऽहं वृक इव च ग्रहणे बले च सिंहः ॥ २१ ॥

(प्रविश्य ।)

रदनिका—हा धिक् हा धिक् बहिर्द्वारशालायां प्रसुप्तो वर्धमानकः सोऽप्यत्र न दृश्यते । भवतु । आर्यमैत्रेयमाह्वयामि । (इति परिक्रामति ।) (क)

शर्विलकः—(रदनिकां हन्तुमिच्छति । निरूप्य ।) कथं स्त्री । भवतु । गच्छामि । (इति निष्क्रान्तः ।)

रदनिका—(गत्वा सत्रासम् ।) हा धिक् हा धिक् अस्माकं गृहे संधिं कर्तयित्वा चौरो निष्क्रामति । भवतु । मैत्रेयं गत्वा प्रबोधयामि । (विदूषकमुपगम्य ।) आर्य मैत्रेय उत्तिष्ठोत्तिष्ठ । अस्माकं गेहे संधिं कर्तयित्वा चौरो निष्क्रान्तः । (ख)

विदूषकः—(उत्थाय ।) आः दास्याःपुत्रिके किं भणसि । चौरं कर्तयित्वा संधिर्निष्क्रान्तः । (ग)

(क) हद्धी हद्धी बाहिरदुआरसालाए पसुत्तो वड्ढमाणओ सोवि एत्थ ण दीसइ । भोदु । अज्जमित्तेअं सद्दावेमि ।

(ख) हद्धी हद्धी अम्हाणं गेहे संधिं कप्पिअ चोरो णिक्कमति । भोदु । मित्तेअं गदुअ पबोधेमि । अज्ज मित्तेअ उट्ठेहि उट्ठेहि । अम्हाणं गेहे संधिं कप्पिअ चोरो णिक्कन्तो ।

(ग) आः दासीएधीए किं भणासि । [2]चोरं कप्पिअ संधी णिक्कन्तो ।

स्तुलने श्वा । सर्पणे भूमितलवक्रगमने पन्नगः । रूपमाकारः शरीरं पश्चाद्याकृतिवेशः च एतेषां रचने माया । अतिपटुरित्यर्थः । देशभाषान्तरे तत्तद्देशभाषायाः परिज्ञाने भाषणे च वाक् सरस्वती । रात्रिषु दीपः । दीप इव सर्वं निरपेक्षः पश्यामीति भावः । संकटेषु दुर्गमप्रदेशेषु डुड्डुभः सर्पविशेषः । स्थले वाजी अश्व इव शीघ्रगामी । जले नौरिव प्लवनशीलः । शार्दूलविक्रीडितं वृत्तम् ।] ग्रहणयुक्तमालुञ्चनं ग्रहालुञ्चनम् । श्वा कुक्कुरः । माया शाम्बरी विद्या । रूपमाकारः । वेशोऽलंकारादियोजना ॥ २० ॥ **भुजग इति** । [परिसर्पणे सवेगं परिभ्रमणे पतगपतेः गरुडस्य तुल्यः । भुवनस्य निलयस्थानस्यावलोकने शश इव । भिन्नसाधारणधर्मा मालोपमाऽलंकारः । पुष्पिताग्रा छन्दः ।] वृक इति हुण्डार इति प्रसिद्धः ॥ २१ ॥ कप्पिअ क्लृप्त्वा । निर्मा-

---

१ कल्पयित्वा. २ चोरो कप्पिदो.

रदनिका—हताश अलं परिहासेन। किं न प्रेक्षस एतद्। (क)

विदूषकः—आः दास्याःपुत्रिके किं भणासि द्वितीयमिव द्वारमुद्घाटितमिति। भो वयस्य चारुदत्त उत्तिष्ठोत्तिष्ठ। अस्माकं गेहे संधिं दत्त्वा चौरो निष्क्रान्तः। (ख)

चारुदत्तः—भवतु। भोः अलं परिहासेन।

विदूषकः—भोः न परिहासः। प्रेक्षतां भवान्। (ग)

चारुदत्तः—कस्मिन्नुद्देशे।

विदूषकः—भोः एषः। (घ)

चारुदत्तः—(विलोक्य।) अहो दर्शनीयोऽयं संधिः।

उपरितलनिपातितेष्टकोऽयं शिरसि तनुर्विपुलश्च मध्यदेशे।
असदृशजनसंप्रयोगभीरोर्हृदयमिव स्फुटितं महागृहस्य ॥ १२ ॥

कथमस्मिन्नपि कर्मणि कुशलता।

विदूषकः—भो वयस्य अयं संधिर्द्वाभ्यामेव दत्तो भवेत्। अथ वाऽऽगन्तुकेन शिक्षितुकामेन वा। अन्यथाऽत्रोज्जयिन्यां कोऽस्माकं गृहविभवं न जानाति। (ङ)

चारुदत्तः—

वैदेश्येन कृतो भवेन्मम गृहे व्यापारमभ्यस्यता
नासौ वेदितवान्धनैर्विरहितं विस्रब्धसुप्तं जनम्।

(क) हदास अलं परिहासेण। किं ण पेक्खसि एणम्।

(ख) आः दासीएधीए किं भणासि दुदिअं विअ दुआरअं उग्घाडिदं त्ति। भो वअस्स चारुदत्त उट्ठेहि उट्ठेहि। अम्हाणं गेहे संधिं दइअ चोरो णिक्कन्तो।

(ग) भो ण परिहासो। पेक्खदु भवम्। (घ) भो एसो।

(ङ) भो वअस्स अअं संधी दुवेहिं ज्जेव्व दिण्णो भवे। आदु आगन्तुएण सिक्खिदुकामेण वा। अण्णधा इध उज्जइणीए को अम्हाणं घरविहवं ण जाणादि।

येत्यर्थः। **उपरीति**। उपरिभागे तलभागे च [उपरितलादूर्ध्वप्रदेशात्] निपातिता आकृष्टा इष्टका यत्र। 'उपरितन-' इति पाठे उपरितनी उपरिभवा। शेषं तुल्यम्। [शिरसि उपरिभागे तनुः अल्पविस्तारः मध्यदेशे मध्यभागे विपुलः विस्तृतः। कुम्भाकार इति भावः। असदृशजनस्य चौरादेः संप्रयोगः आत्मनि व्यापारः तस्माद्भीरोः महागृहस्य स्फुटितं हृदयमिव स्थितः। उत्प्रेक्षालंकारः। पुष्पिताग्रा वृत्तम्]॥१२॥ **वैदेश्येनेति**। [विदेशे भवः वैदेश्यः तेन। व्यापारं संधिकरणमभ्यस्यता मम गृहे संधिः कृतो भवेत्। अतः असौ नरः धनैर्विरहितमतः विस्रब्धं

---

१ उपरितन. २ विश्रब्ध.

दृष्ट्वा प्राङ्महतीं निवासरचनामस्माकमाशान्वितः
संधिच्छेदनखिन्न एव सुचिरं पश्चान्निराशो गतः ॥ २३ ॥

ततः सुहृद्भ्यः किमसौ कथयिष्यति तपस्वी । सार्थवाहसुतस्य गृहं प्रविश्य न किंचिन्मया[1] समासादितमिति ।

विदूषकः—भोः कथं तमेव चौरहतकमनुशोचसि । तेन चिन्तितं महदेतद्गृहम् । इतो रत्नभाण्डं सुवर्णभाण्डं वा निष्क्रामयिष्यामि । (स्मृत्वा । सविषादमात्मगतम् ।) कुत्र तत्सुवर्णभाण्डम् । (पुनरनुस्मृत्य । प्रकाशम् ।) भो वयस्य त्वं सर्वकालं भणसि । मूर्खो मैत्रेयोऽपण्डितो मैत्रेय इति । सुष्ठु मया कृतं तत्सुवर्णभाण्डं भवतो हस्ते समर्पयता । अन्यथा दास्याःपुत्रेणापहृतं भवेत् । (क)

चारुदत्तः—अलं परिहासेन ।

विदूषकः—भोः यथा नामाहं मूर्खस्तत्किं परिहासस्यापि देशकालं न जानामि । (ख)

चारुदत्तः—कस्यां वेलायाम् ।

विदूषकः—भोः यदा त्वं मया भणितोऽसि शीतलस्तेऽग्रहस्तः । (ग)

चारुदत्तः—कदाचिदेवमपि स्यात् । (सर्वतो निरूप्य । सहर्षम् ।) वयस्य दिष्ट्या ते प्रियं निवेदयामि ।

विदूषकः—किं नापहृतम् । (घ)

चारुदत्तः—हृतम् ।

विदूषकः—तथाऽपि किं प्रियम् । (ङ)

(क) भो कधं तं जेव्व चोरहदअं अणुसोचसि । तेण चिन्तिदं महन्तं एदं गेहम् । इदो रअणभण्डअं सुवण्णभण्डअं वा णिक्कामइस्सामि । कहिं तं सुवण्णभण्डअम् । भो वअस्स तुमं सव्व[2]कालं भणासि । मुक्खो मित्तेअओ अपण्डिदो मित्तेअओ त्ति । सुट्ठु[3] मए किदं तं सुवण्णभण्डअं भवदो हत्थे समप्पअन्तेण । अण्णधा दासीएपुत्तेण अवहदं भवे ।

(ख) भो जह णाम अहं मुक्खो ता किं परिहासस्स वि देशआलं ण जाणामि ।

(ग) भो जदा तुमं मए भणिदो सि शीदलो दे अग्गहत्थो ।

(घ) किं ण अवहदम् । (ङ) तधा वि किं पिअम् ।

यथा तथा सुप्तं जनं न वेदितवान् । असौ अस्माकं महतीं निवासरचनां दृष्ट्वा प्राग् आशान्वितः सुचिरं संधिच्छेदनखिन्नः पश्चाद् द्रव्यालाभे निराश एव गतः । [शार्दूलविक्रीडितं वृत्तम्] ॥ २३ ॥ निष्क्रामयिष्यामि बहिः करिष्यामीति दिष्ट्या हर्षे ।

---

१ मयाऽऽसादितम्. २ सव्वं. ३ सुट्ठु क्खु.

चारुदत्तः—यदसौ कृतार्थो गतः ।

विदूषकः—न्यासः खलु सः । (क)

चारुदत्तः—कथं न्यासः । (मोहमुपगतः ।)

विदूषकः—समाश्वसितु भवान् । यदि न्यासश्चौरेणापहृतस्त्वं किं मोहमुपगतः । (ख)

चारुदत्तः—(समाश्वस्य ।) वयस्य ।

कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति ।
शङ्कनीया हि लोकेऽस्मिन्निष्प्रतापा दरिद्रता ॥ २४ ॥

भोः कष्टम् ।

यदि तावत्कृतान्तेन प्रणयोऽर्थेषु मे कृतः ।
किमिदानीं नृशंसेन चारित्रमपि दूषितम् ॥ २५ ॥

विदूषकः—अहं खल्वपलपिष्यामि केन दत्तं केन गृहीतं को वा साक्षीति । (ग)

चारुदत्तः—अहमिदानीमनृतमभिधास्ये ।

भैक्षेणाप्यर्जयिष्यामि पुनर्न्यासप्रतिक्रियाम् ।
अनृतं नाभिधास्यामि चारित्रभ्रंशकारणम् ॥ २६ ॥

रदनिका—तद्यावदार्याधूतायै गत्वा निवेदयामि । (इति निष्क्रान्ता ।) (घ)

(ततः प्रविशति चेट्या सह चारुदत्तवधूः ।)

वधूः—(ससंभ्रमम् ।) अयि सत्यमपरिक्षतशरीर आर्यपुत्र आर्यमैत्रेयेण सह । (ङ)

(**क**) णासो क्खु सो ।
(**ख**) समस्ससदु भवम् । जइ णासो चोरेण अवहदो तुमं किं मोहं उवगदो ।
(**ग**) अहं क्खु अवलविस्सं केण दिण्णं केण गहिदं को वा सक्खि त्ति ।
(**घ**) ता जाव अज्जाधूदाए गदुअ णिवेदेमि ।
(**ङ**) अइ सच्चं अवरिक्खदसरीरो अज्जउत्तो अज्जमित्तेएण सह ।

क इति । [भूतार्थं यथावृत्तमर्थं चौरेणापहृतं रत्नभाण्डमिति । तुलयिष्यति लघूकरिष्यति ।] निष्प्रतापा निष्पौरुषा । [अर्थान्तरन्यासोऽलंकारः] ॥ २४ ॥ **यदीति** । [कृतान्तेन दैवेन] । प्रणयोऽर्थित्वम् । [दूषितं मलिनीकृतम् । लोकैः । ममैवापहारकत्वेनावस्थापनात् इति भावः] ॥ २५ ॥ **भैक्षेणेति** । [न्यासस्य प्रतिक्रियां तन्निष्क्रयद्रव्यमित्यर्थः । भैक्षेण भिक्षालब्धद्रव्यसंघातेन अर्जयिष्यामि] ॥ २६ ॥ अथ-

---

१ उपागतः. २ चरि०. ३ भैक्ष्येण. ४ प्रविश्य चेट्या. ५ अज्जाए.

चेटी—भर्त्रि सत्यम् । किं तु यः स वेश्याजनस्यालंकारः सोऽपहृतः । (क)

वधूः—(मोहं नाटयति ।)

चेटी—समाश्वसित्वार्या धूता । (ख)

वधूः—(समाश्वस्य ।) चेटि किं भणसि अपरिक्षतशरीर आर्यपुत्र इति । वरमिदानीं स शरीरेण परिक्षतः न पुनश्चारित्रेण । सांप्रतमुज्जयिन्यां जन एवं मन्त्रयिष्यति दरिद्रतयाऽऽर्यपुत्रेणैवेदृशमकार्यमनुष्ठितमिति । (ऊर्ध्वमवलोक्य निःश्वस्य च ।) भगवन्कृतान्त पुष्करपत्रपतितजलबिन्दुचञ्चलैः क्रीडसि दरिद्रपुरुषभागधेयैः । इयं च म एका मातृगृहलब्धा रत्नावली तिष्ठति । एतामप्यतिशौण्डीरतयाऽऽर्यपुत्रो न ग्रहीष्यति । चेटि आर्यमैत्रेयं तावच्छब्दापय । (ग)

चेटी—यदार्या धूताऽऽज्ञापयति । (विदूषकमुपगम्य ।) आर्य मैत्रेय धूता त्वामाह्वयति । (घ)

विदूषकः—कुत्र सा । (ङ)

चेटी—एषा तिष्ठति । उपसर्प । (च)

विदूषकः—(उपसृत्य ।) स्वस्ति भवत्यै । (छ)

वधूः—आर्य वन्दे । आर्य पुरस्तान्मुखो भव । (ज)

(क) भट्टिणि सच्चम् । किं तु जो सो वेस्साजणकेरको अलंकारओ सो अवहदो ।

(ख) समस्ससदु[1] अज्जा धूदा ।

(ग) हञ्जे किं भणासि अवरिक्खदसरीरो अज्जउत्तो त्ति । वरं दाणिं सो सरीरेण परिक्खदो ण उण चारित्तेण । संपदं उज्जइणीए जणो एव्वं मन्तइस्सदि दलिद्ददाए अज्जउत्तेण ज्जेव्व ईदिसं अकज्जं अणुचिट्ठिदं त्ति । भअवं कअन्त पोक्खरवत्तपडिदजलबिन्दुचञ्चलेहिं कीलसि दलिद्दपुरिसभाअधेएहिं । इअं च मे एक्का मादुघरलद्धा रअणावली चिट्ठदि । एदं पि अदिसोण्डीरदाए[2] अज्जउत्तो ण गेण्हिस्सदि । हञ्जे अज्जमित्तेअं दाव सद्दावेहि ।

(घ) जं अज्जा धूदा आणवेदि । अज्ज मित्तेअ धूदा दे सद्दावेदि ।

(ङ) कहिं सा । (च) एसा चिट्ठदि । उवसप्प ।

(छ) सोत्थि भोदीए । (ज) अज्ज वन्दामि । अज्ज पुरत्थिआमुहो[3] होहि ।

रक्खणजणस्य अपगतं रक्षणं यस्यासौ अपरक्षणो जनः । [पुष्करपत्रं कमलपत्रं तत्पतिता जलबिन्दवस्तद्वच्चञ्चलैः । अतिशौण्डीरतया अत्युन्नतचित्ततया । पुरस्तान्मुखः प्राचीमुखः । प्रतिग्रहे तस्यावश्यकत्वात् ।] पौरत्थिआहिमुहो पौरस्त्याभिमुखः । पूर्व-

---

१ समस्स० समस्स०. २ एसो अज्ज०. ३ पौरात्थिआहि० (पौरस्त्याभि०).

विदूषकः—एष भवति पुरस्तान्मुखः संवृत्तोऽस्मि । (क)

वधूः—आर्य प्रतीच्छेमाम् । (ख)

विदूषकः—किं न्विदम् । (ग)

वधूः—अहं खलु रत्नषष्ठीमुपोषिताऽऽसम् । तत्र यथाविभवानुसारेण ब्राह्मणः प्रतिग्राहयितव्यः । स च न प्रतिग्राहितः । तत्तस्य कृते प्रतीच्छेमां रत्नमालिकाम् । (घ)

विदूषकः—(गृहीत्वा ।) स्वस्ति । गमिष्यामि । प्रियवयस्याय निवेदयामि । (ङ)

वधूः—आर्य मैत्रेय मा खलु मां लज्जितां कुरु । (इति निष्क्रान्ता ।) (च)

विदूषकः—(सविस्मयम् ।) अहो अस्या महानुभावता । (छ)

चारुदत्तः—अये चिरयति मैत्रेयः । मा नाम वैक्लव्यादकार्यं कुर्यात् । मैत्रेय मैत्रेय ।

विदूषकः—(उपसृत्य ।) एषोऽस्मि । गृहाणैताम् । (रत्नावलीं दर्शयति ।) (ज)

चारुदत्तः—किमेतत् ।

विदूषकः—भोः यत्ते सदृशदारसंग्रहस्य फलम् । (झ)

चारुदत्तः—कथं ब्राह्मणी मामनुकम्पते । कष्टम् । इदानीमस्मि दरिद्रः ।

आत्मभाग्यक्षतद्रव्यः स्त्रीद्रव्येणानुकम्पितः ।
अर्थतः पुरुषो नारी या नारी साऽर्थतः पुमान् ॥ २७ ॥

(क) एसो भोदि पुरत्थिआमुहो संवुत्तो म्हि ।
(ख) अज्ज पडिच्छ इमम् । (ग) किं ण्णेदम् ।
(घ) अहं क्खु रअणसट्ठिं उववसिदा आसि । तहिं जधाविहवाणुसारेण बम्हणो पडिग्गाहिदव्वो । सो अ ण पडिग्गाहिदो । ता तस्स किदे पडिच्छ इमं रअणमालिअं ।
(ङ) सोत्थि । गमिस्सम् । पिअवअस्सस्स णिवेदेमि ।
(च) अज्ज मित्तेअ मा क्खु मं लज्जावेहि । (छ) अहो से महाणुभावदा ।
(ज) एसो म्हि । गेण्ह एदम् । (झ) भो जं दे सरिसदारसंगहस्स फलम् ।

दिगवलम्बितमुख इत्यर्थः । रअणसट्ठिं रत्नषष्ठिकाभिधं व्रतम् । ' अरण्यषष्ठिका नाम ग्रीष्मव्रतम् ' इत्येके । [प्रतिग्राहयितव्यः यतो दक्षिणया व्रतं सुसिद्धं भवति ।] [वैक्लव्यात् चित्तस्य दौःस्थित्यात् । अकार्यमात्मघातादि । **आत्मेति** । आत्मभाग्येन स्वस्य दुर्दैवेन क्षतं द्रव्यं यस्य सः । अर्थतः धनाद्धेतोः । द्रव्याभावादित्यर्थः । [अर्थतः अर्थसंबन्धेन] ॥ २७ ॥ **विभवेति** । [विभवमनुगता विभवानुरूपं

---

१ अज्ज अहं. २ गहि०.

अथ वा। नाहं दरिद्रः । यस्य मम

विभवानुगता भार्या सुखदुःखसुहृद्भवान् ।
सत्यं च न परिभ्रष्टं यद्दरिद्रेषु दुर्लभम् ॥ २८ ॥

मैत्रेय गच्छ रत्नावलीमादाय वसन्तसेनायाः सकाशम्[1] । वक्तव्या च सा मद्वचनात् । यत्खल्वस्माभिः सुवर्णभाण्डमात्मीयमिति[2] कृत्वा विस्रम्भाद्द्यूते हारितम् । तस्य कृते गृह्यतामियं रत्नावलीति ।

विदूषकः—मा तावदखादितस्याभुक्तस्याल्पमूल्यस्य चौरैरपहृतस्य कारणाच्चतुःसमुद्रसारभूता रत्नावली दीयते । (क)

चारुदत्तः—वयस्य मा मैवम् ।

यं समालम्ब्य विश्वासं न्यासोऽस्मासु तया कृतः ।
तस्यैतन्महतो मूल्यं प्रत्ययस्यैव दीयते ॥ २९ ॥

तद्वयस्य अस्मच्छरीरस्पृष्टिकया शापितोऽसि नैनामग्राहयित्वाऽत्रागन्तव्यम् । वर्धमानक[3] ।

एताभिरिष्टकाभिः संधिः क्रियतां सुसंहतः शीघ्रम् ।
परिवादबहलदोषान्न[4] यस्य रक्षां परिहरामि ॥ ३० ॥

वयस्य मैत्रेय भवताऽप्यकृपणशौण्डीर्यमभिधातव्यम् ।

विदूषकः—भो दरिद्रः किमकृपणं मन्त्रयते । (ख)

चारुदत्तः—अदरिद्रोऽस्मि सखे यस्य मम ('विभवानुगता भार्या' (३।२८) इत्यादि पुनः पठति ।) तद्गच्छतु भवान् । अहमपि कृतशौचः संध्यामुपासे । (इति निष्क्रान्ताः सर्वे ।)

इति संधिच्छेदो नाम तृतीयोऽङ्कः । Breach.

(क) मा दाव अक्खाइदस्स अभुत्तस्स अप्पमुल्लस्स चोरेहिं अवहृदस्स कारणादो चदुस्समुद्दसारभूदा रअणावली दीअदि। (ख) भो दलिद्दो किं अकिवणं मन्तेदि।

वर्तमाना । यद् एतत्त्रितयम् ।] ॥ २८ ॥ चतुःसमुद्रेति । चतुःसमुद्राणां रत्नाकराणां सारभूता । **यमिति** । [यं विश्वासं समालम्ब्य तयाऽस्मासु न्यासः कृतः तस्य महतः प्रत्ययस्य विश्वासस्यैवैतन्मूल्यं दीयते] ॥ २९ ॥ [स्पृष्टिकया स्पर्शेन ।] **एताभिरिति** । [संधिः शीघ्रं सुसंहतः सुपूर्णः क्रियताम् । यतः परिवादस्य लोकनिन्दाया यः बहलः दोषः तस्माद्यस्य रक्षां न परिहरामि उपेक्षे] ॥ ३० ॥ [अकृपणममन्दं शौण्डीर्यमौदार्यं यत्र तद्यथा तथा ।]

इति संधिच्छेदो नाम तृतीयोऽङ्कः ।

---

१ सेनागृहम्. २ अस्मदीयं. ३ वर्ध० वर्ध०. ४ बहुल. ५ नयस्य, नृपस्य. ६ मृच्छक टिकायां सं०.

चतुर्थोऽङ्कः ।

(ततः प्रविशति चेटी ।)

चेटी—आज्ञप्ताऽस्मि मात्राऽऽर्यायाः सकाशं गन्तुम् । एषाऽऽर्या चित्रफलकनिषण्णदृष्टिर्मदनिकया सह किमपि मन्त्रयमाणा तिष्ठति । तद्यावदुपसर्पामि । (इति परिक्रामति ।) (क)

(ततः प्रविशति यथानिर्दिष्टा वसन्तसेना मदनिका च ।)

वसन्तसेना—हञ्जे मदनिके अपि सुसदृशीयं चित्राकृतिरार्यचारुदत्तस्य । (ख)

मदनिका—सुसदृशी । (ग)

वसन्तसेना—कथं त्वं जानासि । (घ)

मदनिका—येनार्यायाः सुस्निग्धा दृष्टिरनुलग्ना । (ङ)

वसन्तसेना—हञ्जे किं वेशवासदाक्षिण्येन मदनिके एवं भणसि । (च)

मदनिका—आर्ये किं य एव जनो वेशे प्रतिवसति स एवालीकदाक्षिणो भवति । (छ)

वसन्तसेना—हञ्जे नानापुरुषसङ्गेन वेश्याजनोऽलीकदक्षिणो भवति । (ज)

(क) आणत्तम्हि अत्ताए अज्जआए सआसं गन्तुम् । एसा अज्जआ चित्तफलअणिसण्णदिट्ठी मदणिआए सह किंपि मन्तअन्ती चिट्ठदि । ता जाव उवसप्पामि ।

(ख) हञ्जे मदणिए अवि सुसादिसी इअं चित्ताकिदी अज्जचारुदत्तस्स ।

(ग) सुसादिसी । (घ) कधं तुमं जाणासि ।

(ङ) जेण अज्जआए सुसिणिद्धा दिट्ठी अणुलग्गा ।

(च) हञ्जे किं वेसवासदाक्खिण्णेण मदणिए एव्वं भणासि ।

(छ) अज्जए किं जो ज्जेव जणो वेसे पडिवसदि सो ज्जेव अलीअदक्खिणो भोदि । (ज) हञ्जे णाणापुरिससङ्गेण वेस्साजणो अलीअदक्खिणो भोदि ।

अथोत्कण्ठितायाः प्रियस्य चित्रदर्शनेन विरहं विनोदयन्त्या वसन्तसेनायाः प्रवेशसूचनार्थमादौ चेटीप्रवेशः । वसन्तसेनामात्रा माधवसेनया । चित्रफलके निषण्णा संसक्ता दृष्टिर्यस्याः । प्रियप्रतिकृतिदर्शनं हि उत्कण्ठितानां विरहविनोदनोपायः । तदुक्तम्–'वियोगावस्थासु प्रियजनसदृक्षानुभवनं ततश्चित्रं कर्म स्वपनसमये दर्शनमपि । तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमपि प्रतीकारः कामव्यथितमनसां कोऽपि कथितः ॥' इति । चित्रे निवेशिता आकृतिः चित्राकृतिः । वेशो वेश्यावसतिः । तत्र यो वासः तेन

---

१ अज्जुआस०.

मदनिका—यतस्तावदार्याया दृष्टिरिहाभिरमते हृदयं च तस्य कारणं किं पृच्छयते। (क)

वसन्तसेना—हञ्जे सखीजनादुपहसनीयतां रक्षामि। (ख)

मदनिका—आर्ये एवं नेदम्। सखीजनचित्तानुवर्त्यबलाजनो भवति। (ग)

प्रथमा चेटी—(उपसृत्य।) आर्ये माताऽऽज्ञापयति—'गृहीतावगुण्ठनं पक्षद्वारे सज्जं प्रवहणम्। तद्गच्छ' इति। (घ)

वसन्तसेना—हञ्जे किमार्यचारुदत्तो मां नेष्यति। (ङ)

चेटी—आर्ये येन प्रवहणेन सह सुवर्णदशसाहस्त्रिकोऽलंकारोऽनुप्रेषितः। (च)

वसन्तसेना—कः पुनः सः। (छ)

चेटी—एष एव राजश्यालः संस्थानकः। (ज)

वसन्तसेना—(सक्रोधम्।) अपेहि। मा पुनरेवं भणिष्यसि। (झ)

चेटी—प्रसीदतु प्रसीदत्वार्या। संदेशेनास्मि प्रेषिता। (ञ)

वसन्तसेना—अहं संदेशायैव कुप्यामि। (ट)

(क) जदो दाव अज्जआए दिट्ठी इध अभिरमदि हिअअं च तस्स कारणं किं पुच्छीअदि। (ख) हञ्जे सहीजणादो उवहसणीअदां रक्खामि।

(ग) अज्जए एव्वं णेदम्। सहीजणचित्ताणुवत्ती अबलाजणो भोदि।

(घ) अज्जए अत्ता आणवेदि—'गहिदावगुण्ठणं पक्खदुआरए सज्जं पवहणम्। ता गेच्छ' त्ति। (ङ) हञ्जे किं अज्जचारुदत्तो मं णइस्सदि।

(च) अज्जए जेण पवहणेण सह सुवण्णदससाहस्सिओ अलंकारओ अणुप्पेसिदो।

(छ) को उण सो। (ज) एसो ज्जेव राअसालो संठाणओ।

(झ) अवेहि। मा पुणो एव्वं भणिस्ससि।

(ञ) पसीददु पसीददु अज्जआ। संदेसेण म्हि पेसिदा।

(ट) अहं संदेसस्स ज्जेव कुप्पामि।

यद्दाक्षिण्यं परच्छन्दानुवृत्तिचातुर्यं तेन।'वेशवासदाक्षिण्येन' इति पाठे वेशानां वेश्याश्रितानां यो वासस्तस्य दाक्षिण्यमिति ल. दी.। स सर्व एवालीकदक्षिणो मिथ्याप्रियवादी भवति। किमिति शेषः।] यत्र चक्षुर्हृदये लग्ने तत्र कारणं किं पर्यालोच्यते। अतिप्रियनामासावलं विलम्बेनेत्याशयः। [गृहीतावगुण्ठनमाच्छादनमहापटाच्छादितम्। 'कर्णीरथः प्रवहणम्' इति कोशः। स्त्रीणां स्थितियोग्योऽभितः समाछन्नो रथः प्रवहणम्। इति ल० दी०। सुवर्णं दशमाषिकं तेषां दशसहस्रं तेन लभ्यः सुवर्णदशसाहस्त्रिकः।] संदेशेनेति। मया संदेशः कथितो नात्र मम दोष इति भावः।

---

१ चेटि.

चेटी—तत्किमिति मातरं विज्ञापयिष्यामि । (क)

वसन्तसेना—एवं विज्ञापयितव्या–यदि मां जीवन्तीमिच्छसि तदेवं न पुनरहं मात्राऽऽज्ञापयितव्या । (ख)

चेटी—यथा ते रोचते । (इति निष्क्रान्ता ।) (ग)

(प्रविश्य ।)

शर्विलकः—

दत्त्वा निशाया[1] वचनीयदोषं निद्रां च जित्वा नृपतेश्च रक्षान्[2] ।
स एष सूर्योदयमन्दरश्मिः क्षपाक्षयाच्चन्द्र इवास्मि जातः ॥ १ ॥

अपि च ।

यः कश्चित्त्वरितगतिं[3] निरीक्षते मां
संभ्रान्तं द्रुतमुपसर्पति स्थितं वा ।
तं सर्वं तुलयति दूषितोऽन्तरात्मा[4]
स्वैर्दोषैर्भवति हि शङ्कितो मनुष्यः ॥ २ ॥

मया खलु मदनिकायाः कृते साहसमनुष्ठितम् ।

परिजनकथासक्तः कश्चिन्नरः समुपेक्षितः
क्वचिदपि गृहं नारीनाथं निरीक्ष्य विवर्जितम् ।
नरपतिबले पार्श्वायाते स्थितं गृहदारुव-
द्व्यवसितशतैरेवंप्रायैर्निशा दिवसीकृता ॥ ३ ॥

(इति परिक्रामति ।)

(क) ता किंति[5] अत्तं विण्णविस्सम् ।

(ख) एव्वं विण्णाविदव्वा[6]–जइ मं जीअन्तीं इच्छसि ता एव्वं ण पुणो अहं अत्ताए आणाविदव्वा । (ग) जधा दे रोअदि ।

दत्त्वेति। [निशायाः वचनीयदोषं चौर्यादिकं स्याच्चेन्निशाया एव दोष इत्येवंरूपं दत्त्वा निद्रां जित्वा अवधूय नृपतेः रक्षान् रक्षापुरुषांश्च जित्वा तद्दृष्टिं परिहृत्येत्यर्थः। स एवाहं क्षपाक्षयान्निशावसानात् सूर्योदयेन मन्दा रश्मयः तेजः पराक्रमश्च यस्य सः सूर्योदयविगतप्रभः चन्द्र इव जातोऽस्मि। उपजातिश्छन्दः] ॥ १ ॥ **य इति** । [यः कश्चित् त्वरितगतिं त्वरया गच्छन्तं मां निरीक्षते। तथा च संभ्रान्तं चकितं यथा तथा स्थितं द्रुतमुपसर्पति । तं सर्वं अन्तरात्मा दूषितः संजातशङ्कः तुलयति मद्दोषशङ्कितमिव संभावयतीत्यर्थः । मनुष्यो हि स्वदोषैः शङ्कितो भवति। अर्थान्तरन्यासोऽलंकारः । प्रहर्षिणी वृत्तम्] ॥२॥ **परिजनेति**। [परिजनकथायामासक्तः कश्चिन्नरः समुपेक्षितः । तस्य गृहं न प्रविष्टमित्यर्थः । नारी नाथः यस्य नार्याधिष्ठितं पुरुषाभावात् । तद्विवर्जितं त्यक्तम्। नरपतिबले नगररक्षिबले समीपमागते। गृहदारुवन्निश्चलं स्थितम्। एवंप्रायैः व्यवसितशतैः निशा दिवसीकृता जाग्रता एव नीता। हरिणी वृत्तम्] ॥ ३ ॥

---

१ निशायां. २ रक्ष्यान्. ३ गतिः. ४ तान्तरात्मा. ५ किं अत्तअं. ६ विण्णवि०.

वसन्तसेना—चेटि इमं तावच्चित्रफलकं मम शयनीये स्थापयित्वा तालवृन्तं गृहीत्वा लघ्वागच्छ । (क)

मदनिका—यदार्याऽऽज्ञापयति । (इति फलकं गृहीत्वा निष्क्रान्ता ।)(ख)

शर्विलकः—इदं वसन्तसेनाया गृहम् । तद्यावत्प्रविशामि । (प्रविश्य ।) क्व नु मया मदनिका द्रष्टव्या ।

(ततः प्रविशति तालवृन्तहस्ता मदनिका ।)

शर्विलकः—(दृष्ट्वा ।) अये इयं मदनिका ।

मदनमपि गुणैर्विशेषयन्ती रतिरिव मूर्तिमती विभाति येयम् ।
मम हृदयमनङ्गवह्नितप्तं भृशमिव चन्दनशीतलं करोति ॥ ४ ॥

[1]मदनिके ।

मदनिका—(दृष्ट्वा ।) आश्चर्यम् । कथं शर्विलकः । शर्विलक स्वागतं ते । कुत्र त्वम् । (ग)

शर्विलकः—कथयिष्यामि ।

(इति सानुरागमन्योन्यं पश्यतः ।)

वसन्तसेना—चिरयति मदनिका । तत्कुत्र नु खलु सा । (गवाक्षेकेन दृष्ट्वा ।) कथमेषा केनापि पुरुषकेण सह मन्त्रयमाणा तिष्ठति । यथाऽतिस्निग्धया निश्चलदृष्ट्याऽऽपिबन्तीवैतं निध्यायति तथा तर्कयामि एष स जन एतामिच्छत्यभुजिष्यां कर्तुम् । तद्रमतां रमताम् । मा कस्यापि प्रीतिच्छेदो भवतु । न खल्वाकारयिष्यामि । (घ)

मदनिका—शर्विलक कथय । (ङ)

(क) हञ्जे इमं दाव चित्तफलअं मम सअणीए ठाविअ तालवेण्टअं गेण्हिअ लहुं आअच्छ । (ख) जं अज्जआ आणवेदि ।

(ग) अम्मो । कधं सव्विलओ । सव्विलअ साअदं दे । कहिं तुमम् ।

(घ) चिरअदि मदणिआ । ता कहिं णु क्खु सा । कधं एसा केनावि पुरिसकेण सह मन्तअन्ती चिट्ठदि । जधा अदिसिणिद्धाए णिच्चलदिट्ठीए आपिबन्ती विअ एदं णिज्झाअदि तधा तक्केमि एसो सो जणो एदं इच्छदि अभुजिस्सं कादुम् । ता रमदु रमदु । मा कस्सावि पीदिच्छेदो भोदु । ण क्खु सद्दाविस्सम् ।

(ङ) सव्विलअ कधेहि ।

मदनमिति । [गुणैः सौन्दर्यादिभिर्मदनमपि विशेषयन्ती सातिशयं कुर्वती । येयमनङ्गवह्नितप्तं कामानलसंतप्तं मे हृदयं भृशं चन्दनशीतलमिव करोति । पुष्पिताग्रा छन्दः] ॥४॥

---

१ मदनिके मद०.

शर्विलकः—(साशङ्कं दिशोऽवलोकयति ।)

मदनिका—शर्विलक किं न्विदम् । सशङ्क इव लक्ष्यसे । (क

शर्विलकः—वक्ष्ये त्वां किंचिद्रहस्यम् । तद्विविक्तमिदम् ।

मदनिका—अथ किम् । (ख)

वसन्तसेना—कथं परमरहस्यम् । तन्न श्रोष्यामि । (ग)

शर्विलकः—मदनिके किं वसन्तसेना मोक्ष्यति त्वा निष्क्रयेण ।

वसन्तसेना—कथं मम संबन्धिनी कथा । तच्छ्रोष्याम्यनेन गवाक्षेणापवारितशरीरा । (घ)

मदनिका—शर्विलक भणिता मयाऽऽर्या । तदा भणति—यदि मम च्छन्दस्तदा विनाऽर्थं सर्वं परिजनमभुजिष्यं करिष्यामि । अथ शर्विलक कुतस्त एतावान्विभवः येन मामार्यासकाशान्मोचयिष्यसि । (ङ)

शर्विलकः—

दारिद्र्येणाभिभूतेन त्वत्स्नेहानुगतेन च ।
अद्य रात्रौ मया भीरु त्वदर्थे साहसं कृतम् ॥ ५ ॥

वसन्तसेना—प्रसन्नाऽस्याकृतिः । साहसकर्मतया पुनरुद्वेजनीया । (च)

मदनिका—शर्विलक स्त्रीकल्यवर्तस्य कारणेनोभयमपि संशये विनिक्षिप्तम् । (छ)

शर्विलकः—किं किम् ।

(क) सव्विलअ किं ण्णेदम् । ससङ्को विअ लक्खीअसि ।
(ख) अध इं । (ग) कधं परमरहस्सम् । ता ण सुणिस्सम् ।
(घ) कधं मम संबन्धिणी कधा । ता सुणिस्सं इमिणा गवक्खेण ओवारिदसरीरा ।
(ङ) सव्विलअ भणिदा मए अज्जआ । तदो भणादि—जइ मम छन्दो तदा विणा अत्थं सव्वं परिजणं अभुजिस्सं करइस्सम् । अध सव्विलअ कुदो दे एत्तिओ विहवो जेण मं अज्जआसआसादो मोआइस्ससि ।
(च) पसण्णा से आकिदी । साहसकम्मदाए उण उव्वेअणीआ ।
(छ) सव्विलअ इत्थीकल्लवत्तस्स कारणेण उहअं पि संसए विणिक्खित्तम् ।

[अभुजिष्यामन्येन केनाप्यभोग्याम् । कलत्रवत्स्वगृहस्थां स्वाधीनामित्यर्थः । यद्वा अकिंकरीम् । स्वतन्त्रामित्यर्थः ।] स्वाधीनामिति यावत् । मम छन्दो ममाभिलाषः । **दारिद्र्येणेति** । दारिद्र्योपहतेन तथाऽपि त्वयि स्नेहस्त्वत्स्नेहस्तेनानुगतेन । अनुरागवतेत्यर्थः । साहसं चौर्यरूपम् ॥ ५ ॥ साहसे जीवितानपेक्षकर्मणि ।

---

१ सशङ्कम्.

मदनिका—शरीरं चारित्रं च । (क)

शर्विलकः—अपण्डिते, साहसे श्रीः प्रतिवसति ।

मदनिका—शर्विलक अखण्डितचारित्रोऽसि । तन्न खलु त्वया मम कारणात्साहसं कुर्वताऽत्यन्तविरुद्धमाचरितम् । (ख)

शर्विलकः—

नो मुष्णाम्यबलां विभूषणवतीं फुल्लामिवाहं लतां
विप्रस्वं न हरामि काञ्चनमथो यज्ञार्थमभ्युद्धृतम् ।
धात्र्युत्सङ्गगतं हरामि न तथा बालं धनार्थी क्वचि-
त्कार्याकार्यविचारिणी मम मतिश्चौर्येऽपि नित्यं स्थिता ॥ ६ ॥

तद्विज्ञाप्यतां वसन्तसेना—

अयं तव शरीरस्य प्रमाणादिव निर्मितः ।
अप्रकाशो ह्यलंकारो मत्स्नेहाद्धार्यतामिति ॥ ७ ॥

मदनिका—शर्विलक अप्रकाशोऽलंकारः । अयं च जन इति द्वयमपि न युज्यते । तदुपनय तावत् । पश्याम्येनमलंकारम् । (ग)

शर्विलकः—इदमलंकरणम् । (इति साशङ्कं समर्पयति ।)

मदनिका—(निरूप्य ।) दृष्टपूर्व इवायमलंकारः । तद्भण कुतस्त एषः । (घ)

शर्विलकः—मदनिके किं तवानेन । गृह्यताम् ।

(क) सरीरं चारित्तं च ।

(ख) सव्विलअ अखण्डिदचारित्तो सि । ता ण खु ते मम कारणादो साहसं करन्तेण अच्चन्तविरुद्धं आचरिदम् ।

(ग) सव्विलअ अप्पकाशो अलंकारओ । अअं च जणो त्ति दुवेवि ण जुज्जदि । ता उवणेहि दाव । पेक्खामि एदं अलंकारअम् ।

(घ) दिट्ठपुरुव्वो विअ अअं अलंकारओ । ता भणेहि कुदो दे एसो ।

न खल्वाचरितम् । अपि त्वाचरितमेव । **नो मुष्णामीति** । [धनार्थी अहं विप्रस्वं ब्राह्मणस्य स्वस्वामिकं द्रव्यम् । अथो अथ वा यज्ञार्थमभ्युद्धृतं पृथङ्निहितं काञ्चनं न मुष्णामि । कार्याकार्यविचारिणी युक्तायुक्तविवेकिनी ।] शूद्रस्वर्णहरणे न तथा पातकमिति विप्रेत्यादिनोक्तम् । शार्दूलविक्रीडितं वृत्तम् ॥ ६ ॥ **अयमिति** । तव वसन्तसेनायाः । अनुचितः प्रकाशो यस्य सोऽप्रकाशः । अनेनास्माकं दण्ड इत्यनेन न प्रकाशयितव्य इत्यर्थः ॥ ७ ॥ अयं जनो वसन्तसेनास्वरूपः [यस्याप्रकाशमलंकारधारणमसंभाव्यमिति भावः । 'सप्रमाणव्यवहारकारिजनशिरोमणिः' इति ल. दी.] । अपिरनुनये । 'अयं जनः शर्विलकः' इति प्राचीनटीका । तन्न बुद्ध्यते ।

---

१ अप्रकाश्यं. २ कारओ च त्ति दुवे.

मदनिका—(सरोषम्।) यदि मे प्रत्ययं न गच्छसि तत्किंनिमित्तं मां निष्क्रीणासि । (क)

शर्विलकः—अयि प्रभाते मया श्रुतं श्रेष्ठिचत्वरे यथा सार्थवाहस्य चारुदत्तस्येति ।

(वसन्तसेना मदनिका च मूर्छां नाटयतः।)

शर्विलकः—मदनिके समाश्वसिहि । किमिदानीं त्वं

विषादस्रस्तसर्वाङ्गी संभ्रमभ्रान्तलोचना ।
नीयमानाऽभुजिष्यात्वं कम्पसे नानुकम्पसे ॥ ८ ॥

मदनिका—(समाश्वस्य।) साहसिक न खलु त्वया मम कारणादिदमकार्यं कुर्वता तस्मिन्गेहे कोऽपि व्यापादितः परिक्षतो वा। (ख)

शर्विलकः—मदनिके भीते सुप्ते न शर्विलकः प्रहरति । तन्मया न कश्चिद्व्यापादितो नापि परिक्षतः ।

मदनिका—सत्यम् । (ग)

शर्विलकः—सत्यम् ।

वसन्तसेना—(संज्ञां लब्ध्वा।) आश्चर्यम्। प्रत्युपजीविताऽस्मि।(घ)

मदनिका—प्रियम् । (ङ)

शर्विलकः—(सेर्ष्यम्।) मदनिके किं नाम प्रियमिति ।

त्वत्स्नेहबद्धहृदयो हि करोम्यकार्यं
सद्वृत्तपूर्वपुरुषेऽपि कुले प्रसूतः ।
रक्षामि मन्मथविपन्नगुणोऽपि मानं
मित्रं च मां व्यपदिशस्यपरं च यासि ॥ ९ ॥

(क) जइ मे पच्चअं ण गच्छसि ता किंणिमित्तं मं णिक्किणासि ।
(ख) साहसिअ ण क्खु तुए मम कारणादो इमं अकज्जं करन्तेण तस्सिं गेहे कोवि वावादिदो परिक्खदो वा । (ग) सच्चम् ।
(घ) अम्महे । पच्चुवजीविदम्हि । (ङ) पिअम् ।

वेश्यात्वे वसन्तसेनाया निभृतं संगतमित्यभिप्रायः । **विषादेति** । [विषादेन खेदेन स्रस्तं गलितं सर्वमङ्गं यस्याः सा । संभ्रमेण भयेन चित्तवृत्त्यनवस्थानेन वा भ्रान्ते लोचने यस्याः सा । अभुजिष्यात्वमदासीत्वम् । नीयमाना भुजिष्यात्वमिति वा पदच्छेदः ।] ॥ ८ ॥ **त्वदिति** । [सद्वृत्तं येषां ते सद्वृत्ताः । सद्वृत्ताः पूर्वपुरुषा यस्मिंस्तस्मिन्कुले प्रसूतोऽप्यहं त्वत्स्नेहबद्धहृदयोऽकार्यं करोमि । कामातुरोऽन्यस्य मानं न रक्षति। अहं तु कामातुरोऽपि रक्षामीत्याह। व्यपदिशसि बाह्यतो दर्शयसि ।] मन्मथेन विपन्नो गुणो यस्य। ईदृशोऽपि देहं रक्षामि। मदनिकार्थचौर्याहरणेन हीनगुणत्वं व्यक्तम्। [" मन्मथेत्यादिना देहमिति पाठे ध्वनिः । देहं स्वीयं रक्षामि कामपीडितोऽप्यहमिति वाच्यार्थः ।.परकीयमपि देहं रक्षामि नो चेत्प्रहरेयमिति व्यङ्ग्यम् ।" इति ल.दी.] ॥ ९॥

---

१ समा० समा०. २ माना भुजि०, भुजिष्या त्वं. ३ वक्ष्यामि. ४ अद्य.

(साकूतम् ।)

इह सर्वस्वफलिनः कुलपुत्रमहाद्रुमाः ।
निष्फलत्वमलं यान्ति वेश्याविहगभक्षिताः ॥ १० ॥
अयं च सुरतज्वालः कामाग्निः प्रणयेन्धनः ।
नराणां यत्र हूयन्ते यौवनानि धनानि च ॥ ११ ॥

वसन्तसेना--(सस्मितम् ।) अहो अस्यास्थान आवेगः । (क)

शर्विलकः—सर्वथा—

अपण्डितास्ते पुरुषा मता मे ये स्त्रीषु च श्रीषु च विश्वसन्ति ।
श्रियो हि कुर्वन्ति तथैव नार्यो भुजङ्गकन्यापरिसर्पणानि ॥ १२ ॥
स्त्रीषु न रागः कार्यो रक्तं पुरुषं स्त्रियः परिभवन्ति ।
रक्तैव हि रन्तव्या विरक्तभावा तु हातव्या ॥ १३ ॥

सुष्ठु खल्विदमुच्यते—

एता हसन्ति च रुदन्ति च वित्तहेतो-
विश्वासयन्ति पुरुषं न तु विश्वसन्ति ।
तस्मान्नरेण कुलशीलसमन्वितेन
वेश्याः श्मशानसुमना इव वर्जनीयाः ॥ १४ ॥

(क) अहो से अत्थाणे आवेओ ।

[परपुरुषानुरक्ता मदनिकेति शङ्कमानः शर्विलकः वेश्याजनं निन्दति-**इहेति** । इह अस्मिञ्जगति सर्वाणि स्वानि धनान्येव फलानि सन्त्येषां ते सर्वस्वफलिनः । 'अत इनिठनौ' इति मत्वर्थे इनिः । कुलपुत्रा एव महाद्रुमास्ते वेश्या एव विहगास्तैर्भक्षिताः अलं निष्फलत्वं यान्ति । हृतसर्वस्वा भवन्तीति भावः । समस्तवस्तुविषयं सावयवं रूपकमलंकारः] ॥ १० ॥ **अयमिति** । [अयं कामरूपाग्निः सुरतमेव ज्वाला यस्य तथा । प्रणयोऽनुराग एव इन्धनं यस्य तादृशः अस्ति । यत्र यस्मिन्नराणां यौवनानि धनानि च हूयन्ते । 'अत्र विशेषणयोः समस्तं व्यस्तं विशेषे सावयवरूपमलंकारः' इति ल० दी०] ॥ ११ ॥ [अस्थाने अयुक्ते अकारणे इति यावत् । कामप्रतिघाते क्रोधः शक्तस्याशक्तस्य तु विषाद इति शास्त्रात्क्रुद्धः शर्विलको वेश्याजनं निर्भर्त्स्य स्त्रीमात्रमिदानीं निर्भत्सयति । इति ल० दी० ।] **अपण्डिता इति** । [भुजङ्गकन्या भुजङ्ग्यस्तासामिव परिसर्पणानि वक्राणि त्वरितानि च चलनानि । उपजातिः छन्दः ॥ १२ ॥ **स्त्रीष्विति** । रागः प्रीतिः । परिभवन्ति विगणयन्ति । विरक्तभावा स्नेहशून्यान्तःकरणवृत्तिः । हातव्या त्याज्या । आर्या छन्दः ॥ १३ ॥ स्त्रीजनं निन्दन्नेव विशेषेण वेश्या निन्दति] **एता इति** । [—श्मशाने सुमनाः पुष्पाणि । जात्यैकवचनम् ।] सुमनसः पुष्पवृत्तेरेकवचनान्तताऽपि । यथा–' अप्रत्याख्येये दधिसुमनसी ' इति [प्राचीनप्रयोगात् । अथ वा] 'सुमना मालती लता' ' सुमना मालतीजातिः ' इत्यमरोक्तेः । तां यथा श्मशानवर्तिनीं न कोऽपि स्पृशति तद्वत् । वर्जनीयाः । क्रियादीपकोपमयोः संसृष्टिः ।] वचनभेदेऽपि सतामनुद्वेजकत्वाददुष्टत्वमुपमायाः । वसन्त-

१ तु. २ च. ३ स्मशान.

अपि च ।

समुद्रवीचीव चलस्वभावाः संध्याभ्रलेखेव मुहूर्तरागाः ।
स्त्रियो हृतार्थाः[1] पुरुषं निरर्थं निष्पीडितालक्तकवत्त्यजन्ति ॥ १५ ॥

स्त्रियो नाम चपलाः—

अन्यं मनुष्यं हृदयेन कृत्वा अन्यं[3] ततो दृष्टिभिराह्वयन्ति[4] ।
अन्यत्र मुञ्चन्ति मदप्रसेकमन्यं शरीरेण च कामयन्ते ॥ १६ ॥

सूक्तं खलु कस्यापि——

न पर्वताग्रे नलिनी प्ररोहति न गर्दभा वाजिधुरं वहन्ति ।
यवाः प्रकीर्णा न भवन्ति शालयो न वेशजाताः[5] शुचयस्तथाऽङ्गनाः १७

आः दुरात्मन् चारुदत्तहतक अयं न भवासि । (इति कतिचित्पदानि गच्छति[6] ।)

मदनिका—(अञ्चले गृहीत्वा ।) अयि असंबद्धभाषक असंभावनीये कुप्यसि । (क)

शर्विलकः—कथमसंभावनीयं नाम ।

मदनिका—एष खल्वलंकार आर्यासंबन्धी । (ख)

शर्विलकः—ततः किम् ।

मदनिका—स च तस्यार्यस्य हस्ते विनिक्षिप्तः । (ग)

शर्विलकः—किमर्थम् ।

मदनिका—(कर्णे ।) एवमिव । (घ)

(क) अइ असंबद्धभासअ असंभावणीए कुप्पसि । (ख) एसो क्खु अलंकारओ अज्जआकेरओ । (ग) स च तस्स अज्जस्स हत्थे विणिक्खित्तो[7] । (घ) एव्वं विअ ।

तिलकं वृत्तम् ॥ १४ ॥ [**समुद्रवीचीवेति** । वीची तरङ्गः । मुहूर्ते रागः अनुरागः रक्तिमा च यासां यस्याः च निरर्थं निर्द्रव्यम् । उपजातिर्वृत्तम् ॥ १५ ॥ चपलाः चञ्चलाः । चपला विद्युत एवेति रूपकध्वनिः । **अन्यामिति** । हृदयेन कृत्वा अभिसंधाय । तस्मिन्मनो निवेश्येति यावत् । मदप्रसेकं आनन्दसंदोहं वीर्यसिञ्चनं च । क्रियादीपकम् । इन्द्रवज्रा वृत्तम् ॥ १६ ॥ **न पर्वतेति** । नलिनी गभीरनीरोद्भवा कमलिनी । वाजिनः धुरं वाजिधुरमश्ववाह्यां धुरमित्यर्थः । अत्र ल० दी०–पद्यं प्राचीनम् । अत एवोक्तं सूक्तं कस्यापीति । विलक्षणमिदं छन्दः । प्रथमपादे द्वादशाक्षराणि द्वितीये एकादशाक्षराणि च सन्ति । प्रथमपादे जतजभ एते गणा लभ्यन्ते द्वितीये तु जतजगल इति । उत्तरार्धं तु वंशस्थं छन्दः ।]॥१७॥ [एवमिव चारुदत्तस्याकिंचनतया भोगस्य भूरिधनसाध्यत्वादयमलंकारो न्यासमिषेण तस्य हस्ते विनिक्षिप्त इति संकेतार्थः । अप्रस्तुतवृत्तान्तेन प्रस्तुतवृत्तान्तमुपपादयन्नाह—इति ल०दी०]

---

१ हितार्थाः. २ निपी०. ३ त्वन्यं. ४ आह्वयन्त्यः. ५ याताः. ६ ददाति. ७ णिक्खित्तो.

शर्विलकः—(सवैलक्ष्यम् ।) भोः कष्टम् ।

छायार्थं ग्रीष्मसंतप्तो यामेवाहं समाश्रितः ।
अजानता मया सैव पत्रैः शाखा वियोजिता ॥ १८ ॥

वसन्तसेना—कथमेषोऽपि संतप्यत एव । तदजानतैतेनैवमनुष्ठितम् । (क)

शर्विलकः—मदनिके किमिदानीं युक्तम् ।

मदनिका—अत्र त्वमेव पण्डितः । (ख)

शर्विलकः—नैवम् । पश्य ।

स्त्रियो हि नाम खल्वेता निसर्गादेव पण्डिताः ।
पुरुषाणां तु पाण्डित्यं शास्त्रैरेवोपदिश्यते ॥ १९ ॥

मदनिका—शर्विलक यदि मम वचनं श्रूयते तदा तस्यैव महानुभावस्य प्रतिनिर्यातय । (ग)

शर्विलकः—मदनिके यद्यसौ राजकुले मां कथयति ।

मदनिका—न चन्द्रादातपो भवति । (घ)

वसन्तसेना—साधु मदनिके साधु । (ङ)

शर्विलकः—मदनिके ।

न खलु मम विषादः साहसेऽस्मिन्भयं वा
कथयसि हि किमर्थं तस्य साधोर्गुणांस्त्वम् ।
जनयति मम वेदं कुत्सितं कर्म लज्जां
नृपतिरिह शठानां मादृशां किं नु कुर्यात् ॥ २० ॥

तथाऽपि नीतिविरुद्धमेतत् । अन्य उपायश्चिन्त्यताम् ।

(क) कधं एसो वि संतप्पदि ज्जेव । ता अजाणन्तेण एदिणा एव्वं अणुचिट्ठिदम् । (ख) इत्थं तुमं ज्जेव पण्डिओ ।

(ग) सव्विलअ जइ मम वअणं सुणीअदि ता तस्स ज्जेव महाणुभावस्स पडिणिज्जादेहि । (घ) ण चन्दादो आदवो होदि । (ङ) साहु मदणिए साहु ।

छायार्थमिति । [ग्रीष्मसंतप्तोऽहं यामेवं शाखां छायार्थं समाश्रितः सैव । पत्रैः छायाहेतुभिः । अप्रस्तुतप्रशंसालंकारः] ॥ १८ ॥ **स्त्रियो हीति** । निसर्गादशिक्षयैव । शास्त्रैरेवोपदिश्यते शास्त्राध्ययनादेव जायते ॥ १९ ॥ **नेति** । [अस्मिन्साहसे चौर्यरूपे । तस्य साधोर्गुणान्किमर्थं कथयसि येनाहं प्रतिनिवृत्यालंकारं तस्मै प्रत्यर्पयिष्यामि । इदं कुत्सितं कर्म मम लज्जां जनयति वा । मादृशानां शठानां सर्वा युक्तीर्जानतामित्यर्थः । किं नु कुर्यात् । न किमपि । मालिनी वृत्तम्] ॥ २० ॥

---

१ छायार्थी. २ शास्त्रेणैव. ३ कथयिष्यति. ४ चेदं. ५ न.

मदनिका—सोऽयमपर उपायः। (क)

वसन्तसेना—कः खल्वपर उपायो भविष्यति। (ख)

मदनिका—तस्यैवार्यस्य संबन्धी भूत्वैतमलंकारमार्याया उपनय। (ग)

शर्विलकः—एवं कृते किं भवति।

मदनिका—त्वं तावदचौरः सोऽप्यार्योऽनृणः। आर्यया स्वकोऽलंकार उपगतो भवति। (घ)

शर्विलकः—नन्वतिसाहसमेतत्।

मदनिका—अयि उपनय। अन्यथाऽतिसाहसम्। (ङ)

वसन्तसेना—साधु मदनिके साधु। अभुजिष्ययेव मन्त्रितम्। (च)

शर्विलकः—

मयाऽऽप्ता महती बुद्धिर्भवतीमनुगच्छता।
निशायां नष्टचन्द्रायां दुर्लभो मार्गदर्शकः॥ २१॥

मदनिका—तेन हि त्वमस्मिन्कामदेवगेहे मुहूर्तकं तिष्ठ यावदार्यायै तवागमनं निवेदयामि। (छ)

शर्विलकः—एवं भवतु।

मदनिका—(उपसृत्य।) आर्ये एष खलु चारुदत्तस्य सकाशाद्ब्राह्मण आगतः। (ज)

वसन्तसेना—हञ्जे तस्य संबन्धीति कथं त्वं जानासि। (झ)

(क) सो अअं अवरो उवाओ। (ख) को क्खु अवरो उवाओ हुविस्सदि। (ग) तस्स ज्जेव अज्जस्स केरओ भविअ एदं अलंकारअं अज्जआए उवणेहि। (घ) तुमं दाव अचोरो सो वि अज्जो अरिणो। अज्जआए सकं अलंकारअं उवगदं भोदि। (ङ) अइ उवणेहि। अण्णधा अदिसाहसम्। (च) साहु मदणिए साहु। अभुजिस्साए विअ मन्तिदम्। (छ) तेणं[1] हि तुमं इमस्सिं कामदेवगेहे मुहुत्तअं चिट्ठ जाव अज्जआए तुह आगमणं णिवेदेमि। (ज) अज्जए एसो क्खु चारुदत्तस्स सआसादो बम्हणो आअदो। (झ) हञ्जे तस्स केरअं त्ति कधं तुमं जाणासि।

अथ निजपतित्वेनैवमाह—तुमं दावेति। इदानीं ब्राह्मणभार्यात्वेनेति भावः। [अभुजिष्ययेव यथा कलत्रं मन्त्रयति तथा मन्त्रितमित्यर्थः। ल० दी०] **मयेति**। भवतीमनुगच्छताऽनुवर्तमानेन। नष्टचन्द्रायां तिमिराच्छादितायामित्यर्थः। कार्याकार्यपर्याकुलत्वे सतीति यावत्॥ २१॥

१ तेण तुमं.

मदनिका—आर्ये आत्मसंबन्धिनमपि न जानामि। (क)

वसन्तसेना—(स्वगतं सशिरःकम्पं विहस्य।) युज्यते। (प्रकाशम्।) प्रविशतु। (ख)

मदनिका—यदार्याऽऽज्ञापयति। (उपगम्य।) प्रविशतु शर्विलकः। (ग)

शर्विलकः—(उपसृत्य। सवैलक्ष्यम्।) स्वस्ति भवत्यै।

वसन्तसेना—आर्य वन्दे। उपविशत्वार्यः। (घ)

शर्विलकः—सार्थवाहस्त्वां विज्ञापयति—जर्जरत्वाद्गृहस्य दूरक्ष्यमिदं भाण्डम्। तद्गृह्यताम्। (इति मदनिकायाः समर्प्य प्रस्थितः।)

वसन्तसेना—आर्य ममापि तावत्प्रतिसंदेशं तत्रार्यो नयतु। (ङ)

शर्विलकः—(स्वगतम्।) कस्तत्र यास्यति। (प्रकाशम्।) कः प्रतिसंदेशः।

वसन्तसेना—प्रतीच्छत्वार्यो मदनिकाम्। (च)

शर्विलकः—भवति न खल्ववगच्छामि।

वसन्तसेना—अहमवगच्छामि। (छ)

शर्विलकः—कथमिव।

वसन्तसेना—अहमार्यचारुदत्तेन भणिता—य इममलंकारकं समर्पयिष्यति तस्य त्वया मदनिका दातव्या। तत्स एवैतां ते ददातीत्येवमार्येणावगन्तव्यम्। (ज)

शर्विलकः—(स्वगतम्।) अये विज्ञातोऽहमनया। (प्रकाशम्।) साधु आर्यचारुदत्त साधु।

(क) अज्जए अत्तणकेरअं वि ण जाणामि। (ख) जुज्जदि। पविसदु।

(ग) जं अज्जआ आणवेदि। पविसदु सव्विलओ।

(घ) अज्ज वन्दामि। उवविसदु अज्जो।

(ङ) अज्ज ममावि दाव पडिसंदेसं तहिं अज्जो णेदु।

(च) पडिच्छदु अज्जो मदणिअम्। (छ) अहं अवगच्छामि।

(ज) अहं अज्जचारुदत्तेण भणिदा—जो इमं अलंकारअं समप्पइस्सदि तस्स तुए मदणिआ दादव्वा। ता सो ज्जेव एदं दे देदित्ति एव्वं अज्जेण अवगच्छिदव्वम्।

अत्तणकेरअं वीति चारुदत्तस्यानुचरत्वं स्वीकृत्य ब्रूते। दूरक्ष्यं रक्षितुं दुःशकम्।

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।
गुणैर्युक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ॥ २२ ॥

अपि च ।

गुणेषु यत्नः पुरुषेण कार्यो न किंचिदप्राप्यतमं गुणानाम् ।
गुणप्रकर्षादुडुपेन शंभोरलङ्घ्यमुल्लङ्घितमुत्तमाङ्गम् ॥ २३ ॥

वसन्तसेना—कोऽत्र प्रवहणिकः । (क)

(प्रविश्य सप्रवहणः ।)

चेटः—आर्ये सज्जं प्रवहणम् । (ख)

वसन्तसेना—हञ्जे मदनिके सुदृष्टां मां कुरु । दत्ताऽसि । आरोह प्रवहणम् । स्मरसि माम् । (ग)

मदनिका—(रुदती ।) परित्यक्ताऽस्म्यार्यया । (इति पादयोः पतति ।) (घ)

वसन्तसेना—सांप्रतं त्वमेव वन्दनीया संवृत्ता । तद्गच्छ । आरोह प्रवहणम् । स्मरसि माम् । (ङ)

शर्विलकः—स्वस्ति भवत्यै । मदनिके ।

सुदृष्टः क्रियतामेष शिरसा वन्द्यतां जनः ।
यत्र ते दुर्लभं प्राप्तं वधूशब्दावगुण्ठनम् ॥ २४ ॥

(इति मदनिकया सह प्रवहणमारुह्य गन्तुं प्रवृत्तः ।)

(क) को एत्थ पवहणिओ । (ख) अज्जए सज्जं पवहणम् ।
(ग) हञ्जे मअणिए सुदिट्ठं मं करेहि । दिण्णासि । आरुह पवहणम् । सुमरेसि मम् । (घ) परिच्चत्तेम्हि अज्जआए । (ङ) संपदं तुमं ज्जेव वन्दणीआ संवुत्ता । ता गच्छ । आरुह पवहणम् । सुमरेसि मम् ।

गुणेष्वेवेति । गुणेषु गुणोपार्जने । गुणयुक्तो नरः दरिद्रोऽपि अगुणैः ईश्वरैः धनिकैः न समः । ततोऽप्यधिक इति भावः ॥२२॥ **गुणेष्विति** । गुणानामप्राप्यतममत्यन्तमलभ्यम् । गुणवद्भिः सर्वमेव सुखेन लभ्यते इत्यर्थः । [गुणप्रकर्षाद्गुणाधिक्यात् । उडूनि पातीति उडुपः चन्द्रः तेन अलङ्घ्यं केनापि लङ्घयितुमशक्यं शंभोः उत्तमाङ्गं शिरः लङ्घितमाक्रान्तम् । अत्र गुणप्रकर्षादुडुपकृतशिवशिरोलङ्घनरूपेण विशेषेण सामान्यस्य समर्थनादर्थान्तरन्यासोऽलंकारः । उपेन्द्रवज्रा वृत्तम्] ॥ २३ ॥ [त्वमेव वन्दनीयेति–तवेदानीमभुजिष्यात्वेन वधूत्वं प्राप्तम् । अस्माकं तु कोटिपतित्वेऽपि एकपतित्वेऽपि वेश्यापदवाच्यतैवेति भावः । इति ल० दी० ।] **सुदृष्ट इति** । [एष जनः वसन्तसेना । यत्र यस्याः सकाशात् । वधूशब्दावगुण्ठनं वधूशब्दरूपमवगुण्ठनमावरणम् । केनाप्यनवलोकनत्वरूपमित्यर्थः ।] यत्र ते इति । हेतावाधारविवक्षया ' यत्र ' इति सप्तमी । कर्तुः शेषत्वविवक्षया 'ते' इति षष्ठी ॥ २४ ॥

---

१ गुणयुक्तः. २ रलङ्घितं. ३ परिच्चअम्हि (परिच्युताऽस्मि).

(नेपथ्ये ।)

कः कोऽत्र भोः । राष्ट्रियः समाज्ञापयति—एष खल्वार्यको गोपालदारको राजा भविष्यतीति सिद्धादेशप्रत्ययपरित्रस्तेन पालकेन राज्ञा घोषादानीयं घोरे बन्धनागारे बद्धः । ततः स्वेषु स्वेषु स्थानेष्वप्रमत्तैर्भवितव्यम् ।

शर्विलकः—(आकर्ण्य ।) कथं राज्ञा पालकेन प्रियसुहृदार्यको मे बद्धः । कलत्रवांश्चास्मि संवृत्तः । आः कष्टम् । अथ वा ।

> द्वयमिदमतीव लोके प्रियं नराणां सुहृच्च वनिता च ।
> संप्रति तु सुन्दरीणां शतादपि सुहृद्विशिष्टतमः ॥ २५ ॥

भवतु । अवतरामि । (इत्यवतरति ।)

मदनिका—(साश्रमञ्जलिं बद्ध्वा ।) एवं न्विदम् । तत्परं नयतु मामार्यपुत्रः समीपं गुरुजनानाम् । (क)

शर्विलकः—साधु प्रिये साधु । अस्मच्चित्तसदृशमभिहितम्[2] । (चेटमुद्दिश्य ।) भद्र[3] जानीषे रेभिलस्य सार्थवाहस्योदवसितम् ।

चेटः—अथ किम् । (ख)

शर्विलकः—तत्र प्रापय प्रियाम्[4] ।

चेटः—यदार्य आज्ञापयति । (ग)

मदनिका—यथाऽऽर्यपुत्रो भणति । अप्रमत्तेन तावदार्यपुत्रेण भवितव्यम् । (इति निष्क्रान्ता ।) (घ)

शर्विलकः—अहमिदानीं

> ज्ञातीन्विटान्स्वभुजविक्रमलब्धवर्णा-[5]
> न्राजापमानकुपितांश्च नरेन्द्रभृत्यान् ।

(क) एव्वं ण्णेदम् । ता परं णेदु मं अज्जउत्तो समीवं गुरुअणाणम् ।
(ख) अध इं । (ग) जं अज्जो आणवेदि ।
(घ) जधा अज्जउत्तो भणादि । अप्पमत्तेण दाव अज्जउत्तेण होदव्वम् ।

[राष्ट्रे अधिकृतो राष्ट्रियः।'राष्ट्रावारपाराद्धखौ' इति घः। सिद्धः त्रैकालिकयथार्थज्ञानवान्। तस्यादेशे प्रत्ययो विश्वासस्तेन परित्रस्तः तेन । घोषाद्व्रजात् ।] **द्वयमिति** । [संप्रति सुहृदो विपत्तेः कार्यकाले समुपस्थिते । विशिष्टतमस्यैव रक्षणस्यात्यावश्यकत्वादिति भावः । आर्या छन्दः] ॥ २५ ॥ उदवसितं गृहम् । **ज्ञातीनिति** । [यौगंधरायणः तन्नामकः प्रधानसचिवः उदयनस्य राज्ञः वत्सराजस्य इव सुहृदः

---

१ आनीय चोर इव. २ समभिहितम्. ३ अयि. ४ प्रियतमाम्. ५ शब्दान्.

उत्तेजयामि सुहृदः परिमोक्षणाय
यौगंधरायण इवोदयनस्य राज्ञः ॥ २६ ॥

अपि च ।

प्रियसुहृदमकारणे गृहीतं
रिपुभिरसाधुभिराहितात्मशङ्कैः ।
सरभसमभिपत्य मोचयामि
स्थितमिव राहुमुखे शशाङ्कबिम्बम् ॥ २७ ॥

(इति निष्क्रान्तः ।)

(प्रविश्य ।)[1]

चेटः—आर्ये दिष्ट्या वर्धसे । आर्यचारुदत्तस्य सकाशाद्ब्राह्मण आगतः । (क)

वसन्तसेना—अहो रमणीयताऽद्य दिवसस्य । तद्धञ्जे सादरं बन्धुलेन समं प्रवेशयैनम् । (ख)

चेटी—यदार्याऽऽज्ञापयति । (इति निष्क्रान्ता ।) (ग)

(विदूषको बन्धुलेन सह प्रविशति ।)

विदूषकः—आश्चर्यं भोः । तपश्चरणक्लेशविनिर्जितेन राक्षसराजो रावणः पुष्पकेण विमानेन गच्छति । अहं पुनर्ब्राह्मणोऽकृततपश्चरणक्लेशोऽपि नरनारीजनेन गच्छामि । (घ)

चेटी—प्रेक्षतामार्योऽस्मदीयं गेहद्वारम् । (ङ)

(क) अज्जए दिट्ठिआ वड्ढसि । अज्जचारुदत्तस्स सआसादो बम्हणो आअदो । (ख) अहो रमणीअदा अज्ज दिवसस्स । ता हञ्जे सादरं बन्धुलेण समं पवेसेहि णम् । (ग) जं अज्जआ आणवेदि । (घ) ही ही भोः तवच्चरणकिलेसविणिज्जिदेण रक्खसराआ रावणो पुप्फकेण विमाणेण गच्छदि । अहं उण बम्हणो अकिदतवच्चरणकिलेसो वि णरणारीजणेण[2] गच्छामि । (ङ) पेक्खदु अज्जो अम्हकेरकं गेहदुआरम् ।

आर्यकस्य परिमोक्षणाय बन्धनागारान्मुक्त्यर्थं ज्ञातीन् बन्धून् विटान् स्वभुजविक्रमेण लब्धो वर्णः यशः यैस्तादृशान्वीरपुरुषान् । तथा राज्ञा पालकेन कृतापमानेन कुपितान् । विरक्तानिति यावत् । नरेन्द्रभृत्यानुत्तेजयामि राज्ञः पालकस्योच्छेदार्थं प्रोत्साहयिष्यामि । पुरा किल कौशाम्बीनृपो वत्सराजः उज्जयिनीपतिना चण्डसेनेन केनापि मिषेण गृहीत्वा कारागारे निक्षिप्तस्तत्सचिवेन यौगंधरायेण प्रकृतिकोपमुत्पाद्य बन्धनान्मोचित इति कथासरित्सागरकथाऽत्रानुसंधेया । उपमापरिकरावलंकारौ । वसन्ततिलकं वृत्तम्] ॥ २६ ॥ प्रियेति । [अकारणे कारणाभावेऽपि असाधुभिः आहिता आत्मनि शङ्का आर्यको राजा भविष्यतीति यैस्तैः । स्वयमेव भीतैः । गृहीतं प्रियसुहृदं आर्यकं सरभसं सवेगं समभिपत्य शत्रूनभियात्य मोचयामि राहुमुखे स्थितं शशिबिम्बमिव । पुष्पिताग्रा छन्दः] ॥ २७ ॥ बन्धुलेन । ['बन्धुलस्त्वसतीसुतः' इत्यमरः ।]

१ प्रविष्टः; प्रविश्य. २ णअर.

विदूषकः—(अवलोक्य । सविस्मयम् ।) अहो सलिलसिक्तमार्जितकृतहरितोपलेपनस्य, विविधसुगन्धिकुसुमोपहारचित्रलिखितभूमिभागस्य, गगनतलावलोकनकौतूहलदूरोन्नामितशीर्षस्य, दोलायमानावलम्बितैरावणहस्तभ्रमायितमल्लिकादामगुणालंकृतस्य, समुच्छ्रितदन्तिदन्ततोरणावभासितस्य, महारत्नोपरागोपशोभिना पवनबलान्दोलनालल्लच्चञ्चलाग्रहस्तेन 'इत एहि' इति व्याहरतेव मां सौभाग्यपताकानिवहेनोपशोभितस्य तोरणधरणस्तम्भवेदिकानिक्षिप्तसमुल्लसद्धरितचूतपल्लवललामस्फटिकमङ्गलकलशाभिरामोभयपार्श्वस्य महासुरवक्षःस्थलदुर्भेद्यवज्रनिरन्तरप्रतिबद्धकनककपाटस्य दुर्गतजनमनोरथायासकरस्य वसन्तसेनाभवनद्वारस्य सश्रीकता । यत्सत्यं मध्यस्थस्यापि जनस्य बलाद्दृष्टिमाकारयति । (क)

(क) अहो सलिलसित्तमज्जिदकिदहरिदोवलेवणस्स विविहसुअन्धिकुसुमोवहारचित्तलिहिदभूमिभाअस्स गअणतलाअलोअणकोदूहलदूरुण्णामिदसीसस्स दोलाअमाणावलम्बिदैरावणहत्थब्भमाइदमल्लिआदामगुणालंकिदस्स समुच्छिददन्तिदन्ततोरणावभासिदस्स महारअणोवराओवसोहिणा पवणबलन्दोलणाललन्तचञ्चलग्गहत्थेण 'इदो एहि' त्ति वाहरन्तेण विअ मं सोहग्गपडाआणिवहेणोवसोहिदस्स तोरणधरणत्थम्भवेदिआणिक्खित्तसमुल्लसन्तहरिदचूदपल्लवललामफटिहमङ्गलकलसाभिरामोहअपास्सस्स महासुरवक्खत्थलदुब्भेज्जवज्जणिरन्तरपडिबद्धकणअकवाडस्स दुग्गदजणमणोरहाआसकरस्स वसन्तसेणाभवणदुआरस्स सस्सिरीअदा । जं सच्चं मज्झत्थस्स वि जणस्स बलादिट्ठिं आआरेदि ।

अत्रैवाङ्के पञ्चमप्रकोष्ठके [पञ्चमप्रकोष्ठकवर्णने] 'परगृहललिताः' (४।२८) इत्यादि बन्धुललक्षणं करिष्यते। ही ही भो इति विस्मये । तपश्चरणक्लेशाविनिर्जितेन स्वाधीनेन । पुष्पकेण विमानविशेषेण। अकृततपश्चरणक्लेशः। नरयुक्ता नारी नरनारी सोद्वाहिका यस्य। पुष्पकमपि सा नरनारी सीतारूपा उद्वहनीया यस्येदृशम् । शब्दच्छलेन साम्यम् । अहो वसन्तसेनाभवनद्वारस्य सश्रीकता। किंभूतस्य। [आदौ सलिलेन सिक्तं पश्चान्मार्जितं च कृतं हरितोपलेपनं यस्य तस्य।] कृतहरितोपलेपनस्य । कृतगोमयोपलेपनस्येत्यर्थात्। [विविधानि च तानि सुगन्धीनि कुसुमानि च तेषामुपहारैः चित्रं यथा तथा लिखितः भूमिभागो यस्य। ०लोकने कौतूहलं तेन दूरोन्नामितं शीर्षं येन तस्य ।] उच्छ्रायप्रकर्षपरमेतत् । [दोलायमानः यः अवलम्बितः ऐरावणः ऐरावतस्तस्य हस्तः शुण्डा तस्य भ्रमायितः भ्रममागतः मल्लिकादामगुणः मल्लिकाकुसुममाला तेनालंकृतस्य । महारजनोपरागेति पाठे महारजनं कुसुम्भं तस्योपरागः रञ्जनं तैरुपशोभते इति तेन । पवनबलेन या आन्दोलना तया ललत् चलदत एव चञ्चलं अग्रं

---

१ विलोक्य. २ सुअन्ध... कुसुमचित्त. ३ चित्तलिदभूमिआ० (चित्रितभूमिका०). ४ तलालोअण (तलालोकन). ५ ण्णमिद. ६ समुद्धद. ७ णिब्भेज्ज.

चेटी—एत्वेतु । इमं प्रथमं प्रकोष्ठं प्रविशत्वार्यः । (क)

विदूषकः—(प्रविश्यावलोक्य च ।) आश्चर्यं भोः । इहापि प्रथमे प्रकोष्ठे शशिशङ्खमृणालसच्छाया विनिहितचूर्णमुष्टिपाण्डुरा विविधरत्नप्रतिबद्धकाञ्चनसोपानशोभिताः प्रासादपङ्क्त्योऽवलम्बितमुक्तादामभिः स्फटिकवातायनमुखचन्द्रैर्निर्ध्यायन्तीवोज्जयिनीम् । श्रोत्रिय इव सुखोपविष्टो निद्राति दौवारिकः । सदध्ना कलमोदनेन प्रलोभिता न भक्षयन्ति वायसा बलिं सुधासवर्णतया । आदिशतु भवती । (ख)

चेटी—एत्वेत्वार्यः । इमं द्वितीयं प्रकोष्ठं प्रविशत्वार्यः । (ग)

विदूषकः—(प्रविश्यावलोक्य च ।) आश्चर्यं भोः । इहापि द्वितीये प्रकोष्ठे पर्यन्तोपनीतयवसबुसकवलसुपुष्टास्तैलाभ्यक्तविषाणा बद्धाः प्रवहणबलीवर्दाः । अयमन्यतरोऽवमानित इव कुलीनो दीर्घं निःश्वसिति सैरिभः । इतश्चापनीतयुद्धस्य मल्लस्येव मर्द्यते ग्रीवा मेषस्य । इत इतोऽपरेषामश्वानां केशकल्पना क्रियते । अयमपरः पाटच्चर इव दृढ-

---

(क) एदु एदु । इमं पढमं पओट्ठं पविसदु अज्जो ।

(ख) ही ही भोः । इध वि पढमे पओट्ठे ससिसङ्खमुणालसच्छाहाओ विणिहिदचुण्णमुट्ठिपाण्डुराओ विविहरअणपडिबद्धकञ्चणसोवाणसोहिदाओ पासादपन्तिओ ओलम्बिदमुत्तादामेहिं फटिहवादाअणमुहचन्देहिं णिज्झाअन्ती विअ उज्जइणिम् । सोत्तिओ विअ सुहोवविट्ठो णिद्दाअदि दोवारिओ । सदहिणा कलमोदणेण पलोहिदा ण भक्खन्ति वायसा बलिं सुधासवण्णादाए । आदिसदु भोदी ।

(ग) एदु एदु अज्जो । इमं दुदिअं पओट्ठं पविसदु अज्जो ।

एव हस्तो यस्य तेन । सौभाग्याय सौभाग्यलक्षणा वा याः पताकास्तासां निवहेन । तोरणस्य धरणं धारणं तदर्थं स्तम्भौ तयोः वेदिका तस्यां निक्षिप्तौ निहितौ च तौ । समुल्लसन्तः च ते हरिताश्च चूतपल्लवा आम्रपल्लवास्तैः ललामौ स्फटिकनिर्मितौ मङ्गलकलशौ ताभ्यामभिरामौ उभयपार्श्वौ यस्य । महासुरवक्षःस्थलवद् दुर्भेद्यं वज्रैः हीरकैः निरन्तरं प्रतिबद्धं प्रत्युप्तं कनककपाटं यस्य तस्य । दुर्गतः दरिद्रः जनः । आयासकरस्य द्रव्याभावादलभ्यत्वात् । आकारयत्याकर्षति ।] प्रथमप्रकोष्ठवर्णनम्—[शशिशङ्खमृणालसच्छायाः शशिशङ्खमृणालैः समाना छाया कान्तिर्येषां ते । विविधैः रत्नैः प्रतिबद्धानि खचितानि काञ्चनस्य सोपानानि तैः शोभिताः । अवलम्बितानि मुक्तादामानि येषु तैः । स्फटिकवातायनान्येव मुखचन्द्रास्तैः । निर्ध्यायन्तीव पश्यन्तीव । कलमोदनेन शाल्योदनेन ।] [पर्यन्तेषु उपनीतानि यवसानि तृणानि बुसानि धान्यत्वचश्च तेषां कवलैः सुपुष्टाः ।] इह सैरिभो महिषः । [केशकल्पना केशसज्जना । केशानां संस्कार इत्यर्थः ।

---

१ दृष्ट्वा च. २ वन्तिओ.

बद्धो मन्दुरायां शाखामृगः। (अन्यतोऽवलोक्य।) इतश्च कूरच्युततैल-मिश्रं पिण्डं हस्ती प्रतिग्राह्यते मात्रपुरुषैः। आदिशतु भवती। (क)

चेटी—एत्वेत्वार्यः। इमं तृतीयं प्रकोष्ठं प्रविशत्वार्यः। (ख)

विदूषकः—(प्रविश्य दृष्ट्वा च।) आश्चर्यं भोः। इहापि तृतीये प्रकोष्ठे इमानि तावत्कुलपुत्रजनोपवेशननिमित्तं विरचितान्यासनानि। अर्धवाचितं पाशकपीठे तिष्ठति पुस्तकम्। एतच्च मणिमयसारिकासहितं पाशकपीठम्। इमे चापरे मदनसंधिविग्रहचतुरा विविधवर्णिकाविलिप्तचित्रफलकाग्रहस्ता इतस्ततः परिभ्रमन्ति गणिका वृद्धविटाश्च। आदिशतु भवती। (ग)

चेटी—एत्वेत्वार्यः। इमं चतुर्थं प्रकोष्ठं प्रविशत्वार्यः। (घ)

(क) ही ही भोः। इध वि दुदिए पओट्ठे पज्जन्तोवणीदजवसबुसकवलसुपुट्ठा तेल्लभङ्गिदविसाणा[1] बद्धा पवहणबइल्ला। अअं अण्णदरो अवमाणिदो विअ कुलीणो दीहं णीससदि सेरिहो। इदो अ अवणीदजुज्झस्स मल्लस्स विअ मद्दीअदि गीवा मेसस्स। इदो इदो अवराणं अस्साणं केसकप्पणा करीअदि। अअं अवरो पाडच्चरो विअ दढबद्धो मन्दुराए साहामिओ। इदो अ कूरच्चुअतेल्लमिस्सं पिण्डं हत्थी पडिच्छावीअदि मेत्थपुरिसेहिं। आदिसेदु[2] भोदी।

(ख) एदु एदु अज्जो। इमं तइअं पओट्ठं पविसदु अज्जो।

(ग) ही ही भोः। इध वि तइए पओट्ठे इमाइं दाव कुलउत्तजणोववेसणणिमित्तं विरचिदाइं आसणाइं। अद्धवाचिदो पासअपीठे[3] चिट्ठइ पोत्थओ। एसो अ मणिम[4]असारिआसहिदो पासअपीठो। इमे अ अवरे मअणसंधिविग्गहचदुरा विविहवण्णिआविलित्तचित्तफलहअग्गहत्था इदो तदो परिब्भमन्ति गणिआ वुड्ढविडा अ। आदिसदु भोदी।

(घ) एदु एदु अज्जो। इमं चउट्ठं पओट्ठं पविसदु अज्जो।

"कूरेति भक्तेत्यर्थः। तेल्लेति घृतेत्यर्थः। मात्रेति महामात्रेत्यर्थः।" इति ल० दी०।] पाटच्चर इव चौर इव। इतोऽपि भक्ततैलघृतामिश्रपिण्डं ग्राह्यते हस्ती हस्तिपकपुरुषैः। [कुलपुत्राः गर्भेश्वराः। पाशकपीठे मञ्चे इति ल० दी०। यद्वा शारीपटे।] पुस्तकं कामशास्त्रस्येत्यर्थात्। स्वाधीनम्। 'सारितम्' इति पाठे प्रसारितमित्यर्थः। 'स्वाधीनमकृत्रिमम्' इति प्राचीनटीका। [मदनसंबन्धी यः संधिः परस्परानुनयनं विग्रहः प्रणयकलहश्च तत्र चतुराः। विविधा वर्णिका नीलपीतादयो वर्णास्तैः विलिप्ताः कृतालेख्याः चित्रफलका अग्रहस्ते येषां ते।] विविधवर्णिकावलिप्तं चित्रफलकं वहमानाः। गम्भीरं

---

१ विसाणबद्ध. २ आदेसेदु. ३ वासपीठे (व्यासपीठे). ४ साहीणमणि० (स्वाधीनमणि०).

विदूषकः—(प्रविश्यावलोक्य च ।) आश्चर्यं भोः । इहापि चतुर्थे प्रकोष्ठे युवतिकरताडिता जलधरा इव गम्भीरं नदन्ति मृदङ्गाः क्षीणपुण्या इव गगनात्तारका निपतन्ति कांस्यतालाः मधुकरविरुतमिव मधुरं वाद्यते वंशः । इयमपरेर्ष्याप्रणयकुपितकामिनीवाङ्कारोपिता कररुहपरामर्शेन सार्यते वीणा । इमा अपराः कुसुमरसमत्ता इव मधुकर्योऽतिमधुरं प्रगीता गणिकादारिका नर्त्यन्ते नाट्यं पाठ्यन्ते सशृङ्गारम् । अपवलिगता गवाक्षेषु वातं गृह्णन्ति सलिलगर्गर्यः । आदिशतु भवती । (क)

चेटी—एत्वेत्वार्यः । इमं पञ्चमं प्रकोष्ठं प्रविशत्वार्यः । (ख)

विदूषकः—(प्रविश्य दृष्ट्वा च ।) आश्चर्यं भोः । इहापि पञ्चमे प्रकोष्ठेऽयं दरिद्रजनलोभोत्पादनकर आहरत्युपचितो हिङ्गुतैलगन्धः । विविधसुरभिधूमोद्गारैर्नित्यं संताप्यमानं निःश्वसितीव महानसं द्वारमुखैः । अधिकमुत्सुकायते मां साध्यमानबहुविधभक्ष्यभोजनगन्धः । अयमपरः पटच्चरमिव हतपशूदरपेशिं धावति रूपिदारकः । बहुविधाहारविकारमुप-

(क) ही ही भोः । इध वि चउट्ठे पओट्ठे जुअदिकरताडिदा जलधरा विअ गम्भीरं णदन्ति मुदङ्गा[1] हीणपुण्णाओ विअ गअणादो तारआओ णिवडन्ति कंसतालआ महुअरविरुअं विअ महुरं वज्जदि वंसो । इअं अवरा ईसाप्पणअकुविदकामिणी विअ अङ्कारोविदा कररुहपरामरिसेण सारिज्जदि वीणा । इमाओ अवराओ कुसुमरसमत्ताओ विअ महुअरिओ अदिमहुरं पगीदाओ गणिआदारिआओ णच्चीअन्ति णट्टअं पठीअन्ति ससिङ्गारओ । ओवग्गिदा गवक्खेसु वादं गेण्हन्ति सलिलगग्गरीओ । आदिसदु भोदी । (ख) एदु एदु अज्जो । इमं पञ्चमं पओट्ठं पविसदु अज्जो ।

धीरम् । निपतन्ति वैदग्ध्यवादनादेव निपातः । मधुकराभिरुतमिव । [अपरस्या ईर्ष्यया अनुरागासहिष्णुतया प्रणयकुपिता कामिनीव । कररुहपरामर्शेन नखाग्राघातेन । कामिनीपक्षे स्पर्शनेन] । 'गणिकादारिका वेश्याविशेषाः' इति गुणपताकायामुक्तम् । [नर्त्यन्ते नृत्यं शिक्ष्यन्ते ।] नाट्यते नाट्यम् । पठ्यते सशृङ्गारम् । अपवलिगता अवलम्बिताः । सलिलगर्गर्यः [पात्रविशेषाः] । एतच्च जनानां पानार्थम् । हिङ्गुतैलगन्ध आ समन्ताद्धरति । [महानसं पाकस्थानम् ।] अधिकं रोमाञ्चयति [उत्सुकयतीति वाऽर्थः । भुज्यते अनेनेति भोजनम् । करणे ल्युट् । व्यञ्जनमिति व्युत्पत्तेः । अतो न पौनरुक्त्यमिति ध्येयम् । इति ल० दी०] भोजनं करणे ल्युटि व्यञ्जनादिवचनः । पटच्चरमिव जीर्णवस्त्रमिव [पेशीं मांसपिण्डीम् ।] छेद्यपट्टमनेकधारशोणिताभ्यामुपहतत्वात् । रूपिदारओ । रूपशब्दः पशुवचनस्तद्योगाद्रूपी खट्टिकस्तस्य दारकः पुत्रः । यद्वा रूपी रूपसंघस्तस्य दारकश्छेदकः । खट्टिक एव । यत्र मांसं छिद्यते तं पदं

१ मुरआ (मुरजाः). २ झीण. ३ विरुअमहुरं (विरुतमधुरं).

साधयति सूपकारः । बध्यन्ते मोदकाः पच्यन्तेऽपूपकाः । (आत्मगतम् ।) अपीदानीमिह वर्धितं भुङ्क्ष्वेति पादोदकं लप्स्ये । (अन्यतोऽवलोक्य ।) इतो गन्धर्वाप्सरोगणैरिव विविधालंकारशोभितैर्गणिकाजनैर्बन्धुलैश्च यत्सत्यं स्वर्गायत एतद्गेहम् । भोः के यूयं बन्धुला नाम । (क)

बन्धुलाः—वयं खलु

परगृहललिताः परान्नपुष्टाः परपुरुषैर्जनिताः पराङ्गनासु ।
परधननिरता गुणेष्ववाच्या गजकलभा इव बन्धुला ललामः॥२८॥

विदूषकः—आदिशतु भवती । (ख)

चेटी—एत्वेत्वार्यः । इमं षष्ठं प्रकोष्ठं प्रविशत्वार्यः । (ग)

विदूषकः—(प्रविश्यावलोक्य च ।) आश्चर्यं भोः । इहापि षष्ठे प्रकोष्ठेऽमूनि तावत्सुवर्णरत्नानां कर्मतोरणानि नीलरत्नविनिक्षिप्तानीन्द्रायुधस्थानमिव दर्शयन्ति । वैदूर्यमौक्तिकप्रवालकपुष्परागेन्द्रनीलकर्केतरकपद्मरागमरकतप्रभृतीन्रत्नविशेषानन्योन्यं विचारयन्ति शिल्पिनः । बध्यन्ते जातरूपैर्माणिक्यानि । घटय्न्ते सुवर्णालंकाराः । रक्तसूत्रेण ग्रथ्यन्ते मौक्ति-

---

(क) ही ही भोः । इध वि पञ्चमे पओट्ठे अअं दलिद्दजणलोहुप्पादणअरो आहरइ उवचिदो हिङ्गुतेल्लगन्धो । विविहसुरहिधूमुग्गारेहिं णिच्चं संताविज्जमाणं णीससदि विअ महाणसं दुवारमुहेहिं । अधिअं उसुसावेदि[2] मं साहिज्जमाणबहुविहभक्खभोअणगन्धो । अअं अवरो पडच्चरं विअ पोट्टिं धोअदि रूपिदारओ । बहुविहाहारविआरं उवसाहेदि सूवआरो । बज्झन्ति मोदआ पच्चन्ति अपूवआ । अवि दाणिं इह वड्ढिअं भुञ्जसु त्ति पादोदअं लहिस्सम् । इदो[3] गन्धव्वच्छ[4]रगणेहिं विअ विविहालंकारसोहिदेहिं गणिआजणेहिं बन्धुलेहिं अ जं सच्चं सग्गीअदि[5] एदं[6] गेहम् । भो के तुम्हे बन्धुला णाम ।

(ख) आदिसदु भोदी ।

(ग) एदु एदु अज्जो । ईमं छट्ठं पओट्ठं पविसदु अज्जो ।

धावति प्रक्षालयति । अपीदानीमहं भोक्तुं पादोदकं लप्स्ये । 'वर्धितम्' इति पाठे 'व्यञ्जनादिसामग्र्योपचितं वर्धितकम्' इति पूर्वटीका । **परगृहेति** । [परगृहे ललिताः पालिताः ।] गुणेष्ववाच्याः । अनभिधानीयगुणा इत्यर्थः । 'ऋणेषु' इति पाठे ऋणेष्ववाच्या ऋणमेवावसीय सर्वैरभिमुह्यामह इत्यर्थः । ललामो विलसामः । 'लल विलासे' भौवादिकः । अनुप्रासानुरोधेनानयोरैक्यम् । 'ललामाः' इति पाठे श्रेष्ठा इत्यर्थः ॥ २८ ॥ [कर्मणा कार्येण चित्रघटनयेत्यर्थः । निर्मितानि तोरणानि ।] वस्तुविशेषे निक्षिप्तानि प्रसारितानीन्द्रायुधस्थानकमिव दर्शयन्ति । नीलरत्नेष्वारोपितानीन्द्रायुधमिव दृश्यन्त इत्याशयः । प्रवालककर्केतरौ मणिविशेषौ ।

---

१ ललामाः. २ ओआसावेदि. ३ इदो अ. ४ सुर. ५ सग्गाअदि. ६ एदं.

काभरणानि। घृष्यन्ते धीरं वैदूर्याणि। छिद्यन्ते शङ्खाः। शाणैर्घृष्यन्ते प्रवालकाः। शोष्यन्त आर्द्रकुङ्कुमप्रस्तराः। सार्यते कस्तूरिका। विशेषेण घृष्यते चन्दनरसः। संयोज्यन्ते गन्धयुक्तयः। दीयते गणिकाकामुकानां सकर्पूरं ताम्बूलम्। अवलोक्यते सकटाक्षम्। प्रवर्तते हासः। पीयते चानवरतं ससीत्कारं मदिरा। इमे चेटा इमाश्चेटिका इमेऽपरेऽवधीरितपुत्रदारवित्ता मनुष्या आसवकरकापीतमदिरैर्गणिकाजनैर्ये मुक्तास्ते पिबन्ति। आदिशतु भवती। (क)

चेटी—एत्वेत्वार्यः। इमं सप्तमं प्रकोष्ठं प्रविशत्वार्यः। (ख)

विदूषकः—(प्रविश्यावलोक्य च।) आश्चर्यं भोः। इहापि सप्तमे प्रकोष्ठे सुश्लिष्टविहंगवाटीसुखनिषण्णान्यन्योन्यचुम्बनपराणि सुखमनुभवन्ति पारावतमिथुनानि। दधिभक्तपूरितोदरो ब्राह्मण इव सूक्तं पठति

(क) ही हो भोः। इध वि छट्ठे पओट्ठे अमुं दाव सुवण्णरअणाणं कम्मतोरणाइं णीलरअणविणिक्खित्ताइं इन्दाउहट्ठाणं विअ दरिसअन्ति। वेदुरिअमोत्तिअपवालअपुप्फराअइन्दणीलकक्केतरअपउमराअमरगअपहुदिआइं रअणविसेसाइं अण्णोण्णं विचारेन्ति सिप्पिणो। बज्झन्ति जादरूवेहिं माणिक्काइं। घडिज्जन्ति सुवण्णालंकारा। रत्तसुत्तेण गत्थीअन्ति मोत्तिआभरणाइं। घसीअन्ति धीरं वेदुरिआइं। छेदीअन्ति सङ्खआ। साणिज्जन्ति पवालआ। सुक्खविअन्ति ओल्लविदकुङ्कुमपत्थरा। सालीअदि सेलज्जअम्। विस्साणीअदि चन्दणरसो। संजोईअन्ति गधजुत्तीओ। दीअदि गणिआकामुकाणं सकप्पूरं तम्बोलम्। अवलोईअदि सकडक्खअम्। पअट्टदि हासो। पिबीअदि अ अणवरअं ससिकारं मइरा। इमे चेडा इमा चेडिआओ इमे अवरे अवधीरिदपुत्तदारवित्ता मणुस्सा आसवकरआपीदमदिरेहिं गणिआजणेहिं जे मुक्का ते पिअन्ति। आदिसदु भोदी।

(ख) एदु एदु अज्जो। इमं सत्तमं पओट्ठं पविसदु अज्जो।

जातरूपैः सुवर्णैः। लोहितसूत्रैर्ग्रथ्यन्ते मौक्तिकाभरणानि। शाणे घृष्यन्ते प्रवालानि। शोष्यन्ते ओल्लविदमवतारिता आर्द्रिता वा कुङ्कुमप्रस्तराः। 'प्रस्तरः कुङ्कुमाधारश्चर्मपुटः' इत्याहुः। सालीअदि आर्द्रीक्रियते। सेलज्जअं कस्तूरिका। शल्यवद्वेधकत्वात्। आज्यमिव मृगमदत्वात्। इमेऽन्येऽवज्ञातपुत्रदारवित्ता मनुष्याः [आसवकरकैश्चषकैः आपीता मदिरा यैः] आसवकरकेणापीतमदिरा गणिकाजनैर्ये मुक्तास्ते वाटं पिबन्ति। अयमर्थः—मद्यपानभाण्डेनापीतमद्या अनादृतनिजपरिवारास्त्यक्तान्यकर्तव्या अत एव तत्रैवात्यन्तमवस्थाना गणिकाभिर्ये मुक्ता निःसारिता इत्युक्तं ते पुरुषा वारंवारं पुनः पुनर्मद्यमेव पिबन्ति। मदिराया अवारितसत्रत्वमुक्तम्। इह सप्तमे प्रकोष्ठे सुश्लिष्टायां विहङ्गपाल्यां (-वाट्यां) कपोतपालिकायाम्।

---

१ क्षाल्यते. २ कामुकयोः.

पञ्जरशुकः । इयमपरा संमाननालब्धप्रसरेव गृहदासी अधिकं कुरकुरायते मदनसारिका । अनेकफलरसास्वादप्रहृष्टकण्ठा कुम्भदासीव कूजति परपुष्टा । आलम्बिता नागदन्तेषु पञ्जरपरंपराः । योध्यन्ते लावकाः । आलाप्यन्ते कपिञ्जलाः । प्रेष्यन्ते पञ्जरकपोताः । इतस्ततो विविधमणिचित्रित इवायं सहर्षं नृत्यन्रविकिरणसंतप्तं पक्षोत्क्षेपैर्विधुवतीव प्रासादं गृहमयूरः । (अन्यतोऽवलोक्य ।) इतः पिण्डीकृता इव चन्द्रपादाः पदगतिं शिक्षमाणानीव कामिनीनां पश्चात्परिभ्रमन्ति राजहंसमिथुनानि । एतेऽपरे वृद्धमहल्लका इवेतस्ततः संचरन्ति गृहसारसाः । आश्चर्यं भोः । प्रसारणं कृतं गणिकाया नानापक्षिसमूहैः । यत्सत्यं खलु नन्दनवनमिव मे गणिकागृहं प्रतिभासते । आदिशतु भवती । (क)

चेटी—एत्वार्यः । इममष्टमं प्रकोष्ठं प्रविशत्वार्यः । (ख)

(क) ही ही भोः । इध वि सत्तमे पओट्ठे सुसिलिट्ठविहङ्गवाडीसुहणिसण्णाइं अण्णोण्णचुम्बणपराइं सुहं अणुभवन्ति पारावदमिहुणाइं । दहिभत्तपूरिदोदरो बम्हणो विअ सुत्तं पढदि पञ्जरसुओ । इअं अवरा संमाणणालद्धपसरा विअ घरदासी[1] अधिअं कुरुकुरायदि मदणसारिआ । अणेअफलरसास्सादपहुट्ठकण्ठा[2] कुम्भदासी विअ कूअदि परपुट्ठा[3] । आलम्बिदा णागदन्तेसु पञ्जरपरम्पराओ । जोधीअन्ति लावआ । आलवीअन्ति कविञ्जला । पेसीअन्ति पञ्जरकवोदा । इदो तदो विविहमणिचित्तलिदो विअ अअं सहरिसं णच्चन्तो रविकिरणसंतत्तं पक्खुक्खेवेहिं विधुणेदि विअ पासादं घरमोरो । इदो पिण्डीकिदा विअ चन्दपादा पदगदिं सिक्खन्ता[4] विअ कामिणीणं पच्छादो परिब्भमन्ति राअहंसमिहुणा । एदे अवरे बुड्ढमहल्लका विअ इदो तदो संचरन्ति घरसारसा[5] । ही ही भोः । पसारणअं किदं गणिआए णाणापक्खिसमूहेहिं । जं सच्चं क्खु[6] णन्दणवणं विअ मे गणिआघरं पडिभासदि । आदिसदु[7] भोदी ।

(ख) एदु[8] अज्जो । इमं अट्ठमं पओट्ठं पविसदु अज्जो ।

सूक्तमृक्समुदायम् । शोभनोक्तं च यथा स्यादेवम् । [कुम्भदासीव कुट्टिनीव ।] परपुष्टा कोकिला । आलम्बिता नागदन्तेषु गृहभित्तिस्थदारुविशेषेषु । नागदन्तका इति प्रकृष्टौ कः । कपिञ्जला गौरास्तित्तिरयः । प्रेष्यन्ते पञ्जरकपोताः । योद्धुमित्यर्थात् । इतस्ततो विविधमणिविचित्रित इवायं सहचरीसहितः सहर्षं नृत्यन्रविकिरणसंतप्तं पक्षोत्क्षेपैर्वीजयतीव प्रासादं गृहमयूरः । चन्द्रपादाश्चन्द्रकिरणाः । [वृद्धमहल्लका वृद्धश्रेष्ठा इत्यर्थः । इति ल. दी.] प्रसारणकं दत्तं गणिकाभिर्नानापक्षिसमूहे । [एत्वार्यः । अत्र एत्वेत्विति न वीप्सा । प्रकोष्ठमर्यादासमाप्तेरभ्यन्तरगृहस्यागतत्वेन

---

१ गृहदासी. २ पहुट्ट (प्रतुष्ट). ३ परउ–वु–द्दा. ४ सिक्खन्ति. ५ सारसाओ. ६ क्खु एदं. ७ आदेसेदु. ८ एदु एदु.

विदूषकः—(प्रविश्यावलोक्य च ।) भवति क एष पट्टप्रावारकप्रावृतोऽधिकतरमत्यद्भुतपुनरुक्तालंकारालंकृतोऽङ्गभङ्गैः परिस्खलन्नितस्ततः परिभ्रमति । (क)

चेटी—आर्य एष आर्याया भ्राता भवति । (ख)

विदूषकः—कियत्तपश्चरणं कृत्वा वसन्तसेनाया भ्राता भवति । अथ वा ।

मा तावद्यद्यप्येष उज्ज्वलः स्निग्धश्च सुगन्धश्च ।
तथाऽपि श्मशानवीथ्यां जात इव चम्पकवृक्षोऽनभिगमनीयो लोकस्य

(अन्यतोऽवलोक्य ।) भवति एषा पुनः का पुष्पप्रावारकप्रावृतोपानद्युगलनिक्षिप्ततैलचिक्कणाभ्यां पादाभ्यामुच्चासन उपविष्टा तिष्ठति । (ग)

चेटी—आर्य एषा खल्वस्माकमार्याया माता । (घ)

विदूषकः—अहो अस्याः कपर्दकडाकिन्या उदरविस्तारः । तत्किमेतां प्रवेश्य महादेवमिव द्वारशोभेह गृहे निर्मिता । (ङ)

चेटी—हताश मैवमुपहसास्माकं मातरम् । एषा खलु चातुर्थिकेन पीड्यते । (च)

(क) भोदि को एसो पट्टपावारअपाउदो अधिअदरं अच्चब्भुदपुणरुत्तालंकारालंकिदो अङ्गभङ्गेहिं परिक्खलन्तो इदो तदो परिब्भमदि ।

(ख) अज्ज एसो अज्जआएं भादा भोदि ।

(ग) केत्तिअं तवच्चरणं कदुअ वसन्तसेणाए भादा भोदि । अध वा ।

मा दाव जइ वि एसो उज्जलो सिणिद्धो अ सुअन्धो अ ।
तह वि मसाणवीधीए जादो विअ चम्पअरुक्खो अणहिगमणीओ लोअस्स ॥

भोदि एसा उण का फुल्लपावारअपाउदा उवाणहजुअलणिक्खित्ततेल्लचिक्कणेहिं पादेहिं उच्चासणे उवविट्ठा चिट्ठदि । (घ) अज्ज एसा क्खु अम्हाणं अज्जआए अत्तिआ ।

(ङ) अहो से कवड्डडाइणीए पोट्टवित्थारो । ता किं एदं पवेसिअ महादेवं विअ दुआरसोहा इह घेरे णिम्मिदा ।

(च) हदास मा एव्वं उवहस अम्हाणं अत्तिअम् । एसा क्खु चाउत्थिएण पीडीअदि ।

गन्तव्यस्य प्रकोष्ठान्तरस्य विरहाच्चेति ध्येयम् । इति ल० दी०] पट्टप्रच्छदप्रावृतोऽधिकतरमत्यद्भुतपुनरुक्तालंकारालंकृतः । **मा तावदिति** । आर्या । विततायामिव अमेध्य इवेति पाठान्तरे इत्यर्थः । अनभिगम्योऽनभिगमनीयः ॥ २९ ॥ पुष्पप्रावारकप्रावृता । [सूक्ष्मसूत्रपुष्पाणि कृत्रिमाणि यत्र भवन्ति स पुष्पपट इति प्रसिद्धः । इति ल० दी०] पादाभ्यां लक्षिता । 'करट्ट' इति पाठे अशौचाभ्यवहरणप्रयुक्तकरट्टब्राह्मणवत् । तत्किमितीमां प्रवेश्येत्यादि । अन्यथा अनेन द्वारेणास्या गृहे न प्रवेशः स्यादित्याशयः । एषा खल्वस्माकं माता चातुर्थिकेन ज्वरविशेषेण पीड्यते । तेनेदृशी दशेत्युक्तम् । [चतुर्थे अहनि भवः चातुर्थिकः । 'कालाट्ठञ्' इत्यनेन ठञ् । 'ठस्येकः' इतीकादेशः ।]

---

१ आए अअं. २ करट्ट (अपवित्र).

विदूषकः—(सपरिहासम् ।) भगवंश्चातुर्थिक एतेनोपकारेण मामपि ब्राह्मणमालोकय । (क)

चेटी—हताश मरिष्यसि । (ख)

विदूषकः—(सपरिहासम् ।) दास्याःपुत्रि वरमीदृशः शूनपीनजठरो मृत एव ।

सीधुसुरासवमत्ता एतावदवस्थां गता हि माता ।
यदि म्रियतेऽत्र माता भवति शृगालसहस्रपर्याप्ता ॥ ३० ॥

भवति किं युष्माकं यानपात्राणि वहन्ति । (ग)

चेटी—आर्य न हि न हि । (घ)

विदूषकः—किं वाऽत्र पृच्छ्यते । युष्माकं खलु प्रेमनिर्मलजले मदनसमुद्रे स्तननितम्बजघनान्येव यानपात्राणि मनोहराणि । एवं वसन्तसेनाया बहुवृत्तान्तमष्टप्रकोष्ठं भवनं प्रेक्ष्य यत्सत्यं जानाम्येकस्थमिव त्रिविष्टपं दृष्टम् । प्रशंसितुं नास्ति मे वाग्विभवः । किं तावद्गणिकागृहमथ वा कुबेरभवनपरिच्छेद इति । कुत्र युष्माकमार्या । (ङ)

चेटी—आर्य एषा वृक्षवाटिकायां तिष्ठति । तत्प्रविशत्वार्यः । (च)

(क) भअवं चाउत्थिअ एदिणा उवआरेण मं पि बम्हणं आलोएहि ।
(ख) हदास मरिस्ससि । (ग) दासीएधीए[1] वरं ईदिसो शूणपीणजठरो मुदो ज्जेव ।

[2]सीहुसुरासवमत्तिआ एआवत्थं गदा हि अत्तिआ ।
जइ मरइ एत्थ अत्तिआ भोदि सिआलसहस्सपज्जत्तिआ[3] ॥

भोदि किं तुम्हाणं जाणवत्ता वहन्ति । (घ) अज्ज ण हि ण हि ।

(ङ) किं वा एत्थ पुच्छीअदि । तुम्हाणं क्खु पेम्मणिम्मलजले मअणसमुद्दे त्थणणिअम्बजहणा ज्जेव जाणवत्ता मणहरणा । एव्वं वसन्तसेणाए बहुवुत्तन्तं अट्टपओट्ठं भवणं पेक्खिअ जं सच्चं जाणामि एकत्थं व्विअ तिविट्ठअं दिट्ठम् । पसंसिदुं णत्थि मे वाआविहवो । किं दाव गणिआघरो अह वा कुबेरभवणपरिच्छेदो[4] त्ति । कहिं तुम्हाणं अज्जआ । (च) अज्ज एसा रुक्खवाडिआए चिट्ठदि । ता पविसदु अज्जो ।

सपरिहासम् । शूणपीणजठरो शूनमुच्छूनं पीनं महाभोगं जठरं यस्य सः । **सीधुसुरासवेत्यादि** । उपजातिविशेषः । सीधुसुरासवा मदिराविशेषाः । ['सीधुरिक्षुरसैः पक्वैरपक्वैरासवं भवेत्' इति माधवः ।] एतावदवस्थामापन्नपीनत्वरूपां गता यदि म्रियतेऽत्र मृता भवति शृगालानां पर्याप्तिका सौहित्यम् ॥ ३० ॥ [युष्माकं यानपात्राणि पोतादीनि वाणिज्यार्थे वहन्ति किम् । अन्यथा कथमीदृशी संपदिति भावः ।] उद्वाहकेनार्जितविभवस्यैव परमियान्विस्तारो भवतीति प्रश्नुरभिप्रायः । [परिच्छेदः

---

१ आ दासी०. २ सीधु. ३ ज्जत्तिआ (यात्रा). ४ परिच्छदो.

विदूषकः—(प्रविश्य दृष्ट्वा च ।) आश्चर्यं भोः । अहो वृक्षवाटिकायाः सश्रीकता । अच्छरीतिकुसुमप्रस्तारा रोपिता अनेकपादपाः निरन्तरपादपतलनिर्मिता युवतिजनजघनप्रमाणा पट्टदोला सुवर्णयूथिकाशेफालिकामालतीमल्लिकानवमालिकाकुरबकातिमुक्तकप्रभृतिकुसुमैः स्वयं निपतितैर्यत्सत्यं लघूकरोतीव नन्दनवनस्य सश्रीकताम् । (अन्यतोऽवलोक्य ।) इतश्च उदयत्सूर्यसमप्रभैः कमलरक्तोत्पलैः संध्यायत इव दीर्घिका । अपि च ।

एषोऽशोकवृक्षो नवनिर्गतकुसुमपल्लवो भाति ।
सुभट इव समरमध्ये घनलोहितपङ्कचर्चिकः ॥ ३१ ॥

भवतु । तत्कुत्र युष्माकमार्या । (क)

चेटी—आर्य अवनमय दृष्टिम् । पश्यार्याम् । (ख)

विदूषकः—(दृष्ट्वा उपसृत्य ।) स्वस्ति भवत्यै । (ग)

वसन्तसेना—(संस्कृतमाश्रित्य ।) अये मैत्रेयः । (उत्थाय ।) स्वागतम् । इदमासनम् । अत्रोपविश्यताम् ।

विदूषकः[1]—उपविशतु भवती । (घ)

(क) ही ही भोः । अहो रुक्खवाडिआए सस्सिरीअदा । अच्छरीदिकुसुमपत्थारा[2] रोविदा अणेअपादवा णिरन्तरपादवतलणिम्मिदा[3] जुवदिजणजहणप्पमाणा[4] पट्टदोला सुवण्णजूधिआसेहालिआमालईमल्लिआणोमालिआकुरबआ[5]अदिमोत्तअप्पहुदिकुसुमेहिं सअं णिवाडेदेहिं जं सच्चं लहुकरेदि विअ णन्दणवणस्स सस्सिरीअदम् । इदो अ उदअन्तसूरसमप्पहेहिं कमलरत्तोप्पलेहिं संझाअदि विअ दीहिआ । अवि अ ।

एसो असोअवुच्छो णवणिग्गअ[6]कुसुमपल्लवो भादि ।
सुभडो व्व समरमज्झे घणलोहिदपङ्कचच्चिको ॥

भोदु । ता कहिं तुम्हाणं अज्जआ ।

(ख) अज्ज ओणामेहि दिट्टिम् । पेक्ख अज्जअम् । (ग) सोत्थि भोदीए ।

(घ) उपविसदु भोदी ।

एकदेशः । ' परिच्छदो विस्तारः ' इति ल. दी.] [अच्छरीतयः सम्यक्प्रकाराः कुसुमप्रस्ताराः पुष्पोद्गमा येषां ते । निर्गतमन्तरं येषां ते निरन्तराः पादपाः । युवतिजनजघनानुरूपप्रमाणा इत्यर्थः । पट्टनिर्मिता दोला पट्टदोला । सुवर्णानि चम्पकानि हरिचन्दनकुसुमानि वा । यूथिकादयः पुष्पविशेषाः ।] सर्वकुसुमप्रस्तारा पट्टदोला । लघूकरोतीव नन्दनवनस्य सश्रीकत्वम् । [संध्यायते संध्यावदाचरति ।] **एष इत्यादि** । गाथा । [घना लोहितपङ्कस्य रुधिरकर्दमस्य] चर्चा यस्य सः ॥ ३१ ॥

---

१ मैत्रेयः. २ अच्छरीअकुसुमा जत्थ रोविदा (आश्चर्यकुसुमा यत्र रोपिताः). ३ णिरन्तरम्. ४ जव०. ५ कुरवआ. ६ णिग्गम (निर्गम).

(उभावुपविशतः ।)

वसन्तसेना—अपि कुशलं सार्थवाहपुत्रस्य ।

विदूषकः—भवति कुशलम् । (क)

वसन्तसेना—आर्य मैत्रेय अपीदानीं

गुणप्रवालं विनयप्रशाखं विश्रम्भमूलं महनीयपुष्पम् ।
तं साधुवृक्षं स्वगुणैः फलाढ्यं सुहृद्विहङ्गाः सुखमाश्रयन्ति ॥ ३२॥

विदूषकः—(स्वगतम् ।) सुष्ठूपलक्षितं दुष्टविलासिन्या । (प्रकाशम् ।) अथ किम् । (ख)

वसन्तसेना—अये किमागमनप्रयोजनम् ।

विदूषकः—शृणोतु भवती । तत्रभवांश्चारुदत्तः शीर्षेऽञ्जलिं कृत्वा भवतीं विज्ञापयति । (ग)

वसन्तसेना—(अञ्जलिं बद्ध्वा ।) किमाज्ञापयति ।

विदूषकः—मया तत्सुवर्णभाण्डं विश्रम्भादात्मीयमिति कृत्वा द्यूते हारितम् । स च सभिको राजवार्ताहारी न ज्ञायते कुत्र गत इति । (घ)

चेटी—आर्ये दिष्ट्या वर्धसे । आर्यो द्यूतकरः संवृत्तः । (ङ)

वसन्तसेना—(स्वगतम् ।) कथं चौरेणापहृतमपि शौण्डीरतया द्यूते हारितमिति भणति । अत एव काम्यते । (च)

विदूषकः—तत्तस्य कारणाद्गृह्णातु भवतीमां रत्नावलीम् । (छ)

वसन्तसेना—(आत्मगतम् ।) किं दर्शयामि तमलंकारम् । (विचिन्त्य ।) अथ वा न तावत् । (ज)

(क) भोदि कुशलम् । (ख) सुट्ठु उवलक्खिदं दुट्ठविलासिणीए । अध इं । (ग) सुणादु भोदी । तत्तभवं चारुदत्तो सीसे अञ्जलिं कदुअ भोदिं विण्णवेदि । (घ) मए तं सुवण्णभण्डअं विस्सम्भादो अत्तणकेरकेत्ति कदुअ जूदे हारिदम् । सो अ सहिओ राअवत्थहारी[1] ण जाणिअदि कहिं गदो त्ति । (ङ) अज्जए दिट्ठिआ वड्ढसि । अज्जो जूदिअरो संवुत्तो । (च) कधं चोरेण अवहिदं पि सोण्डीरदाए जूदे हारिदं त्ति भणादि । अदो ज्जेव कामीअदि । (छ) ता तस्स कारणादो गेण्हदु भोदी ऍदं[2] रअणावलिम् । (ज) किं दंसेमि तं अलंकारअम् । अध वा ण दाव ।

गुणेति । [गुणाः संगीतज्ञानं कलापाटवमित्यादयः कृत्रिमाः ते एव प्रवालाः पल्लवा यस्य तम् । विनय एव प्रशाखा मुख्यशाखा यस्य तम् । विश्रम्भः सर्वलोकानां विश्वास एव मूलं यस्य तम् । महनीयं पूज्यत्वं यश इत्यर्थः एव पुष्पं यस्य तम् । स्वगुणैः सहजैः गुणैः दयादाक्षिण्यकुलशीलादिभिः फलैः आढ्यं संपन्नम् । एवंविधं साधुः चारुदत्त एव वृक्षस्तं सुहृद एव विहङ्गाः पक्षिणस्ते सुखमाश्रयन्ति अपि । भवादृशास्तं यथापूर्वं सेवन्ते किमित्यर्थः । रूपकमलंकारः । उपजातिश्छन्दः ।] ॥ ३२ ॥ अथ किम् अनुमतौ । राअवत्थहारी वार्त्तिकः । शौण्डीर्येणाशयमहत्त्वेन ।

---

१ राआवत्थआरी (राजापथ्यकारी). २ इमं (इमां).

विदूषकः--किं तावन्न गृह्णाति भवत्येतां रत्नावलीम् । (क)

वसन्तसेना—(विहस्य सखीमुखं पश्यन्ती ।) मैत्रेय कथं न ग्रहीष्यामि रत्नावलीम् । (इति गृहीत्वा पार्श्वे स्थापयति । स्वगतम् ।) कथं हीनकुसुमादपि सहकारपादपान्मकरन्दबिन्दवो निपतन्ति । (प्रकाशम् ।) आर्य विज्ञापय तं द्यूतकरं मम वचनेनार्यचारुदत्तम्—अहमपि प्रदोष आर्यं प्रेक्षितुमागच्छामीति । (ख)

विदूषकः--(स्वगतम् ।) किमन्यत्तत्र गत्वा ग्रहीष्यति । (प्रकाशम् ।) भवति भणामि । (स्वगतम् ।)--निवर्ततामस्माद्गणिकाप्रसङ्गादिति । (इति निष्क्रान्तः ।) (ग)

वसन्तसेना—चेटि गृहाणैतमलंकारम् । चारुदत्तमभिरन्तुं गच्छावः । (घ)

चेटी—आर्ये पश्य पश्य । उन्नमत्यकालदुर्दिनम् । (ङ)

वसन्तसेना[२]--

उदयन्तु नाम मेघा भवतु निशा वर्षमविरतं पततु ।
गणयामि नैव सर्वं दयिताभिमुखेन हृदयेन ॥ ३३ ॥

चेटि हारं गृहीत्वा लघ्वागच्छ । (च)

(इति निष्क्रान्ताः सर्वे ।)

मदनिका[३]शर्विलको नाम चतुर्थोऽङ्कः ।

(क) किं दाव ण गेण्हदि भोदी एदं रअणावलिम् । (ख) मित्तेअ कधं ण गेण्हिस्सं रअणावलिम् । कधं झीणकुसुमादो वि सहआरपादवादो मअरन्दबिन्दओ णिवडन्ति । अज्ज विण्णवेहि तं जूदिअरं मम वअणेण अज्जचारुदत्तम्—अहं पि पदोसे अज्जं पेक्खिदुं आअ[४]च्छामि त्ति । (ग) किं अण्णं तहिं गदुअ गेण्हिस्सदि । भोदि भणामि ।—णिअत्तीअदु इमादो गणिआपसङ्गादो त्ति । (घ) हञ्जे गेण्ह एदं अलंकारअम् । चारुदत्तं अहिरमिदुं गच्छम्ह । (ङ) अज्जए पेक्ख पेक्ख । उण्णमदि अकालदुद्दिणम् । (च) हञ्जे हारं गेण्हिअ लँहुं आअच्छ ।

[हीनकुसुमादिति दारिद्र्यं गताच्चारुदत्ताद्रत्नावलीरूपस्यालंकारस्य प्राप्तिरित्यर्थः । अकाले दुर्दिनं मेघध्वान्तं सूर्यकिरणरोधकारि मेघमण्डलमित्यर्थः उन्नमति आविर्भवति ।] **उदयन्त्विति** । [वर्षं वृष्टिः । अविरतमविश्रान्तम् । दयिताभिमुखेन प्रियगमनोत्सुकेन ॥ ३३ ॥ अत्र चारुदत्तानुरागः परमार्थः । अत्र चेटीवचनेन वसन्तसेनावाक्येन च अव्यवहितमेव पञ्चमाङ्कादौ वर्षर्तुवर्णनावतारः सूच्यते । इति ल० दी० ।]

इति मदनिकाप्रदानो नाम चतुर्थोऽङ्कः ॥

---

१ इदं नास्ति क्वचित्. २ अस्मात्परं—'संस्कृतमाश्रित्य' इत्यधिकं क्वचित्. ३ मृच्छकटिके, ० टिकप्रकरणे चतु०. ४ आगमिस्सामिति. ५ लहु लहुं.

पञ्चमोऽङ्कः ।

(ततः प्रविशत्यासनस्थः सोत्कण्ठश्चारुदत्तः ।)

चारुदत्तः—(ऊर्ध्वमवलोक्य ।) उन्नमत्यकालदुर्दिनम् । यदेतत्

आलोकितं गृहशिखण्डिभिरुत्कलापै-
र्हंसैर्यियासुभिरपाकृतमुन्मनस्कैः ।
आकालिकं सपदि दुर्दिनमन्तरिक्ष-
मुत्कण्ठितस्य हृदयं च समं रुणद्धि ॥ १ ॥

अपि च ।

मेघो जलार्द्रमहिषोदरभृङ्गनीलो
विद्युत्प्रभारचितपीतपटोत्तरीयः ।
आभाति संहतबलाकगृहीतशङ्खः
खं केशवोऽपर इवाक्रमितुं प्रवृत्तः ॥ २ ॥

पूर्वाङ्केऽङ्कावतारेणैव सूचितस्य प्रकरणनायकस्य प्रवेशः । * [अत्राङ्के तावदासमाप्ति वर्षर्तुवर्णनं चारुदत्तेन वसन्तसेनया च विटेन च यथायथं क्रियते । तदिदं वसन्तसेनाचारुदत्तयोरन्योनानुरागोद्दीपनविभावत्वेनावतरतीति ध्येयम् इति ल० दी० ।] [अधुना पूर्वाङ्कान्ते सूचितं वसन्तसेनाया अभिसारिकावेषेण चारुदत्ताभिसरणमुपक्षेप्तुं पूर्वाङ्कान्तसूचितस्य नायकस्य प्रवेशं निर्दिशति–ततः प्रविशतीत्यादिना । सोत्कण्ठः वसन्तसेनाविषयकोत्कण्ठासहित इत्यर्थः । इत आरभ्याङ्कसमाप्तिं यावद्गर्भसंधिः ।] **आलोकितमिति** । [उद्गतः कलापो येषां तैः उत्कलापैः उन्नमितबर्हैः गृहशिखण्डिभिः आलोकितम् । उन्मनस्कैः उत्कण्ठितैः यियासुभिः मानसं सरो गन्तुमिच्छुभिः हंसैः] अपाकृतं निरस्तम् । अनभिनन्दितमिति यावत् । [अकाले भवम् आकालिकम् । 'कालाट्ठञ्' इति ठञ् । दुर्दिनं मेघावरणं सपदि अन्तरिक्षं उत्कण्ठितस्य विरहिजनस्य हृदयं च समं रुणद्धि व्याप्नोति । सहोक्तिरलंकारः । वसन्ततिलकं वृत्तम्] ॥ १ ॥ **मेघ इति** । [जलेनार्द्रं जलार्द्रं च तन्महिषोदरं च जलार्द्रमहिषोदरं भृङ्गश्च तद्वन्नीलः । महिषस्य स्वतः श्यामत्वेऽपि जलार्द्रस्यातिश्यामलता ततोऽप्युदरदेशे नैलाधिक्यमिति तथा ग्रहणम् । विद्युत्प्रभया रचितं पीतपटवदुत्तरीयं यस्य । पक्षे विद्युप्रभा इव रचितं पीतपटः पीताम्बरमेव उत्तरीयं येन । संहताः बलाका बका एव गृहीतः

---

*अस्मात्परं—तथा चोक्तम्—'प्रवेशश्चूलिका चैव तथा विष्कम्भकोऽपरः । अङ्कावतारोऽङ्कमुखमर्थोपक्षेपपञ्चकम् ॥' इति । प्रवेशयतीति प्रवेशः । पचाद्यच् । प्रवेशको ण्वुलन्त उच्यते । अधमपात्रप्रयोज्यः प्रवेशकः । तदुक्तम्—'भृत्यवर्गकथावद्य कर्तव्यस्तु प्रवेशकः । अन्तर्जवनिकासंस्थैस्तथा मागधबन्दिभिः ॥ अर्थोपक्षेपणं यत्र क्रियते सा हि चूलिका ॥ विष्कम्भस्तु द्विधा सोऽयं शुद्धः संकीर्ण एव च । शुद्धो मध्यमपात्रेण संकीर्णो मध्यमाधमैः ॥' इति ॥ —इत्यधिकः ग्रन्थष्टीकायामुपलभ्यमानोऽप्यनुपयोगित्वान्नात्र निवेशितः ।

---

१ उपाकृत.

अपि च ।

केशवगात्रश्यामः कुटिलबलाकावलीरचितशङ्खः ।
विद्युद्गुणकौशेयश्चक्रधर इवोन्नतो मेघः ॥ ३ ॥
एता निषिक्तरजतद्रवसंनिकाशा
धारा जवेन पतिता जलदोदरेभ्यः ।
विद्युत्प्रदीपशिखया क्षणदृष्टनष्टा-
श्छिन्ना इवाम्बरपटस्य दशाः पतन्ति ॥ ४ ॥
संसक्तैरिव चक्रवाकमिथुनैर्हंसैः प्रडीनैरिव
व्याविद्धैरिव मीनचक्रमकरैर्हर्म्यैरिव प्रोच्छ्रितैः ।
तैस्तैराकृतिविस्तरैरनुगतैर्मेघैः समभ्युन्नतैः
पत्रच्छेद्यमिवेह भाति गगनं विश्लेषितैर्वायुना ॥ ५ ॥
एतत्तद्धृतराष्ट्रचक्रसदृशं मेघान्धकारं नभो
हृष्टो गर्जति चातिदर्पितबलो दुर्योधनो वा शिखी ।

शङ्खः येन । अत्र बलाकशब्दः पुंलिङ्गः । 'बलाकश्च बको मतः' इति विश्वशाश्वतौ । पक्षे संहतबलाकवद् गृहीतः शङ्खः पाञ्चजन्यो येन । एतादृशो मेघः अपरः केशव इव खमाकाशमाक्रमितुं प्रवृत्तः । उत्प्रेक्षालंकारः । यद्वा अपरः केशवः वामनावतारः विष्णुरिव खमाक्रमितुं प्रवृत्तः । एतत्पक्षे उपमालंकारः । वृत्तं पूर्वोक्तम् ॥ २ ॥ उक्तार्थमेव भङ्ग्यन्तरेणाह—**केशवेत्यादि** । केशवगात्रश्यामः । कुटिला चासौ बलाकावली च तया रचितः शङ्खो येन । विद्युद्गुण एव कौशेयं यस्य सः । मेघः चक्रधरो विष्णुरिवोन्नतः । उपमालंकारः । आर्या छन्दः ॥ ३ ॥ **एता इति** । निषिक्तः स्रावितः यः रजतद्रवः तस्य सदृश्यः ०द्रवसंनिकाशाः । जलदोदरेभ्यः जवेन वेगेन पतिताः । विद्युदेव प्रदीपशिखा तया क्षणं दृष्टाः पश्चान्नष्टाः । एता धारा वर्षोदकस्येति शेषः । छिन्ना अम्बरमेव पटः तस्य दशा अग्राणीव पतन्ति । वसन्ततिलकं वृत्तम् ॥ ४ ॥ **संसक्तैरिति** । संसक्तैः अन्योन्यं मिलितैः चक्रवाकमिथुनैः इव । प्रडीनैः उत्पतितैः हंसैः इव । व्याविद्धैः समुद्रक्षोभादितस्ततः उत्क्षिप्तैः मीनचक्रैः मकरैश्च । प्रोच्छ्रितैः ऊर्ध्वं गतैः हर्म्यैः इव । एतादृशैः तैस्तैः बहुविधैः आकृतिविस्तरैः अनुगतैः प्राप्तानेकाकृतिविस्तरैरिति यावत् । समभ्युन्नतैः वायुना विश्लेषितैश्च मेघैः इह एतद्भूतलोर्ध्वभागे गगनं पत्रच्छेद्यमिव पत्रच्छेदैर्घटितं चित्रमालेख्यमिव भाति । उपमालंकारः । शार्दूलविक्रीडितं छन्दः ।] प्रडीनैरिति कर्मणि क्तः । व्याविद्धैर्भ्रान्तैः । चक्रं समूहः । पत्रस्य छेदः खण्डनं विचलं यत्र चित्रे तत्पत्रच्छेद्यं चित्रम् । तदिव गगनं शोभते ॥ ५ ॥ **एतदिति** । [मेघैरन्धकारो यस्मिन् तद् एतन्नभः । तत्प्रसिद्धं धृतराष्ट्रचक्रं कौरवकटकं तेन सदृशम् । 'सादृश्यं चानयोराभूवियन्मण्डलमन्धकारकारित्वेन विनष्टचन्द्रार्कतया च बोध्यम्' इति ल०दी०।०वक्त्र० इति पाठे धृतराष्ट्रवक्त्रे दृष्टिशून्यत्वादन्धकारः । नभसि सूर्याचन्द्रमसोरिति सादृश्यम् ।

---

१ विद्युद्गण. २ नष्टदृष्टाः-दृष्टाः. ३ विश्लेषितं. ४ वक्त्र.

अक्षद्यूतजितो युधिष्ठिर इवा[1]ध्वानं गतः कोकिलो
हंसाः संप्रति पाण्डवा इव वनादज्ञातच[2]र्यां गताः ॥ ६ ॥

(विचिन्त्य ।) चिरः खलु कालो मैत्रेयस्य वसन्तसेनायाः सकाशं गतस्य । नाद्याप्यागच्छति ।

(प्रविश्य ।)

विदूषकः—अहो गणिकाया लोभोऽदक्षिणता च यतो न कथाऽपि कृताऽन्या । अनेकधा स्नेहानुसारं भणित्वा किमप्येवमेव गृहीता रत्नावली । एतावत्या ऋद्ध्या न तयाऽहं भणितः—आर्य मैत्रेय विश्रम्यताम् । मल्लकेन पानीयमपि पीत्वा गम्यतामिति । तन्मा तावद्दास्याःपुत्र्या गणिकाया मुखमपि द्रक्ष्यामि । (सनिर्वेदम् ।) सुष्ठु खलूच्यते—अकन्दसमुत्थिता पद्मिनी, अवञ्चको वणिक्, अचौरः सुवर्णकारः, अकलहो ग्रामसमागमः अलुब्धा गणिकेति दुष्करमेते संभाव्यन्ते । तत्प्रियवयस्यं गत्वाऽस्माद्गणिकाप्रसङ्गान्निवर्तयामि । (परिक्रम्य दृष्ट्वा ।) कथं प्रियवयस्यो वृक्षवाटिकायामुपविष्टस्तिष्ठति । तद्यावदुपसर्पामि । (उपसृत्य ।) स्वस्ति भवते । वर्धतां भवान् । (क)

(क) अहो गणिआए लोभो अदक्खिणदा अ जदो ण कधा वि किदा अण्णा । अ[3]णेकहा सिणेहाणुसारं भणिअ किं पि एअमेअ गहिदा रअणावली । एत्तिआए ऋद्धीए ण तए अ[4]हं भणिदो—अज्ज मित्तेअ वीसमीअदु । म[5]ल्लकेण पाणीअं पि पिबिअ गच्छीअदुत्ति । ता मा दाव दासीएधीआए गणिआए मुहं पि पेक्खिस्सम् । सुष्ठु क्खु वुच्चदि—अकन्दसमुत्थिता पउमिणी अवञ्चओ वाणिओ अचोरो सुवण्णआरो अकलहो गामसमागमो अलुद्धा गणिआ त्ति दुक्करं एदे संभावीअन्ति । ता पिअवअस्सं गदुअ इमादो गणिआपसङ्गादो णिवत्तावेमि । कधं पिअवअस्सो रुक्खवाडिआए उवविट्ठो चिट्ठदि । ता जाव उवसप्पामि । सोत्थि [6]भवदे । वड्ढदु भवम् ।

अतिदर्पितं बलं सारः यस्य स शिखी मयूरः । अतिदर्पितं बलं सैन्यं यस्य स दुर्योधनः वा इव । वा शब्द इवार्थे । गर्जति । अक्षद्यूते जितः युधिष्ठिरः अध्वानं वनमार्गमिव कोकिलः अध्वानं ध्वनिराहित्यं गतः । संप्रति हंसा वनात् जलाद्धेतोः पाण्डवा वनादरण्यवासादिव अज्ञातचर्यां गताः। मानसं सरो गता अदृश्या अभवन्नित्यर्थः।] धृतराष्ट्रवक्त्रसदृशं नष्टचन्द्रार्कत्वात् । वा इवार्थे । शिखी मयूरः । वनादिति ल्यब्लोपे कर्मणि पञ्चमी । वनं प्राप्येत्यर्थः ॥६॥ पाठान्तरे—नैव कथा कथं हारितमलंकारभाण्डमित्यादिका नैव कथानुसारः कुतोऽस्या रत्नावल्या भाव इत्यादिकः । मल्लको भाजनविशेषः ।

---

१ वारण्यं. २ चर्यं. ३ अणाअरेण ज्जेव अभणिअ किं पि एअमेअ इ. (अनादरेणैवाभणित्वा किमप्येवमेव इ.). ४ एवं पि. ५ गल्ल०. ६ भो ते.

चारुदत्तः—(विलोक्य ।) अये सुहृन्मे मैत्रेयः प्राप्तः । वयस्य स्वागतम् । आस्यताम् ।

विदूषकः—उपविष्टोऽस्मि । (क)

चारुदत्तः—वयस्य कथय तत्कार्यम् ।

विदूषकः—तत्खलु कार्यं विनष्टम् । (ख)

चारुदत्तः—किं तया न गृहीता रत्नावली ।

विदूषकः—कुतोऽस्माकमेतावद्भागधेयम् । नवनलिनकोमलमञ्जलिं मस्तके कृत्वा प्रतीष्टा । (ग)

चारुदत्तः—तत्किं ब्रवीषि विनष्टमिति ।

विदूषकः—भोः कथं न विनष्टं यदभुक्तपीतस्य चौरैरपहृतस्याल्पमूल्यस्य सुवर्णभाण्डस्य कारणाच्चतुःसमुद्रसारभूता रत्नमाला हारिता । (घ)

चारुदत्तः—वयस्य मा मैवम् ।

यं समालम्ब्य विश्वासं न्यासोऽस्मासु तया कृतः ।
तस्यैतन्महतो मूल्यं प्रत्ययस्यैव दीयते ॥ ७ ॥

विदूषकः—भो वयस्य एतदपि मे द्वितीयं संतापकारणं यत्सखीजनदत्तसंज्ञया पटान्तापवारितं मुखं कृत्वाहमुपहसितः । तदहं ब्राह्मणो भूत्वेदानीं भवन्तं शीर्षेण पतित्वा विज्ञापयामि—निवर्त्यतामात्माऽस्माद्बहुप्रत्यवायाद्गणिकाप्रसङ्गात् । गणिका नाम पादुकान्तरप्रविष्टेव लेष्टुका दुःखेन पुनर्निराक्रियते । अपि च भो वयस्य गणिका हस्ती कायस्थो भिक्षुश्चाटो रासभश्च यत्रैते निवसन्ति तत्र दुष्टा अपि न जायन्ते । (ङ)

(क) उवविट्ठो म्हि । (ख) तं क्खु कज्जं विणट्ठम् ।

(ग) कुदो अम्हाणं एत्तिअं भाअधेअम् । णवणलिणकोमलं अञ्जलिं मत्थए कदुअ पडिच्छिआ ।

(घ) भो कधं ण विणट्ठं जं अभुत्तपीदस्स चोरेहिं अवहिदस्स अप्पमुल्लस्स सुवण्णभण्डअस्स कारणादो चदुस्समुद्दसारभूदा रअणमाला हारिदा ।

(ङ) भो वअस्स एदं पि मे दुदिअं संतावकारणं जं सहीअणदिण्णसण्णाए पडन्तोवारिदं मुहं कदुअ अहं उवहसिदो । ता अहं बम्हणो भविअ दाणिं भवन्तं

तन्मा तावत् । यद्भोजनाद्यर्थमपि न तथा भणितोऽहम् । चौरैरेवापहृतस्य । यामिति । [तृ. २९ श्लो. द्रष्टव्यः] ॥ ७ ॥ बहुप्रत्यवायात् बहवः प्रत्यवाया दोषा

१ कथं सु०. २ किं न. ३ मैवम् । पश्य. ४ मौल्यं. ५ ०विट्ठोम्हि. ६ एत्तिआ. ७ भागधेआ. ८ दुदिअसं०. ९ पडन्तावबारिदं. १० ०सिदोम्हि.

चारुदत्तः—वयस्य अलमिदानीं सर्वं परिवादमुक्त्वा । अवस्थयैवास्मि निवारितः । पश्य ।

वेगं करोति तुरगस्त्वरितं प्रयातुं
प्राणव्ययान्न चरणास्तु तथा वहन्ति ।
सर्वत्र यान्ति पुरुषस्य चलाः स्वभावाः
खिन्नास्ततो हृदयमेव पुनर्विशन्ति ॥ ८ ॥

अपि च वयस्य ।

यस्यार्थास्तस्य सा कान्ता धनहार्यो ह्यसौ जनः ।
(स्वगतम् ।) न गुणहार्यो ह्यसौ जनः । (प्रकाशम् ।)
वयमर्थैः परित्यक्ता ननु त्यक्तैव सा मया ॥ ९ ॥

विदूषकः—(अधोऽवलोक्य । स्वगतम् ।) यथैष ऊर्ध्वं प्रेक्ष्य दीर्घं निःश्वसिति तथा तर्कयामि मया विनिवार्यमाणस्याधिकतरं वृद्धाऽस्योत्कण्ठा । तत्सुष्ठु खल्वेवमुच्यते—कामो वाम इति । (प्रकाशम् ।) भो वयस्य भणितं च तया—भण चारुदत्तमद्य प्रदोषे मयाऽत्रागन्तव्यमिति । तत्तर्कयामि रत्नावल्याऽपरितुष्टाऽपरं याचितुमागमिष्यतीति । (क)

चारुदत्तः—वयस्य आगच्छतु । परितुष्टा यास्यति ।

सीसेण पडिअ विण्णवेमि—णिवत्तीअदु अप्पा इमादो बहुपच्चवाआदो गणिआपसङ्गादो । गणिआ णाम पादुअन्तरप्पविट्ठा विअ लेट्ठुआ दुक्खेण उण णिराकरीअदि । अवि अ भो वअस्स गणिआ हत्थी काअत्थओ भिक्खु चाटो रासहो अ जहिं एदे णिवसन्ति तहिं दुट्ठा वि ण जाअन्ति ।

(क) जधा एसो उद्धं पेक्खिअ दीहं णिस्ससदि तधा तक्केमि मए विणिवारिअन्तस्स अधिअदरं वड्ढिदा से उक्कण्ठा । ता सुट्ठु क्खु एव्वं वुच्चदि—कामो वामो त्ति । भो वअस्स भणिदं अ ताए—भणेहि चारुदत्तं अज्ज पओसे मए एत्थ आअन्तव्वं त्ति । ता तक्केमि रअणावलीए अपरितुट्ठा अवरं मग्गिदुं आअमिस्सदि त्ति ।

यत्र तस्मात् । चाटो क्षुद्रविषयभोक्ता । न जायन्ते वृद्धिं गच्छन्ति । **वेगमिति ।** [तुरगस्त्वरितं प्रयातुं वेगं करोति किं तु प्राणव्ययात् शक्तिक्षयात् तस्य चरणाः तथा वेगानुरूपं न वहन्ति । पुरुषस्य चलाः स्वभावा मनोवृत्तयः सर्वत्र सर्वेषु विषयेषु यान्ति । ततः खिन्नाः अलब्धकामत्वात्खेदं प्राप्ताः पुनः उत्पत्तिस्थानं हृदयमेव प्रविशन्ति । तत्रैव विलीयन्ते इत्यर्थः । वसन्ततिलकं वृत्तम्] ॥ ८ ॥ **यस्येति ।** असौ जनः गणिका वसन्तसेना ॥ ९ ॥ [कामो वाम इति । तदुक्तं रामायणे–'वामः

---

१ सर्वपरि० २ तदा.

चेटः—(प्रविश्य ।) अवेत मानवाः ।

यथा यथा वर्षत्यभ्रखण्डं तथा तथा तिम्यति पृष्ठचर्म ।
यथा यथा लगति शीतवातस्तथा तथा वेपते मे हृदयम् ॥ १० ॥

(प्रहस्य ।)

वंशं वादयामि सप्तच्छिद्रं सुशब्दं वीणां वादयामि सप्ततन्त्रीं नदन्तीम् ।
गीतं गायामि गर्दभस्यानुरूपं को मे गाने तुम्बुरुर्नारदो वा ॥ ११ ॥

आज्ञप्तोऽस्म्यार्यया वसन्तसेनया—कुम्भीलक गच्छ त्वं ममागमनमार्यचारुदत्तस्य निवेदयेति । तद्यावदार्यचारुदत्तस्य गेहं गच्छामि । (परिक्रम्य प्रविष्टकेन दृष्ट्वा ।) एष चारुदत्तो वृक्षवाटिकायां तिष्ठति । एषोऽपि स दुष्टबटुकः । तद्यावदुपसर्पामि । कथमाच्छादितं द्वारं वृक्षवाटिकायाः । भवतु । एतस्य दुष्टबटुकस्य संज्ञां ददामि । (इति लोष्टगुटिकाः[1] क्षिपति ।) (क)

विदूषकः—अये क इदानीमेष प्राकारवेष्टितमिव कपित्थं मां लोष्टकैस्ताडयति । (ख)

(क) अवेध माणहे ।
जधा जधा वश्शदि अब्भखण्डे तधा तधा तिम्मदि पुट्ठिचम्मे ।
जधा जधा लग्गदि शीदवादे तधा तधा वेवदि मे हलक्के[2] ॥
वंशं वाए शत्तच्छिद्दं शुशद्दं वीणं वाए शत्ततन्तिं णदन्तिं ।
गीअं गाए गद्दहश्शाणुलूअं के मे गाणे तुम्बुलू णालदे वा ॥
आणत्तम्हि अज्जआए वशन्तशेणाए—कुम्भीलआ गच्छ तुमं मम आगमणं अज्जचारुदत्तश्श णिवेदेहि त्ति । ता जाव अज्जचारुदत्तश्श गेहं गच्छामि । एशे चालुदत्ते रुक्खवाडिआए चिट्ठदि । एशे वि शे दुट्ठबडुके । ता जाव उवशप्पेमि । कधं ढक्किदे दुवाले रुक्खवाडिआए । भोदु । एदश्श दुट्ठबडुकश्श शण्णं देमि ।

(ख) अए को दाणिं एसो पाआरवेट्टिदं विअ कइत्थं मं लोट्टकेहिं ताडेदि[3] ।

कामो मनुष्याणां यस्मिन्किल निबध्यते । जने तस्मिन्ननुक्रोशः स्नेहश्च किल जायते ॥' इति ।] अवेत अवगच्छत मानवाः । **यथा यथेति** । उपेन्द्रवज्रया श्लोकः । अभ्रखण्डं [मेघशकलं मेघसमूहो वा ।] तिम्यति आर्द्रीभवति पृष्ठचर्म ॥ १० ॥ **वंशमिति** । उपजातिविशेषः । पादत्रयं जगतीजात्या । चतुर्थः पादः शालिन्या । सप्तच्छिद्रं सप्तरन्ध्रम् । को मे तुल्यस्तुम्बुरुर्नारदो वा ॥ ११ ॥ [तत्पातनार्थम् । आरामप्राकारेति । आरामः उपवनं तद्गतप्राकारवेष्टितं प्राचीरपरिवृतं] कपित्थं कपित्थवृक्ष-

---

१ गुटिकां. २ हडक्के. ३ सीसे ताडेदि.

चारुदत्तः—आरामप्रासादवेदिकायां क्रीडद्भिः पारावतैः पातितं भवेत् ।

विदूषकः—दास्याःपुत्र दुष्टपारावत तिष्ठ तिष्ठ यावदेतेन दण्डकाष्ठेन सुपक्वमिव चूतफलमस्मात्प्रासादाद्भूमौ पातयिष्यामि । (इति दण्डकाष्ठमुद्यम्य धावति ।) (क)

चारुदत्तः—(यज्ञोपवीतं आकृष्य ।) वयस्य उपविश । किमनेन । तिष्ठतु दयितासहितस्तपस्वी पारावतः ।

चेटः—कथं पारावतं पश्यति । मां न पश्यति । भवतु । अपरया लोष्टगुटिकया पुनरपि ताडयिष्यामि । (तथा करोति ।) (ख)

विदूषकः—(दिशोऽवलोक्य ।) कथं कुम्भीलकः । तद्यावदुपसर्पामि । (उपसृत्य । द्वारमुद्धाट्य ।) अरे कुम्भीलक प्रविश । स्वागतं ते । (ग)

चेटः—(प्रविश्य ।) आर्य वन्दे । (घ)

विदूषकः—अरे कुत्र त्वमीदृशे दुर्दिनेऽन्धकार आगतः । (ङ)

चेटः—अरे एषा सा । (च)

विदूषकः— कैषा का । (छ)

चेटः—एषा सा । (ज)

विदूषकः—किमिदानीं दास्याःपुत्र दुर्भिक्षकाले वृद्धरङ्क इवोर्ध्वकं श्वासायसे—एषा सा सेति । (झ)

(क) दासीएपुत्त दुट्ठपारावअ चिट्ठ चिट्ठ जाव एदिणा दण्डकट्ठेण सुपक्कं विअ चूअफलं इमादो पासादादो भूमीए पाडइस्सम् ।

(ख) कधं पारावदं पेक्खदि । मं ण पेक्खदि । भोदु । अवराए लोट्ठगुडिकाए पुणो वि ताडइस्सम् ।

(ग) कधं कुम्भीलओ । ता जाव उवसप्पामि । अरे कुम्भीलअ पविश । सागदं दे । (घ) अज्ज वन्दामि ।

(ङ) अरे कहिं तुमं ईदिसे दुद्दिणे अन्धआरे आअदो ।

(च) अले एशा शा । (छ) का एसा का । (ज) एशा शा ।

(झ) किं दाणिं दासीएपुत्ता दुब्भिक्खकाले वुड्ढरङ्को विअ उद्धकं सासाअसि—एसा सा सेत्ति ।

फलार्थमिव । [प्रासादस्य वेदिकायाम् । तपस्वी वराकः । वृद्धरङ्कः वृद्धभिक्षुः ।] इन्द्रमह-

---

१ ०वीतेन. २ विलोक्य. ३ आ दासीए०.

चेटः—अरे त्वमपीदानीमिन्द्रमहकामुक इव सुष्ठु किं काकायसे—का केति। (क)

विदूषकः—तत्कथय। (ख)

चेटः—(स्वगतम्।) भवतु। एवं भणिष्यामि। (प्रकाशम्।) अरे प्रश्नं ते दास्यामि। (ग)

विदूषकः—अहं ते मस्तके पादं दास्यामि। (घ)

चेटः—अरे जानीहि तावत्तेन हि कस्मिन्काले चूता मुकुलिता भवन्ति। (ङ)

विदूषकः—अरे दास्याःपुत्र ग्रीष्मे। (च)

चेटः—(सहासम्।) अरे न हि न हि। (छ)

विदूषकः—(स्वगतम्।) किमिदानीमत्र कथयिष्यामि। (विचिन्त्य।) भवतु। चारुदत्तं गत्वा प्रक्ष्यामि। (प्रकाशम्।) अरे मुहूर्तकं तिष्ठ। (चारुदत्तमुपसृत्य।) भो वयस्य प्रक्ष्यामि तावत्कस्मिन्काले चूता मुकुलिता भवन्ति। (ज)

चारुदत्तः—मूर्ख वसन्ते।

विदूषकः—(चेटमुपगम्य।) मूर्ख वसन्ते। (झ)

चेटः—द्वितीयं ते प्रश्नं दास्यामि। सुसमृद्धानां ग्रामाणां का रक्षां करोति। (ञ)

(क) अले तुमं पि दाणिं इन्दमहकामुको विअ सुट्ठु किं काकाअसि—का केत्ति। (ख) ता कहेहि।

(ग) भोदु। एव्वं भणिश्शम्। अले पण्हं दे दइश्शम्।

(घ) अहं दे मुण्डे गोडं दइस्सम्।

(ङ) अले जाणाहि दाव तेण हि कश्शिं काले चूआ मौलेन्ति।

(च) अरे दासीएपुत्ता गिम्हे। (छ) अले ण हि ण हि।

(ज) किं दाणिं एत्थ कहिस्सम्। भोदु। चारुदत्तं गदुअ पुच्छिस्सम्। अरे मुहुत्तअं चिट्ठ। भो वअस्स पुच्छिस्सं दाव कस्सिं काले चूआ मौलेन्ति।

(झ) मुक्ख वसन्ते।

(ञ) दुदिअं दे पण्हं दइश्शम्। शुशमिद्धाणं गामाणं का लक्खअं कलेदि।

कामुकः काकः। 'इन्द्रमहकाकपोदओ [०काकपोतकः] विअ' इति पाठो व्यक्तार्थ एव।

---

१ दाव इति नास्ति क्वचित्.

विदूषकः—अरे रथ्या । (क)

चेटः—(सहासम् ।) अरे न हि न हि । (ख)

विदूषकः—भवतु । संशये पतितोऽस्मि । (विचिन्त्य ।) भवतु । चारुदत्तं पुनरपि प्रक्ष्यामि । (पुनर्निवृत्य चारुदत्तं तथैवोदाहरति ।) (ग)

चारुदत्तः—वयस्य सेना ।

विदूषकः—(चेटमुपगम्य ।) अरे दास्याःपुत्र सेना । (घ)

चेटः—अरे द्वे अप्येकस्मिन्कृत्वा शीघ्रं भण । (ङ)

विदूषकः—सेनावसन्ते । (च)

चेटः—ननु परिवर्त्य भण । (छ)

विदूषकः—(कायेन परिवृत्य ।) सेनावसन्ते । (ज)

चेटः—अरे मूर्ख बटुक पदे परिवर्तय । (झ)

विदूषकः—(पादौ परिवर्त्य ।) सेनावसन्ते । (ञ)

चेटः—अरे मूर्ख अक्षरपदे परिवर्तय । (ट)

विदूषकः—(विचिन्त्य ।) वसन्तसेना । (ठ)

चेटः—एषा साऽऽगता । (ड)

विदूषकः—तद्यावच्चारुदत्तस्य निवेदयामि । (उपसृत्य ।) भो चारुदत्त धनिकस्त आगतः । (ढ)

चारुदत्तः—कुतोऽस्मत्कुले धनिकः ।

विदूषकः—यदि कुले नास्ति तद्द्वारेऽस्ति। एषा वसन्तसेनाऽऽगता। (ण)

चारुदत्तः—वयस्य किं मां प्रतारयसि ।

(क) अरे रच्छा । (ख) अले ण हि ण हि ।
(ग) भोदु । संसए पडिदोम्हि । भोदु । चारुदत्तं पुणो वि पुच्छिस्सम् ।
(घ) अरे दासीएपुत्ता सेणा ।
(ङ) अले दुवे वि एक्कस्सिं कदुअ शिग्घं भणाहि ।
(च) सेणावसन्ते । (छ) णं पलिवत्तिअ भणाहि ।
(ज) सेणावसन्ते । (झ) अले मुक्ख बडुका पदाइं पलिवत्तावेहि ।
(ञ) सेणावसन्ते । (ट) अले मुक्ख अक्खलपदाइं पलिवत्तावेहि ।
(ठ) वसन्तसेणा । (ड) एशा शा आअदा ।
(ढ) ता जाव चारुदत्तस्स णिवेदेमि । भो चारुदत्त धणिओ दे आअदो ।
(ण) जइ कुले णत्थि ता दुवारे अत्थि । एसा वसन्तसेणा आअदा ।

---

१ बटुवका (बटुवक).

विदूषकः—यदि मे वचने न प्रत्येषि तदेतं कुम्भीलकं पृच्छ। अरे दास्याःपुत्र कुम्भीलक उपसर्प। (क)

चेटः—(उपसृत्य।) आर्य वन्दे। (ख)

चारुदत्तः—भद्र स्वागतम्। कथय सत्यं प्राप्ता वसन्तसेना।

चेटः—एषा साऽऽगता वसन्तसेना। (ग)

चारुदत्तः—(सहर्षम्।) भद्र न कदाचित्प्रियवचनं निष्फलीकृतं मया। तद्गृह्यतां पारितोषिकम्। (इत्युत्तरीयं प्रयच्छति।)

चेटः—(गृहीत्वा प्रणम्य सपरितोषम्।) यावदार्याया निवेदयामि। (इति निष्क्रान्तः।) (घ)

विदूषकः—भो अपि जानासि किंनिमित्तमीदृशे दुर्दिन आगतेति। (ङ)

चारुदत्तः—वयस्य न सम्यगवधारयामि।

विदूषकः—मया ज्ञातम्। अल्पमूल्या रत्नावली बहुमूल्यं सुवर्णभाण्डमिति न परितुष्टाऽपरं याचितुमागता। (च)

चारुदत्तः—(स्वगतम्।) परितुष्टा यास्यति।

(ततः प्रविशत्युज्ज्वलाभिसारिकावेषेण वसन्तसेना सोत्कण्ठा छत्रधारिणी विटश्च।)

विटः—(वसन्तसेनामुद्दिश्य।)

अपद्मा श्रीरेषा प्रहरणमनङ्गस्य ललितं
कुलस्त्रीणां शोको मदनवरवृक्षस्य कुसुमम्।
सलीलं गच्छन्ती रतिसमयलज्जाप्रणयिनी
रतिक्षेत्रे रङ्गे प्रियपथिकसार्थैरनुगता॥ १२॥

(क) जइ मे वअणे ण पत्तिआअसि ता एदं कुम्भीलअं पुच्छ। अरे दासीए-पुत्ता कुम्भीलअ उवसप्प। (ख) अज्ज वन्दामि।
(ग) एशा शा आअदा वशन्तशेणा। (घ) जाव अज्जआए णिवेदेमि।
(ङ) भो अवि जाणाशि किंणिमित्तं ईदिसे दुद्दिणे आअदेत्ति।
(च) मए जाणिदम्। अप्पमुल्ला रअणावली बहुमुल्लं सुवण्णभण्डअं त्ति ण परितुट्ठा अवरं मग्गिदुं आअदा।

[कान्तमभिसरतीत्यभिसारिका। उज्ज्वलवेषत्वं वेश्यात्वात्। तदुक्तं—'विचित्रोज्ज्वलवेषा तु चलन्नूपुरनिःस्वना। प्रमोदस्मेरवदना स्याद्वेश्याऽभिसरेद्यदि॥' इति] **अपद्मेति।** [रतिसमये लज्जा तस्यां प्रणयिनी प्रीतिमती रतिक्षेत्रे क्रीडाभूमौ एव रङ्गे प्रियैः पथिकसार्थैरनुगता सलीलं गच्छन्ती] एषा वसन्तसेनेति संनिकर्षेण। अपद्मा पद्मरहिता

---

१ कदाचिदपि.

वसन्तसेने पश्य पश्य ।

गर्जन्ति शैलशिखरेषु विलम्बिबिम्बा
मेघा वियुक्तवनिताहृदयानुकाराः ।
येषां रवेण सहसोत्पतितैर्मयूरैः
खं वीज्यते मणिमयैरिव तालवृन्तैः ॥ १३ ॥

अपि च ।

पङ्कक्लिन्नमुखाः पिबन्ति सलिलं धाराहता दर्दुराः
कण्ठं मुञ्चति बर्हिणः समदनो नीपः प्रदीपायते ।
संन्यासः कुलदूषणैरिव जनैर्मेघैर्वृतश्चन्द्रमा
विद्युन्नीचकुलोद्गतेव युवतिर्नैकत्र संतिष्ठते ॥ १४ ॥

वसन्तसेना—भाव सुष्ठु ते भणितम् । एषा[1] हि (क)

मूढे निरन्तरपयोधरया मयैव
कान्तः सहाभिरमते यदि किं तवात्र ।
मां गर्जितैरिति[3] मुहुर्विनिवारयन्ती
मार्गं रुणद्धि कुपितेव निशासपत्नी ॥ १५ ॥

(क) भाव सुट्ठु दे भणिदम् ।

श्रीर्लक्ष्मीः । अनङ्गस्य कामस्य ललितं सुकुमारं प्रहरणम् । कुलस्त्रीणां शोकः तासां पतीनां चित्ताकर्षकत्वेन विश्लेषणादिति भावः । मदन एव वरवृक्षस्तस्य कुसुमम् । अस्तीति शेषः । मालारूपकमलंकारः । शिखरिणी वृत्तम् ॥ १२ ॥ **गर्जन्तीति** । वियुक्ताश्च ता वनिताश्च तासां हृदयानुकाराः धूसरा इत्यर्थः । शैलशिखरेषु विलम्बिबिम्बा मेघा गर्जन्ति । येषां रवेण रवं श्रुत्वा सहसा उत्पतितैः मयूरैः मणिमयैस्तालवृन्तैरिव खमाकाशं वीज्यते इत्युत्प्रेक्षा । वसन्ततिलकं वृत्तम् ॥ १३ ॥ **पङ्केति** । पङ्केन कर्दमेन क्लिन्नं मुखं येषां ते पङ्कक्लिन्नमुखा धाराहताः दर्दुरा भेकाः सलिलं पिबन्ति । समदनः बर्हिणः मयूरः कण्ठं मुञ्चति मुक्तकण्ठं रौति । नीपः कदम्बवृक्षः प्रदीपायते आरक्तकुड्मलभरेण प्रदीप इवाचरति । कुलदूषणैः जनैः संन्यास इव मेघैः चन्द्रमा वृतः । नीचकुलोत्पन्ना युवतिरिव विद्युदेकत्र न संतिष्ठते । शार्दूलविक्रीडितं छन्दः ॥ १४ ॥ ' कार्यतश्चोत्तमादीनां कार्यो भाषाव्यतिक्रमः ' इति भरतोक्त्यनुसारेण वसन्तसेनायाः संस्कृतोक्तिः ।] **मूढे इति** । मूढे इति वसन्तसेनायाः साक्षेपसंबोधनम् । [यदि निरन्तराः पयोधरा यस्यां सा तया सान्द्रमेघया । निरन्तरौ सुश्लिष्टौ पयोधरौ स्तनौ यस्यास्तया च । मयैव सह कान्तः अभिरमते तर्हि अत्र तव किम् । इति कुपिता इव गर्जितैः मुहुः मां निवारयन्ती निशासपत्नी मार्गं रुणद्धि ।

---

१ विश्राम्यति. २ (संस्कृतमाश्रित्य ।) एषा. ३ रपि.

विटः—भवतु। एवं तावत्। उपालभ्यतां तावदियम्।

वसन्तसेना—भाव किमनया स्त्रीस्वभावदुर्विदग्धयोपालब्धया। पश्यतु भावः।

मेघा वर्षन्तु गर्जन्तु मुञ्चन्त्वशनिमेव वा।
गणयन्ति न शीतोष्णं रमणाभिमुखाः स्त्रियः॥ १६॥

विटः—वसन्तसेने पश्य पश्य। अयमपरः

पवनचपलवेगः स्थूलधाराशरौघः
स्तनितपटहनादः स्पष्टविद्युत्पताकः।
हरति करसमूहं खे शशाङ्कस्य मेघो
नृप इव पुरमध्ये मन्दवीर्यस्य शत्रोः॥ १७॥

वसन्तसेना—एवं न्विदम्। तत्कथमेषोऽपरः। (क)

एतैरेव यदा गजेन्द्रमलिनैराध्मातलम्बोदरै-
र्गर्जद्भिः सतडिद्बलाकशबलैर्मेघैः सशल्यं मनः।
तत्किं प्रोषितभर्तृवध्यपटहो हा हा हताशो बकः
प्रावृट् प्रावृडिति ब्रवीति शठधीः क्षारं क्षते प्रक्षिपन्॥ १८॥

(क) एव्वं ण्णेदम्। ता कधं एसो अवरो।

वसन्ततिलकं वृत्तम्।] पयोधरो मेघः स्तनौ च॥ १५॥ **मेघा इति**। [रमणाभिमुखाः प्रियाभिगामिन्यः]॥ १६॥ अयमपर इति शत्रोः पुनर्मेध्य इत्यर्थात्। **पवनेति**। [पवनेन चपलः वेगो यस्य सः। पक्षे पवनवत् चपलो वेगो यस्य। स्थूला धारा एव शरौघा यस्य। पक्षे स्थूलधारा इव शरौघा यस्य। स्तनितं गर्जितमेव पटहनादः यस्य। पक्षे स्तनितवत्पटहनादो यस्य। स्पष्टा विद्युदेव विद्युदिव च पताका यस्य। स मेघः खे शशाङ्कस्य करसमूहं किरणजालं हरति। मन्दवीर्यस्य शत्रोः पुरमध्ये करसमूहं राजदेयद्रव्यमिव। रूपकानुप्राणिता उपमालंकारः। श्लेषश्च। मालिनीछन्दः]॥ १७॥ **एतैरिति**। [यदा गजेन्द्रवन्मलिनैः श्यामैः। आध्मातानि अत एव लम्बानि उदराणि येषां तैः। आध्माताः शब्दायमानाश्च ते लम्बोदराः स्वरूपविस्तारवन्तश्चेति कर्मधारयः—इति ल०दी०। गर्जद्भिः सतडिद्बलाकैः शबलैः मेघैः मनः सशल्यं सवेदनमित्यर्थः। तत्तदा प्रोषितभर्तृणां विरहिणीनामित्यर्थः। वध्यपटहः विपत्तिसूचकः पटहः।] प्रोषितभर्तृशब्दात् 'न नित्यः समासान्तः' इति न 'नद्यृतश्च' इति कप्। [हताशः शठधीः वञ्चकः बकः क्षते क्षारं सिञ्चन् इव हा हा प्रावृट् प्रावृट्

१ दग्धोपा०. २ च. ३ दयिताभि०. ४ स्वनित. ५ तडित्पताक. ६ बद्ध. ७ अवरो (संस्कृतमाश्रित्य।).

विटः—वसन्तसेने एवमेतत्। इदमपरं पश्य।

बलाकापाण्डुरोष्णीषं विद्युदुत्क्षिप्तचामरम्।
मत्तवारणसारूप्यं कर्तुकाममिवाम्बरम्॥ १९॥

वसन्तसेना——भाव पश्य पश्य। (क)

एतैरार्द्रतमालपत्रमलिनैरापीतसूर्यं नभो
वल्मीकाः शरताडिता इव गजाः सीदन्ति धाराहताः।
विद्युत्काञ्चनदीपिकेव रचिता प्रासादसंचारिणी
ज्योत्स्ना दुर्बलभर्तृकेव वनिता प्रोत्सार्य मेघैर्हृता॥ २०॥

विटः—वसन्तसेने पश्य पश्य।

एते हि विद्युद्गुणबद्धकक्षा गजा इवान्योन्यमभिद्रवन्तः।
शक्राज्ञया वारिधराः सधारा गां रूप्यरज्ज्वेव समुद्धरन्ति २१

अपि च पश्य।

महावाताध्मातैर्महिषकुलनीलैर्जलधरै-
श्चलैर्विद्युत्पक्षैर्जलधिभिरिवान्तःप्रचलितैः।
इयं गन्धोद्दामा नवहरितशष्पाङ्कुरवती
धरा धारापातैर्मणिमयशरैर्भिद्यत इव॥ २२॥

वसन्तसेना—भाव एषोऽपरः। (ख)

(क) भाव पेक्ख पेक्खँ। (ख) भाव एसो अवरो।

इति ब्रवीति। शार्दूल० छन्दः॥१८॥ **बलाकेति**। बलाका बकपङ्क्तिरेव पाण्डुरोष्णीषो यस्य। पक्षे बलाकावत्पाण्डुर उ०। विद्युदेव पक्षे विद्युदिव उत्क्षिप्तं चामरं यस्य। तादृगम्बरं मत्तवारणसारूप्यं कर्तुकाममिव भातीति शेषः। रूपकानुप्राणितोत्प्रेक्षालंकारः॥ १९॥ **एतैरिति**। एतैः आर्द्राणि यानि तमालपत्राणि तद्वन्मलिनैः नीलैः मेघैः नभः आपीतः निगीर्णः पिहितः इत्यर्थः। सूर्यः यस्मिन् तथा भूतम्। मेघैः धाराहताः वल्मीकाः शरताडिता गजा इव सीदन्ति। विद्युत् प्रासादसंचारिणी काञ्चनदीपिकेव रचिता। दुर्बलभर्तृका वनिता इव ज्योत्स्ना प्रोत्सार्य हृता। शार्दूल० वृत्तम्॥ २०॥ **एत इति**। एते विद्युद्गुणेन विद्युल्लतया पक्षे विद्युदिव गुणः रज्जुस्तेन बद्धा कक्षा मध्यभागः मध्यबन्धनं वा येषां ते विद्युद्गुणबद्धकक्षाः। अन्योन्यमभिद्रवन्तः गजा इव सधारा वारिधरा शक्राज्ञया गां महीं रूप्यरज्ज्वा समुद्धरन्ति इव। उपमोत्प्रेक्षयोः संसृष्टिः। उपजातिच्छन्दः॥२१॥ **महावातेति**। महावातैः आध्माताः शब्दिताः। 'आध्मातः शब्दिते दग्धे' इति मेदिनी। तैः। महिषकुलवन्नीलैः चलैः। विद्युत एव पक्षा येषां तैः। अन्तः गगनमध्ये प्रचलितैः जलधिभिः इव स्थितैः जलधरैः कर्तृभिः। गन्धेन नववर्षजलसेकजनितमृद्गन्धेन उद्दामा गन्धेन मदेनोद्दामा च नवानां हरितानां शष्पाणामङ्कुरास्तद्वती इयं धरा धारापातैः मणिमयशरैः भिद्यते इव इत्युत्प्रेक्षा। शिखरिणीछन्दः।] शष्पा-

---

१ हता. २ अतिद्र०. ३ सरागा. ४ रूप. ५ वातोद्ध्मा. ६ शस्या. ७ पेक्ख (संस्कृतमाश्रित्य।).

एह्येहीति शिखण्डिनां पटुतरं केकाभिराक्रन्दितः
प्रोड्डीयेव बलाकया सरभसं सोत्कण्ठमालिङ्गितः।
हंसैरुज्झितपङ्कजैरतितरां सोद्वेगमुद्वीक्षितः
कुर्वन्नञ्जनमेचका इव दिशो मेघः समुत्तिष्ठति ॥ २३ ॥

विटः—एवमेतत्। तथा हि पश्य।

निष्पन्दीकृतपद्मषण्डनयनं नष्टक्षपावासरं
विद्युद्भिः क्षणनष्टदृष्टतिमिरं प्रच्छादिताशामुखम्।
निश्चेष्टं स्वपितीव संप्रति पयोधारागृहान्तर्गतं
स्फीताम्भोधरधामनैकजलदच्छत्रापिधानं जगत् ॥ २४ ॥

वसन्तसेना—भाव एवं न्विदम्। तत्पश्य पश्य। (क)

गता नाशं तारा उपकृतमसाधाविव जने
वियुक्ताः कान्तेन स्त्रिय इव न राजन्ति ककुभः।
प्रकामान्तस्तप्तं त्रिदशपतिशस्त्रस्य शिखिना
द्रवीभूतं मन्ये पतति जलरूपेण गगनम् ॥ २५ ॥

अपि च पश्य।

उन्नमति नमति वर्षति गर्जति मेघः करोति तिमिरौघम्।
प्रथमश्रीरिव पुरुषः करोति रूपाण्यनेकानि ॥ २६ ॥

(क) भाव एव्वं ण्णेदम्। ता पेक्ख पेक्खं।

ङ्कुराः संलग्नशरतुल्याः ॥ २२ ॥ **एह्येहीति**। [शिखण्डिनां केकाभिः पटुतरं यथा तथा एहि एहि इति आक्रन्दित आहूतः। बलाकया बलाकमालया सरभसं प्रोड्डीय सोत्कण्ठमालिङ्गित इव स्थितः। हंसैः उज्झितपङ्कजैः त्यक्तकमलैः अतितरां सोद्वेगमुद्वीक्षितः। एष अपरः मेघः दिशः अञ्जनवन्मेचकाः श्यामाः कुर्वन् समुत्तिष्ठति। समुत्तिष्ठते इति पाठे 'उदोऽनूर्ध्वकर्मणि' इत्यात्मनेपदं चिन्त्यम्। उत्प्रेक्षालंकारः। शार्दूल० वृत्तम् ॥ २३ ॥ **निष्पन्दीति**। संप्रति निष्पन्दीकृतानि पद्मषण्डान्येव नयनानि यस्य तत्। नष्टा क्षपा वासरश्च यस्मिंस्तत्। विद्युद्भिः क्षणं नष्टं पश्चाद्दृष्टं तिमिरं यस्मिंस्तत्। प्रच्छादितानि पिहितानि आशा दिश एव मुखानि यस्य तत्। पयोधारा एव गृहं तस्यान्तर्गतं स्फीते अम्भोधराणां धामनि निवासे गगने नैके अनेके जलधरा एव छत्रं तदेव अपिधानं यस्य तत्। जगत् निश्चेष्टं स्वपिति इव। उत्प्रेक्षालंकारः। शार्दूल० छन्दः ॥ २४ ॥ **गता इति**। असाधौ जने उपकृतमिव तारा अदर्शनं गताः। कान्तेन वियुक्ताः स्त्रिय इव दिशः चन्द्रेण वियुक्ता न राजन्ति। त्रिदशपतिरिन्द्रस्तस्य शस्त्रस्य वज्रस्य शिखिना अग्निना प्रकाममन्तस्तप्तमत एव द्रवीभूतं गगनं जलरूपेण पतति इति मन्ये इत्युत्प्रेक्षा। पूर्वार्धे उपमालंकारः। शिखरिणी वृत्तम् ॥ २५ ॥ **उन्नमतीति**। प्रथमा प्रथमं प्राप्ता श्रीः येन स पुरुष इव

---

१ प्रोत्थायेव. २ सोद्गाढं. ३ ०त्तिष्ठते, समुज्जृम्भते. ४ पश्य पश्य. ५ खण्ड. ६ दृष्टनष्ट. ७ पेक्ख (संस्कृतमाश्रित्य।).

विटः—एवमेतत् ।

विद्युद्भिर्ज्वलतीव संविहसतीवोच्चैर्बलाकाशतै-
र्माहेन्द्रेण विवल्गतीव धनुषा धाराशरोद्गारिणा ।
विस्पष्टाशनिनिःस्वनेन रसतीवाघूर्णतीवानिलै-
र्नीलैः सान्द्रमिवाहिभिर्जलधरैर्धूपायतीवाम्बरम् ॥ २७ ॥

वसन्तसेना—

जलधर निर्लज्जस्त्वं यन्मां दयितस्य वेश्म गच्छन्तीम् ।
स्तनितेन भीषयित्वा धाराहस्तैः परामृशसि ॥ २८ ॥

भोः शक्र ।

किं ते ह्यहं पूर्वरतिप्रसक्ता यत्त्वं नदस्यम्बुदसिंहनादैः ।
न युक्तमेतत्प्रियकाङ्क्षिताया मार्गं निरोद्धुं मम वर्षपातैः ॥ २९ ॥

अपि च ।

यद्वदहल्याहेतोर्मृषा वदसि शक्र गौतमोऽस्मीति ।
तद्वन्ममापि दुःखं निरपेक्ष निवार्यतां जलदः ॥ ३० ॥

मेघः अनेकानि रूपाणि करोति आकारान्प्रकटयति । तदेव प्रतिपादयति उन्नमतीत्यादिना । कारकदीपकोपमयोः संसृष्टिः । आर्या छन्दः ॥ २६ ॥ **विद्युद्भिरिति** । अम्बरं विद्युद्भिर्ज्वलति इव । हासस्य कविसमयसिद्धश्वेतत्वादाह—बलाकाशतैः उच्चैः विहसति इव । धारा एव शरास्तानुद्गिरति इति धाराशरोद्गारि तेन माहेन्द्रेण धनुषा विवल्गति प्रस्फुरति इव । विस्पष्टः स्फुटं प्रतीयमानः यः अशनिनिःस्वनः तेन रसति उच्चैर्विक्रोशति इव । अनिलैः आघूर्णति भ्रमति इव । जलधरैः हेतुभिः नीलैः अहिभिः कृष्णसर्पैः सान्द्रं धूपायति धूपवदाचरति धूमितं भवति इति । धूमायति इति पाठे धूमवद्भवतीत्यर्थः । मालोत्प्रेक्षा । शार्दूल० छन्दः ॥ २७ ॥ **जलधरेति** । हे जलधर त्वं निर्लज्जः । यत् यतः दयितस्य वेश्म गच्छन्तीं मां स्तनितेन गर्जितेन भीषयित्वा धारा एव हस्तास्तैः परामृशसि स्पृशसि ॥ २८ ॥ **किमिति** । किमहं ते पूर्वं रत्या संभोगेन प्रसक्ता संबद्धा आसमिति शेषः । यद् यस्मात्त्वं अम्बुदानां सिंहनादैः नदसि । प्रियेण चारुदत्तेन काङ्क्षितायाः प्रियकाङ्क्षितायाः । यद्वा काङ्क्षितः प्रियो यया सा प्रियकाङ्क्षिता । परनिपातः । तस्याः मम एतद् मार्गं निरोद्धुं निरोधनं न युक्तम् ॥२९॥] **यद्वदिति** । हे शक्र [यद्वद अहल्याहेतोः अहल्याप्राप्त्यर्थं] यथा अहल्याया अप्राप्तिदुःखेन गौतमोऽस्मीत्यसत्यं ब्रूषे । हे निरपेक्ष परपीडानभिज्ञ तद्वन्ममापि दुःखं जानीहीत्यर्थात् । ततः किं कर्तुमुचितमित्याह—[जलदः] निवार्यतां [निषिध्यताम्] । प्रियभवनगमनं प्रति विरोधकत्वादित्याशयः ॥ ३० ॥

---

१ शतो०. २ धूमाय०. ३ निरवेक्ष्य.

अपि च ।

गर्ज वा वर्ष वा शक्र मुञ्च वा शतशोऽशनिम् ।
न शक्या हि स्त्रियो रोद्धुं प्रस्थिता दयितं प्रति ॥ ३१ ॥
यदि गर्जति वारिधरो गर्जतु तन्नाम निष्ठुराः पुरुषाः ।
अयि[1] विद्युत्प्रमदानां त्वमपि च दुःखं न जानासि ॥ ३२ ॥

विटः—भवति अलमलमुपालम्भेन । उपकारिणी तवेयम् ।

ऐरावतोरसि चलेव सुवर्णरज्जुः
शैलस्य मूर्ध्नि निहितेव सिता पताका ।
आखण्डलस्य भवनोदरदीपिकेय-[2]
माख्याति ते प्रियतमस्य हि संनिवेशम् ॥ ३३ ॥

वसन्तसेना—भाव एवम् । तदेवैतद्गेहम् । (क)

विटः—सकलकलाभिज्ञाया न किंचिदिह तवोपदेष्टव्यमस्ति[3] । तथाऽपि स्नेहः प्रलापयति । अत्र प्रविश्य कोपोऽत्यन्तं न कर्तव्यः ।

यदि कुप्यसि नास्ति रतिः कोपेन विनाऽथ वा कुतः कामः ।
कुप्य च कोपय च त्वं प्रसीद च त्वं प्रसादय च कान्तम् ॥ ३४ ॥

भवतु । एवं तावत् । भो भोः निवेद्यतामार्यचारुदत्ताय ।

एषा फुल्लकदम्बनीपसुरभौ काले घनोद्भासिते
कान्तस्यालयमागता समदना हृष्टा जलार्द्रालका ।
विद्युद्वारिदगर्जितैः सचकिता त्वद्दर्शनाकाङ्क्षिणी
पादौ नूपुरलग्नकर्दमधरौ[4] प्रक्षालयन्ती स्थिता ॥ ३५ ॥

(क) भाव एव्वं । तं ज्जेव एदं गेहम् ।

गर्जेति । [हे शक्र गर्ज वा इ० । दयितं प्रति प्रस्थिताः । स्त्रियो रोद्धुं न शक्या हि ॥ ३१ ॥ **यदीति** । यदि वारिधरो मेघः गर्जति तत् गर्जतु नाम । यतः पुरुषा निष्ठुराः । अयि विद्युत् त्वमपि । प्रमदा सत्यपीत्यर्थः । प्रमदानां दुःखं न जानासि येन दृष्टिग्रहणमोक्षाभ्यां गमनविघ्नं करोषि ॥ ३२ ॥ **ऐरावतोरसीति** । हि यस्मात् ऐरावतोरसि चला सुवर्णरज्जुः इव । शैलस्य मूर्ध्नि निहिता सिता धवला पताका इव । आखण्डलस्य इन्द्रस्य भवनोदरदीपिका इव । इयं विद्युत् ते प्रियतमस्य उपस्थितं संनिवेशं आख्याति प्रकाशेन दर्शयति । वसन्ततिलकं वृत्तम् ॥ ३३ ॥ **यदीति** । यदि कुप्यसि कुपितैव तिष्ठसीत्यर्थः । तर्हि रतिः रतिसुखमित्यर्थः । नास्ति । अथ वा कोपेन विना कामः कुतः । ईर्ष्याकृतकोपेन विना शृङ्गाररसोत्थं सुखं नास्तीत्यर्थः । अतः त्वं कुप्य कान्तं च कोपयेत्या० । आर्या ॥ ३४ ॥ **एषेति** । फुल्लैः कदम्बैः नीपैः च सुरभौ सुगन्धौ मनोज्ञे वा घनैः उद्भासिते शोभिते काले समदना सकामा हृष्टा । जलेन आर्द्रा अलकाः केशा यस्याः सा । विद्युद्भिः वारिदगर्जितैः च सचकिता भीता त्वद्दर्शनाकाङ्क्षिणी । कान्तस्य आलयमागता वसन्तसेना नूपुरलग्नकर्दमधरौ पादौ प्रक्षालयन्ती स्थिता इति निवेद्यतामिति संबन्धः । शार्दूल० छन्दः] ॥ ३५ ॥

१ अपि. २ भुवनो. ३ तवादे०. ४ भरौ.

चारुदत्तः—(आकर्ण्य।) वयस्य ज्ञायतां किमेतदिति।

विदूषकः—यद्भवानाज्ञापयति। (वसन्तसेनामुपगम्य। सादरम्।) स्वस्ति भवत्यै। (क)

वसन्तसेना—आर्य वन्दे। स्वागतमार्यस्य। (विटं प्रति।) भाव एषा छत्रधारिका भावस्यैव भवतु। (ख)

विटः—(स्वगतम्।) अनेनोपायेन निपुणं प्रेषितोऽस्मि। (प्रकाशम्।) एवं भवतु। भवति वसन्तसेने।

साटोपकूटकपटानृतजन्मभूमेः
शाठ्यात्मकस्य रतिकेलिकृतालयस्य।
वेश्यापणस्य सुरतोत्सवसंग्रहस्य
दाक्षिण्यपण्यसुखनिष्क्रयसिद्धिरस्तु॥ ३६॥

(इति निष्क्रान्तो विटः।)

वसन्तसेना—आर्य मैत्रेय कुत्र युष्माकं द्यूतकरः। (ग)

विदूषकः—(स्वगतम्।) आश्चर्यं भोः द्यूतकर इति भणन्त्याऽलंकृतः प्रियवयस्यः। (प्रकाशम्।) भवति एष खलु शुष्कवृक्षवाटिकायाम्। (घ)

वसन्तसेना—आर्य का युष्माकं शुष्कवृक्षवाटिकोच्यते। (ङ)

विदूषकः—भवति यत्र न खाद्यते न पीयते। (च)

(क) जं भवं आणवेदि। सोत्थि भोदीए।

(ख) अज्ज वन्दामि। साअदं अज्जस्स। भाव एसा छत्तधारिआ भावस्स ज्जेव भोदु। (ग) अज्ज मित्तेअ कहिं तुम्हाणं जूदिअरो।

(घ) ही ही भो जूदिअरो त्ति भणन्तीए अलंकिदो पिअवअस्सो। भोदि एसो क्खु सुक्खरुक्खवाडिआए।

(ङ) अज्ज का तुम्हाणं सुक्खरुक्खवाडिआ वुच्चदि।

(च) भोदि जहिं ण खाईअदि ण पीईअदि।

साटोपेति। आटोपो दम्भः [तेन सहितं साटोपं] कूटं माया कपटं छद्म अनृतं मृषाभाषणम्। निह्नवप्राकट्यभेदात्कूटकपटयोर्भेदः। एतेषां जन्मभूमेः। [शाठ्यं धौर्त्यं आत्मा यस्य तस्य। रतिकेलिभिः शृङ्गारक्रीडाभिः कृतालयस्य कृताश्रयस्य। सुरतमेव उत्सवस्तस्य संग्रहः यत्र तस्य] वेश्यापणो वेश्याव्यवहारः [तस्य]। व्यञ्जकस्येत्यर्थः। [दाक्षिण्येन यत्पण्यसुखं तस्य निष्क्रयासिद्धिः अस्तु। वसन्त० वृत्तम्।] दाक्षिण्यपण्यप्रधानं निष्क्रयो मूल्यम् ३६

---

१ जनस्य. २ पुण्य, पण्यमुख.

(वसन्तसेना स्मितं करोति ।)

विदूषकः—तस्मात्प्रविशतु भवती । (क)

वसन्तसेना—(जनान्तिकम् ।) अत्र प्रविश्य किं मया भणितव्यम् । (ख)

चेटी—द्यूतकर अपि सुखस्ते प्रदोष इति । (ग)

वसन्तसेना—अपि पारयिष्यामि । (घ)

चेटी—अवसर एव पारयिष्यति । (ङ)

विदूषकः—प्रविशतु भवती । (च)

वसन्तसेना—(प्रविश्योपसृत्य च । पुष्पैस्ताडयन्ती ।) अयि द्यूतकर अपि सुखस्ते प्रदोषः । (छ)

चारुदत्तः—(अवलोक्य ।) अये वसन्तसेना प्राप्ता । (सहर्षमुत्थाय ।) अयि प्रिये ।

> **सदा प्रदोषो मम याति जाग्रतः**
> **सदा च मे निःश्वसतो गता निशा ।**
> **त्वया समेतस्य विशाललोचने**
> **ममाद्य शोकान्तकरः प्रदोषकः ॥ ३७ ॥**

तत्स्वागतं भवत्यै । इदमासनम् । अत्रोपविश्यताम् ।

विदूषकः—इदमासनम् । उपविशतु भवती । (ज)

(वसन्तसेनाऽऽसीना[१] । ततः सर्व[२] उपविशन्ति ।)

(क) ता पविसदु भोदी । (ख) एत्थ पविसिअ किं मए भणिदव्वम् । (ग) जूदिअर अवि सुहो दे पदोसो त्ति । (घ) अवि पारइस्सम् । (ङ) अवसरो जेव पारइस्सदि । (च) पविसदु भोदी । (छ) अइ जूदिअर अवि सुहो दे पदोसो । (ज) इदं आसणम् । उवविसदु भोदी ।

सदेति । [सदा मम जाग्रतः प्रदोषः निशामुखं याति । निःश्वसतः त्वद्विरहवेदनातुरत्वादिति भावः । निशा गता । जातावेकवचनम् । प्रदोषा निशाश्च व्यतीताः । हे विशाललोचने अद्य त्वया समेतस्य मम प्रदोषकः शोकान्तकरः शोकस्य नाशकरः । अद्य रात्रिः सुखेन यास्यतीति भावः । वंशस्थं वृत्तम् ॥ ३७ ॥]

---

१ नाट्येनासीना. २ सर्वे उप०.

चारुदत्तः—वयस्य पश्य पश्य।

वर्षोदकमुद्गिरता श्रवणान्तविलम्बिना कदम्बेन।
एकः स्तनोऽभिषिक्तो नृपसुत इव यौवराज्यस्थः॥ ३८॥

तद्वयस्य क्लिन्ने वाससी वसन्तसेनायाः। अन्ये प्रधानवाससी समु[१]पनीयेतामिति।

विदूषकः—यद्भवानाज्ञापयति। (क)

चेटी—आर्य मैत्रेय तिष्ठ त्वम्। अहमेवार्यां शुश्रूषयिष्यामि। (तथा करोति।) (ख)

विदूषकः—(अपवारितकेन।) भो वयस्य पृच्छामि तावत्तत्रभवतीं किमपि। (ग)

चारुदत्तः—एवं क्रियताम्।

विदूषकः— (प्रकाशम्।) अथ किंनिमित्तं पुनरीदृशे प्रनष्टचन्द्रालोके दुर्दिनान्धकार आगता भवती। (घ)

चेटी—आर्ये ऋजुको ब्राह्मणः। (ङ)

वसन्तसेना—ननु निपुण इति भण। (च)

चेटी—एषा खल्वार्यैवं प्रष्टुमागता—कियत्तस्या रत्नावल्या मूल्यमिति। (छ)

विदूषकः—(जनान्तिकम्।) भोः भणितं मया यथाऽल्पमूल्या रत्नावली बहुमूल्यं सुवर्णभाण्डम्। न परितुष्टाऽपरं याचितुमागता। (ज)

(क) जं भवं आणवेदि।
(ख) अज्ज मित्तेअ चिट्ठ तुमम्। अहं ज्जेव अज्जअं सुस्सूसइस्सम्।
(ग) भो वअस्स पुच्छामि दाव तत्थभोदिं किं पि।
(घ) अध किंणिमित्तं उण ईदिसे पणट्ठचन्दालोए दुद्दि[२]णअन्धआरे आअदा भोदी। (ङ) अज्जए उँ[३]जुओ बम्हणो। (च) णं णिउणोत्ति भणाहि।
(छ) एसा क्खु अज्जआ एव्वं पुच्छिदुं आअदा—केत्तिअं ताए रअणावलीए मुल्लं त्ति। (ज) भो भणिदं मए जधा अप्पमुल्ला रअणावली वहुमुल्लं सुवण्णभण्डअम्। ण परितुट्ठा अवरं मग्गिदुं आअदा।

वर्षोदकमिति। [वर्षोदकमुद्गिरता क्षरता श्रवणान्ते कर्णान्ते विलम्बते असौ तेन कदम्बेन कदम्बपुष्पेण यौवराज्यस्थः नृपसुत इव एकः स्तनः अभिषिक्तः। उपमा। आर्या वृत्तम्]॥ ३८॥ प्रधानवाससी उत्कृष्टवस्त्रे। प्रनष्टः चन्द्रालोको यस्मिन्। ऋजुकः

---

१ समुपा०. २ दुद्दिणे. ३ उज्जओ (उज्ज्वलः); उज्जुओ (ऋजुकः).

चेटी—सा खल्वार्ययाऽऽत्मीयेति भणित्वा द्यूते हारिता। स च सभिको राजवार्ताहारी न ज्ञायते कुत्र गत इति। (क)

विदूषकः—भवति मन्त्रितमेव मन्त्र्यते। (ख)

चेटी—यावत्सोऽन्विष्यते तावदिदमेव गृहाण सुवर्णभाण्डम्। (इति दर्शयति।) (ग)

(विदूषको विचारयति।)

चेटी—अतिमात्रमार्यो निध्यायति। तत्किं दृष्टपूर्वं ते। (घ)

विदूषकः—भवति शिल्पकुशलतयाऽवबध्नाति दृष्टिम्। (ङ)

चेटी—आर्य वञ्चितोऽसि दृष्ट्या। तदेवेदं सुवर्णभाण्डम्। (च)

विदूषकः—(सहर्षम्[1]।) भो वयस्य तदेवेदं सुवर्णभाण्डं यदस्माकं गृहे चौरैरपहृतम्। (छ)

चारुदत्तः—वयस्य।

योऽस्माभिश्चिन्तितो व्याजः कर्तुं न्यासप्रतिक्रियाम्।
स एव प्रस्तुतोऽस्माकं किं तु सत्यं[2] विडम्बना॥ ३९॥

विदूषकः—भो वयस्य सत्यं शपे ब्राह्मण्येन। (ज)

चारुदत्तः—प्रियं नः प्रियम्[3]।

(क) सा क्खु अज्जआए अत्तणकेरकेत्ति भणिअ जूदे हारिदा। सो अ सहिओ राअवत्थहारी[4] ण जाणीअदि कहिं गदो त्ति।

(ख) भोदि मन्तिदं ज्जेव मन्तीअदि।

(ग) जाव सो अण्णेसीअदि ताव एदं ज्जेव गेण्ह सुवण्णभण्डअम्।

(घ) अदिमेत्तं अज्जो णिज्झाअदि। ता किं दिट्ठपुरुव्वं दे।

(ङ) भोदि सिप्पकुसलदाए ओबन्धेदि दिट्ठिम्।

(च) अज्ज वञ्चिदोसि दिट्ठीए। तं ज्जेव एदं सुवण्णभण्डअम्।

(छ) भो वअस्स तं ज्जेव एदं सुवण्णभण्डअं जं अम्हाणं गेहे चोरेहिं अवहदम्।

(ज) भो वअस्स सच्चं सवामि बम्हणेण।

सरलः अनागरिक इत्यर्थः। [अन्विष्यते सभिकः।] निध्यायति निरूपयति। **य इति**। [न्यासस्य न्यासीकृतभाण्डस्य प्रतिक्रियां प्रत्यर्पणं कर्तुं अस्माभिः यो व्याजः अपदेशः चिन्तितः स एव व्याजः अस्माकं प्रस्तुतः। किं तु सत्यं अथ वा विडम्बना] स एव व्याजो विडम्बनाऽस्माकं प्रस्तुत आरब्धः॥३९॥ अथ वा सत्य-

१ सहर्षं जनान्तिकम्. २ सत्त्वं. ३ प्रियं नः. ४ राआवत्थआरी (राजापथ्यकारी); राआवच्छहारी (राजावश्यकारी).

विदूषकः—(जनान्तिकम् ।) भोः पृच्छामि ननु कुत इदं समासादितामिति । (क)

चारुदत्तः—को दोषः ।

विदूषकः—(चेट्याः कर्णे ।) एवमिव । (ख)

चेटी—(विदूषकस्य कर्णे ।) एवमिव । (ग)

चारुदत्तः—किमिदं कथ्यते । किं वयं बाह्याः ।

विदूषकः—(चारुदत्तस्य कर्णे ।) एवमिव । (घ)

चारुदत्तः—भद्रे सत्यं तदेवेदं सुवर्णभाण्डम् ।

चेटी—आर्य अथ किम् । (ङ)

चारुदत्तः—भद्रे न कदाचित्प्रियनिवेदनं निष्फलीकृतं मया । तद्गृह्यतां पारितोषिकमिदमङ्गुलीयकम् । (इत्यनङ्गुलीयकं हस्तमवलोक्य लज्जां नाटयति ।)

वसन्तसेना—(आत्मगतम् ।) अत एव काम्यसे । (च)

चारुदत्तः—(जनान्तिकम् ।) भोः कष्टम् ।

धनैर्वियुक्तस्य नरस्य लोके किं जीवितेनादित एव तावत् ।
यस्य प्रतीकारनिरर्थकत्वात्कोपप्रसादा विफलीभवन्ति ॥४०॥

अपि च ।

पक्षविकलश्च पक्षी शुष्कश्च तरुः सरश्च जलहीनम् ।
सर्पश्चोद्धृतदंष्ट्रस्तुल्यं लोके दरिद्रश्च ॥ ४१ ॥

अपि च ।

शून्यैर्गृहैः खलु समाः पुरुषा दरिद्राः
कूपैश्च तोयरहितैस्तरुभिश्च शीर्णैः ।

(क) भो पुच्छामि णं कुदो एदं समासादिदं त्ति । (ख) एव्वं विअ ।
(ग) एव्वं विअ । (घ) एव्वं विअ ।
(ङ) अज्ज अध इं । (च) अदो ज्जेव कामीअसि ।

मेवेदम् । अथ वेति प्रकरणात्प्रतीयते । [**धनैरिति** । धनैः वियुक्तस्य नरस्य लोके जीवितेन किम् । आदित एव तावत् यस्य प्रतीकारे निरर्थकत्वात् कोपप्रसादा विफलीभवन्ति कोपे प्रतिकर्तुं प्रसादे चोपकर्तुमसमर्थतया तयोर्वैयर्थ्यमित्यर्थः । इति ल० दी०] ॥ ४० ॥ **पक्षेति** । [पक्षाभ्यां विकलः पक्षविकलः गतपक्षः पक्षी । उद्धृता दंष्ट्रा यस्य स उद्धृतदंष्ट्रः सर्पश्च एतत्सर्वं लोके तुल्यम् ॥ ४१ ॥] **शून्यैरिति** । [दरिद्राः पुरुषाः शून्यैः गृहैः तोयरहितैः कूपैः शीर्णैः तरुभिश्च समाः खलु ।] यद् यतो यस्मा-

१ कदाऽपि. २ जीवितेरा०. ३ विफला भ०. ४ तुल्यः. ५ च वयस्य.

यद्दृष्टपूर्वजनसंगमविस्मृताना-
मेवं भवन्ति विफलाः परितोषकालाः ॥ ४२ ॥

विदूषकः—भोः अलमतिमात्रं संतापितेन । (प्रकाशं सपरिहासम् ।) भवति समर्प्यतां मम स्नानशाटिका । (क)

वसन्तसेना—आर्य चारुदत्त युक्तं न्विदमनया रत्नावल्येमं जनं तुलयितुम् । (ख)

चारुदत्तः—(सविलक्षस्मितम् ।) वसन्तसेने पश्य पश्य ।

कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति ।
शङ्कनीया हि लोकेऽस्मिन्निष्प्रतापा दरिद्रता ॥ ४३ ॥

विदूषकः—चेटि किं भवत्यैहैव स्वप्तव्यम् । (ग)

चेटी—(विहस्य ।) आर्य मैत्रेय अतिमात्रमिदानीमृजुमात्मानं दर्शयसि । (घ)

विदूषकः—भो वयस्य एष खल्वपसारयन्निव सुखोपविष्टं जनं पुनरपि विस्तारिवारिधाराभिः प्रवृष्टः पर्जन्यः । (ङ)

चारुदत्तः—सम्यगाह भवान् ।

अमूर्हि भित्त्वा जलदान्तराणि पङ्कान्तराणीव मृणालसूच्यः ।
पतन्ति चन्द्रव्यसनाद्विमुक्ता दिवोऽश्रुधारा इव वारिधाराः ॥४४॥

(क) भो अलं आदिमेत्तं संतप्पिदेण । भोदि समप्पीअदु ममकेरिआ ण्हाणसाडिआ ।

(ख) अज्ज चारुदत्त जुत्तं ण्णेदं इमाए रअणावलीए इमं जणं तुलइदुम् ।

(ग) हञ्जे किं भोदिए इध ज्जेव सुविदव्वम् ।

(घ) अज्ज मित्तेअ अदिमेत्तं दाणिं उजुअं अत्ताणअं दंसेसि ।

(ङ) भो वअस्स एसो क्खु ओसारअन्तो विअ सुहोवविट्ठं जणं पुणोवि वित्थारिवारिधाराहिं पविट्ठो पज्जण्णो ।

दृष्टपूर्वस्य जनस्य संगमेनोत्तरलतया वर्तमानस्वदैन्यविस्मृतानां विस्मरणवतां पुंसां [परितोषकालाः एवं विफला भवन्ति । वसन्त० वृत्तम्] ॥४२॥ मत्संबन्धिनी स्नानशाटिका । तुलयितुं लुब्धालुब्धजिज्ञासया बहुमूल्यायाा रत्नावल्या अल्पमूल्यसुवर्णभाण्डस्य कृते [प्रत्यर्पणेन परीक्षितुं इदं युक्तं न । नाहमर्थलुब्धेति भावः ।] **क इति** । [व्याख्यातपूर्वोऽयं ३अ० २४श्लो०]॥४३॥**अमूरिति**। [हि अमूः वारिधारा मृणालसूच्यः बिसाग्राणि पङ्कान्तराणि इव जलदान्तराणि भित्त्वा चन्द्रस्य प्रियस्य व्यसनाद् आवरणरूपसंकटात् विमुक्ता दिवो

---

१ विस्मितानां. २ तुल०. ३ भिन्ना. ४ वियुक्ता. ५ संकयिदेण.

अपि च।

धाराभिरार्यजनचित्तसुनिर्मलाभि-
श्चण्डाभिरर्जुनशरप्रतिकर्कशाभिः।
मेघाः स्रवन्ति बलदेवपटप्रकाशाः
शक्रस्य मौक्तिकनिधानमिवोद्गिरन्तः ॥ ४५ ॥

प्रिये पश्य पश्य।

एतैः पिष्टतमालवर्णकनिभैरालिप्तमम्भोधरैः
संसक्तैरुपवीजितं सुरभिभिः शीतैः प्रदोषानिलैः।
एषाऽम्भोदसमागमप्रणयिनी स्वच्छन्दमभ्यागता
रक्ता कान्तमिवाम्बरं प्रियतमा विद्युत्समालिङ्गति ॥ ४६ ॥

(वसन्तसेना शृङ्गारभावं नाटयन्ती चारुदत्तमालिङ्गति।)

चारुदत्तः—(स्पर्शं नाटयन्प्रत्यालिङ्ग्य।)

भो मेघ गम्भीरतरं नद त्वं तव प्रसादात्स्मरपीडितं मे।
संस्पर्शरोमाञ्चितजातरागं कदम्बपुष्पत्वमुपैति गात्रम् ॥ ४७ ॥

विदूषकः—दास्याःपुत्र दुर्दिन अनार्य इदानीमसि त्वं यदत्रभवतीं विद्युता भीषयसि। (क)

चारुदत्तः—वयस्य नार्हस्युपालब्धुम्।

(क) दासीएपुत्त दुद्दिण अणज्जो दाणिं सि तुमं जं अत्तभोदिं[1] विज्जुआए भाआवेसि।

नायिकाया अश्रुधारा इव पतन्तीति उत्प्रेक्षा। उपजातिर्वृत्तम्] ॥४४॥ [**धाराभिरिति**। बलदेवपटप्रकाशा बलरामवस्त्रसदृशा नीला इत्यर्थः। मेघाः आर्यजनचित्तसुनिर्मलाभिः चण्डाभिः तीव्राभिः अर्जुनशरप्रतिकर्कशाभिः धाराभिः शक्रस्य मौक्तिकनिधिं मुक्तासमूहं उद्गिरन्त इव स्रवन्ति। उपमोत्प्रेक्षयोः संसृष्टिः। वसन्ततिलकं वृत्तम् ॥ ४५ ॥ **एतैरिति**। पिष्टतमालवर्णकनिभैः पिष्टतमालपत्राणां यद्वर्णकं विलेपनं तत्सदृशैः नीलैः अम्भोधरैः आलिप्तम्। संसक्तैः सुरभिभिः शीतैः प्रदोषानिलैः उपवीजितं अम्बरं अम्भोदसमागमे प्रणयिनी स्वच्छन्दं स्वेच्छयैव अभ्यागता रक्ता एषा विद्युत् अम्बरं प्रियतमा कान्तमिव समालिङ्गति। शार्दूल० वृत्तम् ॥ ४६ ॥ **भो मेघेति**। भो मेघ त्वं गम्भीरतरं नद। स्मरपीडितं मे गात्रं तव प्रसादात् वसन्तसेनाप्रापणरूपात् संस्पर्शेन रोमाञ्चितं जातरोम उत्पन्नसंभोगाभिलाषं च कदम्बपुष्पत्वमुपैति। काव्यलिङ्गनिदर्शनालंकारौ। उपजातिश्छन्दः] ॥४७॥

---

1 एव्वं भोदिं.

वर्षशतमस्तु दुर्दिनमविरतधारं शतह्रदा स्फुरतु ।
अस्मद्विधदुर्लभया यदहं प्रियया परिष्वक्तः ॥ ४८ ॥

अपि च वयस्य ।

धन्यानि तेषां खलु जीवितानि ये कामिनीनां गृहमागतानाम् ।
आर्द्राणि मेघोदकशीतलानि गात्राणि गात्रेषु परिष्वजन्ते ॥ ४९ ॥

प्रिये वसन्तसेने ।

स्तम्भेषु प्रचलितवेदिसंचयान्तं
शीर्णत्वात्कथमपि धार्यते वितानम् ।
एषा च स्फुटितसुधाद्रवानुलेपा-
त्संक्लिन्ना सलिलभरेण चित्रभित्तिः ॥ ५० ॥

(ऊर्ध्वमवलोक्य ।) अय इन्द्रधनुः । प्रिये पश्य पश्य ।

विद्युज्जिह्वेनेदं महेन्द्रचापोच्छ्रितायतभुजेन ।
जलधरविवृद्धहनुना विजृम्भितमिवान्तरीक्षेण[1] ॥ ५१ ॥

तदेहि । अभ्यन्तरमेव प्रविशावः । (इत्युत्थाय परिक्रामति ।)[2]

तालीषु तारं विटपेषु मन्द्रं[3] शिलासु रूक्षं[4] सलिलेषु चण्डम् ।
संगीतवीणा इव ताड्यमानास्तालानुसारेण पतन्ति धाराः ॥ ५२ ॥

(इति निष्क्रान्ताः सर्वे ।)

दुर्दिनो[5] नाम पञ्चमोऽङ्कः ।

वर्षेति । [अविरता अविच्छिन्ना धारा यस्मिंस्तद् अविरतधारं दुर्दिनं वर्षशतमस्तु । शतह्रदा स्फुरतु ।] यदहमस्मद्विधदुर्लभया दरिद्रस्य वेश्यावाप्त्यसंभवात् । [प्रियया परिष्वक्त आलिङ्गितः॥४८॥ **धन्यानीति**। ये पुमांसः गृहमागतानां कामिनीनां मेघोदकशीतलानि आर्द्राणि गात्राणि आत्मनः गात्रेषु परिष्वजन्ते तेषां जीवितानि धन्यानि खलु। इन्द्रवज्रा वृत्तम् ॥४९॥ **स्तम्भेष्विति** । स्तम्भेषु प्रचलितः शिथिलित इत्यर्थः । यः वेदिसंचयः तस्य अन्तं यावत् शीर्णत्वाद्वितानं कथमपि धार्यते उपरि ध्रियते । एषा च चित्रभित्तिः स्फुटितसुधाद्रवानुलेपात् सलिलभरेण वर्षोदकाधिक्येन संक्लिन्ना अत्यार्द्रा । प्रहर्षिणी वृत्तम् ।] प्रकृतिच्छन्दसा । वितानं चन्द्रातपः ॥५०॥ **विद्युदिति** । [विद्युदेव जिह्वा यस्य तेन । महेन्द्रचापमेव उच्छ्रितौ आयतौ च भुजौ यस्य तेन । जलधर एव विवृद्धा हनुर्यस्य तेन । अन्तरीक्षेण विजृम्भितं जृम्भाप्रदानं कृतमिवेत्युत्प्रेक्षा ।] आर्या । अनया च वेतालादिभयानकरूपवर्णनम् ॥ ५१ ॥ **तालीष्विति** । [तालीषु तालीपत्रेषु तारं विटपेषु शाखासु मन्द्रं शिलासु रूक्षं सलिलेषु चण्डं तुमुलस्वनम् । एवं ताड्यमाना संगीतवीणा इव धाराः तालानुसारेण पतन्ति । उपमा । उपजातिच्छन्दः ॥ ५२ ॥]

इति दुर्दिनो नाम पञ्चमोऽङ्कः ॥

---

१ अन्तरि. २ क्रामतः; अस्मात्परं–प्रिये पश्य, पश्य पश्य. ३ मन्दं. ४ रूक्षं. ५ इति मृच्छकटिकायां, मृ०प्रकरणे दु०.

षष्ठोऽङ्कः ।

(ततः प्रविशति चेटी ।)

चेटी—कथमद्याप्यार्या न विबुध्यते । भवतु । प्रविश्य प्रतिबोधयिष्यामि । (इति नाट्येन परिक्रामति ।) (क)

(ततः प्रविशत्याच्छादितशरीरा प्रसुप्ता वसन्तसेना ।)

चेटी—(निरूप्य ।) उत्तिष्ठतूत्तिष्ठत्वार्या । प्रभातं संवृत्तम् । (ख)

वसन्तसेना—(प्रतिबुध्य ।) कथं रात्रिरेव प्रभातं संवृत्तम् । (ग)

चेटी—अस्माकमेतत्प्रभातम् । आर्यायाः पुना रात्रिरेव । (घ)

वसन्तसेना—चेटि कुतः पुनर्युष्माकं द्यूतकरः । (ङ)

चेटी—आर्ये वर्धमानकं समादिश्य पुष्पकरण्डकं जीर्णोद्यानं गत आर्यचारुदत्तः । (च)

वसन्तसेना—किं समादिश्य । (छ)

चेटी—योजय रात्रौ प्रवहणं वसन्तसेना गच्छत्विति । (ज)

वसन्तसेना—चेटि कुत्र मया गन्तव्यम् । (झ)

चेटी—आर्ये यत्र चारुदत्तः । (ञ)

वसन्तसना—(चेटीं परिष्वज्य ।) चेटि सुष्ठु न निर्ध्यातो रात्रौ । तदद्य प्रत्यक्षं प्रेक्षिष्ये । चेटि किं प्रविष्टाऽहमिहाभ्यन्तरचतुःशालकम् । (ट)

(क) कधं अज्ज वि अज्जआ ण विबुज्झदि । भोदु । पविसिअ पडिबोधइस्सम् ।

(ख) उत्थेदु उत्थेदु अज्जआ । पभादं संवुत्तम् । (ग) कधं रत्ति ज्जेव पभादं संवुत्तम् । (घ) अम्हाणं एसो पभादो । अज्जआए उण रत्ति ज्जेव ।

(ङ) हञ्जे कहिं उण तुम्हाणं जूदिअरो । (च) अज्जए वड्ढमाणअं समादिसिअ पुप्फकरण्डअं जिण्णुज्जाणं गदो अज्जचारुदत्तो । (छ) किं समादिसिअ ।

(ज) जोएहि रादीए पवहणं वसन्तसेना गच्छदु त्ति ।

(झ) हञ्जे कहिं मए गन्तव्वम् । (ञ) अज्जए जहिं चारुदत्तो ।

(ट) हञ्जे सुट्ठु ण णिज्झाइदो रादीए । ता अज्ज पच्चक्खं पेक्खिस्सम् । हञ्जे किं पविट्ठा अहं इह अब्भन्तरचदुस्सालअम् ।

अपय्यत्तं अपर्याप्तम् ।[निर्ध्यातः सम्यग्दृष्टः । संतप्यते ममात्रागमनेनात्मनः सपत्नीभावा-

---

१ प्रबुध्य. २ संदिसिअ (संदिश्य); समासादिअ. ३ अपय्यत्तं (अपर्याप्तं) (टी०).

चेटी—न केवलमभ्यन्तरचतुःशालकम् । सर्वजनस्यापि हृदयं प्रविष्टा । (क)

वसन्तसेना—अपि संतप्स्यते चारुदत्तस्य परिजनः । (ख)

चेटी—संतप्स्यति । (ग)

वसन्तसेना—कदा । (घ)

चेटी—यदाऽऽर्या गमिष्यति । (ङ)

वसन्तसेना—तदा मया प्रथमं संतप्तव्यम् । (सानुनयम्[1] ।) चेटि गृहाणेमां रत्नावलीम् । मम भगिन्या आर्याधूतायै गत्वा समर्पय । वक्तव्यं च—अहं श्रीचारुदत्तस्य गुणनिर्जिता दासी तदा युष्माकमपि । तदेषा तवैव कण्ठाभरणं भवतु रत्नावली । (च)

चेटी—आर्ये कोपिष्यति चारुदत्त आर्यायै तावत् । (छ)

वसन्तसेना—गच्छ । न कोपिष्यति । (ज)

चेटी—(गृहीत्वा ।) यदार्याऽऽज्ञापयति । (इति निष्क्रम्य पुनः प्रविशति ।) आर्ये भणत्यार्या धूता—आर्यपुत्रेण युष्माकं प्रसादीकृता । न युक्तं ममैतां ग्रहीतुम् । आर्यपुत्र एव ममाभरणविशेष इति जानातु भवती । (झ)

(क) ण केवलं अब्भन्तरचदुस्सालअम् । सव्वजणस्स वि हिअअं पविट्ठा ।

(ख) अवि संतप्पदि चारुदत्तस्स परिअणो । (ग) संतप्पिस्सदि ।

(घ) कदा । (ङ) जदो अज्जआ गमिस्सदि ।

(च) तदो मए पढमं संतप्पिदव्वम् । हञ्जे गेण्ह एदं रअणावलिम् । मम बहिणिआए अज्जाधूदाए गदुअ समप्पेहि । भणिदव्वं च—अहं सिरिचारुदत्तस्स गुणणिज्जिदा दासी तदा तुम्हाणं पि । ता एसा तुह ज्जेव कण्ठाहरणं होदु रअणावली ।

(छ) अज्जए कुपिस्सदि चारुदत्तो अज्जाए दाव ।

(ज) गच्छ । ण कुपिस्सदि ।

(झ) जं अज्जआ आणवेदि । अज्जए भणादि अज्जा धूदा—अज्जउत्तेण तुम्हाणं पसादीकिदा । ण जुत्तं मम एदं गेण्हिदुम् । अज्जउत्तो ज्जेव मम आहरणविसेसो त्ति जाणादु भोदी ।

दित्यर्थः । संतप्स्यति तव विश्लेषादिति भावः । मया प्रथमं संतप्तव्यं-गृहीतरत्नावलीकायां गतायां मयि निजमित्रचारुदत्तपरिजनपरितापे पश्चान्मम बहुपश्चात्तापः स्यादिति प्रथममेव मया संतप्तव्यम् । यथा मित्रपरिजनानुतापो न भवेदिति भावः । इति ल० दी०]
['भर्ता हि परमं नार्या भूषणं भूषणैर्विना' इति मन्यमानाऽऽह—आर्यपुत्र एवेत्यादि ।]

---

[1] सानुकम्पम्.

(ततः प्रविशति दारकं गृहीत्वा रदनिका ।)

रदनिका—एहि वत्स शकटिकया क्रीडावः । (क)

दारकः—(सकरुणम् ।) रदनिके किं ममैतया मृत्तिकाशकटिकया । तामेव सौवर्णशकटिकां देहि । (ख)

रदनिका—(सनिर्वेदं निःश्वस्य ।) जात कुतोऽस्माकं सुवर्णव्यवहारः । तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि । तद्यावद्विनोदयाम्येनम् । आर्याया वसन्तसेनायाः समीपमुपसर्प्स्यामि । (उपसृत्य ।) आर्ये प्रणमामि । (ग)

वसन्तसेना—रदनिके स्वागतं ते । कस्य पुनरयं दारकः । अनलंकृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम् । (घ)

रदनिका—एष खल्वार्यचारुदत्तस्य पुत्रो रोहसेनो नाम । (ङ)

वसन्तसेना—(बाहू प्रसार्य ।) एहि मे पुत्रक आलिङ्ग । (इत्यङ्क उपवेश्य ।) अनुकृतमनेन पितू रूपम् । (च)

रदनिका—न केवलं रूपं शीलमपि तर्कयामि । एतेनार्यचारुदत्त आत्मानं विनोदयति । (छ)

वसन्तसेना—अथ किंनिमित्तमेष रोदिति । (ज)

(क) एहि वच्छ सअडिआए कीलम्ह ।

(ख) रदणिए किं मम एदाए मट्टिआसअडिआए । तं ज्जेव सोवण्णसअडिअं देहि ।

(ग) जाद कुदो अम्हाणं सुवण्णववहारो । तादस्स पुणो वि रिद्धीए सुवण्णसअडिआए कीलिस्ससि । ता जाव विणोदेमि णम् । अज्जआए वसन्तसेणाए समीवं उवसप्पिस्सम् । अज्जए पणमामि ।

(घ) रदणिए साअदं दे । अस्स उण अअं दारओ । अणलंकिदसरीरो वि चन्दमुहो आणन्देदि मम हिअअम् ।

(ङ) एसो क्खु अज्जचारुदत्तस्स पुत्तो रोहसेणो णाम ।

(च) एहि मे पुत्तअ आलिङ्ग । अणुकिदं अणेण पिदुणो रूवम् ।

(छ) ण केवलं रूवं सीलं पि तक्केमि । एदिणा अज्जचारुदत्तो अत्ताणअं विणोदेदि । (ज) अध किंणिमित्तं एसो रोअदि ।

---

१ उपसप्पामि.

रदनिका—एतेन प्रतिवेशिगृहपतिदारकस्य सुवर्णशकटिकया क्रीडितम् । तेन च सा नीता । ततः पुनस्तां याचतो मयेयं मृत्तिकाशकटिका कृत्वा दत्ता । ततो भणति—रदनिके किं ममतया मृत्तिकाशकटिकया । तामेव सौवर्णशकटिकां देहीति । (क)

वसन्तसेना—हा धिक् हा धिक् । अयमपि नाम परसंपत्त्या संतप्यते । भगवन्कृतान्त पुष्करपत्रपतितजलबिन्दुसदृशैः क्रीडसि त्वं पुरुषभागधेयैः । (इति सास्रा ।) जात मा रुदिहि । सौवर्णशकटिकया क्रीडिष्यसि । (ख)

दारकः—रदनिके कैषा । (ग)

वसन्तसेना—पितुस्ते गुणनिर्जिता दासी । (घ)

रदनिका—जात आर्या ते जननी भवति । (ङ)

दारकः—रदनिके अलीकं त्वं भणसि । यद्यस्माकमार्या जननी तत्किमर्थमलंकृता । (च)

वसन्तसेना—जात मुग्धेन मुखेनातिकरुणं मन्त्रयसे । (नाट्येनाभरणान्यवतार्य रुदती ।) एषेदानीं ते जननी संवृत्ता । तद्गृहाणैतमलंकारम् । सौवर्णशकटिकां कारय । (छ)

(क) एदिणा पडिवेसिगहवइदारअकेरिआए सुवण्णसअडिआए कीलिदम् । तेण अ सा णीदा । तदो उण तं मग्गन्तस्स मए इअं मट्टिआसअडिआ कदुअ दिण्णा । तदो भणादि—रदणिए किं मम एदाए मट्टिआसअडिआए । तं ज्जेव सोवण्णसअडिअं देहि त्ति ।

(ख) हद्धी हद्धी । अअं पि णाम परसंपत्तीए संतप्पदि । भअवं कअन्त पोक्खरवत्तपडिदजलविन्दुसरिसेहिं कीलसि तुमं पुरिसभाअधेएहिं । जाद मा[2] रोद । सोवण्णसअडिआए कीलिस्ससि ।   (ग) रदणिए का एसा ।

(घ) पिदुणो दे गुणणिज्जिदा दासी । (ङ) जाद अज्जआ दे जणणी भोदि ।

(च) रदणिए अलिअं तुमं भणासि । जइ अम्हाणं अज्जआ जणणी ता कीस अलंकिदा ।

(छ) जाद मुद्धेण मुहेण अदिकरुणं मन्तेसि । एसा दाणिं दे जणणी संवुत्ता । ता गेण्ह एदं अलंकारअम् । सोवण्णसअडिअं घडावेहि ।

[कृतान्त विधे । पुष्करपत्रं कमलपत्रं तस्मिन्पतिता जलबिन्दवस्तत्सदृशैः चञ्चलैरित्यर्थः।]

---

१ सास्रम्. २ मा रोद मा रोद.

दारकः—अपेहि । न ग्रहीष्यामि । रोदिषि त्वम् । (क)

वसन्तसेना—(अश्रूणि प्रमृज्य ।) जात न रोदिष्यामि । गच्छ । क्रीड । (अलंकारैर्मृच्छकटिकं पूरयित्वा ।) जात कारय सौवर्णशकटिकाम् । (ख)

(इति दारकमादाय निष्क्रान्ता रदनिका ।)

(प्रविश्य प्रवहणाधिरूढः ।)

चेटः—रदनिके रदनिके निवेदयार्यायै वसन्तसेनायै—अपवारितं[1] पक्षद्वारके सज्जं प्रवहणं तिष्ठति । (ग)

(प्रविश्य ।)

रदनिका—आर्ये एष वर्धमानको विज्ञापयति—पक्षद्वारे सज्जं प्रवहणमिति । (घ)

वसन्तसेना—चेटि तिष्ठतु मुहूर्तकम् । यावदहमात्मानं प्रसाधयामि । (ङ)

रदनिका—(निष्क्रम्य ।) वर्धमानक तिष्ठ मुहूर्तकम् । यावदार्याऽऽत्मानं प्रसाधयति । (च)

चेटः—ही ही भोः । मयाऽपि यानास्तरणं विस्मृतम् । तद्यावद्गृहीत्वाऽऽगच्छामि । एतौ नासिकारज्जुकटुकौ बलीवर्दौ । भवतु । प्रवहणेनैव गतागतिं करिष्यामि । (इति निष्क्रान्तश्चेटः ।) (छ)

(क) अवेहि । ण गेण्हिस्सम् । रोदसि तुमम् ।

(ख) जाद ण रोदिस्सम् । गच्छ । कील । जाद कारेहि सोवण्णसअडिअम् ।

(ग) लदणिए लदणिए णिवेदेहि अज्जआए वशन्तशेणाए—ओहालिअं पक्खदुआलए शज्जं पवहणं चिश्टदि ।

(घ) अज्जए एसो वड्ढमाणओ विण्णवेदि—पक्खदुआरए सज्जं पवहणं त्ति ।

(ङ) हञ्जे चिट्ठदु मुहुत्तअम् । जाव अहं अत्ताणअं पसाधेमि ।

(च) वड्ढमाणआ चिट्ठ मुहुत्तअम् । जाव अज्जआ अत्ताणअं पसाधेदि ।

(छ) ही ही भो । मए वि जाणत्थलके विशुमलिदे । ता जाव गेण्हिअ आअच्छामि । एदे णश्शालज्जुकडुआ बइल्ला । भोदु । पवहणेण ज्जेव गदागदिं कलिश्शम् ।

अलीकमसत्यम् । बालहस्ताभ्यां सुवर्णपूर्णां शकटिकां दारकं च स्वयं गृहीत्वा निष्क्रान्ता । उद्घाटितपक्षद्वारकम् । ही ही इत्यकस्मात्स्मरणविषये । जाणत्थलके यानास्तरणकम् । णस्साकदुआ नासिकारज्ज्वा दुःसहाः । अतोऽतिक्रमः संभाव्यते । 'णस्साकडुआ' इत्यपि पाठः । तत्र नस्यकटुका इत्यर्थः । बइल्ला बलीवर्दाः ।

---

१ अवघाटितं (अपवृतं) इति च्छायापा०.

वसन्तसेना—चेटि उपनय मे प्रसाधनम् । आत्मानं प्रसाधयिष्यामि । (इति प्रसाधयन्ती स्थिता ।) (क)

(प्रविश्य प्रवहणाधिरूढः ।)

स्थावरकः चेटः—आज्ञप्तोऽस्मि राजश्यालकसंस्थानेन—स्थावरक प्रवहणं गृहीत्वा पुष्पकरण्डकं जीर्णोद्यानं त्वरितमागच्छेति । भवतु । तत्रैव गच्छामि ।—वहतं बलीवर्दौ वहतम् । (परिक्रम्यावलोक्य च ।) कथं ग्रामशकटै रुद्धो मार्गः । किमिदानीमत्र करिष्यामि । (साटोपम् ।) अरे रे अपसरत अपसरत । (आकर्ण्य ।) किं भणथ—एतत्कस्य प्रवहणमिति । एतद्राजश्यालकसंस्थानस्य प्रवहणम् । तच्छीघ्रमपसरत । (अवलोक्य ।) कथमेषोऽपरः सभिकमिव मां प्रेक्ष्य सहसैव द्यूतपलायित इव द्यूतकरोऽपवार्यात्मानमन्यतोऽपक्रान्तः । तत्कः पुनरेषः । अथ वा किं ममैतेन । त्वरितं गमिष्यामि । अरे रे ग्राम्याः अपसरत अपसरत । किं भणथ—मुहूर्तकं तिष्ठ । चक्रपरिवृत्तिं देहीति । अरे रे राजश्यालकसंस्थानस्याहं शूरश्चक्रपरिवृत्तिं दास्यामि । अथ वैष एकाकी तपस्वी । तदेवं करोमि । एतत्प्रवहणमार्यचारुदत्तस्य वृक्षवाटिकायाः पक्षद्वारके स्थापयामि । (इति प्रवहणं संस्थाप्य ।) एषाऽस्म्यागतः । (इति निष्क्रान्तः ।) (ख)

(क) हञ्जे उवणेहि मे पसाहणम् । अत्ताणअं पसाधइस्सम् ।

(ख) आण्णत्तम्हि लाअशालअशंठाणेण—थावलआ पवहणं गेण्हिअ पुप्फकलण्डअं जिण्णुज्जाणं तुलिदं आअच्छेहि त्ति । भोदु । तहिं ज्जेव गच्छामि ।—वहध बइल्ला वहध । कधं गामशअलेहिं लुद्धे मग्गे । किं दाणिं एत्थ कलइश्शम् । अले ले ओशलध ओशलध । किं भणाध—एशे कश्शकेलके पवहणे त्ति । एशे लाअशालअशंठाणकेलके पवहणम् । ता शिग्घं ओशलध । कधं एशे अवले शहिअं विअ मं पेक्खिअ शहशा ज्जेव जूदपलाइदे विअ जूदिअले ओहालिअ अत्ताणअं अण्णदो अवक्कन्ते । ता को उण एशे । अध वा किं मम एदिणा । तुलिदं गमिश्शम् । अले ले गामेलुआ ओशलध ओशलध । किं भणाध—मुहुत्तअं चिट्ठ । चक्कपलिवट्टिं देहित्ति । अले ले लाअशालअशंठाणकेलके हगे शूले चक्कपलिवट्टिं दइश्शम् । अध वा एशे एआई तवश्शी । ता एव्वं कलेमि । एदं पवहणं अज्जचालुदत्तश्श लुक्खवाडिआए पक्खदुआलए थावेमि । एशे म्हि आअदे ।

द्यूतपलायित इव द्यूतकरः सभिकमिव मां दृष्ट्वा प्रच्छादितशरीरः । एतेनार्यकस्य पलायनमुपाक्षिप्तम् । एआई तवस्सी एकाकी वराकः । एशे आअदे इति चक्रपरिवृत्तिदानार्थम् । अतोऽपि च शकारलाघवमुक्तामित्यवधेयम् ।

चेटी---आर्ये नेमिशब्द इव श्रूयते । तदागतं प्रवहणम् । (क)

वसन्तसेना---चेटि गच्छ । त्वरते मे हृदयम् । तदादिश पक्षद्वारम् । (ख)

चेटी---एत्वेत्वार्या । (ग)

वसन्तसेना---(परिक्रम्य ।) चेटि विश्राम्य त्वम् । (घ)

चेटी---यदार्याऽऽज्ञापयति । (इति निष्क्रान्ता) । (ङ)

वसन्तसेना---(दक्षिणाक्षिस्पन्दं सूचयित्वा प्रवहणमधिरुह्य च ।) किंन्विदं स्फुरति दक्षिणं लोचनम् । अथ वा चारुदत्तस्यैव दर्शनमनिमित्तं प्रमार्जयिष्यति । (च)

(प्रविश्य ।)

स्थावरकः चेटः---अपसारिता मया शकटाः । तद्यावद्गच्छामि । (इति नाट्येनाधिरुह्य चालयित्वा । स्वगतम् ।) भारवत्प्रवहणम् । अथ वा चक्रपरिवर्तनेन परिश्रान्तस्य भारवत्प्रहवणं प्रतिभासते । भवतु । गमिष्यामि ।---यातं गावौ यातम् । (छ)

(नेपथ्ये ।)

अरे रे दौवारिकाः अप्रमत्ताः स्वेषु स्वेषु गुल्मस्थानेषु भवत । एषोऽद्य गोपालदारको गुप्तिं भङ्क्त्वा गुप्तिपालकं व्यापाद्य बन्धनं भित्त्वा परिभ्रष्टोऽपक्रामति । तद्गृह्णीत गृह्णीत । (ज)

(क) अज्जए णेमिसद्दो विअ सुणीअदि । ता आअदो पवहणो ।

(ख) हञ्जे गच्छ । तुवरदि मे हिअअम् । ता आदेसेहि पक्खदुआलम् ।

(ग) एदु एदु अज्जआ । (घ) हञ्जे वीसम तुमम् ।

(ङ) जं अज्जआ आणवेदि ।

(च) किं ण्णेदं फुरदि दाहिणं लोअणम् । अध वा चारुदत्तस्स ज्जेव दंसणं अणिमित्तं पमज्जइस्सदि ।

(छ) ओशालिदा मए शअडा । ता जाव गच्छामि । भालिके पवहणे । अध वा चक्कपलिवट्टिआए पलिश्शन्तश्श भालिके पवहणे पडिभाशेदि । भोदु । गमिश्शम् ।---जाध गोणा जाध ।

(ज) अरे रे दोवारिआ अप्पमत्ता सएसु सएसु गुम्मट्ठाणेसु होध । एसो अज्ज गोवालदारओ गुत्तिअं भञ्जिअ गुत्तिवालअं वावादिअ बन्धणं भेदिअ परिब्भट्टो अवक्कमदि । ता गेण्हध गेण्हध ।

भारवत् सभारमित्यर्थः । मत्वर्थीयः । गोणा गावः । परिब्भट्टो बन्धनभेदादपगतः ।

(प्रविश्यापटीक्षेपेण संभ्रान्त एकचरणलग्ननिगडोऽवगुण्ठित आर्यकः परिक्रामति ।)

चेटः—(स्वगतम् ।) महान्नगर्यां संभ्रम उत्पन्नः । तत्त्वरितं त्वरितं गमिष्यामि । (इति निष्क्रान्तः ।) (क)

आर्यकः—

हित्वाऽहं नरपतिबन्धनापदेश-
व्यापत्तिव्यसनमहार्णवं महान्तम् ।
पादाग्रस्थितनिगडैकपाशकर्षी
प्रभ्रष्टो गज इव बन्धनाद्भ्रमामि ॥ १ ॥

भोः अहं खलु सिद्धादेशजनितपरित्रासेन राज्ञा पालकेन घोषादानीय विशसने गूढागारे बन्धनेन बद्धः । तस्माच्च प्रियसुहृच्छर्विलकप्रसादेन बन्धनात्परिभ्रष्टोऽस्मि । (अश्रूणि विसृज्य ।)

भाग्यानि मे यदि तदा मम कोऽपराधो
यद्वन्यनाग इव संयमितोऽस्मि तेन ।
दैवी च सिद्धिरपि लङ्घयितुं न शक्या
गम्यो नृपो बलवता सह को विरोधः ॥ २ ॥

तत्कुत्र गच्छामि मन्दभाग्यः । (विलोक्य ।) इदं कस्यापि साधोरनावृतपक्षद्वारं गेहम् ।

(क) महन्ते णअलीए शंभमे उप्पण्णे । ता तुलिदं तुलिदं गमिश्शम् ।

हित्वेति । [महान्तं नरपतिना बन्धनं कारागृहेऽवरोधः नरपतिबन्धनमपदेशो यस्याः सा नरपतिबन्धनापदेशा या व्यापत्तिः तत्संबन्धि यद् व्यसनं दुःखं संकटं वा तदेव महार्णवस्तं हित्वा । पादाग्रस्थितः निगडस्य एकपाशस्तं कर्षतीति तथा सन् अहं बन्धनात्प्रभ्रष्टः गज इव भ्रमामि । प्रहर्षिणी वृत्तम् ॥ १ ॥ विशसने वधस्थानभूते । मारणाय इति वा । 'निमित्तात्कर्मयोगे' इति सप्तमी । गूढागारे कारागृहे । भाग्यानीति। यदि मे भाग्यानि । राज्यप्राप्तिरूपं भाग्यमित्यर्थः। तदा मम कः अपराधः यद्यस्मात् तेन राज्ञा वन्यनाग इव संयमितोऽस्मि बद्धोऽस्मि । दैवी देवसंबन्धिनी सिद्धिः लङ्घयितुं न शक्या च । बन्धनं न भाव्यर्थप्रतीकार इति भावः । तथाऽपि गम्यो नृपः सर्वेषां सेव्यो हि राजा । बलवता सह कः विरोधो वैरम् । वसन्ततिलका वृत्तम्] ॥ २ ॥

---

१ महार्हणं. २ पाशकर्षम्.

इदं गृहं भिन्नमदत्तदण्डो विशीर्णसंधिश्च महाकपाटः ।
ध्रुवं कुटुम्बी व्यसनाभिभूतां दशां प्रपन्नो मम तुल्यभाग्यः॥३॥

तदत्र तावत्प्रविश्य तिष्ठामि ।

(नेपथ्ये ।)

यातं गावौ यातम् । (क)

आर्यकः—(आकर्ण्य ।) अये प्रवहणमित एवाभिवर्तते ।

भवेद्गोष्ठीयानं न च विषमशीलैरधिगतं
वधूसंयानं वा तदभिगमनोपस्थितमिदम् ।
बहिर्नेतव्यं वा प्रवरजनयोग्यं विधिवशा-
द्विविक्तत्वाच्छून्यं मम खलु भवेद्दैवविहितम् ॥ ४ ॥

(ततः प्रवहणेन सह प्रविश्य ।)

वर्धमानकः चेटः—आश्चर्यम् । आनीतं मया यानास्तरणम् । रदनिके निवेदयार्यायै वसन्तसेनायै—अवस्थितं सज्जं प्रवहणमधिरुह्य पुष्पकरण्डकं जीर्णोद्यानं गच्छत्वार्या । (ख)

आर्यकः—(आकर्ण्य ।) गणिकाप्रवहणमिदम् । बहिर्यानं च । भवतु । अधिरोहामि । (इति स्वैरमुपसर्पति ।)

चेटः—(श्रुत्वा ।) कथं नूपुरशब्दः । तदागता खल्वार्या । आर्ये इमौ नासिकारज्जुकटुकौ बलीवर्दौ । तत्पृष्ठत एवारोहत्वार्या । (ग)

(क) जाध गोणा जाध ।

(ख) हीमाणहे । आणीदे मए जाणत्थलके । लदणिए णिवेदेहि अज्जआए वशन्तशेणाए—अवत्थिदे शज्जे पवहणे अहिलुहिअ पुप्फकलण्डअं जिण्णुज्जाणं गच्छदु अज्जआ ।

(ग) कधं णेउलशद्दे । ता आअदा क्खु अज्जआ । अज्जए इमे णश्शालज्जुकडुआ बइल्ला । ता पिट्ठदो ज्जेव आलुहदु अज्जआ ।

इदमिति । [इदं गृहं भिन्नं विश्लिष्टसंधिबन्धमित्यर्थः । महाकपाटः अदत्तः दण्डः अर्गला यस्य तथा विशीर्णः संधिः फलकसंयोगो यस्य तथाभूतश्च । ध्रुवं नूनमयं कुटुम्बी गृहस्वामी व्यसनाभिभूतां दारिद्र्योपहतां दशां प्रपन्नः सन् मम तुल्यभाग्यः मत्सदृशभागधेयो वर्तते । उपेन्द्रवज्रा वृत्तम् ॥ ३ ॥ भवेदिति । इदं विषमशीलैः विसदृशस्वभावैः न च अधिगतम् । गोष्ठी समाजस्तस्य यानं भवेत् । अथ वा वधूसंयानं स्त्रीवाहनं तस्या अभिगमनायोपस्थितं भवेत् । वा अथ वा प्रवरजनयोग्यं सद्विधिवशाद्दैवबलाद्बहिर्नेतव्यं भवेत् । विविक्तत्वात्परिजनादिराहित्यात् शून्यं मम खलु दैवविहितं दैवप्रापितं भवेत् । संदेहालंकारः । शिखरिणी वृत्तम्] ॥ ४ ॥

---

१ मनायतार्गलम्. २ पिश्टदो.

(आर्यकस्तथा करोति ।)

चेटः—पादोत्फालचालितानां नूपुराणां विश्रान्तः शब्दः । भाराक्रान्तं च प्रवहणम् । तथा तर्कयामि सांप्रतमार्ययाऽऽरूढया भवितव्यम् । तद्गच्छामि ।—यातं गावौ यातम् । (इति परिक्रामति ।) (क)

(प्रविश्य ।)

वीरकः—अरे रे अरे जय-जयमान-चन्दनक-मङ्गल-पुष्पभद्र-प्रमुखाः ।

किं गच्छथं विश्रब्धाः यः स गोपालदारको बद्धः ।
भित्त्वा समं व्रजति नरपतिहृदयं च बन्धनं चापि ॥ ५ ॥

अरे पुरस्तात्प्रतोलीद्वारे तिष्ठ त्वम् । त्वमपि पश्चिमे त्वमपि दक्षिणे त्वमप्युत्तरे । योऽप्येष प्राकारखण्ड एनमधिरुह्य चन्दनेन समं गत्वाऽवलोकयामि । एहि चन्दनक एहि । इतस्तावत् । (ख)

(प्रविश्य संभ्रान्तः ।)

चन्दनकः—अरे रे वीरक-विशल्य-भीमाङ्गद—दण्डकालक—दण्डशूर-प्रमुखाः ।

आगच्छत विश्वस्तास्त्वरितं यतध्वं लघु कुरुत ।
लक्ष्मीर्येन न राज्ञः प्रभवति गोत्रान्तरं गन्तुम् ॥ ६ ॥ (ग)

(क) पादुप्फालचालिदाणं णेउलाणं वीशन्ते शद्दे । भलक्कन्ते अ पवहणे । तथा तक्केमि शंपदं अज्जआए आलूढाए होदव्वम् । ता गच्छामि ।—जाध गोणा जाध ।

(ख) अरे रे अरे जअ-जअमाण-चन्दणअ-मङ्गल-फुल्लभद्द-प्पमुहा ।
किं अच्छध वीसद्धा जो सो गोवालदारओ बद्धो ।
भेत्तूण समं वच्चइ णरवइहिअअं अ बन्धणं चावि ॥
अले पुरत्थिमे पदोलीदुआरे चिट्ठ तुमम् । तुमं पि पच्छिमे तुमं पि दक्खिणे तुमं पि उत्तरे । जो वि एसो पाआरखण्डो एदं अहिरुहिअ चन्दणेण समं गदुअ अवलोएमि । एहि चन्दणअ एहि । इदो दाव ।

(ग) अरे रे वीरअ-विसल्ल-भीमङ्गअ-दण्डकालअ-दण्डसूरप्पमुहा ।
आअच्छध वीसत्था तुरिअं जत्तेह लहुं करेज्जाह ।
लच्छी जेण ण रण्णो पहवइ गोत्तन्तरं गन्तुम् ॥

किमित्यादि । गाथा । [किं विश्रद्धा असंरब्धाः गच्छथ । यः स गोपालदारको बद्धः स नरपतिहृदयं च बन्धनं चापि समं युगपदेव भित्त्वा व्रजति] ॥ ५ ॥ पुरत्थिमे पूर्वस्मिन् । [प्रतोलीद्वारे रथ्यामुखे । पूर्वनगरद्वारे इत्यर्थः ।] **आगच्छतेति** । गाथापञ्चकम् । [विश्वस्ताः सुविश्रब्धा आगच्छत । लघु द्रुतं कुरुत कार्यं ।

---

१ 'स्थ,' 'तिष्ठथ,' इति च्छायापा०

अपि च ।

उद्यानेषु सभासु च मार्गे नगर्यामापणे घोषे ।
तं तमन्वेषयत त्वरितं शङ्का वा जायते यत्र ॥ ७ ॥
रे रे वीरक किं किं दर्शयसि भणसि तावद्विश्रब्धम् ।
भित्त्वा च बन्धनकं कः स गोपालदारकं हरति ॥ ८ ॥
कस्याष्टमो दिनकरः कस्य चतुर्थश्च वर्तते चन्द्रः ।
षष्ठश्च भार्गवग्रहो भूमिसुतः पञ्चमः कस्य ॥ ९ ॥
भण कस्य जन्मषष्ठो जीवो नवमस्तथैव सूरसुतः ।
जीवति चन्दनके कः स गोपालदारकं हरति ॥ १० ॥ (क)

(क) अवि अ ।

उज्जाणेसु सहासु अ मग्गे णअरीअ आवणे घोसे ।
तं तं जोहह तुरिअं सङ्का वा जाअए जत्थ ॥
रे रे वीरअ किं किं दरिसेसि भणाहि दाव वीसद्धम् ।
भेत्तूण अ बन्धणअं को सो गोवालदारअं हरइ ॥
कस्सट्टमो दिणअरो कस्स चउत्थो अ वट्टए चन्दो ।
छट्ठो अ भग्गवगहो भूमिसुओ पञ्चमो कस्स ॥
भण कस्स जम्मछट्ठो जीवो णवमो तहेअ सूरसुओ ।
जीअन्ते चन्दणए को सो गोवालदारअं हरइ ॥

निर्हत] ॥६॥ **उद्यानेष्विति** ॥७॥ **रे रे इति** ॥८॥ **कस्याष्टम इति । भणेति** । [युग्मम् । अष्टमः जन्मराशितोऽष्टमराशिस्थः । एवमुत्तरत्रापि । भार्गवग्रहः शुक्रः । भूमिसुतो मङ्गलः । जीवो गुरुः । सूरः सूर्यस्तत्सुतः शनिः । एते ग्रहा उक्तस्थानस्थिता अत्यन्तानिष्टा जीवितापहाः । गोपालदारकमपहरतः कस्य मृत्युरुपस्थित इत्यर्थः । अष्टमसूर्यफलं मरणम् । चतुर्थचन्द्रफलं कुक्षिरोगः । षष्ठशुक्रफलं बुद्धिहानिः । पञ्चममङ्गलफलं क्षतिः । षष्ठगुरुफलं शोकः शत्रुपीडा च । नवमशनैश्चरफलमर्थनाशः । अत्र बादरायणः–'हुतवहभयमारश्चन्द्रजः सौख्यमुग्रं धनहरणमथार्किर्भार्गवश्चार्थलाभम् । मरणमथ पतङ्गः स्थाननाशं सुरेज्यः सृजति निधनसंस्थो नेत्ररोगं च चन्द्रः ॥ सूक्ष्मां शास्त्रविबोधिकामपि धियं मूढां करोत्यङ्गिरा घोरां दुःखपरंपरां दिनकरः कुक्ष्यामयं चन्द्रमाः । सौम्यो रोगविनाशमिच्छति नृणां रोगक्षयं भार्गवो भौमः शत्रुभयं चतुर्थभवने सौरिश्च वित्तक्षयम् ॥ स्थिताः षष्ठे राशौ दिनकरमहीजार्कतनया बुधश्चन्द्रश्चैवं प्रचुरधनधान्यानि ददति । समृद्धिं शत्रूणां मनसिजविषादं सुरगुरुर्भृगुर्नाशं कुर्याद्युवतिकृतवैरं च परमम् ॥ दौर्भाग्यं शशलाञ्छनः क्षितिसुतश्चोद्विग्नतां चेतसः' इत्यादि । 'धर्मस्थाने दिनकरसुतो नाशमर्थस्य कुर्यात्' इत्यादि । अत्र पृथ्वीधरोक्तश्लोकांशाः सम्यक्तया नोपलभ्यन्ते इति न निवेशिताः । ते बृहत्संहितायां द्रष्टव्याः ।

वीरकः—भट चन्दनक ।

अपहरति कोऽपि त्वरितं चन्दनक शपे तव हृदयेन ।
यथाऽर्धोदितदिनकरे गोपालकदारकः खुंटितः ॥ ११ ॥ (क)

चेटः—यातं गावौ यातम् । (ख)

चन्दनकः—(दृष्ट्वा ।) अरे रे पश्य पश्य ।

अपवारितं प्रवहणं व्रजति मध्येन राजमार्गस्य ।
एतत्तावद्विचारय कस्य कुत्र प्रोषितं प्रवहणमिति ॥ १२ ॥ (ग)

वीरकः—(अवलोक्य ।) अरे प्रवहणवाहक मा तावदेतत्प्रवहणं वाहय । कस्यैतत्प्रवहणम् । को वेहारूढः ; कुत्र वा व्रजति । (घ)

चेटः—एतत्खलु प्रवहणमार्यचारुदत्तस्य । इहार्या वसन्तसेनाऽऽरूढा । पुष्पकरण्डकं जीर्णोद्यानं क्रीडितुं चारुदत्तस्य नीयते । (ङ)

वीरकः—(चन्दनकमुपसृत्य ।) एष प्रवहणवाहको भणति—आर्यचारुदत्तस्य प्रवहणम् । वसन्तसेनाऽऽरूढा । पुष्पकरण्डकं जीर्णोद्यानं नीयत इति । (च)

चन्दनकः—तद्गच्छतु । (छ)

(क) भड चन्दणआ ।

अवहरइ कोवि तुरिअं चन्दणअ सवामि तुज्झ हिअएण ।
जह अद्धइदादिणअरे गोवालअदारओ खुडिदो ॥

(ख) जाध गोणा जाध ।

(ग) अरे रे पेक्ख पेक्ख ।

ओहारिओ पवहणो वच्चइ मज्झेण राअमग्गस्स ।
एदं दाव विआरह कस्स कहिं पवसिओ पवहणोत्ति ॥

(घ) अरे पवहणवाहआ मा दाव एवं पवहणं वाहेहि । कस्सकेरकं एदं पवहणम् । को वा इध आरूढो । कहिं वा वज्जइ । (ङ) एशे क्खु पवहणे अज्जचालुदत्ताह-केलके । इध अज्जआ वशन्तशेणा आलूढा । पुप्फकरण्डअं जिण्णुज्जाणं कीलिदुं चालुदत्तश्श णीअदि । (च) एसो पवहणवाहओ भणादि—अज्जचालुदत्तस्स पवहणं । वशन्तशेणा आलूढा । पुप्फकरण्डअं जिण्णुज्जाणं णीअदि त्ति । (छ) ता गच्छदु ।

॥९॥१०॥ **अपहरतीत्यादि** । गाथा । खुटितः छिन्नबन्ध इत्यर्थे प्राकृतम् ॥११॥ **अपवारितमित्यादि** । गाथा । उद्घाटितं प्रवहणम् । एवं तावद्विचारयत कस्य कुत्र

---

१ अवह०. २ खण्डितः.

वीरकः—अनवलोकित एव। (क)

चन्दनकः—अथ किम्। (ख)

वीरकः—कस्य प्रत्ययेन। (ग)

चन्दनकः—आर्यचारुदत्तस्य। (घ)

वीरकः—क आर्यचारुदत्तः का वा वसन्तसेना येनानवलोकितं व्रजति। (ङ)

चन्दनकः—अरे आर्यचारुदत्तं न जानासि न वा वसन्तसेनाम्। यद्यार्यचारुदत्तं वसन्तसेनां वा न जानासि तदा गगने ज्योत्स्नासहितं चन्द्रमपि त्वं न जानासि।

कस्तं गुणारविन्दं शीलमृगाङ्कं जनो न जानाति।
आपन्नदुःखमोक्षं चतुःसागरसारं रत्नम्॥ १३॥
द्वावेव पूजनीयाविह नगर्यां तिलकभूतौ च।
आर्या वसन्तसेना धर्मनिधिश्चारुदत्तश्च॥ १४॥ (च)

वीरकः—अरे चन्दनक।

जानामि चारुदत्तं वसन्तसेनां च सुष्ठु जानामि।
प्राप्ते च राजकार्ये पितरमप्यहं न जानामि॥ १५॥ (छ)

(क) अणवलोइदो ज्जेव। (ख) अध इं। (ग) कस्स पच्चएण। (घ) अज्जचारुदत्तस्स। (ङ) को अज्जचारुदत्तो का वा वसन्तसेणा जेण अणवलोइदं वच्चदि।

(च) अरे अज्जचारुदत्तं ण जाणासि ण वा वसन्तसेणिअम्। जइ अज्जचारुदत्तं वसन्तसेणिअं वा ण जाणासि ता गअणे जोह्णासहिदं चन्दं पि तुमं ण जाणासि।

को[1] तं गुणारविन्दं शीलमिअङ्कं जणो ण जाणादि।
आवण्णदुक्खमोक्खं चउसाअरसारअं रअणम्॥
दो ज्जेवं[2] पूअणीआ इह णअरीए तिलअभूदा अ।
अज्जा वसन्तसेणा धम्मणिही चारुदत्तो अ॥

(छ) अरे चन्दणआ।

जाणामि चारुदत्तं वसन्तसेणं अ सुट्ठु जाणामि।
पत्ते अ राअकज्जे पिदरं पि अहं ण जाणामि॥

वा प्रवसितं प्रवहणमिति॥ १२॥ **कस्तमिति। द्वावेवेति।** गाथाद्वयम्। [गुणानामरविन्दं कमलं मधुन इव निवासस्थानम्। यद्वा गुणा अरविन्दं इव यस्य। शीलस्य मृगाङ्कं चन्द्रमिव स्थितम्। आपन्नानां विपद्ग्रस्तानां शरणमागतानां वा मोक्षं दुःखमुक्तिस्थानम्। यद्वा] आपन्नदुःखस्य मोक्षो यतस्तं चतुःसागरसारकं रत्नम्। [तिलकभूतौ अलंकारभूतौ। धर्मनिधिः पुण्यैकसंचयः]॥ १३॥ १४॥ **जानामीति।** गाथा। [राजकार्ये राज्ञः प्राप्ते कार्ये कर्तव्यत्वेनो-

---

१ को स. २ चेव्व.

आर्यकः—(स्वगतम् ।) अयं मे पूर्ववैरी । अयं मे पूर्वबन्धुः । यतः ।

एकंकार्यनियोगेऽपि नानयोस्तुल्यशीलता ।
विवाहे च चितायां च यथा हुतभुजोर्द्वयोः ॥ १६ ॥

चन्दनकः—त्वं तन्त्रिलः सेनापती राज्ञः प्रत्ययितः । एतौ धारितौ मया बलीवर्दौ । अवलोकय । (क)

वीरकः—त्वमपि राज्ञः प्रत्ययितो बलपतिः । तस्मात्त्वमेवावलोकय । (ख)

चन्दनकः—मयाऽवलोकितं त्वयाऽवलोकितं भवति । (ग)

वीरकः—यत्त्वयाऽवलोकितं तद्राज्ञा पालकेनावलोकितम् । (घ)

चन्दनकः—अरे उन्नमय धुरम् । (ङ)

(चेटस्तथा करोति ।)

आर्यकः—(स्वगतम् ।) अपि रक्षिणो मामवलोकयन्ति । अशस्त्रश्चास्मि मन्दभाग्यः । अथ वा ।

भीमस्यानुकरिष्यामि बाहुः शस्त्रं भविष्यति ।
वरं व्यायच्छतो मृत्युर्न गृहीतस्य बन्धने ॥ १७ ॥

अथ वा साहसस्य तावदनवसरः ।

(चन्दनको नाट्येन प्रवहणमारुह्यावलोकयति ।)

आर्यकः—शरणागतोऽस्मि ।

चन्दनकः—(संस्कृतमाश्रित्य ।) अभयं शरणागतस्य ।

आर्यकः—

त्यजति किल तं जयश्रीर्जहाति च मित्राणि बन्धुवर्गश्च ।
भवति च सदोपहास्यो यः खलु शरणागतं त्यजति ॥ १८ ॥

(क) तुमं तन्तिलो सेणावई रण्णो पच्चइदो । एदे धारिदा मए बइल्ला । अवलोएहि ।
(ख) तुमं पि रण्णो पच्चइदो बलवई । ता तुमं ज्जेव अवलोएहि ।
(ग) मए अवलोइदं तुए अवलोइदं भोदि ।
(घ) जं तुए अवलोइदं तं रण्णा पालएण अवलोइदम् ।
(ङ) अरे उण्णामेहि धुरम् ।

पस्थिते ।] प्राप्ते चेति चकारः पुनरर्थे ॥ १५ ॥ **एकेति** ॥ १६ ॥ तन्त्रिलश्चिन्तापरः । **भीमस्येति** । [भीमस्य शस्त्रं विना बाहुभ्यामेव युध्यमानस्य ।] व्यायच्छतः परपरिभवं कुर्वतः ॥ १७ ॥ **त्यजतीति** ॥ १८ ॥

---

१ एकाकार्य.

चन्दनकः—कथमार्यको गोपालदारकः श्येनवित्रासित इव पत्ररथः शाकुनिकस्य हस्ते निपतितः । (विचिन्त्य ।) एषोऽनपराधः शरणागत आर्यचारुदत्तस्य प्रवहणमारूढः प्राणप्रदस्य म आर्यशर्विलकस्य मित्रम् । अन्यतो राजनियोगः । तत्किमिदानीमत्र युक्तमनुष्ठातुम् । अथ वा यद्भवतु तद्भवतु । प्रथममेवाभयं दत्तम् ।

भीताभयप्रदानं ददतः परोपकाररसिकस्य ।
यदि भवति भवतु नाशस्तथाऽपि खलु लोके गुण एव ॥ १९ ॥

(सभयमवतीर्य ।) दृष्ट आर्यः—(इत्यर्धोक्ते ।) न, आर्या वसन्तसेना । तदेषा भणति—युक्तं न्विदं सदृशं न्विदं यदहमार्यचारुदत्तमभिसर्तुं गच्छन्ती राजमार्गे परिभूता । (क)

वीरकः—चन्दनक अत्र मे संशयः समुत्पन्नः । (ख)

चन्दनकः—कथं ते संशयः । (ग)

वीरकः—

संभ्रमघर्घरकण्ठस्त्वमपि जातोऽसि यत्त्वया भणितम् ।
दृष्टो मया खल्वार्यः पुनरप्यार्या वसन्तसेनेति ॥ २० ॥

अत्र मेऽप्रत्ययः । (घ)

(**क**) कधं अज्जओ गोवालदारओ सेणवित्तासिदो विअ पत्तरहो साउणिअस्स हत्थे णिवडिदो । एसो अणवराधो सरणाअदो अज्जचारुदत्तस्स पवहणं आरूढो पाणप्पदस्स मे अज्जसव्विलअस्स मित्तम् । अण्णदो राअणिओओ । ता किं दाणिं एत्थ जुत्तं अणुचिट्ठिदुम् । अध वा जं भोदु तं भोदु । पढमं ज्जेव अभअं दिण्णम् ।

भीदाभअप्पदाणं दत्तस्स परोवआररसिअस्स ।
जइ होइ होउ णासो तहवि हु लोए गुणो ज्जेव्व ॥

दिट्ठो अज्जो—ण, अज्जआ वसन्तसेणा । तदो एसा भणादि—जुत्तं ण्णेदं सरिसं ण्णेदं जं अहं अज्जचारुदत्तं अहिसारिदुं गच्छन्ती राअमग्गे परिभूदा ।

(**ख**) चन्दणआ एत्थ मह संसओ समुप्पण्णो । (**ग**) कधं दे संसओ ।

(**घ**) संभमघग्घरकण्ठो तुमं पि जादो सि जं तुए भणिदम् ।
दिट्ठो मए क्खु अज्जो पुणो वि अज्जा वसन्तसेणेत्ति ॥

एत्थ मे अप्पच्चओ ।

पत्ररथः पक्षी । शाकुनिकस्य पक्षिणां हन्तुः । **भीताभयेति** । गाथा । भीतेभ्यः अभयप्रदानं ददतः परोपकारे निरतस्य ॥ १९ ॥ परिभूता रथाधिरोहणेन धर्षिता । **संभ्रमेत्यादि** । गाथा । [त्वमपि धीरोऽपि । संभ्रमेण भयव्याकुलतया घर्घरः कण्ठो यस्य ।]

---

१ ०र्धोक्तेन. २ अज्जुआ.

चन्दनकः—अरे कोऽप्रत्ययस्तव। वयं दाक्षिणात्या अव्यक्तभाषिणः। खश-खत्ति-खड-खडत्तु-विड—कर्णाट—कर्ण-प्रावरण-द्राविड—चोल-चीन—बर्बर-खेर-खान-मुख-मधुघात-प्रभृतीनां म्लेच्छजातीनामनेकदेशभाषाभिज्ञा यथेष्टं मन्त्रयामहे दृष्टो दृष्टा वा आर्य आर्या वा। (क)

वीरकः—नन्वहमपि प्रलोकयामि। राजाज्ञैषा। अहं राज्ञः प्रत्ययितः। (ख)

चन्दनकः—तत्किमहमप्रत्ययितः संवृत्तः। (ग)

वीरकः—ननु स्वामिनियोगः। (घ)

चन्दनकः—(स्वगतम्।) आर्यगोपालदारक आर्यचारुदत्तस्य प्रवहणमधिरुह्यापक्रामतीति यदि कथ्यते तदाऽऽर्यचारुदत्तो राज्ञा शास्यते। तत्कोऽत्रोपायः। (विचिन्त्य।) कर्णाटकलहप्रयोगं करोमि। (प्रकाशम्।) अरे वीरक मया चन्दनकेन प्रलोकितं पुनरपि त्वं प्रलोकयसि। कस्त्वम्। (ङ)

वीरकः—अरे त्वमपि कः। (च)

चन्दनकः—पूज्यमानो मान्यमानस्त्वमात्मनो जातिं न स्मरसि।(छ)

वीरकः—(सक्रोधम्।) अरे का मम जातिः। (ज)

चन्दनकः—को भणतु। (झ)

वीरकः—भणतु। (ञ)

(क) अरे को अप्पच्चओ तुह। वअं दक्खिणत्ता अव्वत्तभासिणो। खस-खत्ति-खड-खडत्तु-विलअ-कण्णाट—कण्ण—प्पावरणअ-दविड-चोल—चीण-बर्बर-खेर-खान-मुख—मधुघाद—पहुदाणं मिलिच्छजादीणं अणेअदेसभासाभिण्णा जेहट्ठं मन्तआम दिट्ठो दिट्ठा वा अज्जो अज्जआ वा।

(ख) णं अहं पि पलोएमि। राअअण्णा एसा। अहं रण्णो पच्चइदो।

(ग) ता किं अहं अप्पच्चइदो संवुत्तो। (घ) णं सामिणिओओ।

(ङ) अज्जगोवालदारओ अज्जचारुदत्तस्स पवहणं अहिरुहिअ अवक्कमदित्ति जइ कहिज्जदि तदो अज्जचारुदत्तो रण्णा सासिज्जइ। ता को एत्थ उवाओ। कण्णाटकलहप्पओअं कलेमि। अरे वीरअ मए चन्दणकेण पलोइदं पुणो वि तुमं पलोएसि। को तुमम्। (च) अरे तुमं पि को। (छ) पूइज्जन्तो माणिज्जन्तो तुमं अप्पणो जादिं ण सुमरेसि। (ज) अरे का मह जादी। (झ) को भणउ। (ञ) भणउ।

यत्त्वं जातोऽसि ॥ २० ॥ । कर्णाटकलहः मिथ्याकलहः तस्य प्रयोगं करोमि।]

---

१ अस्मात्परं 'किं शब्दविचारः। स्त्रीपुंनपुंसकव्याख्यानमप्रस्तुतम्' इत्य० ए० पु०।

चन्दनकः—अथ वा न भणामि ।

जानन्नपि खलु जातिं तव च न भणामि शीलविभवेन ।
तिष्ठतु ममैव मनसि किं च कपित्थेन भग्नेन ॥ २१ ॥ (क)

वीरकः—ननु भणतु भणतु । (ख)

(चन्दनकः संज्ञां ददाति ।)

वीरकः—अरे किं न्विदम् । (ग)

चन्दनकः—

शीर्णशिलातलहस्तः पुरुषाणां कूर्चग्रन्थिसंस्थापनः ।
कर्तरीव्यापृतहस्तस्त्वमपि सेनापतिर्जातः ॥ २२ ॥ (घ)

वीरकः—अरे चन्दनक त्वमपि मान्यमान आत्मनो जातिं न स्मरसि । (ङ)

चन्दनकः—अरे का मम चन्दनकस्य चन्द्रविशुद्धस्य जातिः । (च)

वीरकः—को भणतु । (छ)

चन्दनकः—भणतु भणतु । (ज)

(वीरको नाट्येन संज्ञां ददाति ।)

चन्दनकः—अरे किं न्विदम् । (झ)

(क) अह वा ण भणामि ।

जाणन्तो वि हु जादिं तुज्झ अ ण भणामि सीलविहवेण ।
चिट्ठउ मह च्चिअ मणे किं च कइत्थेण भग्गेण ॥

(ख) णं भणउ भणउ । (ग) अरे किं ण्णेदम् ।

(घ) सिण्णसिलाअलहत्थो पुरिसाणं कुच्चगण्ठिसंठवणो ।
कत्तरिवावुदहत्थो तुमं पि सेणावई जादो ॥

(ङ) अरे चन्दणआ तुमं पि माणिज्जन्तो अप्पणोकेरिकं जादिं ण सुमरेसि ।

(च) अरे का मह चन्दणअस्स चन्दविसुद्धस्स जादी ।

(छ) को भणउ । (ज) भणउ भणउ । (झ) अरे किं ण्णेदम् ।

जानन्नपीति । गाथा । [शीलविभवेन मम शीलस्य विभवेन औन्नत्येन] ॥ २१ ॥ संज्ञां ददातीति जात्युचितक्रियाभिनयः । **शीर्णेत्यादि** । गाथा । [शीर्णे शिलातलं क्षुरादितेजनशिलाखण्डः हस्ते यस्य स शीर्णशिलातलहस्तः । पुरुषाणां कूर्चग्रन्थिसंस्थापनः सम्यक्स्थापकः । अनेन पर्यायेण नापितजातिर्दर्शिता] ॥ २२ ॥

वीरकः—अरे शृणु शृणु ।

जातिस्तव विशुद्धा माता भेरी पिताऽपि ते पटहः ।
दुर्मुख करटकभ्राता त्वमपि सेनापतिर्जातः ॥ २३ ॥ (क)

चन्दनकः—(सक्रोधम् ।) अहं चन्दनकश्चर्मकारः । तत्प्रलोकय प्रवहणम् । (ख)

वीरकः—अरे प्रवहणवाहक परिवर्तय प्रवहणम् । प्रलोकयिष्यामि । (ग)

(चेटस्तथा करोति । वीरकः प्रवहणमारोढुमिच्छति । चन्दनकः सहसा केशेषु गृहीत्वा पातयति पादेन ताडयति च ।)

वीरकः—(सक्रोधमुत्थाय ।) अरे अहं त्वया विश्वस्तो राजाज्ञप्तिं कुर्वन्सहसा केशेषु गृहीत्वा पादेन ताडितः । तच्छृणु रे अधिकरणमध्ये यदि ते चतुरङ्गं न कल्पयामि तदा न भवामि वीरकः । (घ)

चन्दनकः—अरे राजकुलमधिकरणं वा व्रज । किं त्वया शुनकसदृशेन । (ङ)

वीरकः—तथा । (इति निष्क्रान्तः ।) (च)

चन्दनकः—(दिशोऽवलोक्य ।) गच्छ रे प्रवहणवाहक गच्छ । यदि कोऽपि पृच्छति तदा भण—चन्दनकवीरकाभ्यामवलोकितं प्रवहणं व्रजति । आर्ये वसन्तसेने इदं चाभिज्ञानं ते ददामि । (इति खड्गं प्रयच्छति ।) (छ)

(क) अरे सुणाहि सुणाहि ।

जादी तुज्झ विसुद्धा मादा भेरी पिदा वि दे पडहो ।
दुम्मुह करडअभादा तुमं पि सेणावई जादो ॥

(ख) अहं चन्दणओ चम्मारओ । ता पलोएहि पवहणम् ।

(ग) अरे पवहणवाहआ पडिवत्तावेहि पवहणम् । पलोइस्सम् ।

(घ) अरे अहं तुए वीसत्थो राआणत्तिं करेन्तो सहसा केसेसु गेण्हिअ पादेन ताडिदो । ता सुणु रे अहिअरणमज्झे जइ दे चउरङ्गं ण कप्पावेमि तदो ण होमि वीरओ ।

(ङ) अरे राअउलं अहिअरणं वा वच्च । किं तुए सुणअसरिसेण । (च) तह ।

(छ) गच्छ रे पवहणवाहआ गच्छ । जइ को वि पुच्छेदि तदो भणेसि—चन्दणअवीरएहिं अवलोइदं पवहणं वच्चइ । अज्जे वसन्तसेणे इमं च अहिण्णाणं दे देमि ।

जातिस्तवेति । गाथा । [करटकस्य वाद्यविशेषस्य भ्राता । अत्र चर्मावगुण्ठितवाद्यानां मातापितृत्वाद्यारोपणेन भङ्ग्यन्तरेण चर्मकारजातिरुक्ता] ॥ २३ ॥

---

१ नाट्येन प्र०. २ पादप्रहारेण दूरीकरोति वीरकम्.

आर्यकः—(खड्गं गृहीत्वा सहर्षमात्मगतम् ।)

अये शस्त्रं मया प्राप्तं स्पन्दते दक्षिणो भुजः ।
अनुकूलं च सकलं हन्त संरक्षितो ह्यहम् ॥ २४ ॥

चन्दनकः—आर्ये ।

अत्र मया विज्ञप्ता प्रत्ययिता चन्दनकमपि स्मरासि ।
न भणाम्येष लुब्धः स्नेहस्य रसेन ब्रूमः ॥ २५ ॥ (क)

आर्यकः—

चन्दनश्चन्द्रशीलाढ्यो दैवादद्य सुहृन्मम ।
चन्दनं भोः स्मरिष्यामि सिद्धादेशस्तथा यदि ॥ २६ ॥

चन्दनकः—

अभयं तव ददातु हरो विष्णुर्ब्रह्मा रविश्च चन्द्रश्च ।
हत्वा शत्रुपक्षं शुम्भनिशुम्भौ यथा देवी ॥ २७ ॥ (ख)

(चेटः प्रवहणेन निष्क्रान्तः ।)

चन्दनकः—(नेपथ्याभिमुखमवलोक्य ।) अरे निष्क्रमतो मम प्रियवयस्यः शर्विलकः पृष्ठत एवानुलग्नो गतः । भवतु । प्रधानदण्डधारको वीरको राजप्रत्ययकारो विरोधितः । तद्यावदहमपि पुत्रभ्रातृपरिवृत एतमेवानुगच्छामि । (इति निष्क्रान्तः ।) (ग)

इति [1]प्रवहणविपर्ययो नाम षष्ठोऽङ्कः ।

(क) अज्जए ।

एत्थ मए विण्णविदा पच्चइदा चन्दणं पि सुमरेसि ।
ण भणामि एस लुद्धो णेहस्स [3]रसेण बोल्लामो ॥

(ख) अभअं तुह देउ हरो विण्हू बम्हा रवी अ चन्दो अ ।
हत्तूण सत्तुवक्खं सुम्भणिसुम्भे जधा देवी ॥

(ग) अरे णिक्कमन्तस्स मे पिअवअस्सो सव्विलओ पिट्ठदो ज्जेव अणुलग्गो गदो । भोदु । पधाणदण्डधारओ वीरओ राअपच्चअआरो विरोधिदो । ता जाव अहंपि पुत्तभादुपडिवुदो एदं ज्जेव अणुगच्छामि ।

अये इति । [पुंसो दक्षिणबाहुस्पन्दः सौभाग्यसूचकः] ॥२४॥ **अत्रेति** । [प्रत्ययिता राज्यलाभेन सिद्धादेशे जातविश्वासा । लुब्धः द्रव्यगृध्नुः] सन्न भणामि ॥२५॥ **चन्दन इति** । तथा यदीत्यादि । राज्यप्राप्तिरूपः ॥ २६ ॥ **अभयमित्यादि** । आर्या । ॥ २७ ॥ विरोधिदो विरोधितः । पुत्रभ्रातृप्रभृतिभिः सहितः । तमार्यकमेव ।

इति प्रवहणविपर्यासो नाम षष्ठोऽङ्कः ।

---

१ मृच्छकटिकायां प्रवहण०; मृच्छ०प्रकरणे. २ विण्णादा. ३ वसेण.

सप्तमोऽङ्कः ।

(ततः प्रविशति चारुदत्तो विदूषकश्च ।)

विदूषकः—भोः पश्य पश्य पुष्पकरण्डकजीर्णोद्यानस्य सश्रीकताम् । (क)

चारुदत्तः—वयस्य एवमेतत् । तथा हि ।

वणिज इव भान्ति तरवः पण्यानीव स्थितानि कुसुमानि ।
शुल्कमिव साधयन्तो मधुकरपुरुषाः प्रविचरन्ति ॥ १ ॥

विदूषकः—भोः इदमसंस्काररमणीयं शिलातलमुपविशतु भवान् । (ख)

चारुदत्तः—(उपविश्य ।) वयस्य चिरयति वर्धमानकः ।

विदूषकः—भणितो मया वर्धमानकः—वसन्तसेनां गृहीत्वा लघु लघ्वागच्छेति । (ग)

चारुदत्तः—तत्किं चिरयति ।

किं यात्यस्य पुरः शनैः प्रवहणं तस्यान्तरं मार्गते
भग्नेऽक्षे परिवर्तनं प्रकुरुते छिन्नोऽथ वा प्रग्रहः ।
वर्त्मान्तोज्झितदारुवारितगतिर्मार्गान्तरं याचते
स्वैरं प्रेरितगोयुगः किमथ वा स्वच्छन्दमागच्छति ॥ २ ॥

(प्रविश्य गुप्तार्यकप्रवहणस्थः ।)

चेटः—यातं गावौ यातम् । (घ)

(क) भो पेक्ख पेक्ख पुप्फकरण्डअजिण्णुज्जाणस्स सस्सिरीअदाम् ।
(ख) भो इमं असक्काररमणीअं सिलाअलं उवाविसदु भवम् ।
(ग) भणिदो मए वड्ढमाणओ—वसन्तसेणिअं गेण्हिअ लहुं लहुं आअच्छ त्ति ।
(घ) जाध गोणा जाध ।

वणिज इति । [पण्यानि विक्रेयवस्तूनि ।] शुल्कं राजदेयम् ॥ १ ॥ असंकारमिति । अकृत्रिमं स्वभावत एवेत्यर्थः । **किमिति** । [तस्य अन्तरं गमनावकाशम् । अक्षे कूबराख्ये । परिवर्तनं विनिमयम् । प्रग्रहः रश्मिः । वर्त्मान्ते अध्वप्रान्ते उज्झितानि दारूनि तैः वारिता गतिर्यस्य । कर्मान्तेति पाठे] कर्मान्तो राजादीनां नियोगविशेषः । तत्संबन्धिनि धर्मे त्यक्तकाष्ठानि

---

१ भणितस्तत्किम्. २ कर्मान्तो०. ३ प्रेषित.

आर्यकः—(स्वगतम् ।)

नरपतिपुरुषाणां दर्शनाद्भीतभीतः
सनिगडचरणत्वात्सावशेषापसारः ।
अविदितमधिरूढो यामि साधोस्तु[1] याने
परभृत इव नीडे रक्षितो वायसीभिः ॥ ३ ॥

अहो नगरात्सुदूरमपक्रान्तोऽस्मि[2] । तत्किमस्मात्प्रवहणादवतीर्य वृक्षवाटिकागहनं प्रविशामि । उताहो प्रवहणस्वामिनं पश्यामि । अथ वा कृतं वृक्षवाटिकागहनेन । अभ्युपपन्नवत्सलः खलु तत्रभवानार्यचारुदत्त श्रूयते । तत्प्रत्यक्षीकृत्य गच्छामि ।

स तावदस्माद्व्यसनान्नवोत्थितं[3] निरीक्ष्य साधुः समुपैति निर्वृतिम् ।
शरीरमेतद्गतमीदृशीं दशां धृतं मया तस्य महात्मनो गुणैः ॥ ४ ॥

चेटः—इदं तदुद्यानम् । यावदुपसर्पामि । (उपसृत्य ।) आर्य मैत्रेय । (क)

विदूषकः—भोः प्रियं ते निवेदयामि । वर्धमानको मन्त्रयते । आगतया वसन्तसेनया भवितव्यम् । (ख)

चारुदत्तः—प्रियं नः प्रियम् ।

विदूषकः—दास्याःपुत्र किं चिरायितोऽसि । (ग)

चेटः—आर्य मैत्रेय मा कुप्य । यानास्तरणं विस्मृतमिति कृत्वा गतागतिं कुर्वंश्चिरायितोऽस्मि । (घ)

(क) इमं तं उज्जाणम् । जाव उवशप्पामि । अज्ज मित्तेअ ।

(ख) भो पिअं दे णिवेदेमि । वड्ढमाणओ मन्तेदि । आगदाए वसन्तसेणाए होदव्वम् । (ग) दासीएपुत्ता किं चिरइदोसि ।

(घ) अज्ज मित्तेअ मा कुप्प । जाणत्थलके विशुमालिदे त्ति कदुअ गदागदिं कलेन्ते चिलइदेम्हि ।

तैः प्रतिरुद्धगमनः ॥ २ ॥ **नरपतीति** । [निगडेन शृङ्खलया सहितः चरणः यस्य तस्य भावस्तत्त्वं तस्मात् ।] सावशेषः किंचिदवशिष्टः अपसारो निर्गमो यस्य । कोकिलपक्षे नरपतिपुरुषाः शाकुनिकाः । सनिगड इव । सनिगडो बाल्यान्मन्दगमनः याने॑ऽधिरूढोऽनवस्थितः । काकस्त्रीरक्षितकोकिल उपमानम् । [मालिनी वृत्तम्] ॥३॥ [अभ्युपपन्नेषु आश्रितेषु वत्सलः ।] **स इति** । [स साधुः अस्मात् व्यसनाद्राजनिग्रहरूपात् नवोत्थितं मां निरीक्ष्य निर्वृतिं सुखं समुपैति तावत् ।]

---

१ सुयाने. २ आगतः. ३ नार्णवो०.

चारुदत्तः—वर्धमानक परिवर्तय प्रवहणम् । सखे मैत्रेय अवतारय वसन्तसेनाम् ।

विदूषकः—किं निगडेन बद्धावस्याः पादौ येन स्वयं नावतरति । (उत्थाय प्रवहणमुद्धाट्य ।) भोः न वसन्तसेना वसन्तसेनः खल्वेषः । (क)

चारुदत्तः—वयस्य अलं परिहासेन । न कालमपेक्षते स्नेहः । अथ वा स्वयमेवावतारयामि । (इत्युत्तिष्ठति ।)

आर्यकः—(दृष्ट्वा ।) अये अयमेव प्रवहणस्वामी । न केवलं श्रुतिरमणीयो दृष्टिरमणीयोऽपि । हन्त रक्षितोऽस्मि ।

चारुदत्तः—(प्रवहणमधिरुह्य दृष्ट्वा च ।) अये तत्कोऽयम् ।

करिकरसमबाहुः सिंहपीनोन्नतांसः
पृथुतरसमवक्षास्ताम्रलोलायताक्षः ।
कथमिदमसमानं प्राप्त एवंविधो यो
वहति निगडमेकं[1] पादलग्नं महात्मा ॥ ५ ॥

ततः[2] को भवान् ।

आर्यकः—शरणागतो गोपालप्रकृतिरार्यकोऽस्मि ।

चारुदत्तः—किं घोषादानीय योऽसौ राज्ञा पालकेन बद्धः ।

आर्यकः—अथ किम् ।

चारुदत्तः—

विधिनैवोपनीतस्त्वं चक्षुर्विषयमागतः ।
अपि प्राणानहं जह्यां न तु त्वां शरणागतम् ॥ ६ ॥

(आर्यको हर्षं नाटयति ।)

चारुदत्तः—वर्धमानक चरणान्निगडमपनय ।

चेटः—यदार्य आज्ञापयति । (तथा कृत्वा[3] ।) आर्य अपनीतानि निगडानि । (ख)

(**क**) किं णिअडेण बद्धा से गोडा जेण सअं ण ओदरेदि । भो ण वसन्तसेणा वसन्तसेणो क्खु एसो । (**ख**) जं अज्जो आणवेदि । अज्ज अवणीदाइं णिगलाइं ।

चन्दनकेन रक्षितत्वात् । [वंशस्थं वृत्तम्] ॥ ४ ॥ **करीति** । [करिणः करः शुण्डादण्डः तेन समौ बाहू यस्य । सिंहस्येव पीनौ उन्नतौ च अंसौ यस्य । पृथुतरमतिविपुलं समं च वक्षो यस्य सः । ताम्रे लोले आयते च अक्षिणी यस्य सः । यः एवंविधो महात्मा इदं असमानमननुरूपं पादलग्नमेकं निगडं कथं वहति । मालिनी वृत्तम्] ॥ ५ ॥

---

१ निगडयुग्मं. २ तत्को. ३ करोति.

आर्यकः—स्नेहमयान्यन्यानि दृढतराणि दत्ता[1]नि ।

विदूषकः—संगच्छस्व निगडानि । एषोऽपि मुक्तः । साम्प्रतं वयं व्रजिष्यामः । (क)

चारुदत्तः—धिक्[2] शान्तम् ।

आर्यकः—सखे चारुदत्त अहमपि प्रणयेनेदं प्रवहणमारूढः । तत्क्षन्तव्यम् ।

चारुदत्तः—अलंकृतोऽस्मि स्वयंग्राह[3]प्रणयेन भवता ।

आर्यकः—अभ्यनुज्ञातो भवता गन्तुमिच्छामि ।

चारुदत्तः—गम्यताम् ।

आर्यकः—भवतु । अवतरामि ।

चारुदत्तः—सखे नावतरितव्यम् । प्रत्यग्रापनीतसंयमनस्य भवतोऽलघुसंचारा[4] गतिः । सुलभपुरुषसंचारेऽस्मिन्प्रदेशे प्रवहणं विश्वासमुत्पादयति । तत्प्रवहणेनैव गम्यताम् ।

आर्यकः—यथाऽऽह भवान् ।

चारुदत्तः—

क्षेमेण व्रज बान्धवान्

आर्यकः—

ननु मया लब्धो भवान्बान्धवः

चारुदत्तः—

स्मर्तव्योऽस्मि कथान्तरेषु भवता

आर्यकः—

स्वात्माऽपि विस्मर्यते ।

चारुदत्तः—

त्वां रक्षन्तु पथि प्रयान्तममराः

आर्यकः—

संरक्षितोऽहं त्वया

(**क**) संगच्छेहि णिअडाइं । एसो वि मुक्को । संपदं अम्हे वजिस्सामो ।

अलघुर्मन्दः संचारो यत्र । लघुरिति पाठे अल्पः । **क्षेमेणेति** । अत्र चारुदत्तार्यकयोरुत्तरोत्तरेण अष्टखण्डः श्लोकः । [एवमुपकृतवांस्त्वं विस्मर्यसे चेन्मया स्वात्माऽपि विस्मर्यते ।

---

१ लग्नानि. २ धिक् । धिक् । शान्तं पापम्. ३ ग्रह. ४ ०संवारा; लघुसं०.

चारुदत्तः—

स्वैर्भाग्यैः परिरक्षितोऽसि

आर्यकः—

ननु हे तत्रापि हेतुर्भवान् ॥ ७ ॥

चारुदत्तः—यदुद्यते[1] पालके महती रक्षा न वर्तते तच्छीघ्रमपक्रामतु भवान् ।

आर्यकः—एवं पुनर्दर्शनाय । (इति निष्क्रान्तः ।)

चारुदत्तः—

कृत्वैवं मनुजपतेर्महद्व्यलीकं
स्थातुं हि क्षणमपि न प्रशस्तमस्मिन् ।
मैत्रेय[2] क्षिप निगडं पुराणकूपे
पश्येयुः क्षितिपतयो हि चारदृष्ट्या ॥ ८ ॥

(वामाक्षिस्पन्दनं सूचयित्वा ।) सखे मैत्रेय वसन्तसेनादर्शनोत्सुकोऽयं जनः । पश्य ।

अपश्यतोऽद्य तां कान्तां वामं स्फुरति लोचनम् ।
अकारणपरित्रस्तं हृदयं व्यथते मम ॥ ९ ॥

तदेहि । गच्छावः । (परिक्रम्य ।) कथमभिमुखमनाभ्युदयिकं श्रमणकदर्शनम् । (विचार्य ।) प्रविशत्वयमनेन पथा । वयमप्यनेनैव पथा गच्छामः । (इति निष्क्रान्तः ।)

इत्यार्यकापहरणं[3] नाम सप्तमोऽङ्कः ।

शार्दूलविक्रीडितं वृत्तम्] ॥७॥ पालके राजनि रक्षक एव वा । रक्षणे महानभिनिवेश इत्यर्थः । **कृत्वेति** । [मनुजपतेः राज्ञः एवं महत् व्यलीकमप्रियं कृत्वा अस्मिन्देशे इ० । निगडमार्यकपादादपनीतम् । चारदृष्ट्या यतः चारचक्षुषः राजानः । तदुक्तम्—‘ चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ’ इति । प्रहर्षिणी वृत्तम्] ॥ ८ ॥ **अपश्यत इति** ॥ ९ ॥ [अभ्युदय उत्कर्षः प्रयोजनमस्याभ्युदयिकम् । ‘प्रयोजनम्’ इति ठञ् । नाभ्युदयिकमनाभ्युदयिकमनिष्टफलम् । ‘काषायीगुडतक्रपङ्कविधवाकुब्जा न दृष्टाः शुभाः ’ इत्युक्तेः ।] श्रमणको भिक्षुः । अशकुनपरंपरा च चारुदत्तवसन्तसेनयोरनिष्टस्याग्रे भविष्यतः सूचनाय ।

इत्यार्यकापवाहनो नाम सप्तमोऽङ्कः ।

---

१ यत्नोद्यते, यत्नेनो०...रक्षा वर्तते. २ (दृष्ट्वा ।) मैत्रेय. ३ मृच्छकटिकायामा०; ०काख्ये प्रकरणे.

अष्टमोऽङ्कः ।

(ततः प्रविशत्यार्द्रचीवरहस्तो भिक्षुः ।)

भिक्षुः—अज्ञाः कुरुत धर्मसंचयम् ।

संयच्छत निजोदरं नित्यं जागृत ध्यानपटहेन ।
विषमा इन्द्रियचौरा हरन्ति चिरसंचितं धर्मम् ॥ १ ॥

अपि च । अनित्यतया प्रेक्ष्य केवलं तावद्धर्माणां शरणमस्मि ।

पञ्चजना येन मारिता स्त्रियं[1] मारयित्वा ग्रामो रक्षितः ।
अबलश्च चण्डालो मारितोऽवश्यं स नरः स्वर्गं गाहते ॥ २ ॥
शिरो मुण्डितं तुण्डं मुण्डितं चित्तं न मुण्डितं किमर्थं[2] मुण्डितम् ।
यस्य पुनश्च चित्तं मुण्डितं साधु सुष्ठु शिरस्तस्य मुण्डितम् ॥ ३ ॥

गृहीतकषायोदकमेतच्चीवरं यावदेतद्राष्ट्रियश्यालकस्योद्याने प्रविश्य पुष्करिण्यां प्रक्षाल्य लघु लघ्वपक्रमिष्यामि । (परिक्रम्य तथा करोति ।) (क)

(क) अज्ञा[3] कलेध धम्मशंचअम् ।
शंजमध[4] णिअपोटं णिच्चं जग्गेध झाणपडहेण ।
विशमा इन्दिअचोला हलन्ति चिलशंचिदं धम्मम् ॥
अवि अ । अणिच्चदाए पेक्खिअ णवलं[5] दाव धम्माणं शलणम्हि ।
पञ्चज्जण जेण मालिदा इत्थिअ मालिअ गाम लक्खिदे ।
अबले अ[6] चण्डाल मालिदे अवसं[7] शे णले शग्ग गाहदि ॥
शिल मुण्डिदे तुण्ड मुण्डिदे चित्त ण मुण्डिदे कीश मुण्डिदे ।
जाह उण अ चित्त मुण्डिदे शाहु शुट्ठु शिल ताह मुण्डिदे ॥

गिहिदकशाओदए एशे चीवले जाव एदं लश्टिअशालकाहकेलके उज्जाणे पविशिअ पोक्खलिणीए पक्खालिअ लहुं लहुं अवक्कमिश्शम् ।

[अथ पूर्वाङ्कान्तसूचितं भिक्षुं प्रवेश्य तदनु शकारस्यापि प्रवेशं प्रवहणविपर्ययेण राष्ट्रियशकटमधिरूढाया वसन्तसेनायाः संकटं वर्णयितुं प्रस्तौति ।] **संयच्छतेति** । गाथा । [निजोदरं संयच्छत केवलमुदरपरायणा मा भवतेत्यर्थः । ध्यानमेव पटहस्तेन जागृत । अज्ञाननिद्रामग्ना मा भवतेत्यर्थः । विषमा दुर्ग्राह्या इन्द्रियाणि एव चौराः चिरसंचितं चिरोपार्जितं धर्मं पुण्यं हरन्ति] ॥१॥ **पञ्चजना इति । शिर इति** । वैतालीछन्दसा द्वयम् । पञ्चेति । ज्जणसंयोगात्पञ्चेति पञ्चशब्दो गुरुः छन्दोनुरोधात् । पञ्चजणेति णकारः । अबले केति केवलः ककारः एकारश्च लघुः । अवसं वीत्यत्र सकारो न प्रविष्टः । अन्यथा अवस्सं वीति स्यात् । शे णले इत्येकारद्वयेऽन्यतरो न गाहतीत्यत्र ‘ गा ’ इत्याकारस्य गुरुत्वम् । पञ्चजनाः पञ्चेन्द्रियाणि । ग्रामः शरीरम् । लक्खिदे रक्षितः । दुष्टत्वविकृतिपातात् । चण्डालोऽहंकारः । अबलोऽसहायः । अथ वेन्द्रियादिविनाशात् । अवश्यं स नरः स्वर्गं गाहते ॥ २ ॥ चित्तं न मुण्डितं न संयत्तीकृतम् । किं मुण्डितम् । साधु शिरो मुण्डितम् । [सत्यामेव चित्तशुद्धौ बहिःसंन्यासः शोभते इत्यर्थः] ॥३॥ राष्ट्रियश्यालकत्वेन च पुनः संयोगः प्रकर्षख्यापनार्थः । अपूपौ द्वावितिवत् वा न पुनरुक्तम् । [चीवरं

---

१ अविद्यां. २ कुतः, किं. ३ अज्जा (आर्याः). ४ संजयमध णिअमुदलं णिच्चं जग्लध. ५ णवल (नरः). ६ क-क (टी०). ७ अवसं षि.

(नेपथ्ये ।)

शकारः—तिष्ठ रे दुष्टश्रमणक तिष्ठ । (क)

भिक्षुः—(दृष्ट्वा सभयम् ।) आश्चर्यम् । एष स राजश्यालसंस्थानक आगतः । एकेन भिक्षुणाऽपराधे कृतेऽन्यमपि यत्र यत्र भिक्षुं पश्यति तत्र तत्र गामिव नासिकां विद्ध्वाऽपवाहयति । तत्कुत्राशरणः शरणं गमिष्यामि । अथ वा भट्टारक एव बुद्धो मे शरणम् । (ख)

(प्रविश्य सखड्गेन विटेन सह)

शकारः—तिष्ठ रे दुष्टश्रमणक तिष्ठ । आपानकमध्यप्रविष्टस्येव रक्तमूलकस्य शीर्षं ते भङ्क्ष्यामि । (इति ताडयति ।) (ग)

विटः—काणेलीमातः न युक्तं निर्वेदधृतकाषायं भिक्षुं ताडयितुम् । तत्किमनेन । इदं तावत्सुखोपगम्यमुद्यानं पश्यतु भवान् ।

अशरणशरणप्रमोदभूतैर्वनतरुभिः क्रियमाणचारुकर्म ।
हृदयमिव दुरात्मनामगुप्तं नवमिव राज्यमनिर्जितोपभोग्यम् ॥ ४ ॥

भिक्षुः—स्वागतम् । प्रसीदतूपासकः । (घ)

(क) चिश्ट ले दुश्टशमणका चिश्ट ।

(ख) ही अविद माणहे । एशे शे लाअशालशंठाणे आअदे । एक्केण भिक्खुणा अवलाहे किदे अण्णं पि जहिं जहिं भिक्खुं पेक्खदि तहिं तहिं गोणं विअ णासं विन्धिअ ओवाहेदि । ता कहिं अशलणे शलणं गमिश्शम् । अध वा भट्टालके ज्जेव बुद्धे मे शलणे ।

(ग) चिश्ट ले दुश्टशमणका चिश्ट । आवाणअमज्झपविश्टश्श विअ लत्तमूलअश्श शीशं दे मोडइश्शम् ।

(घ) शाअदम् । पशीददु उवाशके ।

शाक्यभिक्षुप्रावरणम् ।] ही अविद माणहे इति विस्मयखेदे । आपानकं पानगोष्ठी । पिबन्त्यस्मिन्नित्याधिकरणे ल्युट् । रक्तमूलकस्य शीर्षमिव । मद्यपाः पत्रमयमग्रभागमपनीय मूलकमुपदंशीकुर्वन्ति । [कषायेण लोहितद्रव्यविशेषेण रक्तं काषायम् । 'तेन रक्तं रागात्' इत्यण् । निर्वेदाद्वैराग्येण धृतं काषायं येन तम् ।] **अशरणेति** । [अशरणानां गृहाद्याश्रयरहितानां शरणमाश्रयस्तेन प्रमोदभूतैः आनन्दरूपैर्जातैः । वनतरुभिरुद्यानवृक्षैः क्रियमाणं चारु मनोहरं कर्म यस्मिन् तत् । दुरात्मनां त्वादृशामिति ध्वनिः । हृदयमिव अगुप्तं प्रकटमनियन्त्रितप्रवेशं च । पुनश्च] अनिर्जितमनात्मसात्कृतम् । [अत उपभोग्यं च सर्वैरिति शेषः । सर्वोपभोग्यत्वाद्भिक्षोः प्रवेशो न निषेध्य इत्यर्थः । मालोपमालंकारः । पुष्पिताग्रा वृत्तम्] ॥ ४ ॥ नापितः । स ह्युपासको दृष्ट इत्याशयः ।

---

१ कषायं. २ गम्यमान०.

शकारः—भाव पश्य पश्य । आक्रोशति माम् । (क)

विटः—किं ब्रवीति ।

शकारः—उपासक इति मां भणति । किमहं नापित । (ख)

विटः—बुद्धोपासक इति भवन्तं स्तौति ।

शकारः—स्तुहि श्रमणक स्तुहि । (ग)

भिक्षुः—त्वं धन्यस्त्वं पुण्यः । (घ)

शकारः—भाव धन्यः पुण्य इति मां भणति । किमहं चार्वाकः कोष्टकः कुम्भकारो वा । (ङ)

विटः—काणेलीमातः ननु धन्यस्त्वं पुण्यस्त्वमिति भवन्तं स्तौति ।

शकारः—भाव तत्किमर्थमेष इहागतः । (च)

भिक्षुः—इदं चीवरं प्रक्षालयितुम् । (छ)

शकारः—अरे दुष्टश्रमणक एतन्मम भगिनीपतिना सर्वोद्यानानां प्रवरं पुष्पकरण्डोद्यानं दत्तं यत्र तावच्छुनकाः शृगालाः पानीयं पिबन्ति । अहमपि प्रवरपुरुषो मनुष्यको न स्नामि । तत्र त्वं पुष्करिण्यां पुराणकुलित्थयूषसवर्णान्युग्रगन्धीनि चीवराणि प्रक्षालयसि । तत्त्वामेकप्रहारिकं करोमि । (ज)

(क) भावे पेक्ख पेक्ख । आक्कोशदि मम् ।

(ख) उवाशके त्ति मं भणादि । किं हग्गे णाविदे ।

(ग) थुणु शमणका थुणु । (घ) तुमं धण्णे तुमं पुण्णे ।

(ङ) भावे धण्णे पुण्णे त्ति मं भणादि । किं हग्गे शलावके कोश्टके कोम्भकाले वा ।

(च) भावे ता कीश एशे इध आगदे ।

(छ) इदं चीवलं पक्खो[1]लिदुम् । (ज) अले दुश्टशमणका एशे मम बहिणीवदिणा शव्वुज्जाणाणं पवले पुप्फकलण्डुज्जाणे दिण्णे जहिं दाव शुणहका शिआला पाणिअं पिअन्ति । हग्गे वि पबलपुलिशे मणुश्शके ण ण्हाआमि । तहिं तुमं पुक्खलिणीए पुलाणकुलुत्थजूशा[2]शवण्णाइं उश्शा[3]गन्धिआइं चीवलाइं पक्खालेशि । ता तुमं एकपहालिअं कलेमि ।

शलावकश्चार्वाकः । [स हि धनमर्हतीति धन्यः । केवलमर्थकामपरः । ' अनित्यानि शरीराणि ऋणं कृत्वा घृतं पिबेत् ' इति तस्योपदेशः ।] कोष्टकमिष्टकादिरचितं [निपानं यत्र पशवः पानीयं पिबन्ति ।] एकप्रहारवन्तं करोमि । एकप्रहारेण मारणोक्तावयं प्रयोगः।

---

१ पच्छालिदुं. २ शबलाइं. ३ उद्दुश्श (उग्र); उग्गविस्सगन्धि०.

विटः—काणेलीमातः तथा तर्कयामि यथाऽनेनाचिरप्रव्रजितेन भवितव्यम् ।

शकारः—कथं भावो जानाति । (क)

विटः—किमत्र ज्ञेयम् । पश्य ।

अद्याप्यस्य तथैव केशविरहाद्गौरी ललाटच्छविः
कालस्याल्पतया च चीवरकृतः स्कन्धे न जातः किणः ।
नाभ्यस्ता च कषायवस्त्ररचना दूरं निगूढान्तरो
वस्त्रान्तश्च पटोच्छ्रयात्प्रशिथिलः स्कन्धे न संतिष्ठते ॥ ५ ॥

भिक्षुः—उपासक एवम् । अचिरप्रव्रजितोऽहम् । (ख)

शकारः—तत्किमर्थं त्वं जातमात्र एव न प्रव्रजितः । (इति ताडयति ।) (ग)

भिक्षुः—नमो बुद्धाय । (घ)

विटः—किमनेन ताडितेन तपस्विना । मुच्यताम् । गच्छतु ।

शकारः—अरे तिष्ठ तावद्यावत्संप्रधारयामि । (ङ)

विटः—केन सार्धम् ।

शकारः—आत्मनो हृदयेन । (च)

विटः—हन्त न गतः ।

शकारः—पुत्रक हृदय भट्टारक पुत्रक एष श्रमणकोऽपि नाम किं गच्छतु किं तिष्ठतु । (स्वगतम् ।) नापि गच्छतु नापि तिष्ठतु । (प्रकाशम् ।) भाव संप्रधारितं मया हृदयेन सह । एतन्मम हृदयं भणति । (छ)

(क) कधं भावे जाणादि । (ख) उवाशके एव्वम् । अचिलपव्वजिदे हग्गे ।
(ग) ता कीश तुमं जातमेत्तके ज्जेव ण पव्वजिदे ।
(घ) णमो बुद्धश्श । (ङ) अले चिश्ट दाव जाव शंपधालेमि ।
(च) अत्तणो हडक्केण । (छ) पुत्तका हडक्का भश्टके पुत्तके एशे शमणके अवि णाम किं गच्छदु किं चिश्टदु । णावि गच्छदु णावि चिश्टदु । भावे शंपधालिदं मए हडक्केण शह । एशे मह हडक्के भणादि ।

अद्यापीति । गौरी ललाटे शोभा [तथैव गृहस्थाश्रमस्थितस्यैव] भवति । किणः संघर्षजो व्रणाकारः । वस्त्रकषायीकरणं न शीलितम् । [दूरं निगूढमन्तरं शरीरभागो येन स तथा । पटस्योच्छ्रयाद्दैर्घ्याद्विशालतया वा प्रशिथिलः असंस्थितः] वस्त्रान्तं स्कन्धे न संतिष्ठते । नपुंसकत्वं चिन्त्यम् । निगूढमवकाशो यस्य तत् । संकोचितप्रदेशमित्यर्थः । [काव्यलिङ्गसमुच्चयालंकारौ । शार्दूलविक्रीडितं वृत्तम्] ॥ ५ ॥ तपस्विना वराकेण । हडक्केन हृदयेन । न गतस्तर्हि न गमिष्यतीत्यर्थः ।

---

१ तेनाचिर०. २ अद्यार्यस्य. ३ ०न्तरं वस्त्रान्तं (टी०). ४ मेत्तकं. ५ पुत्तका.

विटः—किं ब्रवीति ।

शकारः—माऽपि गच्छतु माऽपि तिष्ठतु । माऽप्युच्छ्वसितु माऽपि निःश्वसितु । इहैव झटिति पतित्वा म्रियताम् । (क)

भिक्षुः—नमो बुद्धाय । शरणागतोऽस्मि । (ख)

विटः—गच्छतु ।

शकारः—ननु समयेन । (ग)

विटः—कीदृशः समयः ।

शकारः—तथा कर्दमं प्रक्षिपतु यथा पानीयं पङ्काविलं न भवति । अथ वा पानीयं पुञ्जीकृत्य कर्दमे क्षिपतु । (घ)

विटः—अहो मूर्खता ।

विपर्यस्तमनश्चेष्टैः शिलाशकलवर्ष्मभिः ।
मांसवृक्षैरियं मूर्खैर्भाराक्रान्ता वसुंधरा ॥ ६ ॥

(भिक्षुर्नाट्येनाक्रोशति ।)

शकारः—किं भणति । (ङ)

विटः—स्तौति भवन्तम् ।

शकारः—स्तुहि स्तुहि । पुनरपि स्तुहि । (च)

(तथा कृत्वा निष्क्रान्तो भिक्षुः ।)

विटः—काणेलीमातः पश्योद्यानस्य शोभाम् ।

अमी हि वृक्षाः फलपुष्पशोभिताः कठोरनिष्पन्दलतोपवेष्टिताः[1] ।
नृपाज्ञया रक्षिजनेन पालिता नराः[2] सदारा इव यान्ति निर्वृतिम् ॥ ७ ॥

(क) मावि गच्छदु मावि चिश्टदु । मावि ऊशशदु[3] मावि णीशशदु । इध ज्जेव झत्ति[4] पडिअ मलेदु । (ख) णमो बुद्धश्श । शलणागदेम्हि । (ग) णं शमएण । (घ) तधा कद्दमं फेलदु जधा पाणिअं पङ्काइलं ण होदि । अध वा पाणिअं पुञ्जीकदुअ कद्दमे फेलदु । (ङ) किं भणादि । (च) थुणु थुणु । पुणो वि थुणु ।

पङ्काविलं कलुषमिति यावत् । **विपर्यस्तेति** । [विपर्यस्ता विपरीता लोकविरुद्धा मनश्चेष्टा मनोव्यापारो येषां तैः । यद्वा विपर्यस्ते मनः चेष्टा च येषां तैः । शिलाशकलानि पाषाणखण्डा इव वर्ष्माणि शरीराणि येषां तैः । मांसस्य वृक्षा इव तैः । मूर्खैः इयं वसुंधरा भाराक्रान्ता भारनिपीडिता] ॥ ६ ॥ आक्रोशति जुगुप्सते । **अमी इति** । [अमी फलपुष्पशोभिताः कठोराः निष्पन्दा निश्चलाश्च ता लताश्च ताभिः । कठोरं निर्दयं निष्पन्दं निश्चलं च यथा तथा इति वा । उपवेष्टिता आलिङ्गिताः वृक्षाः नृपाज्ञया रक्षिजनेन पालिताः सदारा नरा इव निर्वृतिं सुखं यान्ति । वंशस्थं वृत्तम्] ॥ ७ ॥

१ निष्यन्द. २ नरः. ३ ओशशदु (उपविशतु). ४ झत्ति अ.

शकारः—सुष्ठु भावो भणति ।

बहुकुसुमविचित्रिता च भूमिः कुसुमभरेण विनामिताश्च वृक्षाः ।
द्रुमशिखरलतावलम्बमानाः पनसफलानीव वानरा ललन्ति ॥८॥ (क)

विटः—काणेलीमातः इदं शिलातलमध्यास्यताम् ।

शकारः—एषोऽस्म्यासितः । (इति विटेन सहोपविशति ।) भाव अद्यापि तां वसन्तसेनां स्मरामि । दुर्जनवचनमिव हृदयान्नापसरति । (ख)

विटः—(स्वगतम् ।) तथा निरस्तोऽपि स्मरति ताम् । अथ वा ।

स्त्रीभिर्विमानितानां कापुरुषाणां विवर्धते मदनः ।
सत्पुरुषस्य स एव तु भवति मृदुर्नैव वा भवति ॥ ९ ॥

शकारः—भाव काऽपि वेला स्थावरकचेटस्य भणितस्य प्रवहणं गृहीत्वा लघु लघ्वागच्छेति । अद्यापि नागच्छतीति चिरमस्मि बुभुक्षितः । मध्याह्ने न शक्यते पादाभ्यां गन्तुम् । तत्पश्य पश्य ।

नभोमध्यगतः सूरो दुष्प्रेक्षः कुपितवानरसदृक्षः ।
भूमिर्दृढसंतप्ता हतपुत्रशतेव गान्धारी ॥ १० ॥ (ग)

(क) शुश्टु भावे भणादि ।
बहुकुशुमविचित्तिदा अ भूमी कुशुमभलेण विणामिदा अ लुक्खा ।
दुमशिहललदाअलम्बमाणा पणशफला विअ वाणला ललन्ति ॥

(ख) एशे म्हि आशिदे । भावे अज्ज वि तं वशन्तशेणिअं शुमलामि । दुज्जणवअणं विअ हडक्कादो ण ओशलदि ।

(ग) भावे का वि वेला थावलकचेडश्श भणिदश्श पवहणं गेण्हिअ लहुं लहुं आअच्छे त्ति । अज्ज वि ण आअच्छदि त्ति चिलम्हि बुभुक्खिदे । मज्झण्हे ण शक्कीअदि पादेहिं गन्तुम् । ता पेक्ख पेक्ख ।
णहमज्झगदे शूले दुप्पेक्खे कु[1]दिवाणलशलिच्छे ।
भूमी दढशंतत्ता हदपुत्तशदेव्व गन्धाली ॥

बहुकुसुमेत्यादि । [बहुभिः नानावर्णैः कुसुमैः विचित्रिता भूमिः । वृक्षाः विनामिता विनामं प्रापिताः । द्रुमाणां शिखरलताभ्यः शिखरशाखाभ्यः अवलम्बमानाः वानराः पनसफलानीव ललन्ति शोभन्ते ।] पुष्पिताग्राच्छन्दः । लुक्खा वृक्षाः । ललन्ति विहरन्ति ॥ ८ ॥ **स्त्रीभिरिति** । [स्त्रीभिः विमानितानां अवज्ञया तिरस्कृतानां कापुरुषाणामधीराणां मदनः कामः वर्धते । मृदुः स्ववशः भवति विनश्यति वा] ॥९॥ **नभोमध्येत्यादि** । गाथा । [सूरः सूर्यः । संतप्ता भूमिरातपेन गान्धारी शोकेन ।]

---

१ नु. २ बलेण. ३ दिढ.

विटः—एवमेतत् ।

छायासु प्रतिमुक्तशष्पकवलं निद्रायते गोकुलं
तृष्णार्तैश्च निपीयते वनमृगैरुष्णं पयः सारसम् ।
संतापादतिशङ्कितैर्न नगरीमार्गो नरैः सेव्यते
तप्तां भूमिमपास्य च प्रवहणं मन्ये क्वचित्संस्थितम् ॥ ११ ॥

शकारः—भाव ।

शिरसि मम निलीनो भाव सूर्यस्य पादः
शकुनिखगविहङ्गा वृक्षशाखासु लीनाः ।
नरपुरुषमनुष्या उष्णदीर्घं श्वसन्तो
गृहशरणनिषण्णा आतपं निर्वहन्ति ॥ १२ ॥

भाव अद्यापि स चेटो नागच्छति । आत्मनो विनोदननिमित्तं किमपि गास्यामि । (इति गायति ।) भाव भाव श्रुतं त्वया यन्मया गीतम् । (क)

विटः—किमुच्यते । गन्धर्वो[1] भवान् ।

शकारः—कथं गन्धर्वो न भविष्यामि ।

हिङ्गूज्ज्वला जीरकभद्रमुस्ता वचाया ग्रन्थिः सगुडा च शुण्ठी ।
एषा मया सेविता गन्धयुक्तिः कथं नाहं मधुरस्वर इति ॥ १३ ॥

भाव पुनरपि तावद्गास्यामि । (तथा[2] करोति ।) भाव भाव श्रुतं त्वया यन्मया गीतम् । (ख)

(क) भावे ।

शिलशि मम[3] णिलीणे भाव शुज्जश्श पादे शउणिखगविहङ्गा लुक्खशाहाशु लीणा ।
णलपुलिशमणुश्शा उण्हदीहं शशन्ता घलशलणणिशण्णा आदवं णिव्वहन्ति ॥

भावे अज्ज वि शे चेडे णाअच्छदि । अत्तणो विणोदणणिमित्तं किं पि गाइश्शम् । भावे भावे शुदं तुए जं मए गाइदम् ।

(ख) कधं गन्धव्वे ण भविश्शम् ।

हिङ्गुज्जले जीलकभद्दमुश्ते वचाह गण्ठी शगुडा अ शुण्ठी ।
एशे मए शेविद गन्धजुत्ती कधं ण हग्गे मधुलश्शलेत्ति ॥

भावे पुणो वि दाव गाइश्शम् । भावे भावे शुदं तुए जं मए गाइदम् ।

गान्धारी दुर्योधनादिपुत्रशतमाता ॥ १० ॥ **छायास्विति** । [प्रतिमुक्ताः मुखात्त्यक्ताः शष्पस्य कवला ग्रासा येन तत् । गोकुलं गोसमूहः । सरस इदं सारसम् । 'तस्येदम्' इति अण् । संतापात्सूर्यस्य प्रचण्डातपादतिशङ्कितै भीतैः । अपास्य हित्वा । क्वचित्प्रच्छाये देशे । स्वभावोक्तिः । शार्दूल० छन्दः] ॥ ११ ॥ **शिरसीति** । मालिन्या श्लोकः । [गृहमेव शरणं रक्षितृ तत्र निषण्णा । यद्वा गृहं शरणमिति पुनरुक्तिः शकारोक्तत्वान्न दोषाय । निर्वहन्ति यापयन्ति] ॥१२॥ **हिङ्गूज्ज्वलेति** । उपजातिच्छन्दसा । [वचा उग्रग्रन्धाभिधा ओषधिः । 'वेखण्ड' इति भाषायाम् । गन्धयुक्तिः गन्धद्रव्ययोजना]॥ १३॥

---

१ गन्धर्वोऽसि. २ इति तथा. ३ मह.

विटः—किमुच्यते । गन्धर्वो भवान् ।

शकारः—कथं गन्धर्वो न भवामि ।

हिङ्गूज्ज्वलं दत्तमरीचचूर्णं व्याघारितं तैलघृतेन मिश्रम् ।
भुक्तं मया पारभृतीयमांसं कथं नाहं मधुरस्वर इति ॥ १४ ॥

भाव अद्यापि चेटो नागच्छति । (क)

विटः—स्वस्थो भवतु भवान् । संप्रत्येवागमिष्यति ।

(ततः प्रविशति प्रवहणाधिरूढा वसन्तसेना चेटश्च ।)

चेटः—भीतः खल्वहम् । माध्याह्निकः सूर्यः । मेदानीं कुपितो राजश्यालसंस्थानको भविष्यति । तत्त्वरितं वहामि ।—यातं गावौ यातम् । (ख)

वसन्तसेना—हा धिक् हा धिक् । न खलु वर्धमानकस्यायं स्वरसंयोगः । किं न्विदम् । किं नु खल्वार्यचारुदत्तेन वाहनपरिश्रमं परिहरताऽन्यो मनुष्योऽन्यत्प्रवहणं प्रेषितं भविष्यति । स्फुरति दक्षिणं लोचनम् । वेपते मे हृदयम् । शून्या दिशः । सर्वमेव विसंष्ठुलं पश्यामि । (ग)

शकारः—(नेमिघोषमाकर्ण्य ।) भाव भाव आगतं प्रवहणम् । (घ)

(क) कधं गन्धव्वे ण भवामि ।
हिङ्गुज्जले दिण्णमरीचचुण्णे वग्घालिदे तेल्लघिएँण मिश्शे ।
भुत्ते मए पालहुदीअमंशे कधं ण हग्गे मधुलश्शलेत्ति ॥
भाँवे अज्जवि चेडे णाअच्छदि ।

(ख) भीदे क्खु हग्गे । मज्झण्हिके शुज्जे । मैं दाणिं कुविदे लाअशालशंठाणे हुविश्शदि । ता तुलिदं वहामि ।—जाध गोणा जाध ।

(ग) हद्धी हद्धी । ण क्खु वड्ढमाणअस्स अअं सरसंजोओ । किं ण्णेदम् । किं णु क्खु अज्जचारुदत्तेण वाहणपरिस्समं परिहरन्तेण अण्णो मणुस्सो अण्णं पवहणं पेसिदं भविस्सदि । फुरदि दाहिणं लोअणम् । वेवदि मे हिअअम् । सुण्णाओ दिसाओ । सव्वं ज्जेव विसंठुलं पेक्खामि । (घ) भावे भावे आगदे पवहणे ।

हिङ्गूज्ज्वलमिति । [हिङ्गुना उज्ज्वलम् । दत्तं निक्षिप्तं मरीचचूर्णं यस्मिन् । व्याघारितं घृताक्तम् । तैलघृतेन मिश्रमिति विरुद्धार्थं पुनरुक्तं च । परभृत एव पारभृतः कोकिलस्तस्येदं पारभृतीयम् । 'वृद्धाच्छः' इति छः । मांसं भुक्तम्] ॥ १४ ॥

---

१ ०घिएहि. २ भावे भावे. ३ मा दाव.

विटः—कथं जानासि ।

शकारः—किं न पश्यति भावः । वृद्धशूकर इव घुरघुरायमाणं लक्ष्यते । (क)

विटः—(दृष्ट्वा ।) साधु लक्षितम् । अयमागतः ।

शकारः—पुत्रक स्थावरक चेट आगतोऽसि । (ख)

चेटः—अथ किम् । (ग)

शकारः—प्रवहणमप्यागतम् । (घ)

चेटः—अथ किम् । (ङ)

शकारः—गावावप्यागतौ । (च)

चेटः—अथ किम् । (छ)

शकारः—त्वमप्यागतः । (ज)

चेटः—(सहासम् ।) भट्टारक अहमप्यागतः । (झ)

शकारः—तत्प्रवेशय प्रवहणम् । (ञ)

चेटः—कतरेण मार्गेण । (ट)

शकारः—एतेनैव प्राकारखण्डेन । (ठ)

चेटः—भट्टारक वृषभौ म्रियेते । प्रवहणमपि भज्यते । अहमपि चेटो म्रिये । (ड)

शकारः—अरे राजश्यालकोऽहम् । वृषभौ मृतौ अपरौ क्रेष्यामि । प्रवहणं भग्नमपरं कारयिष्यामि । त्वं मृतः अन्यः प्रवहणवाहको भविष्यति । (ढ)

(क) किं ण पेक्खदि भावे । बुड्ढशूअले विअ घुलघुलाअमाणे लक्खीअदि ।
(ख) पुश्तका[1] थावलका चेडा आगदे शि । (ग) अध इं ।
(घ) पवहणे वि आगदे । (ङ) अध इं । (च) गोणा वि आगदे ।
(छ) अध इं । (ज) तुमं पि आगदे । (झ) भट्टके अहं पि आगदे ।
(ञ) ता पवेशेहि पवहणम् । (ट) कदलेण मग्गेण ।
(ठ) एदेण ज्जेव पाओलि[2]खण्डेण ।
(ड) भट्टके गोणा मलेन्ति । पवहणे वि भज्जेदि । हग्गे वि चेडे मलामि ।
(ढ) अले लाअशालके हग्गे । गोणा मले अवले किणिश्शम् । पवहणे भग्गे अवलं घडाइश्शम् । तुमं मले अण्णे पवहणवाहके हुविश्शदि ।

किं न प्रेक्षते भावः । घुरघुरेत्यव्यक्तशब्दानुकरणम् । अव्यक्तं शब्दं कुर्वाणो लक्ष्यते ।

---

१ पुत्तकाँ, पुश्यका. २ पगाल.

चेटः—सर्वमुपपन्नं भविष्यति । अहमात्मीयो न भविष्यामि । (क)

शकारः—अरे सर्वमपि नश्यतु । प्राकारखण्डेन प्रवेशय प्रवहणम् । (ख)

चेटः—विभज्यस्व रे प्रवहण समं स्वामिना विभज्यस्व । अन्यत्प्रवहणं भवतु । भट्टारकं गत्वा निवेदयामि । (प्रविश्य ।) कथं न भग्नम् । भट्टारक एतदुपस्थितं प्रवहणम् । (ग)

शकारः—न च्छिन्नौ वृषभौ । न मृता रज्जवः । त्वमपि न मृतः । (घ)

चेटः—अथ किम् । (ङ)

शकारः—भाव आगच्छ । प्रवहणं पश्यावः । भाव त्वमपि मम गुरुः परमगुरुः । प्रेक्ष्यसे सादरकोऽभ्यन्तरक इति पुरस्करणीय इति । त्वं तावत्प्रवहणमग्रतोऽधिरोह । (च)

विटः—एवं भवतु । (इत्यारोहति ।)

शकारः—अथ वा तिष्ठ त्वम् । तत्र [1]पितृसंबन्धि प्रवहणं येन त्वमग्रतोऽधिरोहसि । अहं प्रवहणस्वामी । अग्रतः प्रवहणमधिरोहामि । (छ)

विटः—भवा[2]नेवं ब्रवीति ।

(क) शव्वं उववण्णं हुविश्शदि । हग्गे अत्तणकेलके ण हुविश्शम् ।

(ख) अले शव्वं पि णश्शदु । पाआलखण्डेण पवेशेहि पवहणम् ।

(ग) वि[3]भञ्ज ले पवहण शमं शामिणा विभञ्ज । अण्णे पवहणे भोदु । भट्टके गदुअ विण्णवेमि । कधं ण भग्गे । भट्टके एशे उवत्थिदे पवहणे ।

(घ) ण छिण्णा गोणा । ण मला लज्जू । तुमं पि ण मले । (ङ) अध इं ।

(च) भाव आअच्छ । पवहणं पेक्खामो । भावे तुमं पि मे गुलु पलमगुलु । पेक्खीअशि शादलके अब्भन्तलकेत्ति पुल[4]क्कलणीएत्ति । तुमं दाव पवहणं अग्गदो अहिलुह ।

(छ) अध वा चिस्ट तुमम् । तु[5]हं बप्पकेलके पवहणे जेण तुमं अग्गदो अहिलुहशि । हग्गे पवहणशामी । अग्गदो पवहणं अहिलुहामि ।

पगालखण्डेण प्राकारखण्डपथेनैव प्रवेशय । दैवगत्या तु न भग्नं प्रवहणमित्याह—कथं न भग्नमिति । ण छिण्गा लज्जू ण मला गोणा इति वक्तव्ये शकारोक्तत्वाद्भ्रमणम् । मम गुरुः । गुरुरित्यतिमान्यत्वपरम् । एवं त्वं प्रेक्षसे । [प्रेक्ष्यसे मयेति शेषः । सादरकः आदरयुक्तः । अभ्यन्तरको रहस्येऽभ्यन्तरीकृतः ।

---

१ पितुः प्रव० इति क्वचिच्छाया. २ भवानेव. ३ विभज्ज विभज्ज. ४ पुक्कलणीआ (पुष्कलनीयः). ५ तुहप्पके (तव संबन्धि).

शकारः—यद्यप्यहमेवं भणामि तथाऽपि तवैष आचारोऽधिरोह भट्टारकेति भणितुम् । (क)

विटः—आरोहतु भवान् ।

शकारः—एष सांप्रतमधिरोहामि । पुत्रक स्थावरक चेट परिवर्तय प्रवहणम् । (ख)

चेटः—(परिवर्त्य ।) अधिरोहतु भट्टारकः । (ग)

शकारः—(अधिरुह्यावलोक्य च शङ्कां नाटयित्वा त्वरितमवतीर्य विटं कण्ठेऽवलम्ब्य ।) भाव भाव मृतोऽसि मृतोऽसि । प्रवहणाधिरूढा राक्षसी चौरो वा प्रतिवसति । तद्यदि राक्षसी तदोभावपि मुषितौ । अथ चौरः तदोभावपि खादितौ । (घ)

विटः—न भेतव्यम् । कुतोऽत्र वृषभयाने राक्षस्याः संचारः । मा नाम ते मध्याह्नार्कतापाच्छिन्नदृष्टेः स्थावरकस्य सकञ्चुकां छायां दृष्ट्वा भ्रान्तिरुत्पन्ना ।

शकारः—पुत्रक स्थावरक चेट जीवसि । (ङ)

चेटः—अथ किम् । (च)

शकारः—भाव प्रवहणाधिरूढा स्त्री प्रतिवसति । तदवलोकय । (छ)

विटः—कथं स्त्री ।

(**क**) जइ वि हग्गे एव्वं भणामि तधा वि तुह एशे आदले अहिलुह भश्टकेत्ति भणिदुम् ।

(**ख**) एशे शंपदं अहिलुहामि । पुत्तका थावलका चेडा पलिवत्तावेहि पवहणम् ।

(**ग**) अहिलुहदु भट्टालके ।

(**घ**) भावे भावे मलेशि मलेशि । पवहणाधिरूढा लक्खशी चोले वा पडिवशदि । ता जइ लक्खशी तदो उभे वि मूशे । अध चोले तदो उभे वि खज्जे ।

(**ङ**) पुश्तका थावलका चेडा जीवेशि । (**च**) अध इं ।

(**छ**) भावे पवहणाधिलूढा इश्थिआ पडिवशदि । तां अवलोएहि ।

पुरस्करणीयः संमाननीयः ।] मूशे खज्जे इति विपरीतोक्तिः शकारवाक्यत्वात् ।

---

१ परावृत्य. २ त्रासं. ३ न भेतव्यं न भेत०. ४ राक्षससंचारः. ५ अवसरः. ६ खिन्न. ७ सकूर्चकाम्. ८ पश्थका; पुत्तका. ९ पवहणाहिं (प्रवहणान्तः). १० इत्थिआ. ११ अतो पलोएहि.

अवनतशिरसः प्रयाम शीघ्रं पथि वृषभा इव वर्षताडिताक्षाः ।
मम हि सदसि गौरवप्रियस्य कुलजनदर्शनकातरं हि चक्षुः ॥ १५ ॥

वसन्तसेना—(सविस्मयमात्मगतम् ।) कथं मम नयनयोरायासकर एव राजश्यालः । तत्संशयितास्मि मन्दभाग्या । एतदिदानीं मम मन्दभागिन्या ऊषरक्षेत्रपतित इव बीजमुष्टिर्निष्फलमिहागमनं संवृत्तम् । तत्किमत्र करिष्यामि । (क)

शकारः—कातरः खल्वेष वृद्धचेटः प्रवहणं नावलोकयति । भाव आलोकय प्रवहणम् । (ख)

विटः—को दोषः । भवतु । एवं तावत् ।

शकारः—कथं शृगाला उड्डयन्ते वायसा व्रजन्ति । तद्यावद्भावोऽक्षिभ्यां भक्ष्यते दन्तैः प्रेक्ष्यते तावदहं पलायिष्ये । (ग)

विटः—(वसन्तसेनां दृष्ट्वा । सविषादमात्मगतम् ।) कथमये मृगी व्याघ्रमनुसरति । भोः कष्टम् ।

शरच्चन्द्रप्रतीकाशं पुलिनान्तरशायिनम् ।
हंसी हंसं परित्यज्य वायसं समुपस्थिता ॥ १६ ॥

(क) कधं मम णअणाणं आआसअरो ज्जेव राअसालओ । ता संसइदम्हि मन्दभाआ । एसो दाणिं मम मन्दभाइणीए ऊसरक्खेत्तपडिदो विअ बीअमुट्टी णिप्फलो इध आगमणो संवुत्तो । ता किं एत्थ करइस्सम् ।

(ख) कादले क्खु एशे बुड्ढचेडे[1] पवहणं णावलोएदि । भावे आलोएहि पवहणम् ।

(ग) कधं शिआला उड्डेन्ति वाअशा वच्चेन्ति । ता जाव भावे अक्खीहिं भक्खीअदि दन्तेहिं पेक्खीअदि ताव हग्गे पलाइश्शम् ।

अवनतेत्यादि । [पथि मार्गे वर्षेण धारासारेण ताडितानि अक्षीणि येषां ते वर्षताडिताक्षाः अत एव अवनतशिरसः वृषभा इव अवनतशिरसः शीघ्रं प्रयाम । सदसि सभायां गौरवमात्मनि बहुमानः प्रियः यस्य तस्य मम चक्षुः कुलजनदर्शनकातरं कुलस्त्रीविलोकनभीरु हि । सामान्यस्त्रीदर्शनं त्वदुष्टमिति ध्वनिः । पुष्पिताग्रा वृत्तम्] ॥ १५ ॥ [ऊषरक्षेत्रे क्षारभूमौ ।] बुड्ढचेडे निन्दितश्रोतः । 'वृद्धश्वोन्नेषांह्य इत्याघाचकः । अकारणात् ' इति पूर्वटीका । अक्षिभ्यां भक्ष्यते दन्तैः प्रेक्ष्यते । शाकारवाक्यत्वाद्विपरीतोक्तिः । **शरदिति**। [शरच्चन्द्रप्रतीकाशं शरदिन्दुधवलं पुलिनान्तरे सैकतप्रदेशे शेते इति तं हंसम् । वसन्तसेना रूपादिगुणसंपन्नं चारुदत्तं विहाय मूर्खं शकारं कथमुपस्थितेत्यर्थः । अप्रस्तुतप्रशंसालंकारः सारूप्यनिबन्धनः] ॥ १६ ॥

---

१ बुड्ढखोडे.

(जनान्तिकम् ।) वसन्तसेने न युक्तमिदं नापि सदृशमिदम् ।

पूर्वं मानादवज्ञाय द्रव्यार्थे जननीवशात् ।

वसन्तसेना—न । (इति शिरश्चालयति ।) (क)

विटः—

अशौण्डीर्य[1]स्वभावेन वेशभावेन मन्यते ॥ १७ ॥

ननूक्तमेव मया भवतीं प्रति—'सममुपचर भद्रे सुप्रियं चाप्रियं च । '

वसन्तसेना—प्रवहणविपर्यासेनागता । शरणागताऽस्मि । (ख)

विटः—न भेतव्यं न भेतव्यम् । भवतु । एनं वञ्चयामि । (शकारमुपगम्य ।) काणेलीमातः सत्यं राक्षस्येवात्र प्रतिवसति ।

शकारः—भाव भाव यदि राक्षसी प्रतिवसति तत्कथं न त्वां मुष्णाति । अथ चौरः तदा किं त्वं न भक्षितः । (ग)

विटः—किमनेन निरूपितेन । यदि पुनरुद्यानपरंपरया पद्भ्यामेव नगरीमुज्जयिनीं प्रविशावः तदा को दोषः स्यात् ।

शकारः—एवं कृते किं भवति । (घ)

विटः—एवं कृते व्यायामः सेवितो धुर्याणां च परिश्रमः[2] परिहृतो भवति ।

शकारः—एवं भवतु । स्थावरक चेट नय प्रवहणम् । अथ वा तिष्ठ तिष्ठ । देवतानां ब्राह्मणानां चाग्रतश्चरणेन गच्छामि । न हि न हि । प्रवहणमधिरुह्य गच्छामि । येन दूरतो मां प्रेक्ष्य भणिष्यन्ति—एष स राष्ट्रियश्यालो भट्टारको गच्छति । (ङ)

(क) ण । (ख) पवहणविपज्जासेण आगदा । सरणागदम्हि ।

(ग) भावे भावे जइ लक्खशी पडिवशदि ता कीश ण तुमं मूशेदि । अध[3] चोले ता किं तुमं ण भक्खिदे[4] । (घ) एव्वं किदे किं भोदि ।

(ङ) एवं भोदु । थावलआ चेडा णेह पवहणम् । अध वा चिस्ट चिस्ट । देवदाणं बम्हणाणं च अग्गदो चलणेण गच्छामि । ण हि ण हि । पवहणं अहिलुहिअ गच्छामि जेण दूलदो मं पेक्खिअ भणिश्शन्ति–एशे शे लस्टिअशाले भस्टालके गच्छदि ।

पूर्वमिति । [पूर्वं प्रथमाङ्के शकारानुगमने मानाद्राजश्यालमवज्ञाय संप्रति जननीवशान्मात्राज्ञानुरोधाद् द्रव्यार्थे आगतेति शेषः । अशौण्डीर्यमनौदार्यं कृपणमतित्वमिति यावत् । तत्स्वभावः यस्य तेन वेशभावेन आगताऽसीति मन्यते] ॥ १७ ॥ भक्खिदे भक्षितः । विपरीतोक्तिः पूर्ववत् । अथ वेत्यतलस्थोक्तिः । श्रृगाला उड्डीयन्त इत्यादि चतुष्टयमपक्रमम् । [धुर्याणां प्रवहणबलीवर्दयोः । सामान्याभिप्रायं बहुवचनम् ।] देवदाणं अग्गदो गच्छामि । न हि न हीति न्यायविरुद्धम् ।

---

१ अशौटीर्य. २ भ्रमः. ३ अध वा. ४ खज्जे (खादितः).

विटः—(स्वगतम् ।) दुष्करं विषमौषधीकर्तुम् । भवतु । एवं तावत् । (प्रकाशम् ।) काणेलीमातः एषा वसन्तसेना भवन्तमभिसारयितुमागता ।

वसन्तसेना—शान्तं पापम् । शान्तं पापम् । (क)

शकारः—(सहर्षम् ।) भाव भाव मां प्रवरपुरुषं मनुष्यं वासुदेवकम् । (ख)

विटः—अथ किम् ।

शकारः—तेन ह्यपूर्वा श्रीः समासादिता । तस्मिन्काले मया रोषिता । सांप्रतं पादयोः पतित्वा प्रसादयामि । (ग)

विटः—साध्वभिहितम् ।

शकारः—एष पादयोः पतामि । (इति वसन्तसेनामुपसृत्य ।) मातः अम्बिके श‍ृणु मम विज्ञप्तिम् ।

> **एष पतामि चरणयोर्विशालनेत्रे**
> **हस्ताञ्जलिं दशनखे तव शुद्धदन्ति ।**
> **यत्तव मयाऽपकृतं मदनातुरेण**
> **तत्क्षामिताऽसि वरगात्रि तवास्मि दासः ॥ १८ ॥** (घ)

वसन्तसेना—(सक्रोधम् ।) अपेहि । अनार्य मन्त्रयसे । (इति पादेन ताडयति ।) (ङ)

(क) सन्तं[2] पावम् । सन्तं पावम् । (ख) भावे भावे मं पबल[3]पुलिशं मणुश्शं वाशुदेवकम् । (ग) तेण हि अपुव्वा शिली शमाशादिदा । तश्शिं काले मए लोशा[4]इदा । शंपदं पादेशुं पडिअ पशादेमि ।

(घ) एशे पादेशुं पडेमि । अत्तिके अम्बिके शुणु मम विण्णत्तिम् ।

एशे पडा[5]मि चलणेशु विशालणेत्ते हश्तञ्जलिं दश[6]णहे तव शुद्धदन्ति ।
जं तं मए अवकिदं म[7]दणातुलेण तं खम्मिदाशि वलगत्ति तव म्हि दाशे ॥

(ङ) अवेहि । अणज्जं मन्तेसि ।

[विषमौषधीकर्तुं[1] दुर्जनमानुकूल्येन परिवर्तयितुमित्यर्थः । वासुदेव इव वासुदेवकः तम् । 'इवे प्रतिकृतौ' इति इवार्थे कन् ।] **एष पतामीत्यादि** । [हे विशालनेत्रे एषोऽहं तव चरणयोः पतामि । हे शुद्धदन्ति शुद्धा दन्ता यस्याः तत्संबुद्धिः । तव दशनखे चरणयोः दशसु नखेषु हस्ताञ्जलिं करोमीति शेषः । मदनातुरेण कामपीडितेन मया यत्तव अपकृतं तत् क्षामिताऽसि तदर्थं क्षमां याचिताऽसि । हे वरगात्रि तव

---

१ ओष०. २ शन्तं. ३ पुलिशमणु०. ४ लोशायिदा. ५ पडेमि. ६ दशणहं. ७ मदणाउलेन.

शकारः—(सक्रोधम् ।)

यच्चुम्बितमम्बिकामातृकाभिर्गतं न देवानामपि यत्प्रणामम् ।
तत्पातितं पादतलेन मुण्डं वने शृगालेन यथा मृताङ्गम् ॥ १९ ॥

अरे स्थावरक चेट कुत्र त्वयैषा समासादिता । (क)

चेटः—भट्टक ग्रामशकटै रुद्धो राजमार्गः । तदा चारुदत्तस्य वृक्षवाटिकायां प्रवहणं स्थापयित्वा तत्रावतीर्य यावच्चक्रपरिवृत्तिं करोमि तावदेषा प्रवहणविपर्यासेनेहारूढेति तर्कयामि । (ख)

शकारः—कथं प्रवहणविपर्यासेनागता । न मामभिसारयितुम् । तदवतरावतर मदीयात्प्रवहणात् । त्वं तं दरिद्रसार्थवाहपुत्रकमभिसारयसि । मदीयौ गावौ वाहयसि । तदवतरावतर । गर्भदास्यवतरावतर । (ग)

वसन्तसेना—तमार्यचारुदत्तमभिसारयसीति यत्सत्यमलंकृताऽस्म्यमुना वचनेन । सांप्रतं यद्भवतु तद्भवतु । (घ)

(**क**) जे चुम्बिदे अम्बिकमादुकेहिं गदे ण देवाण[1] वि जे पणामम् ।
शे पाडिदे पादतलेण मुण्डे वणे शिआलेण जधा मुदङ्गे[2] ॥

अले थावलआ चेडा कहिं तुए एशा शमाशादिदा ।

(**ख**) भट्टके गामशअलेहिं लुद्धे लाअमग्गे । तदो चालुदत्तश्श लुक्खवाडिआए पवहणं थाविअ तहिं ओदलिअ जाव चक्कपलिवट्टिअं कलेमि ताव एशा पवहणविपैज्जाशेण[3] इह आलूढेत्ति तक्केमि ।

(**ग**) कधं पवहणविपज्जाशेण आगदा । ण मं अहिशालिदुम् । ता ओदल ओदल ममकेलकादो पवहणादो । तुमं तं दलिद्दशात्थवाहपुत्तकं[4] अहिशालेशि । ममकेलकाइं गोणाइं वाहेशि । ता ओदल ओदल । गब्भदाशि ओदल ओदल ।

(**घ**) तं अज्जचारुदत्तं अहिसारेसित्ति जं सच्चं अलंकिदम्हि इमिणा वअणेण । संपदं जं भोदु तं भोदु ।

दासः अस्मि । वसन्ततिलकम् ।] ॥ १८ ॥ **यच्चुम्बितमिति** । [यदम्बिकया मात्रा चुम्बितम् । यद्देवानामपि प्रणामं न गतं तान्न प्रणतम् । तन्मे मुण्डं शिरः वन शृगालेन मृताङ्गं शवशरीरमिव पादतलेन पातितम् । अम्बिकामातृभिरिति पुनरुक्तं सर्वत्र पुंलिङ्गबहुवचनत्वं च शकारवचनत्वादित्यवसेयम् ।] उपजात्या । ये चुम्बिता मातृकाम्बिकाभिर्गता न देवानामपि ये प्रणामम् । ते पातिताः पादतलेन मुण्डा वने शृगालेन यथा मृदङ्गाः ॥ मातृका इति स्वार्थे कः । मुण्डा इति बहुवचनमप्यनर्थकम् ॥ १९ ॥ [गर्भदासि जन्मत एव दासि । अतः कस्ते गर्व इति भावः ।]

---

१ देवाणं. २ मिदङ्गे. ३ विपलट्टणेण (विपर्ययेण); पलिवट्टणेण (परिवर्तनेन). ४ पुत्तहकं.

शकारः—

एताभ्यां ते दशनखोत्पलमण्डलाभ्यां
हस्ताभ्यां चाटुशतताडनलम्पटाभ्याम् ।
कर्षामि ते वरतनुं निजयानका-
त्केशेषु वालिदयितामिव यथा जटायुः ॥ २० ॥ (क)

विटः—

अग्राह्या मूर्धजेष्वेताः स्त्रियो गुणसमन्विताः ।
न लताः पल्लवच्छेदमर्हन्त्युपवनोद्भवाः ॥ २१ ॥

तदुत्तिष्ठ त्वम् । अहमेनामवतारयामि । वसन्तसेने अवतीर्यताम् ।

(वसन्तसेनाऽवतीर्यैकान्ते स्थिता ।)

शकारः—(स्वगतम् ।) योऽसौ मम वचनावमानेन तदा रोषाग्निः संधुक्षितोऽद्यैतस्याः पादप्रहारेणानेन प्रज्वलितः । तत्सांप्रतं मारयाम्येनाम् । भवतु । एवं तावत् । (प्रकाशम् ।) भाव भाव ।

यदीच्छसि लम्बदशाविशालं प्रावारकं सूत्रशतैर्युक्तम् । (ख)
मांसं च खादितुं तथा तुष्टिं कर्तुं चुहू चुहू चुक्कु चुहू चुहू इति ॥२२॥

(क) एदेहिं दे दशणहुप्पलमण्डलेहिं
हस्तेहिं चाडुशदताडणलम्पडेहिं ।
कड्ढामि दे वलतणुं णिअजाणकादो
केशेशु वालिदइअं वि जहा जडाऊ ॥

(ख) जे शे मम वअणावमाणेण तदा लोशग्गी शंधुक्खिदे अज्ज एदाए पादप्पहालेण अणेण पज्जलिदे । तं शंपदं मालेमिणम् । भोदु । एव्वं दाव । भावे भावे ।
जदिच्छशे लम्बदशाविशालं पावालअं शुत्तशदेहिं जुत्तम् ।
मंशं च खादुं तह तुस्टि कादुं चुहू चुहू चुक्कु चुहू चुहूत्ति ॥

एताभ्यामित्यादि । वसन्ततिलकच्छन्दसा । सबिन्दोः पाक्षिकगुरुत्वात् एदेहिं हत्थेहिं इत्यनयोर्लघुत्वम् । [दश नखा एव उत्पलमण्डलं ययोस्ताभ्याम् । चाटुशतेन प्रियवचनशतेन यत्ताडनं तत्र लम्पटाभ्यामुत्सुकाभ्याम् । एताभ्यां हस्ताभ्यां ते वरतनुं केशेषु गृहीत्वा निजयानकात्कर्षामि । यथा इव ।] कर्षयामि दे त्वाम् । वरतनु निजयानकात्केशेषु वालिदयितामिव यथा केशेषु जटायुराकृष्टवान् । पाठान्तरे हनूमानित्यर्थः । [ते ते इति यथा इव इति च पुनरुक्तम् । वालिदयिताया जटायुना कर्षणाभावात्] व्याहतोपमं चेदम् । [शकारोक्तित्वेन चमत्कृतिमत्] ॥ २० ॥ **अग्राह्या इति** । [गुणसमन्विताः सौन्दर्यादिगुणोपेताः । दृष्टान्तालंकारः] ॥ २१ ॥ योऽसौ सोऽद्यैतस्याः इत्यादि । ततः सांप्रतं मारयाम्येनाम् । **यदीच्छसीत्यादि** । उपजातिच्छन्दसा । प्रावारकं प्रच्छदं सूत्रशतैर्ग्रथितम् । [यदि इच्छसि मत्त इति शेषः ।] मत्स्यं च खादितुम् । चुहू चुहू चुक्कु चुहू चुहूत्ति इत्यनुकरणम् ॥ २२ ॥

---

१ नु. २ लता...त्युपवनोद्भवा. ३ न्तुपव०. ४ त्वहमेनाम्. ५ हत्थेहिं. ६ वड्ढामि, वड्ढामि. ७ हणूमे (हनूमान्). ८ चुहुत्ति.

विटः—ततः किम् ।

शकारः—मम प्रियं कुरु । (क)

विटः—बाढं करोमि वर्जयित्वा त्वकार्यम् ।

शकारः—भाव अकार्यस्य गन्धोऽपि नास्ति । राक्षसी काऽपि नास्ति । (ख)

विटः—उच्यतां तर्हि ।

शकारः—मारय वसन्तसेनाम् । (ग)

विटः—(कर्णौ पिधाय ।)

बालां स्त्रियं च नगरस्य विभूषणं च
वेश्यामवेशसदृशप्रणयोपचाराम् ।
एनामनागसमहं यदि घातयामि
केनोडुपेन परलोकनदीं तरिष्ये ॥ २३ ॥

शकारः—अहं त उडुपं दास्यामि । अन्यच्च विविक्त उद्यान इह मारयन्तं कस्त्वां प्रेक्षिष्यते । (घ)

विटः—

पश्यन्ति मां दश दिशो वनदेवताश्च
चन्द्रश्च दीप्तकिरणश्च दिवाकरोऽयम् ।
धर्मानिलौ च गगनं च तथाऽन्तरात्मा
भूमिस्तथा सुकृतदुष्कृतसाक्षिभूता ॥ २४ ॥

शकारः—तेन हि पटान्तापवारितां कृत्वा मारय । (ङ)

विटः—मूर्ख अपध्वस्तोऽसि ।

(क) मम पिअं कलेहि । (ख) भावे[4] अकज्जाह गन्धे वि णत्थि । लक्खशी कावि णत्थि । (ग) मालेहि वसन्तशेणिअम् ।

(घ) अहं ते भेडकं दइश्शम् । अण्णं च विवित्ते उज्जाणे इध मालन्तं को तुमं पेक्खिश्शदि । (ङ) तेण हि पडन्तोवालिदं[5] कदुअ मालेहि ।

बालामिति। [वेश्यां तथाऽपि अवेशसदृशः । कुलस्त्रीजनोचित इत्यर्थः । प्रणयोपचारः यस्याः । धनलोभविरहादिति भावः । अनागसं निरपराधामेनां यदि घातयामि । केनोडुपेन प्लवेन । तरिष्ये अत्रात्मनेपदं चिन्त्यम् । वसन्त० वृत्तम् ।] अवेशसदृशेति । अवेश्यापाठकोचितमकृत्रिमम् ॥२३॥ [एडकमिति पाठे मेषम् । परलोकनदीतरणायेति शेषः ।] विविक्ते विजने । **पश्यन्तीति** । [अयमिति गगनस्थितसूर्यस्य हस्तेन निर्देशः । अनिलः वायुः । सुकृतदुष्कृतयोः पुण्यपापकर्मणोः साक्षिभूता प्रत्यक्षद्रष्ट्री । एतल्लिङ्गवचनविपरिणामेन सर्वत्र योज्यम्] ॥ २४ ॥

---

१ नरलोकावि. २ एडकम्. ३ धिक्कृतः. ४ भावे भावे. ५ वलितं (वलितां).

शकारः—अधर्मभीरुरेष वृद्धशृगालः । भवतु । स्थावरकं चेटमनुनयामि । पुत्रक स्थावरक चेट सुवर्णकटकानि दास्यामि । (क)

चेटः—अहमपि परिधास्यामि । (ख)

शकारः—सौवर्णं ते पीठकं कारयिष्यामि । (ग)

चेटः—अहमप्युपवेक्ष्यामि । (घ)

शकारः—सर्वं त उच्छिष्टं दास्यामि । (ङ)

चेटः—अहमपि खादिष्यामि । (च)

शकारः—सर्वचेटानां महत्तरकं कारयिष्यामि । (छ)

चेटः—भट्टक भविष्यामि । (ज)

शकारः—तन्मन्यस्व मम वचनम् । (झ)

चेटः—भट्टक सर्वं करोमि वर्जयित्वाऽकार्यम् । (ञ)

शकारः—अकार्यस्य गन्धोऽपि नास्ति । (ट)

चेटः—भणतु भट्टकः । (ठ)

शकारः—एनां वसन्तसेनां मारय । (ड)

चेटः—प्रसीदतु भट्टकः । इयं मयाऽनार्येणार्या प्रवहणपरिवर्तनेनानीता । (ढ)

(क) अधम्मभीलू एशे बुड्ढकोले[१] । भोदु । थावलअं चेडं अणुणेमि । पुत्थका[२] थावलका चेडा शोवण्णखडुआइं[३] दइश्शम् ।

(ख) अहं पि पहिलिश्शम् । (ग) शोवण्णं दे पीठकं[४] कालइश्शम् ।

(घ) अहं पि उवविशिश्शम् । (ङ) शव्वं दे उच्छिट्टं[५] दइश्शम् ।

(च) अहं पि खाइश्शम् ।

(छ) शव्वचेडाणं[६] महत्तलकं कलइश्शम् । (ज) भट्टके[७] हुविश्शम् ।

(झ) ता मण्णेहि[८] मम वअणम् ।

(ञ) भट्टके शव्वं कलेमि वज्जिअ अकज्जम् ।

(ट) अकज्जाह गन्धे वि णत्थि[९] । (ठ) भणादु भट्टके ।

(ड) एणं वशन्तशेणिअं मालेहि ।

(ढ) पशीददु भट्टके । इअं मए अणज्जेण अज्जा पवहणपलिवत्तणेण आणीदा ।

खडुआइं वाहुवलयविशेषान् । पीठके पीठम् । उच्छिट्टअं भोजनावशिष्टम् ।

---

१ खोले (शृगालः). २ पुत्तका. ३ खण्डाइं. ४ पीठके. ५ ०श्टअं. ६ चेडआणं. ७ भट्टके. ८ माणेहि (मानय). ९ णश्ति.

शकारः—अरे चेट तवापि न प्रभवामि । (क)

चेटः—प्रभवति भट्टकः शरीरस्य न चारित्रस्य । तत्प्रसीदतु प्रसीदतु भट्टकः । बिभेमि खल्वहम् । (ख)

शकारः—त्वं मम चेटो भूत्वा कस्माद्बिभेषि । (ग)

चेटः—भट्टक परलोकात् । (घ)

शकारः—कः स परलोकः । (ङ)

चेटः—भट्टक सुकृतदुष्कृतस्य परिणामः । (च)

शकारः—कीदृशः सुकृतस्य परिणामः । (छ)

चेटः—यादृशो भट्टको बहुसुवर्णमण्डितः । (ज)

शकारः—दुष्कृतस्य कीदृशः । (झ)

चेटः—यादृशोऽहं परपिण्डभक्षको भूतः । तदकार्यं न करिष्यामि । (ञ)

शकारः—अरे न मारयिष्यसि । (इति बहुविधं ताडयति ।) (ट)

चेटः—ताडयतु भट्टको मारयतु भट्टकः । अकार्यं न करिष्यामि ।

> **येनास्मि गर्भदासो विनिर्मितो भागधेयदोषैः ।**
> **अधिकं च न क्रेष्यामि तेनाकार्यं परिहरामि ॥ २५ ॥** (ठ)

वसन्तसेना—भाव शरणागताऽस्मि । (ड)

(क) [1]अले चेडा तवावि ण पहवामि ।

(ख) पहवदि भश्टके[2] शलीलाह ण चालित्ताह । ता पशीददु पशीददु भश्टके । भाआमि क्खु अहम् । (ग) तुमं मम चेडे भविअ कश्श भाआशि ।

(घ) भश्टके[2] पललोअश्श । (ङ) के शे पललोए ।

(च) भश्टके[2] शुकिददुक्किदश्श पलिणामे । (छ) [3]केलिशे शुकिदश्श पलिणामे ।

(ज) जादिशे भश्टके[2] बहुशुवण्णमण्डिदे । (झ) दुक्किदश्श केलिशे ।

(ञ) जादिशे हग्गे पलपिण्डभक्खके[4] भूदे । ता अकज्जं ण कलइश्शम् ।

(ट) अले ण मालिश्शशि । (ठ) पिश्टदु[5] भश्टके[2] मालेदु भश्टके[2] । अकज्जं ण कलइश्शम् ।

> जेणम्हि गब्भदाशे विणिम्मिदे भाअधेअदोशेहिं ।
> अहिअं च ण कीणिश्शं[6] तेण[7] अकज्जं पलिहलामि ॥

(ड) भाव शलणागदम्हि ।

येनेति । [येन कर्मणा अहं भागधेयदोषैः दुर्भाग्यदोषैः गर्भदासः आजन्मसेवकः विनिर्मितोऽस्मि तत्कर्म ईदृशकर्मणा अधिकं न क्रेष्यामि संपादयिष्यामि ।

---

१ अले अले. २ भट्टके. ३ कीलिशे, कीदिशे. ४ पुश्टके, पुट्टके. ५ पिढ्ढदु, विढ्ढदु. ६ कीलिश्शं. ७ तेण अहं.

विटः—काणेलीमातः मर्षय मर्षय । साधु स्थावरक साधु ।

अप्येषं[1] नाम परिभूतदंशो[2] दरिद्रः
प्रेष्यः परत्र फलमिच्छति नास्य भर्ता ।
तस्मादमी कथमिवाद्य न यान्ति नाशं
ये वर्धयन्त्यसदृशं सदृशं त्यजन्ति ॥ २६ ॥

अपि च ।

रन्ध्रानुसारी विषमः कृतान्तो यदस्य दास्यं तव चेश्वरत्वम् ।
श्रियं त्वदीयां यदयं न भुङ्क्ते यदेतदाज्ञां न भवान्करोति ॥ २७ ॥

शकारः—(स्वगतम् ।) अधर्मभीरुको वृद्धशृगालः । परलोकभीरुरेष गर्भदासः । अहं राष्ट्रियश्यालः कस्माद्बिभेमि वरपुरुषमनुष्यः । (प्रकाशम् ।) अरे गर्भदास चेट गच्छ त्वम् । अपवारके प्रविश्य विश्रान्त एकान्ते तिष्ठ । (क)

चेटः—यद्भट्टक आज्ञापयति । (वसन्तसेनामुपसृत्य ।) आर्ये एतावान्मे विभवः । (इति निष्क्रान्तः ।) (ख)

शकारः—(परिकरं बध्नन् ।) तिष्ठ वसन्तसेने तिष्ठ । मारयिष्यामि[3] । (ग)

विटः—आः ममाग्रतो व्यापादयिष्यसि । (इति गले गृह्णाति ।)

(क) अधम्मभीलुए[4] बुड्ढखोडे । पललोअभीलू एशे गब्भदाशे । हग्गे लश्टिअशाले कश्श भाआमि वलपुलिशमणुश्शे । अले[5] गब्भदाशे चेडे गच्छ तुमम् । ओवलके पविशिअ वीशन्ते एअन्ते चिश्ट ।

(ख) जं भट्टके आणवेदि । अज्जए एत्तिके मे विहवे ।

(ग) चिश्ट वसन्तशेणिए चिश्ट । मालइश्शम् ।

तेनाकार्यं परिहरामि] ॥ २५ ॥ **अपीति** । [एष परिभूता निकृष्टा दशा यस्य तथा अपि दरिद्रः प्रेष्यः सेवकोऽपि परत्र परलोके फलं पुण्यकर्मण इति यावत् इच्छति । अस्य भर्ता तु न । तस्माद्ये शकारसदृशाः अद्य असदृशं कर्म पापादि असदृशमयोग्यं पुरुषं वा वर्धयन्ति सदृशं पुण्यं कर्म योग्यं पुरुषं वा त्यजन्ति ते कथमिव नाशं न यान्ति । यास्यन्त्येवेत्यर्थः । वसन्ततिलकं वृत्तम्] ॥ २६ ॥ **रन्ध्रेति** । [कृतान्तः विधिः रन्ध्रानुसारी छिद्रानुवर्ती विषमो विपरीतकारी च यद् यस्मात्कारणाद् । अस्य चेटस्य । शेषं स्पष्टम् । उपजातिच्छन्दः] ॥२७॥ कस्मात् बिभेमि । अपि तु न कस्मादपीत्यर्थः । अपवा-

---

१ अप्येषमेष. २ दशः. ३ ष्यति. ४ भीलू (भीरुः). ५ अले अले.

शकारः—(भूमौ पतति ।) भावो भट्टकं मारयति । (इति मोहं नाटयति । चेतनां लब्ध्वा ।)

सर्वकालं मया पुष्टो मांसेन च घृतेन च ।
अद्य कार्ये समुत्पन्ने जातो मे वैरिकः कथम् ॥ २८ ॥

(विचिन्त्य ।) भवतु । लब्धो मयोपायः । दत्ता वृद्धशृगालेन शिरश्चालनसंज्ञा । तदेतं प्रेष्य वसन्तसेनां मारयिष्यामि । एवं तावत् । (प्रकाशम् ।) भाव यत्त्वं मया भणितः तत्कथमहमेवं बृहत्तरैः मल्लकप्रमाणैः कुलैर्जातोऽकार्यं करोमि । एवमेतदङ्गीकारयितुं मया भणितम् । (क)

विटः—

किं कुलेनोपदिष्टेन शीलमेवात्र कारणम् ।
भवन्ति सुतरां स्फीताः सुक्षेत्रे कण्टकिद्रुमाः ॥ २९ ॥

शकारः—भाव एषा तवाग्रतो लज्जते । न मामङ्गीकरोति । तद्गच्छ । स्थावरकचेटो मया ताडितो गतोऽपि । एष प्रपलाय्य गच्छति । तस्मात्तं गृहीत्वाऽऽगच्छतु भावः । (ख)

(क) भावे भट्टकं मालेदि ।

शव्वकालं मए पुश्टे मंशेण अ घिएण अ ।
अज्ज कज्जे शमुप्पण्णे जादे मे वैलिए कधम् ॥

भोदु । लद्धे मए उवाए । दिण्णा बुड्ढखोडेण शिलश्चालणशण्णा । ता एदं पेशिअ वशन्तशेणिअं मालइश्शम् । एव्वं दाव । भावे जं तुमं मए भणिदे तं कधं हग्गे एव्वं वड्ढकेहिं मल्लकप्पमाणेहिं कुलेहिं जादे अकज्जं कलेमि । एव्वं एदं अङ्गीकलावेदुं मए भणिदम् ।

(ख) भावे एशा तव अग्गदो लज्जादि । ण मं अङ्गीकलेदि । ता गच्छ । थावलअचेडे मए पिट्टिदे गदे वि । एशे पलाइअ गच्छदि । ता तं गेण्हिअ आअच्छदु भावे ।

रके । गृहविशेष इत्यर्थः । परिकरं काछ इति प्रसिद्धम् । **सर्वकालमित्यादि ।** वैरिको वैरी । स्वार्थे कः ॥ २८ ॥ शण्णा उपदेशः । एदं विटम् । कथमहं एवं बृहतो मल्लकप्रमाणात् । समुद्रप्रमाणादिति वक्तव्ये मौर्ख्यान्मल्लकप्रमाणतया कुलमुपमिनोति । ‘ मल्लिका पत्रपुटिका तया कुलस्य महत्त्वं मौर्ख्यादुपमिनोति ’ इति प्राचीनटीका । **किं कुलेनेति ।** [कुलेन उपदिष्टेन कथितेन किं किं प्रयोजनम् । न किंचिदित्यर्थः । अत्र अकार्यकरणे शीलमेव कारणम् । यतः सुक्षेत्रे कण्टकिद्रुमा स्फीताः संप्ररूढा भवन्ति । एवं महाकुलेऽपि दुष्कृतकारिणो भवन्ति] ॥ २९ ॥

---

१ कण्टक. २ भावे भाविअ. ३ पुट्टे. ४ वेलिए. ५ तुमे. ६ गल्लक; ०पमाणाहिं. ७ कालीवेदुं, कालिदुं. ८ गदे वि एशे. ९ आअश्छदु.

विटः—(स्वगतम् ।)

अस्मत्समक्षं हि वसन्तसेना शौण्डीर्यभावान्न भजेत मूर्खम् ।
तस्मात्करोम्येष विविक्तमस्या विविक्तविश्रम्भरसो हि कामः ॥ ३० ॥

(प्रकाशम् ।) एवं भवतु । गच्छामि ।

वसन्तसेना—(पटान्ते गृहीत्वा ।) ननु भणामि शरणागताऽस्मि । (क)

विटः—वसन्तसेने न भेतव्यं न भेतव्यम् । काणेलीमातः वसन्तसेना तव हस्ते न्यासः ।

शकारः—एवम् । मम हस्त एषा न्यासेन तिष्ठतु । (ख)

विटः—सत्यम् ।

शकारः—सत्यम् । (ग)

विटः—(किंचिद्गत्वा ।) अथ वा मयि गते नृशंसो हन्यादेनाम् । तदपवारितशरीरः पश्यामि तावदस्य चिकीर्षितम् । (इत्येकान्ते स्थितः ।)

शकारः—भवतु । मारयिष्यामि । अथ वा कपटकापटिक एष ब्राह्मणो वृद्धश्रृगालः कदाऽप्यपवारितशरीरो गत्वा श्रृगालो भूत्वा कपटं करोति । तदेतस्य वञ्चनानिमित्तमेवं तावत्करिष्यामि । (कुसुमावचयं कुर्वन्नात्मानं मण्डयति ।) बाले बाले वसन्तसेने एहि । (घ)

विटः—अये कामी संवृत्तः । हन्त निर्वृतोऽस्मि । गच्छामि । (इति निष्क्रान्तः ।)

(क) णं भणामि शरणागदम्हि ।

(ख) एव्वम् । मम हश्ते एशा णाशेण चिश्टदु । (ग) शच्चम् ।

(घ) भोदु । मालइश्शम् । अध वा कवडकावडिके एशे बम्हणे बुड्ढखोडे कदावि ओवालिदशलीले गडिअ शिआले भविअ हुडुभुलिं कलेदि । ता एदश्श वञ्चणाणिमित्तं एव्वं दाव कलइश्शम् । वाशू वाशू वशन्तशेणिए एहि ।

अस्मदिति। [वसन्तसेना शौण्डीर्यभावात्स्वाभिमानात् अस्मत्समक्षं न युक्तमिदं नापि सदृशमिदमिति मया पूर्वोक्तत्वात् मूर्खं न भजेत सेवेत । तस्माद् विविक्तं विजनं करोमि । हि यतः विविक्ते यो विश्रम्भस्तेन रसो रागो यत्र तथाभूतः कामः भवति । अथान्तरन्यासः । उपजातिच्छन्दः]॥ ३० ॥ णाशेण न्यासेन विनाशेन च । कपटेन चरतीति कापटिकः ।

---

१ चिष्ठदु. २ माडिश्शम्.

शकारः—

सुवर्णकं ददामि प्रियं वदामि पतामि शीर्षेण सवेष्टनेन । (क)
तथाऽपि मां नेच्छसि शुद्धदन्ति किं सेवकं कष्टमया मनुष्याः ॥ ३१ ॥

वसन्तसेना—कोऽत्र संदेहः । (अवनतमुखी 'खलचरित' इत्यादि श्लोकद्वयं पठति ।)

खलचरित निकृष्ट जातदोषः
कथमिह मां परिलोभसे धनेन ।
सुचरितचरितं विशुद्धदेहं
न हि कमलं मधुपाः परित्यजन्ति ॥ ३२ ॥

यत्नेन सेवितव्यः पुरुषः कुलशीलवान्दरिद्रोऽपि ।
शोभा हि पणस्त्रीणां सदृशजनसमाश्रयः कामः ॥ ३३ ॥

अपि च । सहकारपादपं सेवित्वा न पलाशपादपमङ्गीकरिष्यामि । (ख)

शकारः—दास्याःपुत्रि दरिद्रचारुदत्तकः सहकारपादपः कृतः । अहं पुनः पलाशो भणितः । किंशुकोऽपि न कृतः । एवं त्वं मह्यं गालीं ददत्यद्यापि तमेव चारुदत्तकं स्मरसि । (ग)

(क) शुवण्णअं देमि पिअं वदेमि पडमि शीशेग शवेश्टणेण[3] ।
तधा वि मं णेच्छशि शुद्धदन्ति किं शेवअं कश्टमआ मणुश्शा ॥

(ख) को एत्थ संदेहो । अवि अ । सहआरपादवं सेविअ ण पलासपादवं[4] अङ्गीकरिस्सम् ।

(ग) दाशीएधीए दलिद्दचालुदत्तके[5] शहआलपादवे कडे । हग्गे उण पलाशे[6] भणिदे । किंशुके वि ण कडे । एव्वं तुमं मे गालिं देन्ती अज्जवि तं ज्जेव चालुदत्तकं शुमलेशि ।

कपटेषु कापटिकः वञ्चकाग्रणीरित्यर्थः । **सुवर्णकमिति** । [सवेष्टनेन सोष्णीषेण । शुद्धदन्ति तथाऽपि मां सेवकं किं नेच्छसि । मनुष्याः कष्टमयाः खलु । केचित् किं शेवअं इति पदच्छेदं कृत्वा 'किं ते वयं काष्ठमया मनुष्याः' इति च्छायामिच्छन्ति । ते वयं काष्ठमयाः पुरुषाः न तु परमार्थतः इति व्याख्यान्ति च । उपजातिर्वृत्तम् ।] किं सेवकाः कष्टमया मनुष्याः ॥ ३१ ॥ **खलचरितेति** । [हे खलचरित दुष्टचरित हे निकृष्ट अधम । इति संबोधनद्वयम् । जातदोषः उत्पन्नपापः इह मां कथं धनेन परिलोभसे विलोभयसि । सुचरितं चरित आह्लादकरत्वादि यस्य तत्सुचरितचरितं विशुद्धदेहं भास्वरशरीरं कमलं मधुपाः न परित्यजन्ति हि । अत्र अप्रस्तुतप्रशंसया चारुदत्तं न परित्यजामीति सूचितम् । पुष्पिताग्रा वृत्तम्] ॥ ३२ ॥ **यत्नेनेति** । [कुलशीलवान् पुरुषः दरिद्रोऽपि यत्नेन सेवितव्यः । सदृशजनः अनुरूपपुरुषः समाश्रयो यस्य तादृशः कामः पणप्रधानाः स्त्रियः पणस्त्रियः वेश्याः तासां शोभा हि भूषणावहः खलु । आर्या] ॥ ३३ ॥ पलाशपदेन राक्षसोऽप्यभिधीयते । [पलं मांसमश्नातीति ।]

---

१ संस्कृतमाश्रित्यावन०. २ शोभा पण्य०. ३ शवेट्टणेण. ४ पलाश. ५ दत्ताके ६ पलाशे.

वसन्तसेना—हृदयगत एव किमिति न स्मर्यते । (क)

शकारः—अद्यापि ते हृदयगतं त्वां च सममेव मोटयामि । तद्दरिद्रसार्थवाहकमनुष्यकामुकिनि तिष्ठ तिष्ठ । (ख)

वसन्तसेना—भण भण पुनरपि भण श्लाघनीयान्येतान्यक्षराणि । (ग)

शकारः—परित्रायतां दास्याःपुत्रो दरिद्रचारुदत्तकस्त्वाम् । (घ)

वसन्तसेना—परित्रायते यदि मां प्रेक्षते । (ङ)

शकारः—

किं स शक्रो वालिपुत्रो महेन्द्रो रम्भापुत्रः कालनेमिः सुबन्धुः ।
रुद्रो राजा द्रोणपुत्रो जटायुश्चाणक्यो वा धुन्धुमारस्त्रिशङ्कुः ॥ ३४ ॥

अथ वैतेऽपि त्वां न रक्षन्ति ।

चाणक्येन यथा सीता मारिता भारते युगे ।
एवं त्वां मोटयिष्यामि जटायुरिव द्रौपदीम् ॥ ३५ ॥ (च)

(इति ताडयितुमुद्यतः ।)

(क) हिअअगदो ज्जेव किंत्ति ण सुमरीअदि ।

(ख) अज्ज वि दे हिअअगदं तुमं च शमं ज्जेव मोडेमि । ता दलिद्दशत्थवाहअमणुश्शकामुकिणि चिश्ट चिश्ट । (ग) भण भण पुणो वि भण सलाहणिआइं एदाइं अक्खराइं । (घ) पलित्ताअदु दाशीएपुत्ते दलिद्दचालुदत्तके तुमम् ।

(ङ) परित्ताअदि जदि मं पेक्खदि ।

(च) किं शे शक्के वालिपुत्ते महिन्दे लम्भापुत्ते कालणेमी शुबन्धू ।
लुद्दे लाआ दोणपुत्ते जडाऊ चाणक्के वा धुन्धुमाले तिशङ्कू ॥

अध वा एदे वि दे ण लक्खन्ति ।

चाणक्केण जधा शीदा मालिदा भालदे जुए ।
एव्वं दे मोडइश्शामि जडाऊ विअ दोव्वदिम् ॥

गालिं देन्ती साक्षेपं वदन्ती इति देशीति चिरंतनटीका । **किं स शक्र इति ।** शक्करीविशेषच्छन्दसा श्लोकः । [स चारुदत्तः किं शक्रः वालिपुत्रः महेन्द्रः । अत्र शक्रः महेन्द्र इति पुनरुक्तं वालिपुत्र इति आगमविरुद्धम् । अथ वा रम्भापुत्रः कालनेमिः सुबन्धुः । एवमितरत्रापि आगमविरुद्धं यथायथमूह्यम् । कालनेमिः असुरविशेषः । सुबन्धुः कविः । धुन्धुमारः त्रिशङ्कुश्च राजविशेषौ । शालिनी वृत्तम्] ॥ ३४ ॥ **चाणक्येनेत्यादि ।** भारते युगे भारतावच्छिन्ने समये । [मोटयिष्यामि मारयिष्यामि] ॥ ३५ ॥

---

१ शट्ठवाह, शत्तवाह. २ चिट्ठ चिट्ठ. ३ भण । सला०. ४ पडिअत्तदु.

वसन्तसेना—हा मातः कुत्रासि । हा आर्यचारुदत्त एष जनोऽसंपूर्णमनोरथ एव विपद्यते । तदूर्ध्वमाक्रन्दयिष्यामि । अथ वा वसन्तसेनोर्ध्वमाक्रन्दतीति लज्जनीयं खल्वेतत् । नम आर्यचारुदत्ताय ।(क)

शकारः—अद्यापि गर्भदासी तस्यैव पापस्य नाम गृह्णाति । (इति कण्ठे पीडयन् ।) स्मर गर्भदासि स्मर । (ख)

वसन्तसेना—नम आर्यचारुदत्ताय । (ग)

शकारः—म्रियस्व गर्भदासि म्रियस्व । (नाटयेन कण्ठं निपीडयन्मारयति ।) (घ)

(वसन्तसेना मूर्छिता निश्चेष्टा पतति ।)

शकारः—(सहर्षम् ।)

एतां दोषकरण्डिकामविनयस्यावासभूतां खलां
रक्तां तस्य किलागतस्य रमणे कालागतामागताम् ।
किमेष समुदाहरामि निजकं बाह्वोः शूरत्वं
निःश्वासाऽपि म्रियतेऽम्बा सुमृता सीता यथा भारते ॥३६॥(ङ)

(क) हा अत्ते कहिं सि । हा अज्जचारुदत्त एसो जणो असंपुण्णमणोरधो ज्जेव विवज्जदि । ता उद्धं अक्कन्दइस्सम् । अध वा वसन्तसेणा उद्धं अक्कन्दति त्ति लज्जणीअं क्खु एदम् । णमो अज्जचारुदत्तस्स । (ख) अज्जवि गब्भदाशी[1] तश्श ज्जेव पावस्स णामं गेण्हदि । शुमल गब्भदाशि शुमल । (ग) णमो अज्जचारुदत्तस्स ।

(घ) मल गब्भदाशि मल ।

(ङ) एदं दोशकलण्डिअं[2] अविणअश्शावाशभूदं खलं
लत्तं तश्श किलागदश्श लमणे कालागदं आअदम् ।
किं एशे शमुदाहलामि णिअअं बाहूण शूलत्तणं[3]
णीशाशे वि मलेई[4] अम्ब शुमला शीदा जधा भालदे ॥

[ऊर्ध्वमुच्चैःस्वरेण । निश्चेष्टा चलनवलनादिरहिता ।] **एतामिति** । खलां दुर्जनस्वभावाम् । तस्य चारुदत्तस्य रमणे संभोगनिमित्तं कालागतामागताम् । कालां कृष्णाम् । [दोषाणां करण्डिकां पेटिकां अविनयस्य आवासभूतां खलां रक्तां आगतस्य अथ वा अगतस्य गतिरहितस्य दुर्गतस्येत्यर्थः । तस्य चारुदत्तस्य रमणे रमणार्थं कालागतां कालप्राप्तां तथा आगताम् एताम् हतवानिति शेषः । एष बाह्वोः निजकं शूरत्वं किं समुदाहरामि । निःश्वासा अपि अम्बा वसन्तसेना म्रियते । भारते सीता यथेति

---

१ ०दाशि...गेण्हसि. २ कलण्डअं. ३ शूलक्खणं. ४ मले इअं अ सुमला (म्रियते इयं च सुमृता).

इच्छन्तं मां नेच्छतीति गणिका रोषेण मया मारिता
शून्ये पुष्पकरण्डक इति सहसा पाशेनोत्त्रासिता ।
सेवावञ्चिता भ्राता मम पिता मातेव सा द्रौपदी
योऽसौ पश्यति नेदृशं व्यवसितं पुत्रस्य शूरत्वम् ॥ ३७ ॥

भवतु । सांप्रतं वृद्धश्रृगाल आगमिष्यतीति ततोऽपसृत्य तिष्ठामि । (तथा करोति ।) (क)

(प्रविश्य चेटेन सह ।)

विटः—अनुनीतो मया स्थावरकश्चेटः । तद्यावत्काणेलीमातरं पश्यामि । (परिक्रम्यावलोक्य च ।) अये मार्ग एव पादपो[1] निपतितः । अनेन च पतता स्त्री व्यापादिता । भोः पाप किमिदमकार्यमनुष्ठितं त्वया । तवापि पापिनः पतनात्स्त्रीवधदर्शनेनातीव[2] पातिता वयम् । अनिमित्तमेतत् । यत्सत्यं वसन्तसेनां प्रति शङ्कितं मे मनः । सर्वथा देवताः[3] स्वस्ति करिष्यन्ति । (शकारमुपसृत्य ।) काणेलीमातः एवं मयाऽनुनीतः स्थावरकश्चेटः ।

शकारः—भाव स्वागतं ते । पुत्रक स्थावरक चेट तवापि स्वागतम् । (ख)

चेटः—अथ किम् । (ग)

विटः—मदीयं न्यासमुपनय ।

शकारः—कीदृशो न्यासः । (घ)

(क) इच्छन्तं मम णेच्छदि[4] त्ति गणिआ लोशेण[5] मे मालिदा
शुण्णे पुप्फकलण्डके त्ति शहशा पाशेण उत्ताशिदा ।
शेवावञ्चिद भादुके मम पिदा मादेव शा दोप्पदी
जे शे पेक्खदि णेदिशं ववशिदं पुत्ताह शूलत्तणम् ॥
भोदु । शंपदं[6] बुड्ढखोडे आगमिश्शदित्ति ता ओशलिअ चिश्टामि ।

(ख) भावे शाअदं दे । पुत्तका[7] थावलका चेडा तवावि शाअदम् ।
(ग) अध इं । (घ) कीदिशे णाशे ।

हतोपमम् । शार्दूल०] ॥ ३६ ॥ **इच्छन्तामिति** । [इच्छन्तं मां गणिका नेच्छतीति मे मया रोषेण मारिता । शून्ये पुष्पकरण्डके सहसा पाशेन बाहुपाशेन इति उत्त्रासिता । योऽसौ मम भ्राता पिता च सेवावञ्चितः । सा द्रौपदी इव मे माता च सेवावञ्चिता या ईदृशं पुत्रस्य व्यवसितं शूरत्वं न पश्यति । शार्दूल० वृत्तम् ।] मया रोषेण मारिता इति विपर्यस्य योजना । माता च सा द्रौपदी । या सा पश्यति ॥ ३७ ॥ पाप इति

---

१ पादपोर्नि०. २ दर्शनादतीव. ३ देवता…करिष्यति. ४ णेच्छशि. ५ पाशेण. ६ संपदं. ७ पुश्थका, पुत्तका.

विटः—वसन्तसेना ।

शकारः—गता । (क)

विटः—क्व ।

शकारः—भावस्यैव पृष्ठतः । (ख)

विटः—(सवितर्कम् ।) न गता खलु सा तया दिशा ।

शकारः—त्वं कतमया दिशा गतः । (ग)

विटः—पूर्वया दिशा ।

शकारः—साऽपि दक्षिणया गता । (घ)

विटः—अहं दक्षिणया ।

शकारः—साऽप्युत्तरया । (ङ)

विटः—अत्याकुलं कथयसि । न शुध्यति मेऽन्तरात्मा । तत्कथय सत्यम् ।

शकारः—शपे भावस्य शीर्षमात्मीयाभ्यां पादाभ्याम् । ततः संस्थापय हृदयम् । एषा मया मारिता । (च)

विटः—(सविषादम् ।) सत्यं त्वया व्यापादिता ।

शकारः—यदि मम वचने न प्रत्ययसे तत्पश्य प्रथमं राष्ट्रियश्यालसंस्थानस्य शूरत्वम् । (इति दर्शयति ।) (छ)

विटः—हा हतोऽस्मि मन्दभाग्यः । (इति मूर्छितः पतति ।)

शकारः—ही ही । उपरतो भावः । (ज)

चेटः—समाश्वसितु समाश्वसितु भावः । अविचारितं प्रवहणमानयतैव मया प्रथमं मारिता । (झ)

(क) गडा । (ख) भावश्श ज्जेव्व पिश्टदो । (ग) तुमं कदमाए दिशाए गडे[1] । (घ) शा वि दक्खिणाए गडा । (ङ) शा वि उत्तलाए ।

(च) शवामि भावश्श शीशं अत्तणकेलकेहिं पादेहिं । ता शंठावेहि हिअअम् । एशा मए मालिदा । (छ) जइ मम वअणे न पत्तिआआशि ता पेक्ख पढमं लश्टिअशालशंठाणाह शूलत्तणम्[3] । (ज) ही ही । उवलदे भावे । (झ) शमश्शशदु शमश्शशदु भावे । अविचालिअं पवहणं आणन्तेण ज्जेव मए पढमं मालिदा ।

वृक्षं संबोधयति । अनिमित्तमसंकुलम् । पिष्ठदो पृष्ठतः । दक्षिणदिग्गतत्वं मृतत्वमपि ।

---

१ बुध्यति. २ गदे. ३ पलक्कमं (पराक्रमम्).

विटः—(समाश्वस्य सकरुणम् ।) हा वसन्तसेने ।

दाक्षिण्योदकवाहिनी विगलिता याता स्वदेशं रति-
हा हाऽलंकृतभूषणे सुवदने क्रीडारसोद्भासिनि[1] ।
हा सौजन्यनदि प्रहासपुलिने हा मादृशामाश्रये[2]
हा हा नश्यति मन्मथस्य विपणिः सौभाग्यपण्याकरः ॥ ३८ ॥

(सास्रम् ।) कष्टं भोः कष्टम् ।

किं नु नाम भवेत्कार्यमिदं[3] येन त्वया कृतम् ।
अपापा पापकल्पेन नगरश्रीर्निपातिता ॥ ३९ ॥

(स्वगतम् ।) अये कदाचिदयं पापै इदमकार्यं मयि संक्रामयेत् । भवतु । इतो गच्छामि । (इति परिक्रामति ।)

(शकार उपगम्य धारयति ।)

विटः—पाप मा[4] मा स्प्राक्षीः । अलं त्वया । गच्छाम्यहम् ।

शकारः—अरे वसन्तसेनां स्वयमेव मारयित्वा मां दूषयित्वा कुत्र पलायसे । सांप्रतमीदृशोऽहमनाथः प्राप्तः । (क)

विटः—अपध्वस्तोऽसि ।

शकारः—

अर्थं शतं ददामि सुवर्णकं ते कार्षापणं ददामि सवोडिकं ते ।
एष दोषस्थानं पराक्रमो मे सामान्यको भवतु मनुष्यकाणाम् ॥४०॥(ख)

(क) अले वशन्तशेणिअं शअं ज्जेव मालिअ मं दूशिअ कहिं पलाअशि । शंपदं ईदिशे हग्गे अणाधे पाविदे ।

(ख) अत्थं शदं देमि शुवण्णअं[5] दे कहावणं देमि शवोडिअं[6] दे ।
एशे दुशट्ठाण पलक्कमे[7] मे शामाण्णए भोदु मणुश्शआणम् ॥

न प्रत्येषि पराक्रमे । **दाक्षिण्येति** । [दाक्षिण्यमेव उदकं तस्य नदी विगलिता नष्टा । रतिः प्रीतिः स्वदेशं याता । हे अलंकृतभूषणे अलंकृतानि भूषणानि यया तत्संबुद्धिः । सुवदने । क्रीडायां रसः तेन उद्भासिनि शोभमाने । प्रहासः पुलिनं यस्याः तादृशि हा सौजन्यस्य नदि । हा मादृशामाश्रये आश्रयभूते । हा हा सौभाग्यमेव पण्यं विक्रेयवस्तुजातं तस्य आकरः खनिः मन्मथस्य कामस्य विपणिः पण्यवीथिका नश्यति । शार्दूल० वृत्तम्] ॥ ३८ ॥ **किं न्विति** । [किं नु नाम तत्कार्यं भवेद्येनेदं त्वया कृतम् । पापकल्पेन पापादीषन्न्यूनेन । अपापा नगरस्य श्रीः शोभा त्वया निपातिता] ॥ ३९ ॥ हे पाप हे पापसंकल्प । **अर्थं शतमिति** । [ते शतं सुवर्णमर्थं ददामि । वोडी पणचतुर्थांशः तत्सहितं सवोडिकं कार्षापणं षोडशपणात्मकं सुवर्णं ते ददामि ।] वोडी विंशतिकपर्दकः गौडे प्रसिद्धः । तच्चतुष्टयं पणः । ते षोडश कार्षापणः कहावण

१ सरोद्भा०. २ आश्रमे. ३ पापमिदं. ४ मां. ५ सुवण्णअं. ६ शवेढिअं. ७ फलक्कमे (फलक्रमः).

विटः—धिक् । तवैवास्तु ।

चेटः—शान्तं पापम् । (क)

(शकारो हसति ।)

विटः—

अप्रीतिर्भवतु विमुच्यतां हि हासो
धिक्प्रीतिं परिभवकारिकामनार्याम् ।
मा भूच्च त्वयि मम संगतं कदाचि-
दाच्छिन्नं धनुरिव निर्गुणं त्यजामि ॥ ४१ ॥

शकारः—भाव प्रसीद प्रसीद । एहि । नलिन्यां प्रविश्य क्रीडावः । (ख)

विटः—

अपतितमपि तावत्सेवमानं भवन्तं
पतितमिव जनोऽयं मन्यते मामनार्यम् ।
कथमहमनुयायां त्वां हतस्त्रीकमेनं
पुनरपि नगर[2]स्त्रीशङ्कितार्धाक्षिदृष्टम् ॥ ४२ ॥

(सकरुणम् ।) वसन्तसेने ।

अन्यस्यामपि जातौ मा वेश्या भूस्त्वं हि सुन्दरि ।
चा[3]रित्र्यगुणसंपन्ने जायेथा विमले कुले ॥ ४३ ॥

(क) शन्तं पावम् ।

(ख) भावे पशीद पशीद । एहि । णलिणीए पविशिअ कीलेम्ह ।

इत्येके । साधारणो भवतु । [उपजातिर्वृत्तम्] ॥ ४० ॥ **अप्रीतिरिति** । [अप्रीतिः अनुतापः दुःखं वा भवतु । हासो विमुच्यतां हि । परिभवकारिकां अनार्यां प्रीतिं धिक् । त्वयि मम संगतं कदाचिदपि मा भूत् । आच्छिन्नं शत्रुणा विध्वस्तं निर्गुणं विगतज्यं धनुरिव निर्गुणं दयादिगुणरहितं त्वां त्यजामि । प्रहर्षिणी वृत्तम्] ॥ ४१ ॥ [नलिन्यां दीर्घिकायाम् । नलानि सन्त्यस्यामिति नलिनी ।] **अपतितमपीति** । [अपतितमपि भवन्तं सेवमानं मां अयं जनः अनार्यं पतितामिव मन्यते । एवं सति हतस्त्रीकं पुनरपि नगरस्त्रीभिः शङ्कितं सभयं यथा स्यात्तथा अर्धाक्षिभिः अर्धोन्मीलितनेत्रैः दृष्टं त्वामहं कथमनुयायाम् । मालिनी वृत्तम्] ॥ ४२ ॥ **अन्यस्यामिति** । [हे सुन्दरि त्वमन्यस्यां गतौ आगामिनि जन्मनि अपि वेश्या मा भूः । हे चारित्र्यमेव गुणस्तेन संपन्ने सुशीले विमले निर्दोषे कुले जायेथाः] ॥ ४३ ॥

---

१ स्खलतु. २ रश्री. ३ चारित्र.

शकारः—मदीये पुष्पकरण्डकजीर्णोद्याने वसन्तसेना मारयित्वा कुत्र पलायसे । एहि । मम आवुत्तस्याग्रतो व्यवहारं देहि । (इति धा[१]रयति ।) (क)

विटः—आः तिष्ठ जाल्म । (इति खड्गमा[२]कर्षति ।)

शकारः—(सभयमपसृत्य ।) किं रे भीतोऽसि । तद्गच्छ । (ख)

विटः—(स्वगतम् ।) न युक्तमवस्थातुम् । भवतु । यत्रार्यशर्विलक-च[३]न्दनकप्रभृतयः सन्ति तत्र गच्छामि । (इति निष्क्रान्तः ।)

शकारः—निधनं गच्छ । अरे स्थावरक पुत्रक कीदृशं मया कृतम् । (ग)

चेटः—भट्टक महदकार्यं कृतम् । (घ)

शकारः—अरे चेट किं भणस्यकार्यं कृतमिति । भवतु । एवं तावत् । (नानाभरणान्यवतार्य ।) गृहाणेममलंकारं मया तावद्दत्तम् । यावत्यां वेलायामलंकरोमि तावतीं वेलां मम । अन्यदा तव । (ङ)

चेटः—भट्टक एवैते शोभन्ते । किं ममैतैः । (च)

शकारः—तद्गच्छ । एतौ वृषभौ गृहीत्वा मदीयायां प्रासाद-बालाग्रप्रतोलिकायां तिष्ठ यावदहमागच्छामि । (छ)

चेटः—यद्भट्टक आज्ञापयति । (इति निष्क्रान्तः ।) (ज)

(क) ममकेल[४]के पुप्फकलण्डकाजिण्णुज्जाणे वशन्तशेणिअं मालिअ कहिं पलाअशि । एहि । मम आवुत्तश्श अग्गदो वव[५]हाऴं देहि ।

(ख) किं ले भीदेशि । ता गच्छ[६] ।

(ग) णिधणं गच्छ । अले थावलका पुत्तका[७] कीलिशे मए कडे ।

(घ) भ[८]स्टके महन्ते अकज्जे कडे ।

(ङ) अले चेडे किं भणाशि अकज्जे कडेत्ति । भोदु । एव्वं दाव । गेण्ह एदं अलंकारअं मए ताव दिण्णे । जेत्तिके वेले अलंकलेमि तेत्तिकं वेलं मम । अण्णं तव ।

(च) भस्टके ज्जेव एदे शोहन्ति । किं मम एदेहिं ।

(छ) ता गच्छ । एदाइं गोणाइं गेण्हिअ ममकेलकाए पाशादबालग्गप[९]दोलिकाए चिस्ट जाव हग्गे आअच्छामि । (ज) जं भस्टके आणवेदि ।

आवुत्तश्श भगिनीपतेः । व्यवहारं विचारम् । निधनं गच्छ त्वमिति विटं प्रति ।

---

१ ताडयति. २ कर्षयति. ३ चन्दनप्रभृ०. ४ केरके. ५ ववहाले. ६ गश्छ. ७ पुत्तका, पुत्थका. ८ भट्टके. ९ पढोलिआए.

शकारः—आत्मपरित्राणे भावो गतोऽदर्शनम्। चेटमपि प्रासादबालाग्रप्रतोलिकायां निगडपूरितं कृत्वा स्थापयिष्यामि। एवं मन्त्रो रक्षितो भवति। तद्गच्छामि। अथ वा पश्यामि तावदेनाम्। किमेषा मृताऽथ वा पुनरपि मारयिष्यामि। (अवलोक्य।) कथं सुमृता। भवतु। एतेन प्रावारकेण प्रच्छादयाम्येनाम्। अथ वा नामाङ्कित एषः। तत्कोऽप्यार्यपुरुषः प्रत्यभिज्ञास्यति। भवतु। एतेन वातालीपुञ्जितेन शुष्कपर्णपुटेन प्रच्छादयामि। (तथा कृत्वा। विचिन्त्य।) भवतु। एवं तावत्। सांप्रतमधिकरणं गत्वा व्यवहारं लेखयामि यथाऽर्थस्य कारणात्सार्थवाहकचारुदत्तकेन मदीयं पुष्पकरण्डकं जीर्णोद्यानं प्रवेश्य वसन्तसेना व्यापादितेति।

चारुदत्तविनाशाय करोमि कपटं नवम्।
नगर्यां विशुद्धायां पशुघातमिव दारुणम्॥ ४४॥

भवतु। गच्छामि। (इति निष्क्रम्य दृष्ट्वा। सभयम्।) अविद मादिके। येन येन गच्छामि मार्गेण तेनैवैष दुष्टश्रमणको गृहीतकषायोदकं चीवरं

(क) अत्तपलित्ताणे भावे गदे अदंशणम्। चेडं वि पाशादबालग्गपदोलिकाए णिगलपूलिदं कदुअ थावइश्शम्। एव्वं मन्ते लक्खिदे भोदि। ता गच्छामि। अध वा पेक्खामि दाव एदम्। किं एशा मला आदु पुणो वि मालइश्शम्। कधं शुमला। भोदु। एदिणा पावालएण पच्छादेमि णम्। अध वा णामङ्किदे एशे। ता के वि अज्जपुलिशे पच्चहिजाणेदि। भोदु। एदिणा वादालीपुञ्जिदेण शुक्खपण्णपुडेण पच्छादेमि। भोदु। एव्वं दाव। संपदं अधिअलणं गच्छिअ ववहालं लिहावेमि जहा अत्थश्श कालणादो शत्थवाहचालुदत्ताकेण ममकेलकं पुप्फकलण्डकं जिण्णुज्जाणं पवेशिअ वशन्तशेणिआ वावादिदे त्ति।

चालुदत्तविणाशाय कलेमि कवडं णवम्।
णअलीए विशुद्धाए पशुघादं व्व दालुणम्॥

भोदु। गच्छामि। अविद मादिके। जेण जेण गच्छामि मग्गेण तेण ज्जेव एशे

आत्मपरित्राणे आत्मरक्षार्थम्। प्रासादबालाग्रप्रतोलिकायां प्रासादोपरिगृहविशेष इति पश्चाद्याख्यातम्। निगलपूरितं अतिगुरुबन्धनोक्तिरियम्। प्रावारेण प्रच्छदपटेन। णामङ्किदे नामाङ्कितः वसन्तसेनाया इति शकारस्य वेति लिखिताक्षरः। तथा कृत्वा। पूर्वोक्तेन स्थगितां कृत्वेत्यर्थः। **चारुदत्तेति**। [चारुदत्तस्य विनाशाय वधाय नवं कपटं मायां करोमि रचयिष्यामि। विशुद्धायां नगर्यां दारुणं पशुघातमिव गोवधमिव]॥ ४४॥ अविद मादिके सभयविस्मये। नश्तिय नासारज्ज्वा बाधितः।

१ णिअल०. २ पश्छा०. ३ जधा. ४ शठवाहउत्तचा०. ५ च.

गृहीत्वाऽऽगच्छति। एष मया नासां छित्त्वा वाहितः कृतवैरः कदाऽपि मा प्रेक्ष्यैतेन मारितेति प्रकाशयिष्यति। तत्कथं गच्छामि। (अवलोक्य।) भवतु। एतमर्धपतितं प्राकारखण्डमुल्लङ्घ्य गच्छामि।

एषोऽहं त्वरितत्वरितो लङ्कानगर्यां गगने गच्छन्।
भूम्यां पाताले हनूमच्छिखर इव महेन्द्रः॥ ४५॥ (क)

(इति निष्क्रान्तः।)

(प्रविश्यापटीक्षेपेण संवाहकः)

भिक्षुः—प्रक्षालितमेतन्मया चीवरखण्डम्। किं नु खलु शाखायां शुष्कं करिष्यामि। इह वानरा विलुम्पन्ति। किं नु खलु भूम्याम्। धूलीदोषो भवति। तत्कुत्र प्रसार्य शुष्कं करिष्यामि। (दृष्ट्वा।) भवतु। इह वातालीपुञ्जिते शुष्कपत्रसंचये प्रसारयिष्यामि। (तथा कृत्वा।) नमो बुद्धाय। (इत्युपविशति।) भवतु। धर्माक्षराण्युदाहरामि। ('पञ्चजण जेण मालिदा' (८।२) इत्यादि पूर्वोक्तं पठति।) अथ वाऽलं ममैतेन स्वर्गेण। यावत्तस्या वसन्तसेनाया बुद्धोपासिकायाः प्रत्युपकारं न करोमि यया दशानां सुवर्णकानां कृते

दुस्टशमणके गहिदकशाओदकं चीवलं गोण्हिअ आअच्छदि। एशे मए णाशिं छिदिअ वाहिदे किदवेले कदावि मं पेक्खिअ एदेण मालिदेत्ति पआशइश्शदि। ता कधं गच्छामि। भोदु। एवं अद्धपडिदं पाआलखण्डं उल्लङ्घिअ गच्छामि।

एशे म्हि तुलिदतुलिदे लङ्काणअलीए गअणे गच्छन्ते।
भूमीए पाआले हणूमशिहले विअ महेन्दे॥

(क) पक्खालिदे एशे मए चीवलखण्डे। किं णु क्खु शाहाए शुक्खावइश्शम्। इंध वाणला विलुप्पन्ति। किं णु क्खु भूमीए। धूलीदोशे होदि। ता कहिं पशालिअ शुक्खावइश्शम्। भोदु। इध वादालीपुञ्जिदे शुक्खवत्तसंचए पशालइश्शम्। णमो बुद्धश्श। भोदु। धम्मक्खलाइं उदाहलामि। अध वा अलं मम एदेण शग्गेण। जाव ताए वसन्तशेणिआए बुद्धोवाशिआए पच्चुवकालं ण कलेमि जाए दशाणं शुवण्णकाणं किदे

एषोऽहमित्यादि। गाथा। [एषोऽहं लङ्कानगर्यां गगने भूम्यां पाताले हनूमच्छिखरे महेन्द्र इव त्वरितत्वरितो गच्छन्नस्मि।] भूमौ पाताले हनूमच्छिखरादिव महेन्द्रः। महेन्द्रशिखरादिव हनूमानिति वक्तव्ये शकारोक्तत्वाद्विपरीतम्। 'अट्टअ' इति पाठे अष्टकशिखरादित्यर्थः। व्याहतोपममिदं तावत्॥ ४५॥ तथेति प्रसार्य।

---

१ पटाक्षेपेण. २ णाशिअ (नासारज्ज्वा); णाशि च्छिअ (नासिं छित्त्वा). ३ पंच्छाडिदे. ४ पुञ्जिदेशु...संचएशु.

द्यूतकराभ्यां निष्क्रीतस्ततः प्रभृति तया क्रीतमिवात्मानमवगच्छामि । (दृष्ट्वा ।) किं नु खलु पर्णोदरे समुच्छ्वसिति । अथ वा ।

वातातपेन तप्तानि चीवरतोयेन स्तिमितानि पत्राणि ।
एतानि विस्तीर्णपत्राणि मन्ये पत्राणीव स्फुरन्ति ॥४६॥ (क)

(वसन्तसेना संज्ञां लब्ध्वा हस्तं दर्शयति ।)

भिक्षुः—हा हा शुद्धालंकारभूषितः स्त्रीहस्तो निष्क्रामति । कथम् । द्वितीयोऽपि हस्तः । (बहुविधं निर्वर्ण्य ।) प्रत्यभिजानामीवैतं हस्तम् । अथ वा किं विचारेण । सत्यं स एव हस्तो येन मेऽभयं दत्तम् । भवतु । पश्यामि । (नाट्येनोद्घाट्य दृष्ट्वा प्रत्यभिज्ञाय च ।) सैव बुद्धोपासिका । (क)

(वसन्तसेना पानीयमाकाङ्क्षति ।)

भिक्षुः—कथमुदकं याचते । दूरे च दीर्घिका । किमिदानीमत्र करिष्यामि । भवतु । एतच्चीवरमस्या उपरि गालयिष्यामि । (तथा करोति ।) (ख)

(वसन्तसेना संज्ञां लब्ध्वोत्तिष्ठति । भिक्षुः पटान्तेन वीजयति ।)

वसन्तसेना—आर्य कस्त्वम् । (ग)

जूदिअलेहिं णिक्कीदे तदो पहुदि ताए कीदं विअ अत्ताणअं अवगच्छामि । किं णु क्खु पण्णोदले शमुश्शशदि । अध वा ।

वादादवेण तत्ता चीवलतोएण तिम्मिदा पत्ता ।
एदे विथिण्णपत्ता मण्णे पत्ता विअ फुलेन्ति ॥

(क) हा हा शुद्धालंकालभूशिदे इत्थिआहत्थे णिक्कमदि । कधम् । दुदिए वि हत्थे । पच्चभिआणामि विअ एदं हत्थम् । अध वा किं विचालेण । शच्चं शे ज्जेव हत्थे जेण मे अभअं दिण्णम् । भोदु । पेक्खिश्शम् । शा ज्जेव बुद्धोवाशिआ ।

(ख) कधं उदअं मग्गेदि । दूले च दिग्घिआ । किं दाणिं एत्थ कलइश्शम् । भोदु । एदं चीवलं शे उवलि गालइश्शम् । (ग) अज्ज को तुमम् ।

तदो पहुदि निष्क्रयप्रभृति । **वातातपेनेति** । गाथा । वातातपेन तप्तानि चीवरतोयेन तिम्मितत्वमार्द्रत्वं प्राप्तानि । तिम्मिदा इति भावप्रधानो निर्देशः । एतानि विस्तीर्णं प्राप्तं प्रसारितं यत्र तानि पत्राण्येव स्फुरन्ति विजृम्भन्ते । [विस्तीर्णपत्राः प्रसारितपक्षाः मन्ये पत्राः पक्षिणः इव स्फुरन्ति । इति ल० दी०] ॥ ४६ ॥ शुद्धं केवलं कटकादि एवालंकरणं यत्र सः । दीर्घिका वापी । गालयिष्यामि जलसेकार्थम् ।

---

१ फुरन्ति. २ चाल०.

भिक्षुः—किं मा न स्मरति बुद्धोपासिका दशसुवर्णनिष्क्रीतम्। (क)

वसन्तसेना—स्मरामि । न पुनर्यथाऽऽर्यो भणति । वरमहमुपरतैव । (ख)

भिक्षुः—बुद्धोपासिके किं न्विदम् । (ग)

वसन्तसेना—(सनिर्वेदम् ।) यत्सदृशं वेशभावस्य । (घ)

भिक्षुः—उत्तिष्ठतूत्तिष्ठतु बुद्धोपासिकैतां पादपसमीपजातां लतामवलम्ब्य । (इति लतां नामयति ।) (ङ)

(वसन्तसेना गृहीत्वोत्तिष्ठति ।)

भिक्षुः—एतस्मिन्विहारे मम धर्मभगिनी तिष्ठति । तत्र समाश्वस्तमना भूत्वोपासिका गेहं गमिष्यति । तच्छनैः शनैर्गच्छतु बुद्धोपासिका । (इति परिक्रामति । दृष्ट्वा ।) अपसरत आर्याः अपसरत । एषा तरुणी स्त्री एष भिक्षुरिति शुद्धो ममैष धर्मः ।

हस्तसंयतो मुखसंयत इन्द्रियसंयतः स खलु मनुष्यः ।
किं करोति राजकुलं तस्य परलोको हस्ते निश्चलः ॥ ४७ ॥ (च)

(इति निष्क्रान्ताः सर्वे ।)

इति वसन्तसेनामोटनो नामाष्टमोऽङ्कः ।

(क) किं मं ण शुमलेदि बुद्धोवाशिआ दशशुवण्णणिक्कीदम् ।
(ख) सुमरामि । ण उण जधा अज्जो भणादि । वरं अहं उवरदा ज्जेव ।
(ग) बुद्धोवाशिए किं ण्णेदम् । (घ) जं सरिसं वेसभावस्स ।
(ङ) उट्ठेदु उट्ठेदु बुद्धोवाशिआ एदं पादवसमीवजादं लदं ओलम्बिअ ।
(च) ऍदश्शिं विहाले मम धम्मबहिणिआ चिट्ठदि । तहिं शमश्शशिदमणा भविअ उवाशिआ गेहं गमिश्शदि । ता शेणं शेणं गच्छदु बुद्धोवाशिआ । ओशलध अज्जा ओशलध । एशा तलुणी इत्थिआ एशो भिक्खु त्ति शुद्धे मम एशे धम्मे ।

हत्थशंजदो मुहशंजदो इन्दियशंजदो शे क्खु माणुशे ।
किं कलेदि लाअउले तश्श पलॅलोओ हत्थे णिच्चले ॥

वरं मनागिष्टम्। हस्तेति। [स खलु मनुष्यः । यः हस्ते हस्तेन वा संयतः अकार्यान्निवर्तितहस्तः । मुखसंयतः असत्यवाक्यादेर्निवृत्तः । इन्द्रियसंयतः कामान्निवर्तितेन्द्रियवृत्तिः । तस्य राजकुलं किं करोति । धर्मनिष्ठस्य तस्य न काऽपि भीतिरिति भावः । तस्य हस्ते परलोको निश्चलः ध्रुवः] ॥ ४७ ॥

इति मोटनो नामाष्टमोऽङ्कः ।

---

१ नमयति. २ °सेनामोटणं नाम; इति मृच्छकटिकायां वस°. ३ एत्थ शिलाविहावले (अत्र श्रावकगृहे). ४ ओशलध ओशलध. ५ शंजद-दे मुहशंजद-दे इन्दिअशंजद-दे. ६ पललोअ.

नवमोऽङ्कः ।

(ततः प्रविशति शोधनकः ।)

शोधनकः—आज्ञप्तोऽस्म्यधिकरणभोजकैः—अरे शोधनक व्यवहारमण्डपं गत्वाऽऽसनानि सज्जीकुर्विति । तद्यावदधिकरणमण्डपं सज्जितुं गच्छामि । (परिक्रम्यावलोक्य च ।) एषोऽधिकरणमण्डपः । एष प्रविशामि । (प्रविश्य संमार्ज्यासनमाधाय ।) विविक्तः कारितो मयाऽधिकरणमण्डपः । विरचितानि मयाऽऽसनानि । तद्यावदधिकरणिकानां पुनर्निवेदयामि । (परिक्रम्यावलोक्य च ।) कथमेष राष्ट्रियश्यालो दुष्टदुर्जनमनुष्य इत एवागच्छति । तद्दृष्टिपथं परिहृत्य गमिष्यामि । (इत्येकान्ते स्थितः ।) (क)

(ततः प्रविशत्युज्ज्वलवेषधारी शकारः ।)

शकारः—

स्नातोऽहं सलिलजलैः पानीयैरुद्यान उपवनकानने निषण्णः ।
नारीभिः सह युवतीभिः स्त्रीभिर्गन्धर्व[4] इव सुविहितैरङ्गकैः ॥१॥ (ख)

(**क**) आणत्तम्हि अधिअरणभोइएहिं—अरे सोहणआ ववहारमण्डवं[1] गदुअ आसणाइं सज्जीकरेहि त्ति । ता जाव अधिअरणमण्डवं सज्जिदुं गच्छामि । एदं अधिअरणमण्डवम् । ए[2]स पविसामि । विवित्तं कारिदं मए अधिअरणमण्डवम् । विरइदाइं मए आसणाइं । ता जाव अधिअरणिआणं उण णिवेदेमि । कधं एसो रट्ठिअस्सालो दुट्ठदुज्जणमणुस्सो इदो एव्व आअच्छदि । ता दिट्ठिपधं परिहरिअ गमिस्सम् ।

(**ख**) ण्हा[3]देहं शलिलजलेहिं पाणिएहिं उज्जाणे उववणकाणणे णिशण्णे ।
णालीहिं शह जुवदीहिं इश्तिआहिं गन्धव्वेवं[4] शुविहिदेहिं अङ्गकेहिं ॥

[अधिक्रियते विवादाद्यत्रेत्यधिकरणं तस्य भोजयन्ति पालयन्तीति भोजकाः प्रभवस्तैः । व्यवहारो विवादः तस्य मण्डपः । ' परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु । वाक्यान्न्यायाद्व्यवस्थानं व्यवहार उदाहृतः ॥ ' इति मिताक्षरा ।] अधिकरणे न्यायविवादविषये नियुक्तत्वात्तदेषामस्ति । ' अत इनिठनौ ' इति ठन् । अपवादो दोषवाच्येति यावत् । **स्नातोऽहमिति** । प्रहर्षिणीच्छन्दसा । जलेहिं जुवदीहिं शुविहिदएहिं इत्यत्र सानुस्वाराणामप्यन्त्याक्षराणां लाघवम् । छन्दोनुरोधात् । स्नातोऽहं सलिलजलैः स्वच्छैः । पाठान्तरे पानीयैः । नारीभिर्युवतीभिः स्त्रीभिः सह उद्याने उपवनकानने निषण्ण इति विपर्यस्य योजना । गन्धर्व इव सुविहितैरङ्गकैर्लक्षितः । 'गन्धव्वेहिं' इति पाठे तृतीया प्रथमार्थे रूपकं च । पौनरुक्त्यादि शकारोक्तत्वात् ॥१॥

---

१ मण्डपं सज्जिदुं गच्छेत्ति ता गच्छामि. २ ता प०. ३ ण्हादोहं. ४ गन्धव्वेहिं शुविहिदएहिं; गन्धव्वे विअ शुहिदेहिं; गन्धव्वो शुवि०.

क्षणेन ग्रन्थिः क्षणजूटको मे क्षणेन बालाः क्षणकुन्तला वा ।
क्षणेन मुक्ताः क्षणमूर्ध्वचूडाश्चित्रो विचित्रोऽहं राजश्यालः ॥ २ ॥

अपि च । विषग्रन्थिगर्भप्रविष्टेनेव कीटकेनान्तरं मार्गमाणेन प्राप्तं मया महदन्तरम् । तत्कस्येदं कृपणचेष्टितं पातयिष्यामि । (स्मृत्वा ।) आं स्मृतं मया । दरिद्रचारुदत्तस्येदं कृपणचेष्टितं पातयिष्यामि । अन्यच्च । दरिद्रः खलु सः । तस्य सर्वं संभाव्यते । भवतु । अधिकरणमण्डपं गत्वाऽग्रतो व्यवहारं लेखयिष्यामि यथा चारुदत्तेन वसन्तसेना मोटयित्वा मारिता । तद्यावदधिकरणमण्डपमेव गच्छामि । (परिक्रम्यावलोक्य च ।) एष सोऽधिकरणमण्डपः । अत्र प्रविशामि । (प्रविश्यावलोक्य च ।) कथमासनानि दत्तानि तिष्ठन्ति । यावदागच्छन्त्यधिकरणभोजकाः तावदेतस्मिन्दूर्वाचत्वरे मुहूर्तमुपविश्य प्रतिपालयिष्यामि । (तथा स्थितः ।) (क)

शोधनकः—(अन्यतः परिक्रम्य । पुरो[1] दृष्ट्वा ।) एतेऽधिकरणिका आगच्छन्ति । तद्यावदुपसर्पामि । (इत्युपसर्पति ।) (ख)

(क) खणेण गण्ठी खणजूलके[2] मे खणेण बाला[3] खणकुन्तले वा ।
खणेण मुक्के खण उद्धचूडे[4] चित्ते विचित्ते हगे लाअशाले ॥

अवि अ । विशगण्ठिगब्भपविश्टेण विअ कीडएण अन्तलं मग्गमाणेण पाविदं मए महदन्तलम् । ता कश्श एदं किविणचेश्टिअं पाडइश्शम् । आं शुमलिदं मए । दलिद्दचालुदत्तश्श एदं किविणचेश्टिअं पाडइश्शम् । अण्णं च । दलिद्दे क्खु शे । तश्श शव्वं शंभावीअदि । भोदु । अधिअलणमण्डवं गदुअ अग्गदो ववहालं लिहावइश्शं जधा चालुदत्ताकेण वशन्तशेणिआ मोडिअ मालिदा । ता जाव अधिअलणमण्डवं ज्जेव्व गच्छामि । एदं तं अधिअलणमण्डवम् । एत्थ पविशामि । कधं आशणाइं दिण्णाइं चिश्टन्ति । जाव आअश्शन्ति अधिअलणभोइआ दाव एदश्शिं दुव्वचत्तले मुहुत्तअं उवविशिअ पडिवालइश्शम् ।

(ख) एदे अधिअरणिआ आअच्छन्ति । ता जाव उवसप्पामि ।

क्षणेनेति । उपेन्द्रवज्रया । हगे इत्यत्र एकारस्य लघुत्वम् । छन्दोनुरोधात् । एतच्छत्रकमुष्टिकं पावालबन्ध इत्येके । क्षणेन ग्रन्थिः । पाठान्तरे घृष्टिका । क्षणजूलिका मे क्षणेन बालाः क्षणकुन्तला वा । जनिकाज्वलिकयोर्विशेषः (?) । 'चित्ते ण चित्तो' इति पाठे चित्रं न चित्रं यतोऽहं राजश्याल इति व्याख्येयम् । राजश्यालत्वेन मयि सर्वं संभाव्यते इति भावः ॥ २ ॥ [विषग्रन्थ्यभ्यन्तरे प्रविष्टः कीटो यथा विषतापमसहमानः बहिर्निर्गमनार्थं रन्ध्रं मार्गयते तथा स्वनाशपरिहारायोपायं मार्गमाणेन मया लब्ध

---

१ पुरतः. २ खण (क्षणं) जूदिका. ३ मे चञ्चलकुन्तले वा. ४ उच्चच°.

(ततः प्रविशति श्रेष्ठिकायस्थादि[1]परिवृतोऽधिकरणिकः ।)

अधिकरणिकः[2]—भो भोः श्रेष्ठिकायस्थौ ।

श्रेष्ठिकायस्थौ[3]—आज्ञापयत्वार्यः । (क)

अधिकरणिकः—अहो व्यवहार[4]पराधीनतया दुष्करं खलु परचित्तग्रहणमधिकरणिकैः ।

छन्नं कार्यमुपक्षिपन्ति पुरुषा न्यायेन दूरीकृतं
स्वान्दोषान्कथयन्ति नाधिकरणे रागाभिभूताः स्वयम् ।
तैः पक्षापरपक्षवर्धितबलैर्दोषैर्नृपः स्पृश्यते
संक्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः ॥ ३ ॥

अपि च ।

छन्नं दोषमुदाहरन्ति कुपिता न्यायेन दूरीकृताः
स्वान्दोषान्कथयन्ति नाधिकरणे सन्तोऽपि नष्टा ध्रुवम् ।
ये पक्षापरपक्षदोषसहिताः पापानि संकुर्वते
संक्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः ॥ ४ ॥

(**क**) आणवेदु अज्जो ।

उपाय इत्यर्थः । श्रेष्ठी वणिक् । अलंकरणादिपरीक्षणधनगणनाद्यर्थं लोकरञ्जनार्थं च तस्याधिकरणे नियोगः । तदुक्तं कात्यायनेन—‘ कुलशीलवयोवृत्तवित्तवद्भिरमत्सरैः । वणिग्भिः स्यात्कतिपयैः कुलभूतैरधिष्ठितम् ॥ ’ इति । कायस्थो व्यवहारलेखकः व्यवहारदर्शी । ‘ व्यवहारः प्रतिज्ञोत्तरसंशयहेतुपरामर्शप्रमाणनिर्णयप्रयोजनात्मकः ’ इति मिताक्षरा । तस्य पराधीनतया अर्थिप्रत्यर्थिसाक्ष्यादीनां युक्तिनिष्ठतया व्यवहारपराधीनतया । परचित्तग्रहणं परेषामर्थिप्रत्यर्थ्यादीनां चित्तस्य भावस्य ग्रहणं यथार्थज्ञानम् ।] **छन्नमिति** । [पुरुषाः व्यवहर्तारः न्यायेन प्रत्यक्षादिप्रमाणादिना दूरीकृतं विवर्जितं छन्नं सत्यं कार्यमसत्येनाच्छादितमसत्यं च सत्यवत्कृत्वा कार्यमुपक्षिपन्ति निर्णयार्थमुपन्यस्यन्ति । रागाभिभूताः स्वकार्यसंपादनप्रसक्त्याऽभिभूताः अधिकरणे स्वयं स्वान् दोषान् न कथयन्ति । तैः पक्षापरपक्षाभ्यामर्थिप्रत्यर्थिवादाभ्यां वर्धितं बलं येषां तैः । उपचितैरित्यर्थः । दोषैः नृपः स्पृश्यते । यतो न्यायस्य स एव परमाधिष्ठानम् । तदुक्तं मनुना-‘अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकं चाधिगच्छति ॥ ’ इति । न्यायदर्शिनस्तु को लाभ इत्याह-संक्षेपात सारतः । किं बहुनेत्यर्थः । द्रष्टुः प्राड्विवाकस्य अपवादः निन्दा एव सुलभः । गुणः प्रशंसालाभस्तु दूरत एव । न सुखलभ्य इत्यर्थः । समुच्चयालंकारः । शार्दूलविक्रीडितं वृत्तम्]॥ ३ ॥ [उक्तमेवार्थं किंचिद्विशिष्य पुनराह-**छन्नमिति** । न्यायेन दूरीकृताः वर्जिताः कुपिताः पुरुषाः छन्नं गूढं दोषं परकीयस्य अधिकरणे उदाहरन्ति । स्वान् दोषान् अधिकरणे न कथयन्ति । ये सन्तः पक्षापरपक्षदोषसहिताः पापानि संकुर्वते ते

---

१ स्थादिभिः. २ आधिक०; एवं सर्वत्र. ३ तौ; उभौ. ४ हाराधी०.

यतोऽधिकरणिकः खलु—

शास्त्रज्ञः कपटानुसारकुशलो वक्ता न च क्रोधन-
स्तुल्यो[1] मित्रपरस्वकेषु चरितं[2] दृष्ट्वैव दत्तोत्तरः।
क्लीबान्पालयिता शठान्व्यथयिता धर्म्यो न लोभान्वितो
द्वार्भावे[3] परतत्त्व[4]बद्धहृदयो राज्ञश्च कोपापहः॥ ५॥

श्रेष्ठिकायस्थौ—आर्यस्यापि नाम गुणे दोष इत्युच्यते। यद्येवं तदा चन्द्रालोकेऽप्यन्धकार इत्युच्यते। (क)

अधिकरणिकः—भद्र शोधनक अधिकरणमण्डपस्य मार्गमादेशय।

शोधनकः—एत्वेत्वधिकरणभोजक एतु। (ख)

(इति परिक्रामन्ति[5]।)

शोधनकः—अयमधिकरणमण्डपः। तत्प्रविशन्त्वधिकरणभोजकाः। (ग)

(सर्वे च प्रविशन्ति।)

अधिकरणिकः—भद्र शोधनक बहिर्निष्क्रम्य ज्ञायतां कः कः कार्यार्थीति।

शोधनकः—यदार्य आज्ञापयति। (इति निष्क्रम्य।) आर्याः अधिकरणिका भणन्ति—कः क इह कार्यार्थीति। (घ)

(क) अज्जस्स वि णाम गुणे दोसो त्ति वुच्चदि। जइ एव्वं ता चन्दालोए वि अन्धआरो त्ति वुच्चदि। (ख) एदु एदु अधिअरणभोइओ एदु। (ग) एदं अधिअरणमण्डवम्। ता पविसन्तु अधिअरणभोइआ। (घ) जं अज्जो आणवेदि। अज्जा अधिअरणिआ भणन्ति—को को इध कज्जत्थी त्ति।

ध्रुवं नष्टाः। शेषं व्याख्यातम्]॥ ४॥ [अथाधिकरणिकस्वरूपमाह। अधिकरणिकः खलु एवं स्यात्—**शास्त्रज्ञ इत्यादि**। शास्त्रज्ञः धर्मशास्त्रवित्। कपटस्य वादिप्रतिवादिकृतस्यानुसारे अनुगमने। यथार्थज्ञाने इत्यर्थः। कुशलः। वक्ता अवगतार्थप्रतिपादनसमर्थः। न च क्रोधनः क्रोधशीलः। मित्रपरस्वकेषु मित्रशत्रुस्वजनेषु तुल्यः समदर्शनः। पक्षपातरहित इति यावत्। चरितं व्यवहारिणामिति शेषः। दृष्ट्वा सम्यग्विचार्य एव दत्तोत्तरः उत्तरदायी। क्लीबान्दुर्बलान् पालयिता। शठान् व्यथयिता तेषां निग्रहात्पीडाकारी। धर्मादनपेतो धर्म्यः। न लोभान्वितः। द्वार्भावे द्वारुपायः तस्य भावः सत्त्वं तस्मिन्सति। परतत्त्वे अर्थिप्रत्यर्थिनोः याथार्थ्यज्ञाने बद्धहृदयः आहितमतिः। राज्ञश्च वस्तुनो यथार्थस्वरूपकथनेन सदुपदेशेन च कोपापहः कोपमपहन्तीति तथोक्तः। शार्दूल० छन्दः]॥५॥
[यदुक्तं 'संक्षेपादपवाद एव सुलभः' तदुद्दिश्याह—आर्यस्यापि नाम गुणे दोष इति।]

---

१ त्योऽमित्र. २ चरिते दृष्टे च. ३ द्वाभ्यां वै. ४ तन्त्र. ५ क्रामति.

शकारः—(सहर्षम् ।) उपस्थिता अधिकरणिकाः । (साटोपं परिक्रम्य ।) अहं वरपुरुषो मनुष्यो वासुदेवो राष्ट्रियश्यालो राजश्यालः कार्यार्थी । (क)

शोधनकः— (ससंभ्रमम् ।) हन्त प्रथममेव राष्ट्रियश्यालः कार्यार्थी । भवतु । आर्य मुहूर्तं तिष्ठ । तावदधिकरणिकानां निवेदयामि । (उपगम्य ।) आर्याः एष खलु राष्ट्रियश्यालः कार्यार्थी व्यवहारमुपस्थितः । (ख)

अधिकरणिकः—कथम् । प्रथममेव राष्ट्रियश्यालः कार्यार्थी । यथा सूर्योदय उपरागो महापुरुषनिपातमेव कथयति । शोधनक व्याकुलेनाद्य व्यवहारेण भवितव्यम् । भद्र निष्क्रम्योच्यताम्—गच्छाद्य न दृश्यते तव व्यवहार इति ।

शोधनकः—यदार्य आज्ञापयति । (इति निष्क्रम्य शकारमुपगम्य ।) आर्य अधिकरणिका भणन्ति—अद्य गच्छ । न दृश्यते तव व्यवहारः । (ग)

शकारः—(सक्रोधम् ।) आः किं न दृश्यते मम व्यवहारः । यदि न दृश्यते तदाऽऽवुत्तं राजानं पालकं भगिनीपतिं विज्ञाप्य भगिनीं मातरं च विज्ञाप्यैतमधिकरणिकं दूरीकृत्यात्रान्यमधिकरणिकं स्थापयिष्यामि । (इति गन्तुमिच्छति ।) (घ)

शोधनकः—आर्य राष्ट्रियश्याल मुहूर्तं तिष्ठ । तावदधिकरणिकानां निवेदयामि । (अधिकरणिकमुपगम्य ।) एष राष्ट्रियश्यालः कुपितो भणति—(इति तदुक्तं भणति ।) (ङ)

(क) उवत्थिए अधिअलणिए । हग्गे वलपुलिशे मणुश्शे वाशुदेवे लष्टिअशाले लाअशाले कज्जत्थी । (ख) हीमादिके पढमं ज्जेव रट्ठिअसालो कज्जत्थी । भोदु । अज्ज मुहुत्तं चिट्ठ । दाव अधिअरणिआणं णिवेदेमि । अज्जा एसो क्खु रट्ठिअसालो कज्जत्थी ववहारं उवत्थिदो । (ग) जं अज्जो आणवेदि । अज्ज अधिअरणिआ भणन्ति—अज्ज गच्छ । ण दीशदि तव ववहारो ।

(घ) आः किं ण दीशदि मम ववहाले । जइ ण दीशदि तदो आवुत्तं लाआणं पालअं बहिणीवर्दि विण्णविअ बहिणिं अत्तिकं च विण्णविअ एदं अधिअलणिअं दूले फेलिअ एत्थ अण्णं अधिअलणिअं ठावइश्शम् । (ङ) अज्ज रट्ठिअशालअ मुहुत्तअं चिट्ठ । दाव अधिअरणिआणं णिवेदेमि । एसो रट्ठिअशालो कुविदो भणादि— ।

[उपरागः राहुणा सूर्यस्य चन्द्रस्य वा ग्रासः । व्याकुलेन विक्षोभितेन ।] आः क्रोधे । आवुत्तं भगिनीपतिम् । आवुत्तमित्यादावुक्त्वा पुनर्भगिनीपतिमिति पुनरुक्तम् ।

---

१ ०कानुप०.

अधिकरणिकः—सर्वमस्य मूर्खस्य संभाव्यते। भद्र उच्यताम्—आगच्छ। दृश्यते तव व्यवहारः।

शोधनकः—(शकारमुपगम्य।) आर्य अधिकरणिका भणन्ति—आगच्छ। दृश्यते तव व्यवहारः। तत्प्रविशत्वार्यः। (क)

शकारः—प्रथमं भणन्ति न दृश्यते सांप्रतं दृश्यत इति। तन्नाम भीतभीता अधिकरणभोजकाः। यद्यदहं भाणिष्यामि तत्तत्प्रत्याययिष्यामि। भवतु। प्रविशामि। (प्रविश्योपसृत्य।) सुसुखमस्माकं युष्माकमपि सुखं ददामि न ददामि च। (ख)

अधिकरणिकः—(स्वगतम्।) अहो स्थिरसंस्कारता व्यवहारार्थिनः। (प्रकाशम्।) उपविश्यताम्।

शकारः—आं आत्मीयैषा भूमिः। तद्यत्र मह्यं रोचते तत्रोपविशामि। (श्रेष्ठिनं प्रति।) एष उपविशामि। (शोधनकं प्रति।) नन्वत्रोपविशामि। (इत्यधिकरणिकमस्तके हस्तं दत्त्वा।) एष उपविशामि। (इति भूमावुपविशति।) (ग)

अधिकरणिकः—भवान्कार्यार्थी।

शकारः—अथ किम्। (घ)

अधिकरणिकः—तत्कार्यं कथय।

शकारः—कर्णे कार्यं कथयिष्यामि। एवं बृहति मल्लकप्रमाणस्य कुलेऽहं जातः। (ङ)

(क) अज्ज अधिअरणिआ भणन्ति—आअच्छ। दीसदि तव ववहारो। ता पविसदु अज्जो। (ख) पैढमं भणान्ति ण दीशदि संपदं दीशदि त्ति। ता णाम भीदभीदा अधिअलणभोइआ। जेत्तिअं हग्गे भणिश्शं तोत्तिअं पत्तिआवइश्शम्। भोदु। पविशामि। शुशुहं अम्हाणं तुम्हाणं पि शुहं देमि ण देमि अ।

(ग) आं अत्तणकेलका शे भूमी। ता जहिं मे रोअदि तहिं उवविशामि। एश उवविशामि। णं एत्थ उवविशामि। एश उवविशामि। (घ) अध इं।

(ङ) कण्णे कज्जं कधइश्शम्। एव्वं वड्ढके मल्लकप्पमाणाह कुले हग्गे जादे।

युष्माकं सुखं ददामि न ददामि। शकारोक्तेर्व्याकुलता। मल्लकः पात्रविशेषः।

---

१ यावदहं भणिष्यामि तावत्प्रत्येष्यन्ते. २ ही पढमं भणादि.

राजश्वशुरो मम पिता राजा तातस्य भवति जामाता ।
राजश्यालोऽहं ममापि भगिनीपती राजा ॥ ६ ॥ (क)

अधिकरणिकः—सर्वं ज्ञायते)

किं कुलेनोपदिष्टेन शीलमेवात्र कारणम् ।
भवन्ति नितरां स्फीताः सुक्षेत्रे कण्टकिद्रुमाः[1] ॥ ७ ॥

(तदुच्यतां कार्यम् ।

शकारः—एवं भणामि । अपराद्धस्यापि न च मे किमपि करिष्यति । ततस्तेन भगिनीपतिना परितुष्टेन मे क्रीडितुं रक्षितुं सर्वोद्यानानां प्रवरं पुष्पकरण्डकजीर्णोद्यानं दत्तम् । तत्र च प्रेक्षितुमनुदिवसं शुष्कं कारयितुं शोधयितुं पुष्टं कारयितुं लूनं कारयितुं गच्छामि । दैवयोगेन पश्यामि न पश्यामि वा स्त्रीशरीरं निपतितम् । (ख)

अधिकरणिकः—अथ ज्ञायते का स्त्री विपन्नेति ।

शकारः—अहो अधिकरणभोजकाः (किमिति न जानामि) तां तादृशीं नगरमण्डनं काञ्चनशतभूषणाम् (केनापि कुपुत्रेणार्थकल्यवर्तस्य कारणाच्छून्यं पुष्पकरण्डकजीर्णोद्यानं प्रविश्य बाहुपाशबलात्कारेण वसन्तसेना मारिता । न मया) (इत्यर्धोक्ते मुखमावृणोति ।) (ग)

(क) लाअशशुले मम पिदा लाआ तादश्श होइ जामादा ।
लाअशिआले हग्गे ममावि बहिणीवदी लाआ ॥

(ख) एव्वं भणामि । अवलद्धाह वि ण अ मे किं पि कलइश्शदि । तदो तेण बहिणीवदिणा परितुश्टेण मे कीलिदुं लक्खिदुं शव्वुज्जाणाणं पवले पुप्फकलण्डकजिण्णुज्जाणे दिण्णे । तहिं च पेक्खिदुं अणुदिअहं शोशावेदुं शोधावेदुं पोश्टावेदुं लुणावेदुं गच्छामि । देव्वजोएण पेक्खामि ण पेक्खामि वा इत्थिआशलीलं णिवडिदम् ।

(ग) हंहो अधिअलणभोइआ किंत्ति ण जाणामि तं तादिशिं णअलमण्डणं कञ्चणशदभूशणिअं । केण वि कुपुत्तेण अत्थकल्लवत्तश्श कालणादो शुण्णं पुप्फकलण्डकजिण्णुज्जाणं पविशिअ बाहुपाशबलक्कालेण वशन्तशेणिआ मालिदा । ण मए ।

राजश्वशुर इत्यादि । गाथा ॥ ६ ॥ **किं कुलेनेत्यादि** । [अष्टमाङ्के २९ तमं पद्यं द्रष्टव्यम्] ॥ ७ ॥ एतेन यदुक्तं भवति तदाह—अपराद्धस्यापि न मे किमपि करिष्यति । जीर्णेति विशेषणं विजनत्वख्यापनार्थम् । तत्र च प्रेक्षितुमित्यत्र तत्रेति करणाधिकरणत्वेन विवक्षितत्वात्तादित्येवार्थः । [न गच्छामीति पूर्वोक्तविरुद्धं शकारवचनत्वात् । बाहुपाशबलात्कारेण । व्रणशून्यत्वाद्बलवद्बाहुपीडनेन ।] न मयेति तस्य

---

[1] कण्टक.

अधिकरणिकः—अहो नगररक्षिणां प्रमादः । भोः श्रेष्ठिकायस्थौ न मयेति व्यवहारपदं प्रथममभिलिख्यताम् ।

कायस्थः—यदार्य आज्ञापयति। (तथा कृत्वा।) आर्य लिखितम्।(क)

शकारः—(स्वगतम्।) हीमादिके। उत्त्वरायमाणेनेव पायसपिण्डारकेणाद्य मयाऽऽत्मैव निर्नाशितः । भवतु । एवं तावत् । (प्रकाशम्।) अहो अधिकरणभोजकाः ननु भणामि मयैव दृष्टा । किं कोलाहलं कुरुत । (इति पादेन लिखितं प्रोञ्छति।) (ख)

अधिकरणिकः—कथं त्वया ज्ञातं यथा खल्वर्थनिमित्तं बाहुपाशेन व्यापादिता ।

शकारः—हंहो नूनं शूनशूनया मोघस्थानया ग्रीवालिकया निःसुवर्णकैराभरणस्थानैस्तर्कयामि । (ग)

श्रेष्ठिकायस्थौ—युज्यत इव । (घ)

शकारः—(स्वगतम्।) दिष्ट्या प्रत्युज्जीवितोऽस्मि । अविद मादिके । (ङ)

श्रेष्ठिकायस्थौ—भोः कमेष व्यवहारोऽवलम्बते । (च)

अधिकरणिकः—इह हि द्विविधो व्यवहारः ।

श्रेष्ठिकायस्थौ—कीदृशः । (छ)

अधिकरणिकः—वाक्यानुसारेण अर्थानुसारेण च । यस्तावद्वाक्यानुसारेण स खल्वर्थिप्रत्यर्थिभ्यः । यश्चार्थानुसारेण स चाधिकरणिकबुद्धिनिष्पाद्यः ।

(क) जं अज्जो आणवेदि । अज्ज लिहिदम् । (ख) हीमादिके । उत्तलाअन्तेण विअ पाअशपिण्डालकेण अज्ज मए अत्ता एव्व णिण्णाशिदो । भोदु । एव्वं दाव । अहो अधिअलणभोइआ णं भणामि मए ज्जेव्व दिट्ठा । किं कोलाहलं कलेध ।

(ग) हंहो णूणं शूणशूणाए मोघट्ठाणाए गीवालिआए णिश्शुवण्णकेहिं आहलणट्ठाणेहिं तक्केमि । (घ) जुज्जदि विअ । (ङ) दिश्टिआ पच्चुज्जीविदम्हि । अविद मादिके । (च) भो कं एसो ववहारो अवलम्बदि । (छ) केरिसो ।

बोध्यत्वेन व्यवहारपदम् । [हीमादिके इति खेदे भये वा । उत्त्वरायमाणेन त्वरया ऊर्ध्वं निष्क्रामता पायसपिण्डारकेण पायसान्नेन इव। शूनशूनया अतिशोथवत्या । मोघस्थानया ग्रैवेयाद्यलंकारहरणाद्रिक्तस्थानया । ग्रीवैव ग्रीवालिका ।] अविद मादिके इत्याश्वासे । [वाक्यानुरोधादर्थिप्रत्यर्थिनोस्तत्साक्षिणां च वचनानुरोधात् । अर्थानुसारेण वाक्य-

---

१ लिखनं. २ अर्थ प्रत्यर्थभ्यः. ३ परिशूणाए (परिशून्यया). ४ मोटणाए (मोटनया).

श्रेष्ठिकायस्थौ—तद्वसन्तसेनामातरमवलम्बते व्यवहारः । (क)

अधिकरणिकः—एवमिदम् । भद्र शोधनक वसन्तसेनामातरमनुद्वेजयन्नाह्वय ।

शोधनकः—तथा[1] । (इति निष्क्रम्य गणिकामात्रा[2] सह प्रविश्य ।) एत्वेत्वार्या । (ख)

वृद्धा—गता मे दारिका मित्रगृहमात्मनो यौवनमनुभवितुम् । एष पुनर्दीर्घायुर्भणति—आगच्छ । अधिकरणिक आह्वयति । तन्मोहपरवशमिवात्मानमवगच्छामि । हृदयं मे प्रकम्पते । आर्य आदिश मह्यमधिकरणमण्डपस्य मार्गम् । (ग)

शोधनकः—एत्वेत्वार्या । (घ)

(उभौ परिक्रामतः ।)

शोधनकः—एषोऽधिकरणमण्डपः । अत्र प्रविशत्वार्या । (ङ)

(इत्युभौ प्रविशतः ।)

वृद्धा—(उपसृत्य ।) सुखं युष्माकं भवतु भावमिश्राणाम् । (च)

अधिकरणिकः—भद्रे स्वागतम् । आस्यताम् ।

वृद्धा—तथा । (इत्युपविष्टा ।) (छ)

शकारः—(साक्षेपम् ।) आगताऽसि वृद्धकुट्टिनि आगताऽसि । (ज)

अधिकरणिकः—अये त्वं किल वसन्तसेनाया[3] माता ।

(क) ता वसन्तसेणामादरं अवलम्बदि ववहारो ।

(ख) तधा । एदु एदु अज्जा ।

(ग) गदा मे दारिआ मित्तघरअं अत्तणो जोव्वणं[4] अणुभविदुम् । एसो उण दीहाऊ भणादि—आअच्छ । अधिअरणिओ सद्दावेदि । ता मोहपरवसं विअ अत्ताणअं अवगच्छामि । हिअअं मे थरथरेदि । अज्ज आदेसेहि मे अधिअरणमण्डवस्स मग्गम् । (घ) एदु एदु अज्जा ।

(ङ) एदं अधिअरणमण्डवम् । एत्थ पविसदु अज्जा ।

(च) सुहं तुम्हाणं भोदु भावमिस्साणम् । (छ) तधा ।

(ज) आगदाशि बुड्ढकुट्टिणि[5] आगदाशि ।

विप्रतिपत्तौ विशयस्वरूपबोधनेन निर्णयः ।] अनुद्वेजयन् दुहितृमृत्युवार्ताकथनेनो-

1 तथेति नि०. 2 गणिकायाः. 3 सेनामाता. 4 जोव्वणसुहं. 5 कुट्टिणि, कुट्टणिआ.

वृद्धा—अथ किम् । (क)

अधिकरणिकः—अथेदानीं वसन्तसेना क्व गता ।

वृद्धा—मित्रगृहम् । (ख)

अधिकरणिकः—किंनामधेयं तस्या मित्रम् ?

वृद्धा—(स्वगतम् ।) हा धिक् हा धिक् । अतिलज्जनीयं खल्वेतत् । (प्रकाशम् ।) जनस्य पृच्छनीयोऽयमर्थो न पुनरधिकरणिकस्य । (ग)

अधिकरणिकः—अलं लज्जया । व्यवहारस्त्वां पृच्छति ।

श्रेष्ठिकायस्थौ—व्यवहारः पृच्छति । नास्ति दोषः । कथय । (घ)

वृद्धा—कथं व्यवहारः । यद्येवं तदा शृण्वन्त्वार्यमिश्राः । स खलु सार्थवाहविनयदत्तस्य नप्ता सागरदत्तस्य तनयः सुगृहीतनामधेय आर्यचारुदत्तो नाम श्रेष्ठिचत्वरे प्रतिवसति । तत्र मे दारिका यौवनसुखमनुभवति । (ङ)

शकारः—श्रुतमार्यैः । लिख्यन्तामेतान्यक्षराणि । चारुदत्तेन सह मम विवादः । (च)

श्रेष्ठिकायस्थौ—चारुदत्तो मित्रमिति नास्ति दोषः । (छ)

अधिकरणिकः—व्यवहारोऽयं चारुदत्तमवलम्बते ।

श्रेष्ठिकायस्थौ—एवमिव । (ज)

अधिकरणिकः—धनदत्त वसन्तसेनाऽऽर्यचारुदत्तस्य गृहं गतेति लिख्यतां व्यवहारस्य प्रथमः पादः । कथमार्यचारुदत्तोऽप्यस्माभि-

---

(क) अध इं । (ख) मित्तघरअम् ।

(ग) हद्धी हद्धी । अदिलज्जणीअं क्खु एदम् । जणस्स पुच्छणीओ अअं अत्थो ण उण अधिअरणिअस्स । (घ) ववहारो पुच्छदि । णत्थि दोसो । कधेहि ।

(ङ) कधं ववहारो । जइ एव्वं ता सुणन्तु अज्जमिस्सा । सो क्खु सत्थवाहविणअदत्तस्स णत्तिओ साअरदत्तस्स तणओ सुगहिदणामहेओ अज्जचारुदत्तो णाम सेट्ठिचत्तरे पडिवसदि । तहिं मे दारिआ जोव्वणसुहं अणुभवदि ।

(च) शुदं अज्जेहिं । लिहीअन्तु एदे अक्खला । चालुदत्तेण शह मम विवादे ।

(छ) चारुदत्तो मित्तो त्ति णत्थि दोसो । (ज) एवं विअ ।

द्विम्नामकुर्वन् । अर्थो न पुनरधिकरणिकानामिति वेश्यापतिरूपतया ज्ञानेन शिष्टानां लज्जाकरत्वादिति भावः । धनदत्तेति कायस्थसंबोधनम् । स्वैरं स्वच्छन्दम् । असं-

---

१ ण एत्थ. २ सुगिहिद.

राह्वाययितव्यः । अथ वा व्यवहारस्तमाह्वयति । भद्र शोधनक गच्छ । आर्यचारुदत्तं स्वैरमसंभ्रान्तमनुद्विग्नं सादरमाहूय प्रस्तावेन—अधिकरणिकस्त्वां द्रष्टुमिच्छतीति ।

शोधनकः—यदार्य आज्ञापयति । (इति निष्क्रान्तः । चारुदत्तेन सह प्रविश्य च ।) एत्वेत्वार्यः । (क)

चारुदत्तः—(विचिन्त्य ।)

परिज्ञातस्य मे राज्ञा शीलेन च कुलेन च ।
यत्सत्यमिदमाह्वानमवस्थामभिशङ्कते ॥ ८ ॥

(सवितर्कं स्वगतम् ।)

ज्ञातो नु[1] किं स खलु बन्धनविप्रयुक्तो
मार्गागतः[2] प्रवहणेन मयाऽपनीतः ।
चारेक्षणस्य नृपतेः श्रुतिमागतो वा
येनाहमेवमभियुक्त इव प्रयामि ॥ ९ ॥

अथ वा किं विचारितेन । अधिकरणमण्डपमेव गच्छामि । भद्र शोधनक अधिकरण[3]स्य मार्गमादेशाय ।

शोधनकः—एत्वेत्वार्यः । (ख)

(इति परिक्रामतः ।)

चारुदत्तः—(सशङ्कम् ।) तत्किमपरम् ।

रूक्षस्वरं वाशति[4] वायसोऽयममात्यभृत्या मुहुराह्वयन्ति ।
सव्यं च नेत्रं स्फुरति प्रसह्य ममानिमित्तानि हि खेदयन्ति ॥ १० ॥

(क) जं अज्जो आणवेदि । एदु एदु अज्जो । (ख) एदु एदु अज्जो ।

भ्रान्तं संभ्रमशून्यम् । **परिज्ञातस्येति** । अवस्थामीदृशीं दशाम् ॥८॥ **ज्ञात इति** । [स मार्गागत आर्यकः प्रवहणेन मयाऽपनीतः अपवाहितः नृपतेः ज्ञातः किम् । अथ वा चारा ईक्षणं यस्य तस्य श्रुतिमागतो वा । येनाहमेवमभियुक्तः अपराधित्वेन दूषित इव प्रयामि । वसन्ततिलकं वृत्तम्] ॥ ९ ॥ **रूक्षेति** । 'शासृ वासृ शब्दे' । भ्वादिः । आत्मनेपदानित्यत्वाच्च परस्मैपदम् । [वायसो रूक्षस्वरं वाशति शब्दं करोति । लल्ला-दीक्षितास्तु 'वासति' इति पठित्वा चञ्चुपुटमुद्धास्य विरौति इति व्याख्यान्ति । वायसस्य कर्कशारावः महाभयदः । तदुक्तं वराहमिहिरेण—'दारुणनादस्तरुकोटरोपगो वायसो महाभयदः' इति । अमात्यानामत्राधिकरणिकानां भृत्याः मुहुराह्वयन्ति । सव्यं वामं च नेत्रं प्रसह्य बलवत्स्फुरति । पुंसां वामनेत्रस्फुरणमनिमित्तमनिष्टसूचकम् । एतानि अनिमित्तानि मम मां खेदयन्ति । ममेति द्वितीयार्थे कर्मणः शेषत्वविवक्षया

१ हि किं नु. २ मार्गं गतः. ३ ०णमण्डपस्य. ४ वासति.

शोधनकः—एत्वेत्वार्यः स्वैरमसंभ्रान्तम् । (क)

चारुदत्तः—(परिक्रम्याग्रतोऽवलोक्य च ।)

शुष्कवृक्षस्थितो ध्वाङ्क्ष आदित्याभिमुखस्तथा ।
मयि चोदयते वामं चक्षुर्घोरमसंशयम् ॥ ११ ॥

(पुनरन्यतोऽवलोक्य ।) अये कथमयं सर्पः ।

मयि विनिहितदृष्टिर्भिन्ननीलाञ्जनाभः
स्फुरितविततजिह्वः शुक्लदंष्ट्राचतुष्कः ।
अभिपतति सरोषो जिह्मिताध्मातकुक्षि-
र्भुजगपतिरयं मे मार्गमाक्रम्य सुप्तः ॥ १२ ॥

अपि चेदम् ।

स्खलति चरणं भूमौ न्यस्तं न चार्द्रतमा मही
स्फुरति नयनं वामो बाहुर्मुहुश्च विकम्पते ।
शकुनिरपरश्चायं तावद्विरौति हि नैकशः
कथयति महाघोरं मृत्युं न चात्र विचारणा ॥ १३ ॥

सर्वथा देवताः स्वस्ति करिष्यन्ति ।

शोधनकः—एत्वेत्वार्यः । इममधिकरणमण्डपं प्रविशत्वार्यः । (ख)

(क) एदु एदु अज्जो सैरं असंभन्तम् ।
(ख) एदु एदु अज्जो । इमं अधिअरणमण्डवं पविसदु अज्जो ।

षष्ठी । उपजातिः] ॥ १० ॥ **शुष्केति**। [ध्वाङ्क्षः काकः शुष्कवृक्षस्थितस्तथा आदित्याभिमुखः सन् मयि घोरं वामं चक्षुः असंशयं यथा तथा चोदयते प्रेरयति । महाभयसूचकमेतत् । तदुक्तं बृहत्संहितायां–' छिन्नाग्रेऽङ्गच्छेदः कलहः शुष्कद्रुमास्थिते ध्वाङ्क्षे । ऐन्द्रादिदिगवलोकी सूर्याभिमुखो रुवन् गृहे गृहिणः । राजभयचौरबन्धनकलहाः स्युः पशुभयं चेति ॥ ' इति] ॥ ११ ॥ [अपरमपशकुनमाह–**मयीति** । भिन्नं सम्यग्मर्दितं यन्नीलाञ्जनं तस्येव आभा यस्य सः । स्फुरिता वितता जिह्वा यस्य सः । शुक्लं दंष्ट्राचतुष्कं यस्य सः । मे मार्गमाक्रम्य सुप्तः अयं भुजगपतिः कृष्णसर्पः सरोषः जिह्मितः वक्रीकृतः आध्मातः वायुपूरितः कुक्षिर्यस्य तथा । मयि विनिहितदृष्टिः अभिपतति । एतदपि महाभयसूचकम् । उक्तं च बृहत्संहितायां–'फणिनोऽभिमुखागमोऽरिसङ्गं कथयति बन्धवधात्ययं च यातुः ' इति । स्वभावोक्तिः । मालिनी वृत्तम्] ॥ १२ ॥ **स्खलतीति** । [भूमौ न्यस्तं चरणं स्खलति । न च मही आर्द्रतमा अत्यन्तमार्द्रा । एतदपि अनिष्टसूचकम् । तदुक्तं वसन्तराजेन–'स्वपादयानस्खलनं नृपाणां भङ्गः क्वचिद्यानपलायनं च । द्वाराभिघाताध्वगशस्त्रपाताः प्रस्थानविघ्नं कथयन्ति यातुः ॥' इति । नयनं वाममित्यर्थात् । स्फुरति । वामो बाहुश्च मुहुः विकम्पते । अयमपरः पूर्वोक्तादन्यः गृध्रादिः शकुनिः तावन्नैकशः वारं वारं विरौति विकटं शब्दायते । एतत्सर्वं महाघोरं मृत्युं कथयति । अत्र विचारणा न च । हरिणी वृत्तम्] ॥ १३ ॥

---

१ चक्षुश्चोर. २ विनिहत. ३ महामृत्युं घोरं.

चारुदत्तः—(प्रविश्य । समन्तादवलोक्य ।) अहो अधिकरणमण्डपस्य परा श्रीः । इह हि—

चिन्तासक्तनिमग्नमन्त्रिसलिलं दूतोर्मिशङ्खाकुलं
पर्यन्तस्थितचारनक्रमकरं नागाश्वहिंस्राश्रयम् ।
नानावाशककङ्कपक्षिनिचितं कायस्थसर्पास्पदं
नीतिक्षुण्णतटं च राजकरणं हिंस्रैः समुद्रायते ॥ १४ ॥

भवतु । (प्रविशञ्शिरोघातमभिनीय सवितर्कम् ।) अहह इदमपरम्—

सव्यं मे स्पन्दते चक्षुर्विरौति वायसस्तथा ।
पन्थाः सर्पेण रुद्धोऽयं स्वस्ति चास्मासु दैवतः ॥ १५ ॥

तावत्प्रविशामि । (इति प्रविशति ।)

अधिकरणिकः—अयमसौ चारुदत्तः । य एषः—

घोणोन्नतं मुखमपाङ्गविशालनेत्रं
नैतद्धि भाजनमकारणदूषणानाम् ।

चिन्तासक्तेति । चिन्तामार्गे [चिन्तायां कार्यार्थपर्यालोचने आसक्ताः] निमग्नाश्च मन्त्रिणः एव सलिलानि यत्र । दूत आह्वायको गतागतानियुक्तो वीरश्च गूढपुरुषः । [दूता एव ऊर्मयः शङ्खाश्च । यद्वा ऊर्म्यूढाः शङ्खाः तैः आकुलम् । चाराः प्रणिधय एव नक्रा मकराश्च यत्र । नागा गजाश्च अश्वाश्च नागाश्वाः ते एव हिंस्राः तेषामाश्रयमावासभूतम् । नागानां पादतलेन वध्यविनाशार्थे अश्वानां च झटिति संदेशहरणाद्यर्थं तत्र स्थापितत्वात् हिंस्रसाम्यम् ।] नाना बहुप्रकाराः [ये वाश्यन्ते इति वाशकाः अनेकधा शब्दायमाना अर्थिप्रत्यर्थिजनाः ते एव] शब्दं कुर्वन्तो ये कङ्कपक्षिणस्तै रचितं [निचितं] व्याप्तम् । पर्यन्तेषु स्थिताः अशुभसूचकत्वेन तेषां समवधानमुक्तम् । अब्धिपक्षे तु व्यक्तमेव । 'पक्ष' इति पाठे तेषां पक्षाणां रचितम् । नानाक्रमणिकया निर्मितभेदो यत्रेत्यर्थः । कङ्को मांसादः पक्षिविशेषः । [कायस्था एव सर्पाः तेषां स्वभावकौटिल्यादसूयापरत्वात् प्राणहरराजशासनलेखनाद्वा सर्पसाम्यम् । तेषामास्पदं स्थानम् । नीतिभिः नदीभिरिव क्षुण्णतटम् । एवंविधं राज्ञः करणं न्यायाधिकरणं समुद्रायते । समुद्रवद् दुष्प्रवेश्यमित्यर्थः । 'कर्तुः क्यङ्—' इत्यनेन क्यङ् । रूपकोपमयोः संकरः । शार्दूलविक्रीडितं वृत्तम्] ॥ १४ ॥ **सव्यमिति** । [अस्मासु दैवतः भागधेयादेव स्वस्ति अस्तु] ॥ १५ ॥ **घोणेति** । घोणा उन्नता यत्र घोणया वा उन्नतमुत्कृष्टम् । अपाङ्गो विशालो यत्र । [तादृशे नेत्रे यस्य । यद्वा अपाङ्गयोः विशाले नेत्रे यस्य तत् ।] एतेन नेत्रविशालत्वमुक्तम् । [एवंविधमेतन्मुखमकारणदूषणानां अकारणेन हठेन दूषणानां भाजनं न भवति हि ।

---

१ चारु. २ हिंसा. ३ वासक. ४ रचितं, रुचिरम्. ५ भवनं. ६ दैवताः. ७ विभाजनं.

नागेषु गोषु तुरगेषु तथा नरेषु
न ह्याकृतिः सुसदृशं विजहाति वृत्तम् ॥ १६ ॥

चारुदत्तः—भोः अधिकृतेभ्यः स्वस्ति । हंहो नियुक्ताः अपि कुशलं भवताम् ।

अधिकरणिकः—(ससंभ्रमम् ।) स्वागतमार्यस्य । भद्र शोधनक आर्यस्यासनमुपनय ।

शोधनकः—(आसनमुपनीय ।) एतदासनम् । अत्रोपविशत्वार्यः । (क)

(चारुदत्त उपविशति ।)

(**शकारः**—(सक्रोधम् ।) आगतोऽसि रे स्त्रीघातक आगतोऽसि । अहो न्याय्यो व्यवहारः अहो धर्म्यो व्यवहारः यदेतस्मै स्त्रीघातकायासनं दीयते । (सगर्वम् ।) भवतु । ननु दीयताम्) (ख)

अधिकरणिकः—आर्य चारुदत्त अस्ति भवतोऽस्या आर्याया दुहित्रा सह प्रसक्तिः प्रणयः प्रीतिर्वा ।

चारुदत्तः—कस्याः ।

अधिकरणिकः—अस्याः । (इति वसन्तसेनामातरं दर्शयति ।)

चारुदत्तः—(उत्थाय ।) आर्ये अभिवादये ।

वृद्धा—जात चिरं मे जीव । (स्वगतम् ।) अयं स चारुदत्तः । सुनिक्षिप्तं खलु दारिकया यौवनम् । (ग)

(**अधिकरणिकः**—आर्य गणिका तव मित्रम्)

(चारुदत्तो लज्जां नाटयति ।)

(क) एदं आसनम् । एत्थ उवविसदु अज्जो ।

(ख) आगदेशि ले इत्थिआघादआ आगदेशि । अहो णाए ववहाले अहो धम्मे ववहाले जं एदाह इत्थिआघादकाह आशणे दीअदि । भोदु । णं दीअदु ।

(ग) जाद चिरं मे जीव । अअं सो चारुदत्तो । सुणिक्खित्तं क्खु दारिआए जोव्वणम् ।

यतः नागेषु गोषु तुरगेषु तथा नरेषु आकृतिः रम्याकारः सुसदृशं आकारसदृशं रमणीयं वृत्तं न विजहाति त्यजति । सुरूपाकृतिर्गुणविसंवादिनी न भवतीति भावः । वसन्ततिलकं वृत्तम्]॥१६॥ प्रसक्तिः [सङ्गः संपर्को वा] प्रणयो रागानुबन्धः प्रीति

शकारः--

लज्जया भीरुतया वा चारित्रमलीकं निगूहितुम् । (क)
स्वयं मारयित्वाऽर्थकारणादिदानीं गूहति न तद्धि भट्टकः ॥१७॥

श्रेष्ठिकायस्थौ—आर्य चारुदत्त भण । अलं लज्जया । व्यवहारः खल्वेषः । (ख)

चारुदत्तः— (सलज्जम् ।) भो अधिकृताः मया कथमीदृशं वक्तव्यं यथा गणिका मम मित्रमिति । अथ वा यौवनमत्रापराध्यति न चारित्र्यम्[१] ।

अधिकरणिकः--

व्यवहारः सविघ्नोऽयं त्यज लज्जां हृदि स्थिताम् ।
ब्रूहि सत्यमलं धैर्यं छलमत्र न गृह्यते ॥ १८ ॥

अलं लज्जया । व्यवहारस्त्वां पृच्छति ।

चारुदत्तः—अधिकृत[२] केन सह मम व्यवहारः ।

शकारः—(साटोपम् ।) अरे मया सह व्यवहारः । (ग)

चारुदत्तः—त्वया सह मम व्यवहारः सुदुःसहः ।

(**शकारः**—अरे स्त्रीघातक तां तादृशीं रत्नशतभूषणां वसन्तसेनां मारयित्वा सांप्रतं कपटकापटिको भूत्वा निगूहसि ।) (घ)

(क) लज्जाए भीलुदाए वा चालित्तं अलिए णिगूहिदुम् ।
शअं मालिअ अत्थकालणा दाणिं गूहदि ण तं हि भट्टके ॥

(ख) अज्ज चारुदत्त भणाहि । अलं लज्जाए । ववहारो क्खु एसो ।

(ग) अले मए शह ववहाले ।

(घ) अले इश्थिआघादआ तं तादिशिं लअणशदभूशाणिअं वसन्तशेणिअं मालिअ शंपदं कवडकावडिके भविअ णिगूहेशि ।

स्नेहमात्रम् । **लज्जयेत्यादि** । वैतालीयम् । एइं इति सबिन्दुविकारो लघुः छन्दोनुरोधात् । लज्जया भीरुकतया च लक्षितः । त्वमित्यर्थात् । कुत एवमित्याह स्वयं मारयित्वाऽर्थनिमित्तमिदानीं गृह्णाति न नष्टके । अपि तु नष्ट एव । 'नष्टके' इत्यपि पाठः । [अर्थकारणात् स्वयं वसन्तसेनां मारयित्वा लज्जया भीरुतया वा अलीकं चरित्रं निगूहितुं यतसे इति शेषः । किं तु भट्टकः राजा पालकः अधिकरणिको वा तन्न गूहति हि । 'अलीको निगूहतु' इति पाठः साधीयान्]॥ १७ ॥ **व्यवहार इति** । [अयं व्यवहारः सविघ्नः । हृदि स्थितां लज्जां त्यज । सत्यं ब्रूहि । धैर्यमलं विलम्बो माऽस्तु इत्यर्थः । यद्वा धैर्यं अलं सत्यकथनायेति शेषः । अस्तु ।] छलपरिहारार्थं चिरं समीक्ष्यत इत्याशङ्क्याह—छलमत्र नेति । [यद्वा अत्र अस्मिन्व्यवहारे छलमाकारगोप-

---

१ चारित्रम्. २ अधिकृताः.

(चारुदत्तः—असंबद्धः खल्वसि ।

अधिकरणिकः—आर्य चारुदत्त अलमनेन । ब्रूहि सत्यम् । अपि गणिका तव मित्रम् ?

(चारुदत्तः—एवमेव ।

अधिकरणिकः—आर्य वसन्तसेना क्व ।

चारुदत्तः—गृहं गता)

श्रेष्ठिकायस्थौ—कथं गता कदा गता गच्छन्ती वा केनानुगता। (क)

चारुदत्तः—(स्वगतम् ।) किं प्रच्छन्नं गतेति ब्रवीमि ।

श्रेष्ठिकायस्थौ—आर्य कथय । (ख)

चारुदत्तः—गृहं गता । किमन्यद्ब्रवीमि ।

(शकारः—मदीयं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्यार्थनिमित्तं बाहुपाशबलात्कारेण मारिता । अये सांप्रतं वदसि गृहं गतेति । (ग)

चारुदत्तः—आः असंबद्धप्रलापिन् ।

अभ्युक्षितोऽसि सलिलैर्न बलाहकानां
चाषाग्रपक्षसदृशं भृशमन्तराले ।
मिथ्यैतदाननमिदं भवतस्तथा हि
हेमन्तपद्ममिव निष्प्रभतामुपैति ॥ १९ ॥)

अधिकरणिकः—(जनान्तिकम् ।)

तुलनं चाद्रिराजस्य समुद्रस्य च तारणम् ।
ग्रहणं चानिलस्येव[1] चारुदत्तस्य दूषणम् ॥ २० ॥

(प्रकाशम् ।) आर्यचारुदत्तः खल्वसौ कथमिदमकार्यं[2] करिष्यति । ('घोणा–' (९।१६) इत्यादि पठति ।)

(क) कधं गदा कदा गदा गच्छन्ती वा केण अणुगदा ।

(ख) अज्ज कधेहि ।

(ग) ममकेलकं पुप्फकलण्डकजिण्णुज्जाणं पवेशिअ अत्थणिमित्तं बाहुपाशबलक्कालेण मालिदा । अए शंपदं वदशि घलं गदे त्ति ।

नादिकं न गृह्यते स्वीक्रियते] ॥ १८ ॥ **अभ्युक्षित इति** । [चाषस्य पक्षिविशेषस्य अग्रपक्षः पक्षाग्रं तत्सदृशं यथा तथा अन्तराले आकाशे वचनमध्ये च बलाहकानां मेघानां सलिलैः न अभ्युक्षितोऽसि । एतद्भवतो वचनं मिथ्या । तथा हि । इदं भवतः आननं हेमन्तपद्ममिव निष्प्रभतामुपैति । वसन्ततिलकं वृत्तम्] ॥१९॥ **तुलनमिति**। चारुदत्तस्य दूषणमद्रिराजस्य तुलनमिव । अन्त्यताशक्यमित्यर्थः । एवमन्यत्र ॥२०॥

---

1 वाऽनिल०. 2 कथमकार्यं.

(शकारः—किं पक्षपातेन व्यवहारो दृश्यते । (क)

अधिकरणिकः—अपेहि मूर्ख ।)

वेदार्थान्प्राकृतस्त्वं वदसि न च ते जिह्वा निपतिता
मध्याह्ने वीक्षसेऽर्कं न तव सहसा दृष्टिर्विचलिता ।
दीप्ताग्नौ पाणिमन्तः क्षिपसि स च ते दग्धो भवति नो
चारित्र्याच्चारुदत्तं चलयसि न ते देहं हरति भूः ॥ २१ ॥

(आर्यचारुदत्तः कथमकार्यं करिष्यति ?)

कृत्वा समुद्रमुदकोच्छ्रयमात्रशेषं
दत्तानि येन हि धनान्यनपेक्षितानि ।
स श्रेयसां कथमिवैकनिधिर्महात्मा
पापं करिष्यति धनार्थमवीरजुष्टम् ॥ २२ ॥

(वृद्धा—हताश यस्तदानीं न्यासीकृतं सुवर्णभाण्डं रात्रौ चौरैरपहृतमिति तस्य कारणाच्चतुःसमुद्रसारभूतां रत्नावलीं ददाति स इदानीमर्थकल्यवर्तस्य कारणादिदमकार्यं करोति । हा जाते एहि मे पुत्रि ?

(इति रोदिति ।) (ख)

(अधिकरणिकः—आर्य चारुदत्त किमसौ पद्भ्यां गता उत प्रवहणेनेति ?)

(क) किं पक्खवादेण ववहाले दीशदि ।

(ख) हदास जो तदाणिं णासीकिदं सुवण्णभण्डअं रत्तिं चोरेहिं अवहिदं त्ति तस्स कारणादो चदुस्समुद्दसारभूदं रअणावलिं देदि सो दाणिं अत्थकल्लवत्तस्स कारणादो इमं अकज्जं करेदि । हा जादे एहि मे पुत्ति ।

वेदार्थानित्यादि । अतिधृतिजातिः । [त्वं प्राकृतः नीचः अपकृष्टवर्ण इत्यर्थः । वेदार्थान् वदसि । न च ते जिह्वा निपतिता ।] वेदार्थविरोधिनो वचने जिह्वापातो युज्यते । [विचलिता स्थानाद्भ्रष्टा प्रतिहता वा । चारित्र्याच्चारुदत्तं चलयसि प्रच्यावयसि । भूः ते देहं न हरति च । चित्रमेतदित्यर्थः । विशेषोक्तिप्रतिवस्तूपमालंकारौ । सुमधुरा वृत्तम्] ॥ २१ ॥ **कृत्वेति** । [येन समुद्रं उदकोच्छ्रय उदकस्योन्नतिराधिक्यमिति यावत् । तन्मात्रावशेषं कृत्वा । उद्धृतरत्नत्वात् । अनपेक्षितानि दानशौण्डत्वान्मुक्तहस्तानि धनानि दत्तानि । स श्रेयसां एकनिधिः महात्मा धनार्थं अवीरजुष्टं कृपणसेवितं पापं कथं करिष्यति । 'अवैरिजुष्टम्' इति पाठे वैरिभिरप्यसेवितमित्यर्थः ।

---

१ अवेहि. २ निपतति. ३ संऽर्के. ४ न च ते तत्क्षणं दह्यतेऽसौ. ५ छलयसि. ६ कथमयम॰. ७ ॰मवैरि॰. ८ अस्मात्प्राक्–शकारः–किं पक्खवादेण ववहाले दीशदि. ९ अत्थकारणादो.

(चारुदत्तः—ननु मम प्रत्यक्षं न गता। तन्न जाने किं पद्भ्यां गता उत प्रवहणेनेति।)

(प्रविश्य सामर्षः।)

वीरकः—

पादप्रहारपरिभवविमाननाबद्धगुरुकवैरस्य।
अनुशोचत इयं कथमपि रात्रिः प्रभाता मे॥ २३॥

तद्यावदधिकरणमण्डपमुपसर्पामि। (प्रवेष्टकेन।) सुखमार्यमिश्राणाम्। (क)

अधिकरणिकः—अये नगररक्षाधिकृतो वीरकः। वीरक किमागमनप्रयोजनम्।

वीरकः—ही ही बन्धनभेदनसंभ्रम आर्यकमन्वेषयन् अपवारितं प्रवहणं व्रजतीति विचारं कुर्वन्नन्वेषयन् अरे त्वयाऽप्यालोकितं मयाऽप्यालोकितव्यमिति भणन्नेव चन्दनमहत्तरकेण पादेन ताडितोऽस्मि। एतच्छ्रुत्वाऽऽर्यमिश्राः प्रमाणम्। (ख)

अधिकरणिकः—भद्र जानीषे कस्य तत्प्रवहणमिति।

वीरकः—अस्यार्यचारुदत्तस्य। वसन्तसेनाऽऽरूढा पुष्पकरण्डकजीर्णोद्यानं क्रीडितुं नीयत इति प्रवहणवाहकेन कथितम्। (ग)

शकारः—पुनरपि श्रुतमार्यैः। (घ)

(क) पादप्पहारपरिभवविमाणणाबद्धगरुअवेरस्स।
अणुसोअन्तस्स इयं कधं पि रत्ती पभादा मे॥

ता जाव अधिअरणमण्डवं उवसप्पामि। सुहं अज्जमिस्साणम्।

(ख) ही ही बन्धणभेअणसंभमे अज्जकं अण्णेसन्तो ओवाडिदं पवहणं वच्चदि त्ति विआरं करन्तो अण्णेसन्तो अरे तुए वि आलोइदे मए वि आलोइदव्वो त्ति भणन्तो ज्जेव चन्दणमहत्तरएण पादेण ताडिदो म्हि। एदं सुणिअ अज्जमिस्सा पमाणम्।

(ग) इमस्स अज्जचारुदत्तस्स। वसन्तसेणा आरूढा पुप्फकरण्डकजिण्णुज्जाणं कीलिदुं णीअदि त्ति पवहणवाहएण कहिदम्। (घ) पुणो वि शुदं अज्जेहिं।

वसन्त० वृत्तम्]॥२२॥ **पादेत्यादि**। गाथा। पादप्रहारेण परिभव आक्रमः स एव विमानना तया बद्धगुरुकवैरस्य। अनुशोचमानस्येयं कथमपि रात्रिः प्रभाताऽपगता मम॥२३॥

---

१ लद्ध (लब्ध). २ अज्जमिश्शेहिं.

अधिकरणिकः—

एष भो निर्मलज्योत्स्नो राहुणा ग्रस्यते शशी ।
जलं कूलावपातेन प्रसन्नं कलुषायते ॥ २४ ॥

(वीरक पश्चादिह भवतो न्यायं द्रक्ष्यामः । य एषोऽधिकरणद्वार्यश्वस्तिष्ठति तमेनमारुह्य गत्वा पुष्पकरण्डकोद्यानं दृश्यतामस्ति तत्र कांचिद्विपन्ना[1] स्त्री न वेति ।)

(वीरकः—यदार्य आज्ञापयति । (इति निष्क्रान्तः । प्रविश्य च ।) गतोऽस्मि तत्र । दृष्टं च मया स्त्रीकलेवरं श्वापदैर्विलुप्यमानम्) (क)

श्रेष्ठिकायस्थौ—(कथं त्वया ज्ञातं स्त्रीकलेवरमिति । (ख)

(वीरकः—सावशेषैः केशहस्तपाणिपादैरुपलक्षितं मया) (ग)

(अधिकरणिकः—अहो धिग्वैषम्यं लोकव्यवहारस्य)

यथा यथेदं निपुणं विचार्यते तथा तथा संकटमेव दृश्यते ।
अहो सुसन्ना व्यवहारनीतयो मतिस्तु गौः पङ्कगतेव सीदति ॥ २५ ॥

(चारुदत्तः—(स्वगतम् ।)

यथैव पुष्पं प्रथमे विकासे समेत्य पातुं मधुपाः पतन्ति ।
एवं मनुष्यस्य विपत्तिकाले छिद्रेष्वनर्था बहुलीभवन्ति ॥ २६ ॥

अधिकरणिकः—आर्यचारुदत्त सत्यमभिधीयताम्)

(क) जं अज्जो आणवेदि । गदो म्हि तहिं । दिट्ठं च मए इत्थिआकलेवरं सावदेहिं विलुप्पन्तम् । (ख) कधं तुए जाणिदं इत्थिआकलेवरं त्ति ।
(ग) सावसेसेहिं केसहत्थपाणिपादेहिं उवलक्खिदं मए ।

एष इति । [भो इति खेदे । एष निर्मला ज्योत्स्ना यस्य स निर्मलज्योत्स्नः शशी । निर्दोषश्चारुदत्त इत्यर्थः। कलुषायते आविलं भवति । अपवादेन दुष्यति इत्यर्थः । रूपकातिशयोक्तिः]॥२४॥**यथेति** । [इदं चारुदत्तवृत्तं यथा यथा निपुणं सूक्ष्मतया विचार्यते विमृश्यते तथा तथा संकटमकुशलपरिणामि एव दृश्यते । अहो व्यवहारनीतयः व्यवहारन्यायाः सुसन्नाः सुसंहताः।] सुसन्ना व्यवहारनीतय इति सामान्यविशेषभावेन विशेषणम् । [मे मतिस्तु पङ्कगता गौः इव सीदति । न तु उत्थातुं शक्नोति । निर्दोषमपि चारुदत्तं मोक्तुं न शक्नोतीत्यर्थः । वंशस्थं वृत्तम्]॥ २५ ॥ **यथैवेति** । [यथा एव प्रथमे विकासे विकासारम्भे एव पुष्पं लक्षणया तन्मकरन्दं पातुं मधुपाः भ्रमराः समेत्य संघातं कृत्वा पतन्ति । एवं मनुष्यस्य विपत्तिकाले छिद्रेषु सत्सु अनर्था बहुलीभवन्ति विपुला भवन्ति। उपमाऽप्रस्तुतप्रशंसालंकारौ । उपजातिर्वृत्तम्] ॥ २६ ॥

---

१ काचित्स्त्री विपन्ना.

चारुदत्तः—

दुष्टात्मा परगुणमत्सरी मनुष्यो
रागान्धः परमिह हन्तुकामबुद्धिः ।
किं यो यद्वदति मृषैव जातिदोषा-
त्तद्ग्राह्यं भवति न तद्विचारणीयम् ॥ २७ ॥

अपि च ।

योऽहं लतां कुसुमितामपि पुष्पहेतो-
राकृष्य नैव कुसुमावचयं करोमि ।
सोऽहं कथं भ्रमरपक्षरुचौ सुदीर्घे
केशे प्रगृह्य[1] रुदतीं प्रमदां निहन्मि ॥ २८ ॥

शकारः—हंहो अधिकरणभोजकाः किं यूयं पक्षपातेन व्यवहारं पश्यत येनाद्याप्येष हताशचारुदत्त आसने धार्यते । (क)

अधिकरणिकः—भद्र शोधनक एवं क्रियताम् ।

(शोधनकस्तथा करोति ।)

चारुदत्तः—विचार्यताम् । भो अधिकृताः[2] विचार्यताम् । (इत्यासनादवतीर्य भूमावुपविशति ।)

शकारः—(स्वगतम् । सहर्षं नर्तित्वा ।) ही अनेन मया कृतं पापमन्यस्य मस्तके निपतितम् । तद्यत्र चारुदत्त उपविशति तत्राहमुपविशामि । (तथा कृत्वा ।) चारुदत्त पश्य पश्य माम् । तद्भण भण मया मारितेति) (ख)

चारुदत्तः—भो अधिकृताः । ('दुष्टात्मा-' (९।२७) इति पूर्वोक्तं पठति । सनिःश्वासं स्वगतम् ।)

(क) हंहो अधिअलणभोइआ किं तुम्हे पक्खवादेण ववहालं पेक्खध ज्जेण अज्ज वि एशे हदाशचालुदत्ते आशणे धालीअदि । (ख) ही अणेण मए कडे पावे अण्णश्श मश्तके निवडिदे । ता जहिं चालुदत्ताके[3] उवविशदि तहिं हग्गे उवविशामि । चालुदत्ता पेक्ख पेक्ख मम् । ता भण भण मए मालिदे त्ति ।

दुष्टेति। [इहास्मिन्नधिकरणे यः नरः दुष्टात्मा परगुणेषु मत्सरोऽस्यास्तीति मत्सर्यमर्षणः रागान्धः परं हन्तुकामबुद्धिः जातिदोषात् हीनजातित्वात् मृषैव यद्वदति तत् किं ग्राह्यं भवति । नैवेत्यर्थः । तत् किं न विचारणीयम् । अपि तु सदसद्वेति विमर्शनीयमेव । प्रहर्षिणी वृत्तम्] ॥ २७ ॥ **योऽहमिति** । [योऽहं कुसुमान्यस्याः संजातानि असौ कुसुमिता तां लतां पुष्पहेतोः आकृष्य इ० । सोऽहं भ्रमरपक्षयोरिव रुचिः कान्तिर्यस्य तस्मिन्भ्रमरवन्नीले केशे प्रगृह्य बलाद् गृहीत्वा रुदतीं प्राणत्राणार्थं क्रोशन्तीं प्रमदां कथं निहन्मि । न हन्यामेव । वसन्ततिलकं वृत्तम्] ॥ २८ ॥ अथ मित्रभार्यापुत्रान्

---

१ विगृह्य. २ अधिकृते. ३ चालुदत्ते.

मैत्रेय भोः किमिदमद्य ममोपघातो
हा ब्राह्मणि द्विजकुले विमले प्रसूता ।
हा रोहसेन न हि पश्यसि मे विपत्तिं
मिथ्यैव नन्दसि परव्यसनेन नित्यम् ॥ २९ ॥

प्रेषितश्च मया तद्वार्तान्वेषणाय मैत्रेयो वसन्तसेनासकाशं शकटिकानिमित्तं च तस्य प्रदत्तान्यलंकरणानि प्रत्यर्पयितुम् । तत्कथं चिरयते ।

(ततः प्रविशति गृहीताभरणो विदूषकः ।)

विदूषकः—प्रेषितोऽस्म्यार्यचारुदत्तेन वसन्तसेनासकाशं तत्रालंकरणानि गृहीत्वा यथा—आर्य मैत्रेय वसन्तसेनया वत्सो रोहसेन आत्मनोऽलंकारेणालंकृत्य जननीसकाशं प्रेषितः । अस्या आभरणं दातव्यं न पुनर्ग्रहीतव्यम् । तत्समर्पयेति । तद्यावद्वसन्तसेनासकाशमेव गच्छामि । (परिक्रम्य अवलोक्य च । आकाशे ।) कथं भावरेभिलः । भो भावरेभिल किंनिमित्तं त्वमुद्विग्न उद्विग्न इव लक्ष्यसे । (आकर्ण्य ।) किं भणसि—प्रियवयस्यश्चारुदत्तोऽधिकरणमण्डप आहूत इति । तन्न खल्वल्पेन कार्येण भवितव्यम् । (विचिन्त्य ।) तत्पश्चाद्वसन्तसेनासकाशं गमिष्यामि । अधिकरणमण्डपं तावद्गमिष्यामि । (परिक्रम्यावलोक्य च ।) अयमधिकरणमण्डपः । तद्यावत्प्रविशामि । (प्रविश्य ।) सुखमधिकरणभोजकानाम् । कुत्र मम प्रियवयस्यः । (क)

(क) पेसिदोम्हि अज्जचारुदत्तेण वसन्तसेणासआसं तहिं अलंकरणाइं गेण्हिअ जधा-अज्ज मित्तेअ वसन्तसेणाए वच्छो रोहसेणो अत्तणो अलंकारेण अलंकरिअ जणणीसआसं पेसिदो । इमस्स आहरणं दादव्वं ण उण गेण्हिदव्वम् । ता समप्पेहि त्ति । ता जाव वसन्तसेणासआसं ज्जेव्व गच्छामि । कधं भावरेभिलो । भो भावरेभिल किंणिमित्तं तुमं उव्विग्गो उव्विग्गो विअ लक्खीअसि । किं भणासि—पिअवअस्सो चारुदत्तो अधिअरणमण्डवे सद्दाइदो त्ति । ता ण हु अप्पेण कज्जेण होदव्वम् । ता पच्छा वसन्तसेणासआसं गमिस्सम् । अधिअरणमण्डवं दाव गमिस्सम् । इदं अधिअरणमण्डवम् । ता जाव पविसामि । सुहं अधिअरणभोइआणम् । कहिं मम पिअवअस्सो ।

बुद्ध्युपस्थापितानुद्दिश्याह—**मैत्रेयेति** । [भो मैत्रेय किमिदम् । अद्य ममोपघातः विनाशः प्राप्तः । हा इति खेदे । ब्राह्मणि त्वं विमले द्विजकुले प्रसूताऽसि । अतः तव पत्युरीदृशो विनाशस्तेऽनुचितः इति भावः । हा रोहसेन मे प्राणविपत्तिं न पश्यसि हि नैव जानासि । परं दूरम् । अज्ञातमिति यावत् । च तद् व्यसनं च तेन नित्यं नन्दसि किं तु तन्मिथ्यैव । परेण श्रेष्ठेन व्यसनेन उपस्थितपितृघातरूपेणोपलक्षितस्त्वमिति परेण केवलेन व्यसनेन बाल्योचितक्रीडनेन इति च केचिद्व्या-

---

१ ब्राह्मणी निजकुले. २ परिव्यस०. ३ गेहं.

अधिकरणिकः—नन्वेष तिष्ठति ।

विदूषकः—वयस्य स्वस्ति ते । (क)

चारुदत्तः—भविष्यति ।

विदूषकः—अपि क्षेमं ते । (ख)

चारुदत्तः—एतदपि भविष्यति ।

विदूषकः—भो वयस्य किंनिमित्तमुद्विग्न उद्विग्न इव लक्ष्यसे । कुतो वाऽऽहूतः । (ग)

चारुदत्तः—वयस्य ।

मया खलु नृशंसेन परलोकमजानता ।
स्त्री रतिर्वाऽविशेषेण शेषमेषोऽभिधास्यति ॥ ३० ॥

विदूषकः—किं किम् । (घ)

चारुदत्तः—(कर्णे ।) एवमेवम् ।

विदूषकः—क एवं भणति । (ङ)

चारुदत्तः—(संज्ञया शकारं दर्शयति ।) नन्वेष तपस्वी हेतुभूतः कृतान्तो मां व्याहरति ।

(विदूषकः—(जनान्तिकम् ।) एवं किमर्थं न भण्यते गृहं गतेति ।)(च)

(चारुदत्तः—उच्यमानमप्यवस्थादोषान्न गृह्यते ।

विदूषकः—भो भो आर्याः येन तावत्पुरस्थापनविहारारामदेवालय-

(क) वअस्स सोत्थि दे । (ख) अवि क्खेमं दे ।

(ग) भो वअस्स किंणिमित्तं उव्विग्गो उव्विग्गो विअ लक्खीअसि । कुदो वा सद्दाइदो । (घ) किं किम् । (ङ) को एव्वं भणादि । (च) एव्वं कीस ण भणीअदि गेहं गदे त्ति ।

ख्यान्ति । वसन्ततिलकं वृत्तम्] ॥ २९ ॥ **मयेति** । [परलोकमजानता नृशंसेन घातुकेन मया खलु स्त्री सामान्या योषित् वा अथ वा अविशेषेण रतिः स्वरूपेण कामप्रिया वा मूर्तिमती प्रीतिर्वा । इतेति वक्तुमसमर्थ आह—शेषमिति । एष शकारः ।] ॥ ३० ॥ [तपस्वी शोच्यः । कृतान्तः विधिः । मम दुर्दैवमित्यर्थः । पुरस्थापनं पुरावस्थितिः । पुरनिर्माणमिति यावत् । विहाराः सौगतावसथाः । आरामा उपवनानि ।

१ रतिश्चाविं०. २ एवामिति. ३ निर्दिशति. ४ उण उव्वि०.

तडागकूपयूपैरलंकृता नगर्युज्जयिनी सोऽनीशोऽर्थकल्यवर्तकारणादीदृशमकार्यमनुतिष्ठतीति । (सक्रोधम् ।) अरे रे कुलटापुत्र राजश्यालसंस्थानक उच्छृङ्खलक कृतजनदोषभण्ड बहुसुवर्णमण्डितमर्कटक भण भण ममाग्रतः । य इदानीं मम प्रियवयस्यः कुसुमितां माधवीलतामप्याकृष्य कुसुमावचयं न करोति कदाचिदाकृष्टतया पल्लवच्छेदो भवतीति स कथमीदृशमकार्यमुभयलोकविरुद्धं करोति । तिष्ठ रे कुट्टनीपुत्र तिष्ठ । यावदेतेन तव हृदयकुटिलेन दण्डकाष्ठेन मस्तकं ते शतखण्डं करोमि । (क)

शकारः—(सक्रोधम् ।) शृण्वन्तु शृण्वन्त्वार्यमिश्राः । चारुदत्तेन सह मम विवादो व्यवहारो वा । तत्किमर्थमेष काकपदशीर्षमस्तको मम शिरः शतखण्डं करोति । मा तावत् । रे दास्याःपुत्र दुष्टबटुक । (ख)

(विदूषको दण्डकाष्ठमुद्यम्य पूर्वोक्तं पठति । शकारः सक्रोधमुत्थाय ताडयति । विदूषकः प्रतीपं ताडयति । अन्योन्यं ताडयतः । विदूषकस्य कक्षादेशादाभरणानि पतन्ति ।)

शकारः—(तानि गृहीत्वा दृष्ट्वा ससाध्वसम् ।) पश्यन्तु पश्यन्त्वार्याः । एते खलु तस्यास्तपस्विन्या अलंकाराः । (चारुदत्तमुद्दिश्य ।) अस्यार्थकल्यवर्तस्य कारणादेषा मारिता व्यापादिता च । (ग)

(क) भो भो अज्जा जेण दाव पुरट्ठावणविहारारामदेउलतडागकूवजूवेहिं अलंकिदा णअरी उज्जइणी सो अणीसो अत्थकल्लवत्तकारणादो एरिसं अकज्जं अणुचिट्ठदि त्ति । अरे रे काणेलीसुदा राअश्शालसंठाणआ उस्सुङ्खलआ किदजणदोसभण्डआ बहुसुवण्णमण्डिदमक्कडआ भण भण मम अग्गदो । जो दाणिं मम पिअवअस्सो कुसुमिदं माधवीलदं पि आकिड्ढिअ कुसुमावचअं ण करेदि कदा वि आकिड्ढिदाए पल्लवच्छेदो भोदि त्ति सो कधं एरिसं अकज्जं उहअलोअविरुद्धं करेदि । चिट्ठ रे कुट्टणिपुत्ता चिट्ठ । जाव एदिणा तव हिअअकुडिलेण दण्डअट्ठेण मत्थअं दे सदखण्डं करेमि ।

(ख) शुणन्तु शुणन्तु अज्जमिश्शा । चालुदत्ताकेण शह मम विवादे ववहाले वा । ता कीश एशे काकपदशीशमश्तके मए शिले शदखण्डे कलेदि । मा दाव । ले दाशीएपुत्ता दुट्टबडुका । (ग) पेक्खन्तु पेक्खन्तु अज्जा । एदे क्खु ताए तवश्शिणीए केलका अलंकाला । इमश्श अत्थकल्लवत्तश्श कालणादो एशा मालिदा वावादिदा अ ।

यूपः कृतस्य यज्ञस्य चिह्नभूतः । अनीशः दरिद्रतां गतोऽपि । उच्छृङ्खलक स्वैरवृत्त । कृतजनदोषश्चासौ भण्डश्चेति विशेषणसमासः । कुट्टनीपुत्र असतीपुत्र ।]

---

१ कक्षदे०. २ देउलेहिं. ३ दुस्संकणआ (दुःशङ्कन). ४ आअंचिअ.

(अधिकृताः सर्वेऽधोमुखाः स्थिताः ।)

चारुदत्तः—(जनान्तिकम् ।)

अयमेवंविधे काले दृष्टो भूषणविस्तरः ।
अस्माकं भाग्यवैषम्यात्पतितः पातयिष्यति ॥ ३१ ॥

विदूषकः—भोः किमर्थं भूतार्थो न निवेद्यते । (क)

चारुदत्तः—वयस्य ।

दुर्बलं नृपतेश्चक्षुर्नैतत्तत्त्वं निरीक्षते ।
केवलं वदतो दैन्यमश्लाघ्यं मरणं भवेत् ॥ ३२ ॥

अधिकरणिकः—कष्टं भोः कष्टम् ।

अङ्गारकविरुद्धस्य प्रक्षीणस्य बृहस्पतेः ।
ग्रहोऽयमपरः पार्श्वे धूमकेतुरिवोत्थितः ॥ ३३ ॥

श्रेष्ठिकायस्थौ—(विलोक्य । वसन्तसेनामातरमुद्दिश्य ।) अवहिता तावदार्येदं सुवर्णभाण्डमवलोकयतु तदेवेदं न वेति । (ख)

वृद्धा—(अवलोक्य ।) सदृशमेतत् । न पुनस्तत् । (ग)

शकारः—आं वृद्धकुट्टनि अक्षिभ्यां मन्त्रितं वाचा मूकितम् । (घ)

वृद्धा—हताश अपेहि । (ङ)

श्रेष्ठिकायस्थौ—अप्रमत्तं कथय तदेवैतन्न वेति । (च)

(क) भो कीस भूदत्थं ण णिवेदीअदि ।
(ख) अवहिदा दाव अज्जा एदं सुवण्णभण्डअं अवलोएदु सो ज्जेव एसो ण वेत्ति ।
(ग) सरिसो एसो । ण उण सो ।
(घ) आं वुड्ढकुट्टणि अक्खीहिं मन्तिदं वाआए मूकिदम् ।
(ङ) हदास अवेहि । (च) अप्पमत्तं कधेहि सो ज्जेव एसो ण वेत्ति ।

अयमिति । [एवंविधे काले दोषारोपसमये अस्माकं भाग्यवैषम्याद्विधेः वक्रतया पतितः अयं भूषणविस्तरः आभरणसमूहः दृष्टः मां पातयिष्यति] ॥ ३१ ॥ **दुर्बलमिति** । [नृपतेः चक्षुः अधिकरणादिरूपं दुर्बलमर्थस्य याथार्थ्यग्रहणासमर्थम् । एतत् चक्षुः तत्त्वं न निरीक्षते । बहिःप्रमाणान्येवाश्रयते इत्यर्थः । अतः वदतः परमार्थवादिनः दैन्यमेव केवलं निश्चितम् । अश्लाघ्यं मरणं च भवेत्] ॥ ३२ ॥ **अङ्गारकेति** । [अङ्गारको मङ्गलग्रहः विरुद्धो यस्य तस्य । यद्वा अङ्गारकेण विरुद्धस्य । प्रक्षीणस्य क्षीणबलस्य अथ वा नीचस्थानस्थितत्वाद्दुर्बलस्य । बृहस्पतेः सौम्यग्रहस्य पार्श्वे अयमलंकारपातोऽपरो धूमकेतुरिवोत्थितः । एकदेशविवर्तिना वाक्यार्थोपमालंकारः] ॥ ३३ ॥

वृद्धा—आर्य शिल्पिकुशलतयाऽवबध्नाति दृष्टिम् । न पुनस्तत् । (क)

(अधिकरणिकः—भद्रे अपि जानास्येतान्याभरणानि ।

(वृद्धा—ननु भणामि न खलु न खल्वनभिज्ञातः । अथ वा कदाऽपि शिल्पिना घटितो भवेत्) (ख)

अधिकरणिकः—पश्य श्रेष्ठिन् ।

वस्त्वन्तराणि सदृशानि भवन्ति नूनं
रूपस्य भूषणगुणस्य च कृत्रिमस्य ।
दृष्ट्वा क्रियामनुकरोति हि शिल्पिवर्गः
सादृश्यमेव कृतहस्ततया च दृष्टम् ॥ ३४ ॥

(श्रेष्ठिकायस्थौ—आर्यचारुदत्तीयान्येतानि । (ग)

चारुदत्तः—न खलु न खलु ।

श्रेष्ठिकायस्थौ—तदा कस्य । (घ)

चारुदत्तः—इहात्रभवत्या दुहितुः)

(श्रेष्ठिकायस्थौ—कथमेतानि तस्या वियोगं गतानि) (ङ)

चारुदत्तः—एवं गतानि । आं इदम्)

श्रेष्ठिकायस्थौ—आर्य चारुदत्त अत्र सत्यं वक्तव्यम् । पश्य पश्य ।

सत्येन सुखं खलु लभ्यते सत्यालापे न भवति पातकम् ।
सत्यमिति द्वे अप्यक्षरे मा सत्यमलीकेन गूहय ॥ ३५ ॥ (च)

(क) अज्ज सिप्पिकुसलदाए ओबन्धेदि दिट्ठिम् । ण उण सो ।
(ख) णं भणामि ण हु ण हु अणभिजाणिदो । अह वा कदा वि सिप्पिणा घडिदो भवे । (ग) अज्जचारुदत्तस्स केरकाइं एदाइं । (घ) ता कस्स ।
(ङ) कधं एदाइं ताए विओअं गदाइं ।
(च) अज्ज चारुदत्त एत्थ सच्चं वत्तव्वम् । पेक्ख पेक्ख ।

सच्चेण सुहं क्खु लब्भइ सच्चालावे ण होइ पावम् ।
सच्चं त्ति दुवे वि अक्खरा मा सच्चं अलिएण गूहेहि ॥

वस्त्वन्तराणीति । [कृत्रिमस्य कार्येण निर्वृत्तस्य रूपस्य भूषणगुणस्य अलंकारसौष्ठवस्य वस्त्वन्तराणि सदृशानि नूनं भवन्ति । हि शिल्पिवर्गः कारुजनः दृष्ट्वा क्रियामनुकरोति । अतः शिल्पिवर्गस्य कृतहस्ततया हस्तकौशलेन इति हेतुना सादृश्यं शिल्पकौशलमेव दृष्टम् । काव्यलिङ्गमलंकारः । वसन्ततिलकं वृत्तम्] ॥ ३४ ॥ एवं आं इदं एवमिदं स्मर्यते । **सत्येनेत्यादि** । वैतालीयम् । सत्येन सत्याश्रयणेन । सत्यालापे । सत्यमालापयतीति क्विपि सत्यालापः । तत्र । न

---

१ चारुदत्तस्य. २ अण्णदो अह कदापि (अन्यतोऽथ कदाऽपि).

चारुदत्तः—आभरणान्याभरणानीति न जाने । किं त्वस्मद्गृहादानीतानीति जाने ।

(**शकारः**—उद्यानं प्रवेश्य प्रथमं मारयसि । कपटकापटिकतया सांप्रतं निगूहसि । (क)

अधिकरणिकः—आर्य चारुदत्त सत्यमभिधीयताम् ।)

इदानीं सुकुमारेऽस्मिन्निःशङ्कं[1] कर्कशाः कशाः ।
तव गात्रे पतिष्यन्ति सहा[2]स्माकं मनोरथैः ॥ ३६ ॥

(**चारुदत्तः**—

अपापानां कुले जाते मयि पापं न विद्यते ।
यदि संभाव्यते पापमपापेन च किं मया ॥ ३७ ॥

(स्वगतम् ।) न च मे वसन्तसेनाविरहितस्य जीवितेन कृत्यम् । (प्रकाशम् ।) भोः किं बहुना ।

मया किल[3] नृशंसेन लोकद्व[4]यमजानता ।
स्त्रीर[5]त्नं च विशेषेण शेषमेषोऽभिधास्यति ॥ ३८॥)

(**शकारः**—व्यापादिता । अरे त्वमपि भण मया व्यापादितेति । (ख)

चारुदत्तः—त्वयैवोक्तम् ।

शकारः—शृणुत शृणुत भट्टारकाः एतेन मारिता) एतेनैव संशयश्छिन्नः (एतस्य दरिद्रचारुदत्तस्य शारीरो दण्डो धार्यताम्) (ग)

(क) उज्जाणं पवेशिअ पढमं मालेशि । कवडकावडिआए शंपदं णिगूहेशि ।
(ख) वावादिदा । अले तुमं पि भण मए वावादिदेत्ति ।
(ग) शुणेध शुणेध भट्टारका एदेण मालिदा । एदेण ज्जेव शंशए छिण्णे । एदश्श दलिद्दचालुदत्तश्श शालीले दण्डे धालीअदु ।

भवति पापकम् । सत्यमिति द्वे अक्षरे इति स्वरूपोक्तिः । 'न भवति पापस्य निमित्तमिति यस्मात्' इति प्राचीनटीका । अलीकं कर्तृ । सत्यापेक्षया बह्वक्षरमपीत्यर्थः । सत्यं पूर्वोक्तस्वरूपत्वाद्व्यक्षरमपि कर्मभूतम् । मा निगूहति मा संवृणोति ॥ ३५ ॥ [गृहादानीतानि न तु पुष्पकरण्डकोद्यानादिति रहस्यम् ।] अतिकापटिकतया निगूहसि । **इदानीमिति** । कशा अश्वताडिनीः । [ताः पतिष्यन्ति । सत्यख्यापनार्थमिति भावः । अस्माकं मनोरथैः तव दोषावारणरूपैः] ॥ ३६ ॥ **अपापानामिति** । [यदि पापं संभाव्यते युष्माभिः । अपापेन मया किम् । युष्माकं निर्णय एव प्रमाणमित्यर्थः] ॥ ३७ ॥ **मयेति** । स्त्री रत्नमिव । उत्कृष्टा स्त्री ॥ ३८ ॥

१ निःशङ्काः. २ सदा०. ३ खलु. ४ परलोक०. ५ स्त्री रतिश्च.

(अधिकरणिकः—शोधनक यथाऽऽह राष्ट्रियः । भो राजपुरुषाः गृह्यतामयं चारुदत्तः)

(राजपुरुषा गृह्णन्ति ।)

(वृद्धा—प्रसीदन्तु प्रसीदन्त्वार्यमिश्राः । ('जो तदाणिं...चोरेहिं अवहिदंत्ति...' (२०९ पृष्ठे) इत्यादि पूर्वोक्तं पठति ।) तद्यदि व्यापादिता मम दारिका व्यापादिता । जीवतु मे दीर्घायुः । अन्यच्च । अर्थिप्रत्यर्थिनोर्व्यवहारः । अहमर्थिनी । तन्मुञ्चतैतम्) (क)

(शकारः—अपेहि गर्भदासि गच्छ । किं तवैतेन) (ख)

(अधिकरणिकः—आर्ये गम्यताम् । हे राजपुरुषाः निष्क्रामयतैनाम्).

(वृद्धा—हा जात हा पुत्रक । (इति रुदती निष्क्रान्ता ।)) (ग)

शकारः—(स्वगतम् ।) कृतं मयैतस्यात्मनः सदृशम् । सांप्रतं गच्छामि । (इति निष्क्रान्तः ।) (घ)

(अधिकरणिकः—आर्य चारुदत्त निर्णये वयं प्रमाणम् । शेषे तु राजा । तथाऽपि शोधनक विज्ञाप्यतां राजा पालकः—

अयं हि पातकी विप्रो न वध्यो मनुरब्रवीत् ।
राष्ट्रादस्मात्तु निर्वास्यो विभवैरक्षतैः सह ॥ ३९ ॥

शोधनकः—यदार्य आज्ञापयति । (इति निष्क्रम्य पुनः प्रविश्य । सास्रम् ।) आर्याः गतोऽस्मि तत्र । राजा पालको भणति—येनार्थकल्यवर्तस्य कारणाद्वसन्तसेना व्यापादिता तं तान्येवाभरणानि गले बद्ध्वा डिण्डिमं ताडयित्वा दक्षिणश्मशानं नीत्वा शूले भङ्क्तेति)

(क) पसीदन्तु पसीदन्तु अज्जमिस्सा । ता जदि वावादिदा मम दारिआ वावादिदा । जीवदु मे दीहाऊ । अण्णं च । अत्थिपच्चत्थिण्णं ववहारो । अहं अत्थिणी । ता मुञ्चध एदम् । (ख) अवेहि गब्भदाशि गच्छ । किं तव एदिणा ।
(ग) हा जाद हा पुत्तअ ।
(घ) कडं मए एदश्श अत्तणो शलिशम् । शंपदं गच्छामि ।

अयमिति । [अयं विप्रः पातकी स्थापितदोषः हि । तथाऽपि विप्रः न वध्य इति मनुरब्रवीत् । तस्मादक्षतैः यथास्थितैः विभवैः सहास्माद्राष्ट्रान्निर्वास्यः विवासयितव्यः । अत्र मनुः–'न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम् । राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम् ॥ मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते ।' इति॥ ३९॥ निकारः विप्रकारः।

१ एतन्नास्ति क्वचित्. २ रक्षितैः.

यः कोऽप्यपर ईदृशमकार्यमनुतिष्ठति स एतेन सनिकारदण्डेन शास्यते । (क)

चारुदत्तः—अहो अविमृश्यकारी राजा पालकः । अथ वा ।

ईदृशे व्यवहाराग्नौ मन्त्रिभिः परिपातिताः ।
स्थाने खलु महीपाला गच्छन्ति कृपणां दशाम् ॥ ४० ॥

अपि च ।

ईदृशैः श्वेतकाकीयैः राज्ञः शासनदूषकैः ।
अपापानां सहस्राणि हन्यन्ते च हतानि च ॥ ४१ ॥

सखे मैत्रेय गच्छ । मद्वचनादम्बामपश्चिममभिवादयस्व । पुत्रं च मे रोहसेनं परिपालयस्व ।

विदूषकः—मूले छिन्ने कुतः पादपस्य पालनम् । (ख)

चारुदत्तः—मा मैवम् ।

नृणां लोकान्तरस्थानां देहप्रतिकृतिः सुतः ।
मयि यो वै तव स्नेहो रोहसेने स युज्यताम् ॥ ४२ ॥

(क) जं अज्जो आणवेदि । अज्ज गदम्हि तहिं । राआ पालओ भणादि—जेण अत्थकल्लवत्तस्स कालणादो वसन्तसेणा वावादिदा तं ताइं ज्जेव आहरणाइं गले बन्धिअ डिण्डिमं ताडिअ दक्खिणमसाणं णइअ सूले भज्जेधत्ति । जो को वि अवरो एरिसं अकज्जं अणुचिट्ठदि सो एदिणा सणिआरदण्डेण सासीअदि ।

(ख) मूले छिण्णे कुदो पादवस्स पालणम् ।

अधिक्षेप इति यावत् । तेन सहितः दण्डः तेन ।] **ईदृश इति** । [ईदृशे व्यवहार एव अग्निः तस्मिन् । कुदृष्टव्यवहाररूपाग्नौ इत्यर्थः । मन्त्रिभिः परिपातिताः महीपालाः कृपणां दीनां दशां गच्छन्ति इति स्थाने युक्तं खलु] ॥ ४० ॥ **ईदृशैरिति** । [ईदृशैः श्वेतकाकीयैः श्वेतः काक इति वितथार्थं वाक्यं श्वेतकाकीयम् । 'इवे प्रतिकृतौ' इत्यधिकारस्थितेन ' समासाच्च तद्विषयात् ' इत्यनेन छप्रत्ययः । तद्वादिनः श्वेतकाकीयाः वितथार्थदर्शिनस्तैः । शासनदूषकैः । अधिकरणिकैः । एतन्मनसि कृत्वैवोक्तं प्रथमाङ्के ' व्यवहारदुष्टतां ' इति । अपापानामनपराधिनां सहस्राणि हन्यन्ते हतानि च । ' श्वा च एतः हरिणश्च काकश्च तत्सदृशैः । सादृश्यं च स्वामिसेवापरत्वभयचकितत्वेङ्गितज्ञत्वैर्बोध्यम् ' इति केचित् । उत्पातकल्पैरिति पृथ्वीधरः] ॥ ४१ ॥ **नृणामिति** । [लोकान्तरस्थानां मृतानाम् । सुतः देहप्रतिकृतिः स्वप्रतिनिधिः । तथा च श्रुतिः—'सा जाया जाया भवति यदस्यां जायते पुनः' इति । 'अङ्गादङ्गात्संभवसि हृदयादधिजायसे । आत्मा वै पुत्र नामासि स जीव शरदः शतम् ॥ ' इति च] ॥ ४२ ॥

---

१ अविवेको अविमृ॰. २ श्रियम्. ३ मम. ४ अम्बां मम पाश्चि॰; अम्बामपि मम अभिवा॰. ५ लोकोत्तर. ६ तहिं (तत्र).

(विदूषकः—भो वयस्य अहं ते प्रियवयस्यो भूत्वा त्वया विरहितान्प्राणान्धारयामि ।) (क)

चारुदत्तः—रोहसेनमपि[1] तावद्दर्शय ।

विदूषकः—एवम् । युज्यते । (ख)

(अधिकरणिकः—भद्र शोधनक अपसार्यतामयं बटुः[2] ।)

(शोधनकस्तथा करोति ।)

(अधिकरणिकः—कः कोऽत्र भोः । चाण्डालानां[3] दीयतामादेशः ।

(इति चारुदत्तं विसृज्य[4] निष्क्रान्ताः सर्वे राजपुरुषाः ।)

शोधनकः—इत आगच्छत्वार्यः । (ग)

चारुदत्तः—(सकरुणम् 'मैत्रेय भोः किमिदमद्य' (९।२९) इत्यादि पठति । आकाशे ।)

विषसलिलतुलाग्निप्रार्थिते मे विचारे
क्रकचमिह शरीरे वीक्ष्य दातव्यमद्य ।
अथ रिपुवचनाद्वा ब्राह्मणं मां निहंसि
पतसि नरकमध्ये पुत्रपौत्रैः समेतः ॥ ४३ ॥

अयमागतोऽस्मि ।

(इति निष्क्रान्ताः सर्वे ।)

इति[5] व्यवहारो नाम नवमोऽङ्कः[6] ।

(क) भो वअस्स अहं ते पिअवअस्सो भविअ तुए विरहिदाइं पाणाइं धारेमि ।
(ख) एव्वम् । जुज्जदि । (ग) इदो आअच्छदु अज्जो ।

विषसलिलेति । अथ विचारनिरपेक्षं नृपतिं हृदि स्वीकृत्य वदति । [विषं विषपानं सलिलं सलिलमज्जनं तुला तुलारोहणं अग्निः अग्निधारणमित्येतैः दिव्यैः प्रार्थिते निर्णयार्हे इत्यर्थः । मे मम विचारे व्यवहारविमर्शे । इह मम शरीरे क्रकचं वीक्ष्य दातव्यम् । अथ वा रिपुवचनात् शकारवचनात् मां ब्राह्मणं निहंसि । अतः पुत्रपौत्रैः समेतः नरकमध्ये पतसि पतिष्यसि । अनेन भावि मरणं सूच्यते । मालिनी छन्दः ।] विषादिपरीक्षाप्रार्थितेऽन्विष्टे । विचारे । क्रकचं दातव्यम् । अर्हे तव्यः ॥ ४३ ॥

इति व्यवहारो नाम नवमोऽङ्कः ।

---

१ मपि च. २ बहिः. ३ चण्डा०. ४ विसर्ज्य. ५ इति मृच्छकटिके प्र०; ०कटिकप्र०. ६ अङ्कः समाप्तः.

दशमोऽङ्कः ।

(ततः प्रविशति चाण्डालद्वयेनानुगम्यमानश्चारुदत्तः ।)

उभौ—

तत्किं न कलय कारणं नववधबन्धनयने निपुणौ ।
अचिरेण शीर्षच्छेदनशूलारोपेषु कुशलौ स्वः ॥ १ ॥

अपसरतार्याः अपसरत । एष आर्यचारुदत्तः—

दत्तकरवीरदामा गृहीत आवाभ्यां वध्यपुरुषाभ्याम् ।
दीप इव मन्दस्नेहः स्तोकं स्तोकं क्षयं याति ॥ २ ॥ (क)

चारुदत्तः—(सविषादम् ।)

नयनसलिलसिक्तं पांशुरूक्षीकृताङ्गं
पितृवनसुमनोभिर्वेष्टितं मे शरीरम् ।
विरसमिह रटन्तो रक्तगन्धानुलिप्तं
बलिमिव परिभोक्तुं वायसास्तर्कयन्ति ॥ ३ ॥

(क) ताक्किं ण कलअ कालण णववहबन्धणअणे णिउणा ।
अचिलेर्णे शीशछेअणशूलालोवेशु कुशलम्ह ॥
ओशलध अज्जा ओशलध । एशे अज्जचालुदत्ते—
दिण्णकलवीलदामे गहिदे अम्हेहिं वज्झपुलिसेहिं ।
दीवे व्व मन्दणेहे थोअं थोअं खअं जादि ॥

[इतः समाप्तिं यावत्कार्यफलयोगरूपः निर्वहणसंधिः । वसन्तसेनासंज्ञालाभेन चारुदत्तस्य मोक्षः आर्यकस्य राज्यप्राप्तिः शर्विलकस्य संगमेन चारुदत्तस्य सर्वार्थसिद्धिश्चाङ्कस्य प्रतिपाद्यविषयः । तत्र तावद्वध्यभूमिं नीयमानस्य चारुदत्तस्य प्रवेशः प्रस्तूयते—ततः प्रविशतीत्यादिना । तत्र चाण्डालावन्योन्यं वदतः । **तत्किमिति** । तत् किमिति कारणं वधनिमित्तं न कलय विचारय । नवः वधः बन्धश्च तयोः । यद्वा नवः वधाय बन्धस्तस्य नयने प्रापणे निपुणौ स्वः । स्पष्टमन्यत् ॥१॥ **दत्तेति** । दत्तं करवीराणां दाम वध्यस्रक् यस्य सः । आवाभ्यां वधे नियुक्तः वध्यः । वध्यौ पुरुषौ वध्यपुरुषौ । यद्वा वध्यग्राहकौ पुरुषौ इति मध्यमपदलोपी समासः । ताभ्यां गृहीतः । मन्दस्नेहोऽल्पतैलो दीप इव स्तोकं स्तोकं क्षयं नाशं याति ॥ २ ॥ **नयनेति** । इह विरसं कर्कशं यथा तथा रटन्तः शब्दायमाना वायसा नयनसलिलैरश्रुभिः सिक्तं पांशुना रथ्याधूल्या रूक्षीकृतानि अङ्गानि यस्य तत्तथा । पितृवनं श्मशानं तत्संबन्धिसुमनोभिः पुष्पमालाभिः वेष्टितं मे शरीरं बलिमिव परिभोक्तुं तर्कयन्ति उत्प्रेक्षन्ते ।

---

१ चण्डा०. २ रुक्षी०. ३ लगन्तः. ४ अहलेण. ५ वज्ज.

चाण्डालौ—अपसरतार्याः अपसरत ।

किं पश्यथ छिद्यमानं सत्पुरुषं कालपरशुधाराभिः ।
सुजनशकुनाधिवासं सज्जनपुरुषद्रुममेतम् ॥ ४ ॥

आगच्छ रे चारुदत्त आगच्छ । (क)

चारुदत्तः—पुरुषभा[1]ग्यानाम[2]चिन्त्याः खलु व्यापारा यदहमीदृशीं दशामनुप्राप्तः ।

सर्वगात्रेषु विन्यस्तै रक्तचन्दनहस्तकैः ।
पिष्टचूर्णावकीर्णश्च पुरुषोऽहं पशूकृतः ॥ ५ ॥

(अग्रतो निरूप्य ।) अहो तारतम्यं नराणाम् । (सकरुणम् ।)

अमी हि दृष्ट्वा [3]मदुपेतमेतन्मर्त्यं धिगस्त्वित्युपजातबाष्पा[4]ः ।
अशक्नुवन्तः परिरक्षितुं मां स्वर्गं लभस्वेति वदन्ति पौराः॥६॥

चाण्डालौ—अपसरतार्याः अपसरत । किं पश्यथ ।

इन्द्रः प्रवाह्यमाणो गोप्रसवः संक्र[5]मश्च ताराणाम् ।
सुपुरुषप्राणविपत्तिश्चत्वार इमे न द्रष्टव्याः ॥ ७ ॥ (ख)

(क) ओशलध अज्जा ओशलध ।
किं पेक्खध छिज्जन्तं शप्पुलिशं कालपलशुधालाहिं ।
शुअणशउणाधिवाशं शज्जणपुलिशद्दुमं एदम् ॥

आअच्छ ले चारुदत्ता आअच्छ ।

(ख) ओशलध अज्जा ओशलध । किं पेक्खध ।
इन्दे प्पवाहिअन्ते गोप्पसवे शंकेमं च तालाणम् ।
शुपुलिशपाणविपत्ती चत्तालि इमे ण दट्टव्वा ॥

मालिनी वृत्तम्]॥३॥ **किमिति** । [कालः कृतान्तः स एव परशुः तस्य धाराभिः छिद्यमानं सत्पुरुषम् । अपि च सुजना एव शकुनाः पक्षिणस्तेषामधिवासम् । पुरुष एव द्रुमः पुरुषद्रुमः । सज्जनानां छायाकरत्वात्पुरुषद्रुमः । तमेतं किं पश्यत ॥ ४ ॥ **सर्वेति** । सर्वगात्रेषु विन्यस्तैर्दत्तैः रक्तचन्दनहस्तकैः पञ्चाङ्गुलिचिह्नैः । हस्ता एव हस्तकाः । इवार्थे कन् । पिष्टचूर्णैः पिष्टरजोभिः अवकीर्णः । ' पिष्टचूर्णाभ्यामवकीर्णः व्याप्तः । पिष्टं तण्डुलानां चूर्णं तिलानाम् ' इति लल्लादीक्षिताः । पिष्टचूर्णं श्यामतण्डुलचूर्णमिति पृथ्वीधरः । अहं पुरुषः सन् पशूकृतः । अपशुः पशुर्यथा संपद्यते तथा कृतः ।] पशुदेवतार्थं छागादिः ॥ ५ ॥ **अमी इति** । [अमी हि पौराः मदुपेतं मया प्राप्तमेतद्व्यसनं दृष्ट्वा मर्त्यं मनुष्यधर्माणं धिगस्तु इति उक्त्वा उपजातबाष्पा मां व्यसनाद्रक्षितुमशक्नुवन्तः स्वर्गं लभस्वेति वदन्ति ।] मदिति पञ्चम्येकवचनान्तम् । मदुपगतमीदृशमवस्थान्तरं दृष्ट्वेति वाऽर्थः ॥ ६ ॥ **इन्द्र इत्यादि** । गाथा । इन्द्रः [इन्द्रध्वजः] प्रवास्यमानो यद्वा प्रवाह्यमाणः न द्रष्टव्यः । ['उत्थापयेत्तूर्यरवैः सर्वलोकस्य वै पुरः।रहो विसर्जयेत्केतुं विशेषोऽयं प्रपूजने॥' इति ।] गोप्रसवो [गोप्रसूतिः] निपतनं च ताराणाम् । सत्पुरुषस्य प्राणविपत्तिर्नाशः । चत्वार

---

१ भावानां. २ अविचिन्त्याः. ३ मम देहमेतं. ४ खेदाः. ५ संकमं.

एकः—अरे आहीन्त पश्य पश्य ।

नगरीप्रधानभूते वध्यमाने कृतान्ताज्ञया ।
किं रोदित्यन्तरिक्षमथ वाऽनभ्रं पतति वज्रम् ॥ ८ ॥ (क)

द्वितीयः—अरे गोह ।

न च रोदित्यन्तरिक्षं नैवानभ्रं पतति वज्रम् ।
महिलासमूहमेघान्निपतति नयनाम्बु धाराभिः ॥ ९ ॥

अपि च ।

वध्ये नीयमाने जनस्य सर्वस्य रुदतः ।
नयनसलिलैः सिक्तो रथ्यातो नोन्नमति रेणुः ॥१०॥ (ख)

चारुदत्तः—(निरूप्य सकरुणम् ।)

एताः पुनर्हर्म्यगताः स्त्रियो मां वातायनार्धेन विनिःसृतास्याः[2] ।
हा चारुदत्तेत्यभिभाषमाणा बाष्पं प्रणालीभिरिवोत्सृजन्ति ॥ ११ ॥

चाण्डालौ—आगच्छ रे चारुदत्त आगच्छ । इदं घोषणस्थानम् । आहत डिण्डिमम् । घोषयत घोषणाम् । (ग)

(क) हैण्ड[3] आहीन्ता पेक्ख पेक्ख ।
णअलीपधाणभूदे वज्झीअन्ते कदन्तअण्णाए ।
किं लुअदि अन्तलिक्खे अणब्भे पडदि वज्जे ॥

(ख) अले[4] गोहा ।
ण अ लुअदि अन्तलिक्खे णेअ अणब्भे पडदि वज्जे ।
महिलाशमूहमेहे निवडदि णअणम्बु धाराहिं ॥

अवि अ ।
वज्झम्मि णीअमाणे जणश्श शव्वश्श लोदमाणश्श ।
णअणशलिलेहिं शित्ते लच्छादो ण उण्णमइ लेणू ॥

(ग) आअच्छ ले चालुदत्ता आअच्छ । इमं घोषणट्ठाणम् । आहणेध डिण्डिमम् । घोशेध घोशणम् ।

इमे न द्रष्टव्याः ॥७॥ हण्डे इति नीचसंबोधने । **नगरीत्यादि** । गाथा । नगरीप्रधानभूते [चारुदत्ते] कृतान्ताज्ञया । [विधिनियोगेन । यद्वा कृतान्तसदृशपालकाज्ञया । किं अन्तरिक्षं रोदिति अथ वा अनभ्रं मेघरहितं तथा यथा वज्रं पतति ।] वध्यमाने नगरीप्रधानवधो वज्र इवेत्युत्प्रेक्षा ॥ ८ ॥ **न चेति** । गाथा । स्त्रीसमूहमेघान्निपतति । नयनाम्बु कर्तृ । धाराभिः ॥९॥ **वध्ये नीयमान इति** । आर्या । वध्ये वध्यभूमिं नीयमाने । रेणुः रथ्यातो नोन्नमति नोद्गच्छति ॥ १० ॥ **एता इति** । [एता हर्म्यगताः स्त्रियः पुनः वातायनार्धेन वातायनैकदेशेन विनिःसृतानि आस्यानि यासां ताः निर्गतवदनाः हा चारुदत्तेति अभिभाषमाणाः प्रणालीभिरिव स्थूलधाराभिरित्यर्थः । बाष्पमुद्गिरन्ति उत्सृजन्ति । इन्द्रवज्रा वृत्तम्]॥ ११ ॥

---

१ अनभ्रे. २ विनिःशृताक्ष्यः. ३ हण्डे. ४ अले ले.

उभौ—श्रृणुतार्याः श्रृणुत । एष सार्थवाहविनयदत्तस्य नप्ता सागरदत्तस्य पुत्रक आर्यचारुदत्तो नाम । एतेन किलाकार्यकारिणा गणिका वसन्तसेनाऽर्थकल्यवर्तस्य कारणाच्छून्यं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्य बाहुपाशबलात्कारेण मारितेत्येष सलोप्त्रो गृहीतः स्वयं च प्रतिपन्नः । ततो राज्ञा पालकेन वयमाज्ञप्ता एतं मारयितुम् । यद्यपर ईदृशमुभयलोकविरुद्धमकार्यं करोति तमपि राजा पालक एवमेव शास्ति । (क)

चारुदत्तः—(सनिर्वेदं स्वगतम् ।)

मखशतपरिपूतं गोत्रमुद्भासितं मे
सदसि निबिडचैत्यब्रह्मघोषैः पुरस्तात् ।
मम मरणदशायां वर्तमानस्य पापै-
स्तदसदृशमनुष्यैर्घुष्यते घोषणायाम् ॥ १२ ॥

(उद्वीर्ज्य कर्णौ विधाय ।) हा प्रिये वसन्तसेने ।

शशिविमलमयूखशुभ्रदन्ति सुरुचिरविद्रुमसंनिभाधरौष्ठि ।
तव वदनभवामृतं निपीय कथमवशो ह्ययशोविषं पिबामि ॥ १३ ॥

(क) शुणाध अज्जा शुणाध । एशे शत्थवाहविणअदत्तश्श णत्तिके शाअलदत्तश्श पुँत्तके अज्जचालुदत्ते णाम । एदिणा किल अकज्जकालिणा गणिआ वशन्तशेणा अत्थकल्लवत्तश्श कालणादो शुण्णं पुप्फकलण्डअजिण्णुज्जाणं पवेशिअ बाहुपाशबलक्कालेण मालिदे त्ति एशे शलोत्ते गहिदे शअं अ पडिवण्णे । तदो लण्णा पालएण अम्हे आणत्ता एदं मालेदुम् । जदि अवले ईदिशं उभअलोअविलुद्धं अकज्जं कलेदि तं पि लाआ पालए एव्वं ज्जेव शाशदि ।

[**मखेति** । मखानां यज्ञानां शतैः परिपूतं पवित्रं मे गोत्रं पुरस्तात्पूर्वस्मिन्काले सदसि यज्ञमण्डपे निबिडानि घनानि चैत्यानि आयतनानि तत्र ब्रह्मणां वेदानां घोषैः । चित्यस्य चयनीयस्याग्नेः संबन्धिभिश्चैत्यैः इति केचित् । उद्भासितम् । मरणदशायां वर्तमानस्य मम तद्गोत्रं पापैः असदृशमनुष्यैः नीचैश्चाण्डालैः घोषणायामपराधप्रख्यापनस्थाने घुष्यते । मालिनी वृत्तम्] ॥ १२ ॥ उद्वीज्य उद्वेगं कृत्वा । **शशीति** । [शशिनः चन्द्रस्य विमलमयूखा धवलकिरणा इव शुभ्रा दन्ता यस्यास्तत्संबुद्धिः । सुरुचिरो यः विद्रुमः प्रवालः तत्सदृशः अधरोष्ठो यस्यास्तादृशि । तव वदनोत्पन्नममृतं निपीय अवशः परवशोऽहं अयशोरूपं विषं कथं पिबामि । विषमालंकारः ।

---

१ उद्वीक्ष्य. २ दन्तं. ३ धरोष्ठं; धरोष्ठि. ४ शुणध. ५ पुत्तके.

उभौ—अपसरतार्याः अपसरत ।

एष गुणरत्ननिधिः सज्जनदुःखानामुत्तरणसेतुः ।
असुवर्णं मण्डनकमपनीयतेऽद्य नगरीतः ॥ १४ ॥

अन्यच्च ।

सर्वः खलु भवति लोके लोकः सुखसंस्थितानां चिन्तायुक्तः ।
विनिपतितानां नराणां प्रियकारी दुर्लभो भवति ॥ १५ ॥ (क)

चारुदत्तः—(सर्वतोऽवलोक्य ।)

अमी हि वस्त्रान्तनिरुद्धवक्त्राः प्रयान्ति मे दूरतरं वयस्याः ।
परोऽपि बन्धुः समसंस्थितस्य मित्रं न कश्चिद्विषमस्थितस्य ॥ १६ ॥

चाण्डालौ—अपसारणं कृतम् । विविक्तो राजमार्गः । तदानयतैतं दत्तवध्यचिह्नम् । (ख)

(चारुदत्तो निःश्वस्य 'मैत्रेय भोः किमिदमद्य' (९।२९) इत्यादि पठति।)

(नेपथ्ये ।)

हा तात हा प्रियवयस्य । (ग)

चारुदत्तः—(आकर्ण्य सकरुणम् ।) भोः स्वज्ञातिमहत्तर इच्छाम्यहं भवतः सकाशात्प्रतिग्रहं कर्तुम् ।

चाण्डालौ—किमस्माकं हस्तात्प्रतिग्रहं करोषि । (घ)

(**क**) ओशलध अज्जा ओशलध ।

एशे गुणलअणणिही शज्जणदुक्खाण उत्तलणशेदू ।
अशुवण्णं मण्डणअं अवणीअदि अज्ज णअलीदो ॥

अण्णं च ।

शव्वे क्खु होइ लोए लोए शुहशंठिदाण तत्तिल्लिः[2] ।
विणिवडिदाणं[3] णलाणं पिअकाली दुल्लहो होदि ॥

(**ख**) ओशालणं किदम् । विवित्तं लाअमग्गम् । ता आणेध एदं दिण्णवज्झचिण्हम् । (**ग**) हा ताद हा पिअवअस्स । (**घ**) किं अम्हाणं हत्थादो पडिग्गहं कलेशि ।

पुष्पिताग्रा वृत्तम्] ॥ १३ ॥ **एष इति** । [एष चारुदत्तः गुणा एव रत्नानि तेषां निधिः । सज्जनदुःखानामुत्तरणसेतुः उत्तरणसाधनम् । असुवर्णं मण्डनमद्य नगरीतोऽपनीयते ॥ १४ ॥ **सर्व इति** । लोके सर्वः खलु सुखसंस्थितानां सुखिनां चिन्तायुक्तः क्षेमचिन्तनपरः भवति । चिन्तापर उपयुक्त इत्यर्थः इति पृथ्वीधरः । विनिपतितानामापन्नानां नराणां प्रियकारी दुर्लभः भवति] ॥ १५ ॥ [**अमी हीति** । अमी हि मे वयस्याः वस्त्रान्तेन निरुद्धं संवृतं वक्त्रं यैस्तथा सन्तः दूरतरं प्रयान्ति । समसंस्थितस्य सुखावस्थावस्थितस्य परोऽपि बन्धुर्भवति । उपजातिः] ॥ १६ ॥

---

१ न्तररुद्ध०. २ तात्तिल्ला, ३ वडिदाणं,

चारुदत्तः—शान्तं पापम् । नापरीक्ष्यकारी[1] दुराचारः पालक इव चाण्डालः । तत्परलोकार्थं[2] पुत्रमुखं द्रष्टुमभ्यर्थये ।

चाण्डालौ—एवं क्रियताम् । (क)

(नेपथ्ये ।)

हा तात हा पितः । (ख)

(चारुदत्तः श्रुत्वा सकरुणं ' भोः स्वजातिमहत्तर ' इत्यादि पठति ।)

चाण्डालौ—अरे पौराः क्षणमन्तरं दत्त । एष आर्यचारुदत्तः पुत्रमुखं पश्यतु । (नेपथ्याभिमुखम् ।) आर्य इत इतः । आगच्छ रे दारक आगच्छ । (ग)

(ततः प्रविशति दारकमादाय विदूषकः ।)

विदूषकः—त्वरतां त्वरतां भद्रमुखः । पिता ते मारयितुं नीयते । (घ)

दारकः—हा तात हा पितः । (ङ)

विदूषकः—हा प्रियवयस्य कुत्र मया त्वं द्रष्टव्यः । (च)

चारुदत्तः—(पुत्रं मित्रं च वीक्ष्य ।) हा पुत्र हा मैत्रेय । (सकरुणम् ।) भोः कष्टम् ।

चिरं खलु भविष्यामि परलोके पिपासितः ।
अत्यल्पमिदमस्माकं निवापोदकभोजनम्[3] ॥ १७ ॥

किं पुत्राय प्रयच्छामि । (आत्मानमवलोक्य[4] । यज्ञोपवीतं दृष्ट्वा ।) आं इदं तावदस्ति मम च ।

अमौक्तिकमसौवर्णं ब्राह्मणानां विभूषणम् ।
देवतानां पितॄणां च भागो येन प्रदीयते ॥ १८ ॥

(इति यज्ञोपवीतं ददाति ।)

(क) एव्वं कलीअदु । (ख) हा ताद हा आवुक ।

(ग) अले पउला[5] खणं अन्तलं देध । एशे अज्जचालुदत्ते पुत्तमुहं पेक्खदु । अज्ज इदो इदो । आअच्छ ले दालआ आअच्छ ।

(घ) तुवरदु तुवरदु भद्दमुहो । पिदा दे मारिदुं णीअदि ।

(ङ) हा ताद हा आवुक । (च) हा पिअवअस्स कहिं मए तुमं पेक्खिदव्वो ।

हा आवुक पितः । **चिरमिति** । [पिपासितः तृषितः । इदं पुत्रदत्तं निवापोदकमेव भोजनमस्माकमत्यल्पमपर्याप्तं भविष्यति] ॥ १७ ॥ **अमौक्तिकमिति** । [असौवर्णमसुवर्णघटितम् । येन उपवीतेन प्राचीनोपवीतरूपेण] ॥ १८ ॥

---

१ नापरीक्षितकारी. २ ०कार्थे. ३ भाजनम्. ४ वीक्ष्य. ५ पउला जणा.

चाण्डालः—आगच्छ रे चारुदत्त आगच्छ । (क)

द्वितीयः—अरे आर्यचारुदत्तं निरुपपदेन नाम्नाऽऽलपसि । अरे पश्य ।

अभ्युदयेऽवसाने तथैव रात्रिंदिवमहतमार्गा ।
उद्दामेव किशोरी नियतिः खलु प्रत्येषितुं याति ॥ १९ ॥

अन्यच्च ।

शुष्का व्यपदेशा अस्य किं विनमितमस्तकं न कर्तव्यम् ।
राहुगृहीतोऽपि चन्द्रो न वन्दनीयो जनपदस्य ॥ २० ॥ (ख)

दारकः—अरे रे चाण्डालौ कुत्र मम पितरं नयथः । (ग)

चारुदत्तः—वत्स ।

अंसेन बिभ्रत्करवीरमालां स्कन्धेन शूलं हृदयेन शोकम् ।
आघातमद्याहमनुप्रयामि शामित्रमालब्धमिवाध्वरेऽजः ॥ २१ ॥

(क) आअच्छ ले चालुदत्ता आअच्छ ।

(ख) अले अज्जचालुदत्तं णिलुववदेण णामेण आलवेशि । अले पेक्खं[2] ।

अब्भुदए अवशाणे तहेअ[3] लत्तिदिवं अहदमग्गा ।
उद्दामे व्व किशोली णिअदी क्खु पडिच्छिदुं[4] जादि ॥

अण्णं च ।

शुक्खा वेवदेशा[5] शे किं विणमिअमत्थए[6] ण काअव्वम् ।
लाहुगहिदे वि चन्दे ण वन्दणीए जणपदश्श ॥

(ग) अरे[7] रे चाण्डाला कहिं मे आवुकं णेध ।

निरुपपदेन आर्य इत्यादिविशेषणशून्येन । **अभ्युदय इत्यादि** । गाथा । [अवसाने संदुपरमे आपदि इत्यर्थः । तथैव रात्रिंदिवमहतमार्गा । अव्याहतप्रसिक्ता इत्यर्थः । उद्दामा उच्छिन्नबन्धना किशोरी बालाश्वा इव नियतिर्दैवं खलु प्रत्येषितुं पुरुषमाक्रमितुं याति । प्रतीष्टं (इष्टं पुरुषं) इति केचिच्छायामिच्छन्ति] ॥ १९ ॥ **शुष्का इत्यादि** । गाथा । [अस्य चारुदत्तस्य व्यपदेशाः शोभननामादयः किं शुष्काः अनेनापवादेन क्षीणाः । अस्य विनमितमस्तकं किं न कर्तव्यम् । कर्तव्यमेव । राहुगृहीतश्चन्द्रो जनपदस्य न वन्दनीयः इति काकुः । वन्दनीय एवेत्यर्थः ।] शुष्का अपि प्रदेशा अङ्गानि । किं विनमितमस्तकेन अवनताशिरसा किं कर्तव्यम् । अस्य स्त्रीहणस्य लज्जया नतशिरसोऽपि न कुत्सेत्यर्थः । कुत एवमित्यत आह—राहुगृहीत इव चन्द्रो वन्दनीयो जनपदस्य । किंशब्द आवर्त्योभयोरर्थयोर्योज्य इत्याहुः ॥ २० ॥ **अंसेनेति** । आघातं अधिकरणवधस्थानम् । ‘ शमिता यज्ञे ’ इति पाणिनेः सूत्रम् । शमितुरिदं शामित्रम् । यज्ञे पशुघातस्थानम् । आलब्धोऽभिमन्त्रितः । मारित इत्येके ।

---

१ आलब्धं. २ पेक्ख पेक्ख. ३ तह अ (तथा च). ४ पडिक्खिदुं (परीक्षितुं). ५ वि वदेशा (अपि प्रदेशाः). ६ मत्थएण (मस्तकेन); पणमिअ मत्थके (प्रणम्य मस्तके). ७ अले ले.

चाण्डालः—दारक ।

न खल्वावां चाण्डालौ चाण्डालकुले जातपूर्वावपि ।
येऽभिभवन्ति साधुं ते पापास्ते च चाण्डालाः ॥ २२ ॥ (क)

दारकः—तत्किमर्थं मारयथः पितरम् । (ख)

चाण्डालः—दीर्घायुः अत्र राजनियोगः खल्वपराध्यति न खल्वावाम् । (ग)

दारकः—व्यापादयतं माम् । मुञ्चतं पितरम् । (घ)

चाण्डालः—दीर्घायुः एवं भणंश्चिरं मे जीव । (ङ)

चारुदत्तः—(सास्रं पुत्रं कण्ठे गृहीत्वा ।)

इदं तत्स्नेहसर्वस्वं सममाढ्यदरिद्रयोः ।
अचान्दनमनौशीरं हृदयस्यानुलेपनम् ॥ २३ ॥

('अंसेन बिभ्रत्–'(१०।२१) इत्यादि पुनः पठति । अवलोक्य स्वगतम् । 'अमी हि वस्त्रान्तनिरुद्धवक्त्राः' (१०।१६) इत्यादि पुनः पठति ।)

विदूषकः—भो भद्रमुखौ मुञ्चतं प्रियवयस्यं चारुदत्तम् । मां व्यापादयतम् । (च)

चारुदत्तः—शान्तं पापम् । (दृष्ट्वा स्वगतम् ।) अद्यावगच्छामि । ('समसंस्थित–' (१०।१६) इत्यादि पठति । प्रकाशम् । 'एताः पुनर्हर्म्यगताः स्त्रियो माम्' (१०।११) इत्यादि पुनः पठति ।)

(क) दालआ ।

ण हु अम्हे चाण्डाला चाण्डालकुलम्मि जादपुव्वा वि ।
जे अहिभवन्ति शाहुं ते पावा ते अ चाण्डाला ॥

(ख) ता कीस मारेध आवुकम् ।

(ग) दीहाओ अत्त लाअणिओओ क्खु अवलज्झदि ण क्खु अम्हे ।

(घ) वावादेध मम् । मुञ्चध आवुकम् ।

(ङ) दीहाओ एवं भणन्ते चिलं मे जीव ।

(च) भो भद्दमुहा मुञ्चध पिअवअस्सं चालुदत्तम् । मं वावादेध ।

अज इवाहं प्रयामि। इन्द्रवज्रा वृत्तम्] ॥ २१ ॥ न खल्विति । [जातपूर्वौ अपि । जन्मना चाण्डालौ न कर्मणेत्यर्थः । ते पापाः इत्यनेन पालकः शकारश्च लक्षितौ] ॥ २२ ॥ इदमिति । [इदं तत्पुत्रालिङ्गनजन्यं सुखं आढ्यः श्रीमान् दरिद्रश्च तयोः समं स्नेहसर्वस्वम् । अचान्दनं अनौशीरं उशीरजादन्यत् हृदयस्यानुलेपनम्] ॥ २३ ॥

---

१ अचन्दनं. २ पापं शान्तं पापम्. ३ चण्डाला.

चाण्डालः—अपसरतार्याः अपसरत ।

किं पश्यथ सत्पुरुषमयशोवशेन प्रनष्टजीवाशम् ।
कूपे खण्डितपाशं काञ्चनकलशमिव मज्जन्तम् ॥ २४ ॥ (क)

(चारुदत्तः सकरुणम् 'शशिविमलमयूख–' (१०।१३) इत्यादि पठति ।)

अपरः—अरे पुनरपि घोषय । (ख)

(चाण्डालस्तथा करोति ।)

चारुदत्तः—

प्राप्तोऽहं व्यसनकृतां दशामनार्यां
यत्रेदं फलमपि जीवितावसानम् ।
एषा च व्यथयति घोषणा मनो मे
श्रोतव्यं यदिदमसौ मया हतेति ॥ २५ ॥

(ततः प्रविशति प्रासादस्थो बद्धः स्थावरकः ।)

स्थावरकः—(घोषणामाकर्ण्य सवैक्लव्यम् ।) कथमपापश्चारुदत्तो व्यापाद्यते । अहं निगडेन स्वामिना बद्धः । भवतु । आक्रन्दामि । शृणुतार्याः शृणुत । अस्तीदानीं मया पापेन प्रवहणपरिवर्तेन पुष्पकरण्डकजीर्णोद्यानं वसन्तसेना नीता । ततो मम स्वामिना मां न कामयस इति कृत्वा बाहुपाशबलात्कारेण मारिता न पुनरेतेनार्येण । कथम् । विदूरतया न कोऽपि शृणोति । तत्किं करोमि । आत्मानं पातयामि ।

(क) ओशलध अज्जा ओशलध ।
किं पेक्खध शप्पुलिशं अजशवशेण प्पणट्ठजीवाशम् ।
कूवे खण्डिदपाशं कञ्चणकलशं व्वि डुब्बन्तम् ॥

(ख) अले पुणोवि घोशेहि ।

(ग) कधं अपावे चालुदत्ते वावादीअदि । हग्गे णिअलेण शामिणा बन्धिदे । भोदु । आक्कन्दामि । शुणाध अज्जा शुणाध । अत्थि दाणिं मए पावेण पवहणपडिवत्तेण पुप्फकलण्डअजिण्णुज्जाणं वसन्तशेणा णीदा । तदो मम शामिणा मं ण कामेशित्ति कदुअ बाहुपाशबलक्कालेण मालिदा ण उण एदिणा अज्जेण । कधम् । विदूलदाए ण को वि शुणादि । ता किं कलेमि । अत्ताणअं पाडेमि । जइ एव्वं कलेमि

किमिति। गाथा। [अयशोवशेन वसन्तसेनाघातजन्यापवादात्। प्रनष्टा जीवाशा यस्य तं पुरुषम्। खण्डितः विच्छिन्नः पाशः रज्जुः यस्य तादृशं कूपे मज्जन्तम्] ॥२४॥ **प्राप्त इति**। [अहं व्यसनेन कृतामापज्जनितामनार्यां गर्ह्यां दशां प्राप्तः। यत्रेदं जीवितावसानं मरणरूपं फलमपि। घोषणा मदपराधख्यापना। प्रहर्षिणी वृत्तम्] ॥२५॥ आक्रन्दामि

१ कुशां. २ क्ष्मानम्. ३ त्वया. ४ घोषणं. ५ कूवम्मि खुडिदपाशं.

(विचिन्त्य ।) यद्येवं करोमि तदाऽऽर्यचारुदत्तो न व्यापाद्यते । भवतु । अस्याः प्रासादबालाग्रप्रतोलिकात एतेन जीर्णगवाक्षेणात्मानं निक्षिपामि । वरमहमुपरतः न पुनरेष कुलपुत्रविहगानां वासपादप आर्यचारुदत्तः । एवं यदि विपद्ये लब्धो मया परलोकः । (इत्यात्मानं पातयित्वा ।) आश्चर्यम् । नोपरतोऽस्मि । भग्नो मे दण्डनिगडः । तच्चाण्डालघोषं समन्विष्यामि । (दृष्टोपसृत्य ।) हंहो चाण्डालौ अन्तरमन्तरम् । (ग)

चाण्डालौ—अरे कोऽन्तरं याचते । (क)

(चेटः 'शुणाध' (२३० पृष्ठे) इति पूर्वोक्तं पठति ।)

चारुदत्तः—अये ।

कोऽयमेवंविधे काले कालपाशस्थिते मयि ।
अनावृष्टिहते सस्ये द्रोणमेघ इवोदितः ॥ २६ ॥

भोः श्रुतं भवद्भिः ।

न भीतो मरणादस्मि केवलं दूषितं यशः ।
विशुद्धस्य हि मे मृत्युः पुत्रजन्मसमो भवेत् ॥ २७ ॥

अन्यच्च ।

तेनास्म्यकृतवैरेण क्षुद्रेणात्यल्पबुद्धिना ।
शरेणेवं विषाक्तेन दूषितेनापि दूषितः ॥ २८ ॥

चाण्डालौ—स्थावरक अपि सत्यं भणसि । (ख)

तदा अज्जचालुदत्ते ण वावादीअदि । भोदु । इमादो पाशादबालग्गपदोलिकादो एदिणा जिण्णगवक्खेण अत्ताणअं णिक्खिवामि । वलं हग्गे उवलदे ण उण एशे कुलपुत्तविहंगाणं वाशपादवे अज्जचालुदत्ते । एव्वं जइ विवज्जामि लद्धे मए पललोए । ही ही । ण उवलदम्हि । भग्गे मे दण्डणिअले । ता चाण्डालघोशं शमण्णेशामि । हंहो चाण्डाला अन्तलं अन्तलम् ।

(क) अले के अन्तलं मग्गेदि । (ख) थावलअ अवि शच्चं भणाशि ।

विरौमि । बालाग्रप्रतोलीतः प्रासादभागादित्यर्थः । **कोऽयमिति** । [कालपाशस्थिते मृत्युगोचरे । द्रोणमेघः शस्यवृद्धिकरः पुष्करावर्तकाद्यन्यतमः मेघविशेषः । तदुक्तं ज्योतिस्तत्त्वे–'त्रियुते शाकवर्षे तु चतुर्भिः शेषितः क्रमात् । आवर्तं विद्धि संवर्तं पुष्करं द्रोणमम्बुदम् ॥ आवर्तो निर्जलो मेघः संवर्तश्च बहूदकः । पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः ॥ ' इति] ॥ २६ ॥ **न भीत इति** ॥ २७ ॥ **तेनेति** । [मया अकृतं वैरं यस्य तेन । क्षुद्रेण नीचेन अतिमन्दबुद्धिना स्वयं दूषितेन तेन शकारेण

---

१ वोत्थितः. २ शरेणैव. ३ विहंगाणं. ४ सच्चं.

चेटः—सत्यम् । अहमपि मा कस्यापि कथयिष्यसीति प्रासाद बालाग्रप्रतोलिकायां दण्डनिगडेन बद्ध्वा निक्षिप्तः । (क)

(प्रविश्य ।)

शकारः—(सहर्षम् ।)

मांसेन तिक्ताम्लेन भक्तं शाकेन सूपेन समत्स्यकेन ।
भुक्तं मयाऽऽत्मनो गेहे शालीयकूरेण गुडौदनेन ॥ २९ ॥

(कर्णं दत्त्वा ।) भिन्नकांस्यखङ्खणायाश्चाण्डालवाचायाः स्वरसंयोगः । यथा चैष उद्गीतो वध्यडिण्डिमशब्दः पटहानां च श्रूयते तथा तर्कयामि दरिद्रचारुदत्तको वध्यस्थानं नीयत इति । तत्प्रेक्षिष्ये । शत्रुविनाशो नाम मम महान्हृदयस्य परितोषो भवति । श्रुतं च मया योऽपि किल शत्रुं व्यापाद्यमानं पश्यति तस्यान्यस्मिञ्जन्मान्तरेऽक्षिरोगो न भवति । मया खलु विषग्रन्थिगर्भप्रविष्टेनेव कीटकेन किमप्यन्तरं मृगयमाणेनोत्पादितस्तस्य दरिद्रचारुदत्तस्य विनाशः । सांप्रतमात्मीयायां प्रासादबालाग्रप्रतोलिकायामधिरुह्यात्मनः पराक्रमं पश्यामि । (तथा कृत्वा दृष्ट्वा च ।) ही ही

(क) शच्चम् । हग्गे वि मा कश्श वि कधइश्शशि त्ति पाशादबालग्गपदोलिकाए दण्डणिअलेण बन्धिअ णिक्खित्ते ।

(ख) मंशेण तिक्खामिलकेण भत्ते शाकेण शूपेण शमच्छकेण ।
भुत्तं मए अत्तणअश्श गेहे शालिश्शकूलेण गुलोदणेण ॥

भिण्णकंशखङ्खणाए चाण्डालवाआए शलशंजोए । जधा अ एशे उक्खालिदे[1] वज्झडिण्डिमशद्दे पडहाणं अ शुणीअदि तधा तक्केमि दलिद्दचालुदत्ताके वज्झट्ठाणं णीअदि त्ति । ता पेक्खिश्शम् । शत्तुविणाशे णाम मम महन्ते हलकश्श पलिदोशे होदि । शुदं अ मए जे वि किल शत्तुं वावादअन्तं पेक्खदि तश्श अण्णश्शिं जम्मन्तले अक्खिलोगे ण होदि । मए क्खु विशगण्ठिगब्भपविट्ठेण विअ कीडएण किं पि अन्तलं मग्गमाणेण उप्पाडिदे ताह दलिद्दचालुदत्ताह विणाशे । शंपदं अत्तणकेलिकाए पाशादबालग्गपदोलिकाए अहिलुहिअ अत्तणो पलक्कमं पेक्खामि । ही ही एदाह दलिद्द-

---

विषाक्तेन शरेण इव दूषितोऽस्मि] ॥ २८ ॥ **मांसेनेति** । उपजातिच्छन्दः । [मया आत्मनो गेहे तिक्ताम्लेन तिक्ताम्लरसोपेतेन मांसेन समत्स्यकेन शाकेन शालीयकूरेण शाल्युत्पन्नेनान्नेन गुडौदनेन सह भक्तं भुक्तम् ।] तप्तशाकेन शालेर्भक्तेन गुडौदनेन ॥ २९ ॥ भिन्नकांस्यवत्खङ्खणायाः कटुस्वराया विकृतध्वन्याश्चाण्डालवाचः स्वरसंयोगः । यथा चैष उत्खालित उद्गतः पटहानां च शब्दस्तथा तर्कये । यः शत्रुं व्यापाद्यमानं प्रेक्षते तस्याक्षिणी शीतलायेते । विषकण्डिकामध्यप्रविष्टेन इव कीटकेन ।

---

१ उरफालिदे.

एतस्य दरिद्रचारुदत्तस्य वध्यं नीयमानस्यैतावाञ्जनसंमर्दः। यस्यां वेलाया-मस्मादृशः प्रवरो वरमानुषो वध्यं नीयते तस्यां वेलायां कीदृशो भवेत्। (निरीक्ष्य।) कथम्। एष स नवबलीवर्द इव मण्डितो दक्षिणां दिशं नीयते। अथ किंनिमित्तं मदीयायाः प्रासादबालाग्रप्रतोलिकायाः समीपे घोषणा निपतिता निवारिता च। (विलोक्य।) कथं स्थावरकश्चेटोऽपि नास्तीह। मा नाम तेनेतो गत्वा मन्त्रभेदः कृतो भविष्यति। तद्यावदेनमन्विष्यामि। (इत्यवतीर्योपसर्पति।) (ख)

चेटः—(दृष्ट्वा।) भट्टारकाः एष स आगतः। (क)

चाण्डालौ—

अपसरत दत्त मार्गं द्वारं पिधत्त भवत तूष्णीकाः।
अविनयतीक्ष्णविषाणो दुष्टबलीवर्द इत एति॥ ३०॥ (ख)

शकारः—अरे अरे अन्तरमन्तरं दत्त। (उपसृत्य।) पुत्रक स्थावरक चेट एहि गच्छावः। (ग)

चेटः—ही ही अनार्य वसन्तसेनां मारयित्वा न परितुष्टोऽसि। सांप्रतं प्रणयिजनकल्पपादपमार्यचारुदत्तं मारयितुं व्यवसितोऽसि। (घ)

शकारः—न हि रत्नकुम्भसदृशोऽहं स्त्रियं व्यापादयामि। (ङ)

चालुदत्ताह वज्झं णीअमाणाह एवड्ढे[1] जणशंमद्दे। जं वेलं अम्हालिशे पवले वलमणुश्शे वज्झं णीअदि तं वेलं कीदिशे[2] भवे। कधम्। एशे शे णवबलद्दके विअ मण्डिदे दक्खिणं दिशं णीअदि। अध किंणिमित्तं ममकेलिकाए पाशादबालग्गपदोलिकाए शमीवे घोशणा णिवडिदा णिवालिदा अ। कधं थावलके चेडे वि णत्थि इध। मा णाम तेण इदो गदुअ मन्तभेदे कडे भविश्शदि। ता जाव णं अण्णेशामि।

(क) भट्टालका एशे शे आगदे।

(ख) ओशलध देध मग्गं दालं ढक्केध होध तुण्हीआ।
अविणअतिक्खविशाणे दुट्ठबइल्ले इदो एदि॥

(ग) अले अले अन्तलं अन्तलं देध। पुत्तका थावलका चेडा एहि। गच्छम्ह।

(घ) ही ही अणज्ज वशन्तशेणिअं मालिअ ण पलितुट्टे शि। शंपदं पणइजणकप्पपादवं अज्जचालुदत्तं मालइदुं ववशिदेशि।

(ङ) ण हि लअणकुम्भशलिशे हग्गे इत्थिअं वावादेमि।

ही विस्मये। कथमित्यर्थः। एवड्ढे एतावान्महान्। नवबलीवर्द इव नववृषभ इव मण्डितः। वृषभशब्दः संभवन्नपि शकारभाषात्वात्त्यक्तः। **अपसरतेति**। [तूष्णीका मौनिनः। अविनय एव तीक्ष्णो निशितः विषाणः शृङ्गं यस्य सः। दुष्टः बलीवर्दः शकारः] ३०॥

---

१ एशे वड्ढे (एष वृद्धः). २ कीदिशं.

सर्वे—अहो त्वया मारिता। नार्यचारुदत्तेन। (क)

शकारः—क एवं भणति। (ख)

सर्वे—(चेटमुद्दिश्य।) नन्वेष साधुः। (ग)

शकारः—(अपवार्य सभयम्।) हन्त कथं स्थावरकश्चेटः सुष्ठु न मया संयतः। एष खलु ममाकार्यस्य साक्षी। (विचिन्त्य।) एवं तावत्करिष्यामि। (प्रकाशम्।) अलीकं भट्टारकाः। अहो एष चेटः सुवर्णचोरिकया मया गृहीतस्ताडितो मारितो बद्धश्च। तत्कृतवैर एष यद्भणति किं सत्यम्। (अपवारितकेन चेटस्य कटकं प्रयच्छति। स्वैरकम्।) पुत्रक स्थावरक चेट एतद्गृहीत्वाऽन्यथा भण। (घ)

चेटः—(गृहीत्वा।) पश्यत पश्यत भट्टारकाः। अहो सुवर्णेन मा प्रलोभयति। (ङ)

शकारः—(कटकमाच्छिद्य।) एतत्तत्सुवर्णकं यस्य कारणान्मया बद्धः। (सक्रोधम्।) हंहो चाण्डालौ मया खल्वेष सुवर्णभाण्डारे नियुक्तः सुवर्णं चोरयन्मारितस्ताडितः। तद्यदि न प्रत्ययेथे तदा पृष्ठं तावत्पश्यतम्। (च)

चाण्डालौ—(दृष्ट्वा।) शोभनं भणति। वितप्तश्चेटः किं न प्रलपति। (छ)

(क) अहो तुए मारिदा। ण अज्जचारुदत्तेण।

(ख) के एव्वं भणादि। (ग) णं एसो साहू।

(घ) अविदमादिके अविदमादिके कधं थावलके चेडे शुट्ठु ण मए शंजदे। एशे क्खु मम अकज्जश्श शक्खी। एव्वं दाव कलइश्शम्। अलीअं भश्टालका। हंहो एशे चेडे शुवण्णचोलिआए मए गहिदे पिश्टिदे मालिदे बद्धे अ। ता किदवेले एशे जं भणादि किं शच्चम्। पुश्तका[1] थावलका चेडा एदं गेण्हिअ अण्णधा भणाहि।

(ङ) पेक्खध पेक्खध भट्टालका। हंहो शुवण्णेण मं पलोभेदि।

(च) एशे शे शुवण्णके जश्श कालणादो मए बद्धे[2]। हंहो चाण्डाला[3] मए क्खु एशे शुवण्णभण्डाले णिउत्ते शुवण्णं[4] चोलअन्ते मालिदे पिश्टिदे। ता जदि ण पत्तिआअध ता पिश्टिं दाव पेक्खध।

(छ) शोहणं भणादि। वितत्ते[5] चेडे किं ण प्पलवदि[6]।

---

१ पुश्थका. २ पड्डे. ३ चण्डालआ. ४ शुवण्णअं. ५ विडत्ते. ६ प्पडवदि.

चेटः—हन्त ईदृशो दासभावो यत्सत्यं कमपि न प्रत्याययति । (सकरुणम्।) आर्य चारुदत्त एतावान्मे विभवः। (इति पादयोः पतति।) (क)

चारुदत्तः—(सकरुणम्।)

उत्तिष्ठ भोः पतितसाधुजनानुकम्पि-
न्निष्कारणोपगतबान्धव धर्मशील ।
यत्नः कृतोऽपि सुमहान्मम मोक्षणाय
दैवं न संवदति किं न कृतं त्वयाऽद्य ॥ ३१ ॥

चाण्डालौ—भट्टक ताडयित्वैतं चेटं निष्कासय । (ख)

शकारः—निष्क्राम रे । (इति निष्क्रामयति।) अरे चाण्डालौ किं विलम्बेथे । मारयतमेतम् । (ग)

चाण्डालौ—यदि त्वरयसे तदा स्वयमेव मारय । (घ)

रोहसेनः—अरे चाण्डालौ मां मारयतम् ।मुञ्चतं पितरम् । (ङ)

शकारः—सपुत्रमेवैतं मारयतम् । (च)

चारुदत्तः—सर्वमस्य मूर्खस्य संभाव्यते । तद्गच्छ पुत्र मातुः समीपम् ।

रोहसेनः—किं मया गतेन कर्तव्यम् । (छ)

चारुदत्तः—

आश्रमं वत्स गन्तव्यं गृहीत्वाऽद्यैव मातरम् ।
मा पुत्र पितृदोषेण त्वमप्येवं गमिष्यसि ॥ ३२ ॥

(क) हीमादिके ईदिशे दाशभावे जं शच्चं कंपि ण पत्तिआअदि । अज्ज चालुदत्त एत्तिके मे विहवे । (ख) भट्टके पिट्टिअ एदं चेडं णिक्खालेहि । (ग) णिक्कम ले । अले चाण्डाला किं विलम्बेध । मालेध एदम् । (घ) जदि तुवलशि ता शअं ज्जेव मालेहि । (ङ) अले चाण्डाला मं मारेध । मुञ्चध आवुकम् ।
(च) शपुत्तं ज्जेव एदं मालेध । (छ) किं मए गदेण कादव्वम् ।

[लल्लादीक्षितास्तु सत्यकमपि इति पठित्वा 'प्रशस्तं सत्यं सत्यकम्। प्रशंसायां कन' इति व्याख्यान्ति । विभवः सामर्थ्यम्] । **उत्तिष्ठेति** । [भोः पतितः आपद्ग्रस्तः यः साधुजनस्तस्य अनुकम्पिन् निष्कारणोपगतबान्धव धर्मशील धार्मिक उत्तिष्ठ । त्वया मम मोक्षणाय सुमहान् यत्नः कृतोऽपि यद्यपि कृतः तथाऽपि दैवं न संवदति अनुकूलत्वेनानुवर्तते । त्वयाऽद्य किं न कृतम् । सर्वं कृतमित्यर्थः । वसन्ततिलकं वृत्तम्] ॥ ३१ ॥ **आश्रममिति** । [वत्स मातरं गृहीत्वा अद्यैव आश्रमं कस्यापि मुनेः तपोवनं वा गन्तव्यम् । पुत्र पितृदोषेण त्वमपि एवमहमिव मृत्युं मा गमिष्यसि] ॥ ३२ ॥

---

१ निर्वासयति. २ आश्रमो वत्स गन्तव्यः. ३ त्वमप्यवगमिष्यसि. ४ सच्चकं पि (सत्यकमपि न प्रत्याय्यते). ५ भट्टके. ६ णिश्शल (निस्सर).

तद्वयस्य गृहीत्वैनं व्रज ।

विदूषकः—भो वयस्य एवं त्वया ज्ञातं त्वया विनाऽहं प्राणान्धारयामीति । (क)

चारुदत्तः—वयस्य स्वाधीनजीवितस्य न युज्यते तव प्राणपरित्यागः ।

विदूषकः—(स्वगतम् ।) युक्तं न्विदम् । तथाऽपि न शक्नोमि प्रियवयस्यविरहितः प्राणान्धर्तुमिति । तद्ब्राह्मण्यै दारकं समर्प्य प्राणपरित्यागेनात्मनः प्रियवयस्यमनुगमिष्यामि । (प्रकाशम् ।) भो वयस्य परानयाम्येतं लघु । (इति सकण्ठग्रहं पादयोः पतति ।) (ख)

(दारकोऽपि रुदन्पतति ।)

शकारः—अरे ननु भणामि सपुत्रकं चारुदत्तं व्यापादयतमिति । (ग)

(चारुदत्तो भयं नाटयति ।)

चाण्डालौ—न ह्यस्माकमीदृशी राजाज्ञप्तिः यथा सपुत्रं चारुदत्तं व्यापादयतमिति । तन्निष्क्राम रे दारक निष्क्राम । (इति निष्क्रामयतः ।) इदं तृतीयं घोषणास्थानम् । ताडयत डिण्डिमम् । (पुनर्घोषयतः ।) (घ)

शकारः—(स्वगतम् ।) कथमेते न प्रत्ययन्ते पौराः । (प्रकाशम् ।) अरे चारुदत्त बटुक न प्रत्ययत एष पौरजनः । तदात्मीयया जिह्वया भण मया वसन्तसेना मारितेति । (ङ)

(चारुदत्तस्तूष्णीमास्ते ।)

(क) भो वअस्स एव्वं तुए जाणिदं तुए विणा अहं पाणाइं धारेमि त्ति ।

(ख) जुत्तं णेदम् । तधा वि ण सक्कुणोमि पिअवअस्सविरहिदो पाणाइं धारेदुं त्ति । ता बम्हणीए दारअं समप्पिअ पाणपरिच्चाएण अत्तणो पिअवअस्सं अणुगमिस्सम् । भो वअस्स पराणेमि एदं लहुम् ।

(ग) अले णं भणामि शपुत्तकं चालुदत्तकं वावादेध त्ति ।

(घ) ण हि अम्हाणं ईदिशी लाआणत्ती जधा शपुत्तं चालुदत्तं वावादेध त्ति । ता णिक्कम ले दालआ णिक्कम । इमं तइअं घोशणट्ठाणम् । ताडेध डिण्डिमम् ।

(ङ) कधं एशे ण पत्तिआअन्ति पौला । हंहो चालुदत्ता बडुका ण पत्तिआअदि एशे पौलजणे । ता अत्तणकेलिकाए जीहाए भणाहि मए वशन्तशेणा मालिदेत्ति ।

---

१ ग्रहणं. २ वअस्समग्गं. ३ बडुव्वका (बटुबक).

शकारः—अरे चाण्डाल मनुष्य न भणति चारुदत्तबटुकः । तद्भणयतमनेन जर्जरवंशखण्डेन शङ्खलेन ताडयित्वा ताडयित्वा । (क)

चाण्डालः—(प्रहारमुद्यम्य ।) भोश्चारुदत्त भण । (ख)

चारुदत्तः—(सकरुणम् ।)

प्राप्यैतद्व्यसनमहार्णवप्रपातं
न त्रासो न च मनसोऽस्ति मे विषादः ।
एको मां दहति जनापवादवह्नि-
र्वक्तव्यं यदिह मया हता प्रियेति ॥ ३३ ॥

(शकारः पुनस्तथैव ।)

चारुदत्तः—भो भोः पौराः । ('मया खलु नृशंसेन' (९।३०,३८) इत्यादि पुनः पठति ।)

शकारः—व्यापादिता । (ग)

चारुदत्तः—एवमस्तु ।

प्रथमचाण्डालः—अरे तवात्र वध्यपालिका । (घ)

द्वितीयचाण्डालः—अर तव । (ङ)

प्रथमः—अरे लेखं कुर्वः । (इति बहुविधं लेखकं कृत्वा ।) अरे यदि मदीया वध्यपालिका तदा तिष्ठतु तावन्मुहूर्तकम् । (च)

द्वितीयः—किंनिमित्तम् । (छ)

(क) अले चण्डाल गोहे ण भणादि चालुदत्तबडुके[2] । ता भणावेध इमिणा जज्जलवंशखण्डेण शङ्खलेण तालिअ तालिअ । (ख) भो चालुदत्त भणाहि ।

(ग) वावादिदा । (घ) अले तव अत्त वज्झपालिआ[3] ।

(ङ) अले तव ।

(च) अले लेक्खअं कलेम्ह । अले जदि ममकेलिका वज्झपालिआ ता चिट्ठदु दाव मुहुत्तअम् । (छ) किंणिमित्तम् ।

किं ओहशशीत्यादि । गाथा । किमवहससि हे शक पुरुषं दृष्ट्वा दैवपर्यस्तम् । विदितं न त्वमप्यीवत हे दुर्जन कृतान्तदंष्ट्रामापुरोहपि (?) ॥ पराणेमि परानयामि व्यावर्तयामि । एत्ताए एतावता । एवमेवेत्यर्थः । इदानीमित्येके । सङ्खलेन वध्यपटहवादनदण्डेन । **प्राप्येति** । [एतद्व्यसनमेव महार्णवस्तत्र प्रपातं प्राप्य । त्रासो भीतिः । जनापवादः वसन्तसेनावधायशोरूपः स एव वह्निः] ॥३३॥ वज्झपालिआ वधपर्यायः ।

---

१ महार्णवं;...प्रयातं. २ पडुव्वके; वुड्डबडुके. ३वज्झबाली.

प्रथमः—अरे भणितोऽस्मि पित्रा स्वर्गं गच्छता यथा—पुत्र वीरक यदि तव वध्यपालिका भवति मा सहसा व्यापादयसि वध्यम्। (क)

द्वितीयः—अरे किंनिमित्तम्। (ख)

प्रथमः—कदाऽपि कोऽपि साधुरर्थं दत्त्वा वध्यं मोचयति। कदाऽपि राज्ञः पुत्रो भवति तेन वृद्धिमहोत्सवेन सर्ववध्यानां मोक्षो भवति। कदाऽपि हस्ती बन्धं खण्डयति तेन संभ्रमेण वध्यो मुक्तो भवति। कदाऽपि राजपरिवर्तो भवति तेन सर्ववध्यानां मोक्षो भवति। (ग)

शकारः—किं किं राजपरिवर्तो भवति। (घ)

चाण्डालः—अरे वध्यपालिकाया लेखं कुर्वः। (ङ)

शकारः—अरे शीघ्रं मारयतं चारुदत्तम्। (इत्युक्त्वा चेटं गृहीत्वैकान्त स्थितः।) (च)

चाण्डालः—आर्य चारुदत्त राजनियोगः खल्वपराध्यति न खल्वावां चाण्डालौ। तत्स्मर यत्स्मर्तव्यम्। (छ)

चारुदत्तः—

प्रभवति यदि धर्मो दूषितस्यापि मेऽद्य
प्रबलपुरुषवाक्यैर्भाग्यदोषात्कथंचित्।
सुरपतिभवनस्था[1] यत्र तत्र स्थिता[2] वा
व्यपनयतु कलङ्कं स्वस्वभावेन[3] सैव[4]॥ ३४॥

भोः क्व तावन्मया गन्तव्यम्।

(क) अले भणिदो म्हि पिदुणा शग्गं गच्छन्तेण जधा—पुत्त वीरअ जइ तुह वज्झपालिआ होदि मा शहशा[5] वावादअशि वज्झम्। (ख) अले किंणिमित्तम्।

(ग) कदावि कोवि साहू अत्थं दइअ वज्झं मोआवेदि। कदावि लण्णो पुत्ते भोदि तेण वद्धावेण[6] शव्ववज्झाणं मोक्खे होदि। कदावि हत्थी बन्धं खण्डेदि[7] तेण शंभमेण वज्झे मुक्के होदि। कदावि लाअपलिवत्ते होदि तेण शव्ववज्झाणं मोक्खे होदि।

(घ) किं किं लाअपलिवत्ते होदि। (ङ) अले वज्झपालिआए लेक्खअं कलम्हे। (च) अले शिग्घं मालेध चालुदत्ताकम्। (छ) अज्ज चालुदत्त लाअणिओओ क्खु अवलज्झदि ण क्खु अम्हे चाण्डाला। ता शुमलेहि जं शुमलिदव्वम्।

वीरक इति चाण्डालनाम। बन्धं खण्डेदि बन्धमाच्छिद्य प्रसरति। **प्रभवतीति**। प्रबलपुरुषा नयनिर्णेतारः। तेषां वाक्यैर्भाग्यदोषाददूषितस्य यदि मे धर्मः [पुण्यसंचयः] प्रभवति तदा सुरपतिभवनस्था कदाचिज्जीवन्ती यत्र तत्र स्थिता वा सैव वसन्तसेनैव

---

१ भुवनस्था. २ आश्रिता. ३ स्वास्ति॰. ४ सैषा. ५ शहशात्ति (सहसेति). ६ वद्धावएण. ७ खुट्टति (छिनत्ति).

चाण्डालः—(अग्रतो दर्शयित्वा ।) अरे एतद्दृश्यते दक्षिणश्मशानं यत्प्रेक्ष्य वध्या झटिति प्राणान्मुञ्चन्ति । पश्य पश्य ।

अर्धं कलेवरं प्रतिवृत्तं कर्षन्ति दीर्घगोमायवः ।
अर्धमपि शूललग्नं वेश इवाट्टहासस्य ॥ ३५ ॥ (क)

चारुदत्तः—हा हतोऽस्मि मन्दभाग्यः । (इति सावेगमुपविशति ।)

शकारः—न तावद्गमिष्यामि । चारुदत्तकं व्यापाद्यमानं तावत्पश्यामि । (परिक्रम्य दृष्ट्वा ।) कथमुपविष्टः । (ख)

चाण्डालः—चारुदत्त किं भीतोऽसि । (ग)

चारुदत्तः—(सहसोत्थाय ।) मूर्ख । ('न भीतो मरणादस्मि केवलं दूषितं यशः' (१०।२७) इत्यादि पुनः पठति ।)

चाण्डालः—आर्य चारुदत्त गगनतले प्रतिवसन्तौ चन्द्रसूर्यावपि विपत्तिं लभेते । किं पुनर्जना मरणभीरुका मानवा वा । लोके कोऽप्युत्थितः पतति कोऽपि पतितोऽप्युत्तिष्ठते ।

उत्तिष्ठत्पततो वसनपातिका शवस्य पुनरस्ति ।
एतानि हृदये कृत्वा संधारयात्मानम् ॥ ३६ ॥

(द्वितीयचाण्डालं प्रति ।) एत्तच्चतुर्थं घोषणास्थानम् । तदुद्घोषयावः । (पुनस्तथैवोद्घोषयतः ।) (घ)

(क) अले एदं दीशदि दक्खिणमशाणं जं पेक्खिअ वज्झा झत्ति पाणाइं मुञ्चन्ति । पेक्ख पेक्ख ।

अद्धं कलेवलं पडिवुत्तं कट्टन्ति दीहगोमाआ ।
अद्धं पि शूललग्गं वेशं विअ अट्टहाशश्श ॥

(ख) ण दाव गमिश्शम् । चालुदत्ताकं वावादअन्तं दाव पेक्खामि । कधं उवविस्टे ।   (ग) चालुदत्ता किं भीदेशि ।

(घ) अज्ज चालुदत्त गअणदले पडिवशन्ता चन्दशुज्जा वि विपत्तिं लहन्ति । किं उण जणा मलणभीलुआ माणवा वा । लोए कोवि उट्ठिदो पडदि कोवि पडिदोवि उट्ठेदि ।

उट्ठन्तपडन्ताह वशणपाडिआ शवश्श उण अत्थि ।
एदाइं हिअए कदुअ संधालेहि अत्ताणअम् ॥

एदं चउट्ठं घोशणट्ठाणम् । ता उग्घोशम्ह ।

स्वस्वभावेनात्मरूपतया मम कलङ्कं व्यपनयतु । [मालिनी छन्दः] ॥ ३४ ॥ गन्तव्यम् । तत्रैव मया मर्तव्यमित्यर्थः । **अर्धमिति** । [दीर्घा उन्नतशरीरा गोमायवः शृगालाः प्रतिवृत्तं शूलादधोलम्बमानं कलेवरं कर्षन्ति । अर्धमपि शूललग्नमट्टहासस्य वेशो कालाट्टहासस्य रूपमिव तद्द्रौषणमित्यर्थः । शूललग्नं स्थितम्] ॥ ३५ ॥ **उत्तिष्ठदिति** ॥ ३६ ॥

---

१ नेपथ्ये श०. २ इ० श्लोकद्वयं.

चारुदत्तः—हा प्रिये वसन्तसेने । ('शशिविमलमयूख'-(१०।१३) इत्यादि पुनः पठति ।)

(ततः प्रविशति ससंभ्रमा वसन्तसेना भिक्षुश्च ।)

भिक्षुः—आश्चर्यम् । अस्थानपरिश्रान्तां समाश्वास्य वसन्तसेनिकां नयन्ननुगृहीतोऽस्मि प्रव्रज्यया । उपासिके कुत्र त्वां नेष्यामि । (क)

वसन्तसेना—आर्यचारुदत्तस्यैव गेहम् । तस्य दर्शनेन मृगलाञ्छनस्येव कुमुदिनीमानन्दय माम् । (ख)

भिक्षुः—(स्वगतम् ।) कतरेण मार्गेण प्रविशामि । (विचिन्त्य ।) राजमार्गेणैव प्रविशामि । उपासिके एहि । अयं राजमार्गः । (आकर्ण्य ।) किं नु खल्वेष राजमार्गे महान्कलकलः श्रूयते । (ग)

वसन्तसेना—(अग्रतो निरूप्य ।) कथं पुरतो महाजनसमूहः । आर्य जानीहि तावत्किं न्विदमिति । विषमभरक्रान्तेव वसुंधरा एकपार्श्वोन्नतोज्जयिनी वर्तते । (घ)

चाण्डालः—इदं च पश्चिमं घोषणास्थानम् । तत्ताडयतं डिण्डिमम् । उद्घोषयतं घोषणाम् । (तथा कृत्वा ।) भोश्चारुदत्त प्रतिपालय । मा भैः । शीघ्रमेव मार्यसे । (ङ)

चारुदत्तः—भगवत्यो देवताः ।

भिक्षुः—(श्रुत्वा ससंभ्रमम् ।) उपासिके त्वं किल चारुदत्तेन मारिताऽसीति चारुदत्तो मारयितुं नीयते । (च)

(क) हीमाणहे । अह्राणपलिश्शन्तं शमश्शाशिअ वशन्तशेणिअं णअन्ते अणुग्गहिदम्हि पव्वज्जाए । उवाशिके कहिं तुमं णइश्शम् ।

(ख) अज्जचारुदत्तस्स ज्जेव गेहम् । तस्स दंसणेण मिअलाञ्छणस्स विअ कुमुदिणिं आणन्देहि मम् ।

(ग) कदलेण मग्गेण पविशामि । लाअमग्गेण ज्जेव पविशामि । उवाशिके एहि । इमं लाअमग्गम् । किं णु क्खु एशे लाअमग्गे महन्ते कलअले शुणीअदि ।

(घ) कधं पुरदो महाजणसमूहो । अज्ज जाणाहि दाव किं णेदं त्ति । विसमभरक्कन्ता विअ वसुंधरा एअवासोण्णदा उज्जइणी वट्टदि ।

(ङ) इमं अ पच्छिमं घोशणट्ठाणम् । ता तालेध डिण्डिमम् । उग्घोशेध घोशणम् । भो चालुदत्त पडिवालेहि । मा भाआहि । लहुं ज्जेव मालीअशि ।

(च) उवाशिके तुमं किल चालुदत्तेण मालिदाशि त्ति चालुदत्तो मालिदुं णीअदि

वसन्तसेना—(ससंभ्रमम् ।) हा धिक् हा धिक् । कथं मम मन्दभागिन्याः कृत आर्यचारुदत्तो व्यापाद्यते । भोः त्वरितं त्वरितमादेशय मार्गम् । (क)

भिक्षुः—त्वरतां त्वरता बुद्धोपासिकाऽऽर्यचारुदत्तं जीवन्तं समाश्वासयितुम् । आर्याः अन्तरमन्तरं दत्त । (ख)

वसन्तसेना—अन्तरमन्तरम् । (ग)

चाण्डालः—आर्य चारुदत्त स्वामिनियोगोऽपराध्यति । तत्स्मर यत्स्मर्तव्यम् । (घ)

चारुदत्तः—किं बहुना । ('प्रभवति-'(१०।३४) इत्यादि श्लोकं पठति ।)

चाण्डालः—(खड्गमाकृष्य ।) आर्य चारुदत्त उत्तानो भूत्वा समं तिष्ठ । एकप्रहारेण मारयित्वा त्वां स्वर्गं नयावः । (ङ)

(चारुदत्तस्तथा तिष्ठति ।)

चाण्डालः—(प्रहर्तुमीहते । खड्गपतनं हस्तादभिनयन् ।) ही कथम् ।

आकृष्टः सरोषं मुष्टौ मुष्टिना गृहीतोऽपि ।
धरण्यां किमर्थं पतितो दारुणकोऽशनिसंनिभः खड्गः ॥ ३७ ॥

यथैतत्संवृत्तं तथा तर्कयामि न विपद्यत आर्यचारुदत्त इति । भगवति सह्यवासिनि प्रसीद प्रसीद । अपि नाम चारुदत्तस्य मोक्षो भवेत्तदाऽनुगृहीतं त्वया चाण्डालकुलं भवेत् । (च)

(क) हद्धी हद्धी । कधं मम मन्दभाइणीए किदे अज्जचालुदत्तो वावादीअदि । भो तुरिदं तुरिदं आदेसेहि मग्गम् । (ख) तुवलदु तुवलदु बुद्धोवाशिका अज्जचालुदत्तं जीअन्तं शमश्शाशिदुम् । अज्जा अन्तलं अन्तलं देध । (ग) अन्तरं अन्तरम् । (घ) अज्ज चालुदत्त शामिणिओओ अवलज्झदि । ता शुमलेहि जं शुमलिदव्वम् । (ङ) अज्ज चालुदत्त उत्ताणे भविअ समं चिट्ठ । एक्कप्पहालेण मालिअ तुमं शग्गं णेम्ह ।

(च) ही कधम् ।

आअंह्ळिदे शलोशं मुट्ठीए मुट्ठिणा गहीदे वि ।
धलणीए कीश पडिदे दालुणके अशणिशंणिहे खग्गे ॥

जधा एदं संवुत्तं तधा तक्केमि ण विवज्जदि अज्जचालुदत्ते त्ति । भअवदि सज्झवाशिणि पशीद पशीद । अवि णाम चालुदत्तश्श मोक्खे भवे तदो अणुगहीदं तुए चाण्डालउलं भवे ।

आकृष्ट इति । उद्गीतिः । [सरोषमाकृष्टः मुष्टौ त्सरौ मुष्टिना गृहीतोऽपि दारुणकः भीषणः अशनिसंनिभः निर्घातसदृशः खड्गः किमर्थं धरण्यां पतितः] ॥ ३७ ॥ सह्यवासिनीति । सह्यः पर्वतविशेषः । तत्रस्थां दुर्गां स्वकुलदेवतां संबोधयति ।

अपरः—यथाज्ञप्तमनुतिष्ठावः । (क)

प्रथमः—भवतु । एवं कुर्वः । (ख)

(इत्युभौ चारुदत्तं शूले समारोपयितुमिच्छतः ।)

(चारुदत्तः 'प्रभवति–' (१०।३४) इत्यादि पुनः पठति ।)

भिक्षुर्वसन्तसेना च—(दृष्ट्वा ।) आर्याः मा तावन्मा तावत् । आर्याः एषाऽहं मन्दभागिनी यस्याः कारणादेष व्यापाद्यते । (ग)

चाण्डालः—(दृष्ट्वा ।)

का पुनस्त्वरितमेषाऽंसपतता चिकुरभारेण ।
मा मेति व्याहरन्त्युत्थितहस्तेत एति ॥ ३८ ॥ (घ)

वसन्तसेना—आर्य चारुदत्त किं न्विदम् । (इत्युरसि पतति ।) (ङ)

भिक्षुः—आर्य चारुदत्त किं न्विदम् । (इति पादयोः पतति ।) (च)

चाण्डालः—(सभयमुपसृत्य ।) कथं वसन्तसेना । ननु खल्वावाभ्या साधुर्न व्यापादितः । (छ)

भिक्षुः—(उत्थाय ।) अरे जीवति चारुदत्तः । (ज)

चाण्डालः—जीवति वर्षशतम् । (झ)

वसन्तसेना—(सहर्षम् ।) प्रत्युज्जीविताऽस्मि । (ञ)

चाण्डालः—तद्यावदेतद्वृत्तं राज्ञो यज्ञवाटगतस्य निवेदयावः । (ट)

(इति निष्क्रामतः ।)

शकारः—(वसन्तसेनां दृष्ट्वा । सत्रासम् ।) आश्चर्यम् । केन गर्भदासी

(क) जधाणत्तं अणुचिठ्ठम्ह । (ख) भोदु । एव्वं कलेम्ह । (ग) अज्जा मा दाव मा दाव । अज्जा एसा अहं मन्दभाइणी जाए कारणादो एसो वावादीअदि ।

(घ) का उण तुलिदं एशा अंशपडन्तेण चिउलभालेण ।
मा मेत्ति वाहलन्ती उट्टिदहत्था इदो एदि ॥

(ङ) अज्ज चारुदत्त किं ण्णेदम् । (च) अज्ज चालुदत्त किं ण्णेदम् ।

(छ) कधं वशन्तशेणा । णं क्खु अम्हेहिं शाहू ण वावादिदे । (ज) अले जीवदि चालुदत्ते । (झ) जीवदि वश्शशदम् । (ञ) पच्चुज्जीविदम्हि ।

(ट) ता जाव एदं वुत्तं राइणो जण्णवाडगदश्श णिवेदेम्ह ।

का पुनरिति । गाथा । का पुनस्त्वरितमंसे पतता चिकुरभारेण [कुन्तलकलापेनोपलक्षिता एषा] व्याहरन्त्युत्थितहस्ता [ऊर्ध्वपाणिः] इत एति । 'उच्छिअहत्था' इति पाठे उच्छ्रितहस्तेत्यर्थः ॥ ३८ ॥ [यज्ञवाटगतस्य यज्ञस्थानस्थितस्य ।]

---

१ उपसृत्य. २ भोदु भोदु. ३ उत्थिद. ४ वस्सर (वत्सर), वरिस०.

जीवनं प्रापिता । उत्क्रान्ता मे प्राणाः । भवतु । पलायिष्ये । (इति पलायते ।) (क)

चाण्डालः—(उपसृत्य ।) अरे नन्वावयोरीदृशी राजाज्ञप्तिः—येन सा व्यापादिता तं मारयतमिति । तद्राष्ट्रियश्यालमेवान्विष्यावः । (ख)

(इति निष्क्रान्तौ ।)

चारुदत्तः—(सविस्मयम् ।)

केयमभ्युद्यते शस्त्रे मृत्युवक्त्रगते मयि ।
अनावृष्टिहते सस्ये द्रोणवृष्टिरिवागता ॥ ३९ ॥

(अवलोक्य च ।)

वसन्तसेना किमियं द्वितीया समागता सैव दिवः किमित्थम् ।
भ्रान्तं मनः पश्यति वा ममैनां वसन्तसेना न मृताऽथ सैव ॥ ४० ॥

अथ वा ।

किं नु स्वर्गात्पुनः प्राप्ता मम जीवातुकाम्यया ।
तस्या रूपानुरूपेण किमुतान्येयमागता ॥ ४१ ॥

वसन्तसेना—(सास्रमुत्थाय पादयोर्निपत्य ।) आर्य चारुदत्त सैवाहं पापा यस्याः कारणादियं त्वयाऽसदृश्यवस्था प्राप्ता । (ग)

(नेपथ्ये ।)

आश्चर्यमाश्चर्यम् । जीवति वसन्तसेना । (इति सर्वे पठन्ति ।) (घ)

चारुदत्तः—(आकर्ण्य सहसोत्थाय स्पर्शसुखमभिनीय निमीलिताक्ष एव हर्षगद्गदाक्षरम् ।) प्रिये वसन्तसेना त्वम् ।

वसन्तसेना—सैवाहं मन्दभाग्या । (ङ)

चारुदत्तः—(निरूप्य सहर्षम् ।) कथं वसन्तसेनैव । (सानन्दम् ।)

(क) हीमादिके । केण गब्भदाशी जीवाविदा । उक्कन्ताइं मे पाणाइं । भोदु । पलाइश्शम् । (ख) अले णं अम्हाणं ईदिशी लाआणत्ती—जेण शा वावादिदा तं मालेध त्ति । ता लट्ठिअशालअं ज्जेव अण्णेशम्ह । (ग) अज्ज चालुदत्त सा ज्जेव्व अहं पावा जाए कारणादो इअं तुए असरिसी अवत्था पाविदा । (घ) अच्चरिअं अच्चरिअम् । जीवदि वसन्तसेणा । (ङ) सा ज्जेव्वाहं मन्दभाआ ।

केयमिति । अभ्युद्यते उद्गते । द्रोणवृष्टिः द्रोणस्य मेघस्य वृष्टिः ॥३९॥ **वसन्तसेनेति** । [द्वितीया मृताया अन्या । उपजातिर्वृत्तम्] ॥ ४० ॥ **किं न्विति** । [जीवातुकाम्यया जीवनौषधेच्छया । जीवयितुमित्यर्थः। रूपानुरूपेण सदृशरूपेण] ॥४१॥

---

१ केयं समु०. २ शस्ये. ३ सम्यग्वृष्टि. ४ जीवानु०. ५ स-सं-स्पर्शसुखनिमी०.

कुतो बाष्पाम्बुधाराभिः स्नपयन्ती[1] पयोधरौ ।
मयि मृत्युवशं प्राप्ते विद्येव समुपागता ॥ ४२ ॥

प्रिये वसन्तसेने ।

त्वदर्थमेतद्विनिपात्यमानं देहं त्वयैव प्रतिमोचितं मे ।
अहो प्रभावः प्रियसंगमस्य मृतोऽपि को नाम पुनर्ध्रियेत ॥ ४३ ॥

अपि च । प्रिये पश्य[2] ।

रक्तं तदेव वरवस्त्रमियं च माला
कान्तागमेन हि वरस्य यथा विभाति ।
एते च वध्यपटहध्वनयस्तथैव
जाता विवाहपटहध्वनिभिः समानाः ॥ ४४ ॥

वसन्तसेना—अतिदाक्षिणतया किं न्विदं व्यवसितमार्येण । (क)

चारुदत्तः—प्रिये त्वं किल मया हतेति—

पूर्वानुबद्धवैरेण शत्रुणा प्रभविष्णुना ।
नरके पतता[3] तेन मनागस्मि निपातितः ॥ ४५ ॥

वसन्तसेना—(कर्णौ पिधाय ।) शान्तं पापम् । तेनास्मि राजश्यालेन व्यापादिता । (ख)

चारुदत्तः—(भिक्षुं दृष्ट्वा ।) अयमपि कः ।

वसन्तसेना—तेनानार्येण व्यापादिता । एतेनार्येण जीवं प्रापिताऽस्मि । (ग)

चारुदत्तः—कस्त्वमकारणबन्धुः ।

भिक्षुः—न प्रत्यभिजानाति मामार्यः । अहं स आर्यस्य चरणसंवाहचिन्तकः संवाहको नाम द्यूतकरैर्गृहीत एतयोपासिकयाऽऽर्यस्यात्मीय

(क) अदिदक्खिणदाए किं ण्णेदं ववसिदं अज्जेण । (ख) सन्तं पावम् । तेण म्हि राअसालेण वावादिता । (ग) तेण अणज्जेण वावादिदा । एदिणा अज्जेण जीवाविदम्हि । (घ) ण पच्चभिजाणादि[4] मं अज्जो । अहं शे अज्जश्श चलणशंवाहचिन्तए शंवाहके णाम । जूदिअलेहिं गहिदे एदाए उवाशिकाए अज्जश्श केलके त्ति अलंकालपण-

---

कुत इति । [बाष्पाम्बुधाराभिः पयोधरौ स्नपयन्ती । विद्याऽमृतसंजीवनी विद्या ।] विद्या इतरविविक्तात्मज्ञानम् ॥ ४२ ॥ **त्वदर्थमिति** । [देहं देहः । 'कायो देहः क्लीबपुंसोः ' इत्यमरः । उपजातिर्वृत्तम्] ॥ ४३ ॥ **रक्तमिति** । [वरस्य जामातुः वस्त्रम् । यद्वा पट्टवस्त्रम् ।] वरस्य यथा जामातुरिव । [पर्यायालंकारः । वसन्ततिलकं वृत्तम्] ॥ ४४ ॥ **पूर्वेति** । [प्रभविष्णुना सामर्थ्यवता । मनागीषत्] ॥ ४५ ॥ केनापि । न एतद्व्यतिरिक्तेनान्येनेत्यर्थः । न प्रत्यभिजानाति । निर्वेदः शान्तिः वैष-

---

१ स्नाप० . २ पश्य पश्य. ३ ताऽनेन. ४ ०आणादि.

इत्यलंकारपणनिष्क्रीतोऽस्मि । तेन च द्यूतनिर्वेदेन शाक्यश्रमणकः संवृत्तोऽस्मि । एषाऽप्यार्या प्रवहणविपर्यासेन पुष्पकरण्डकजीर्णोद्यानं गता। तेन चानार्येण न मां बहु मन्यस इति बाहुपाशबलात्कारेण मारिता मया दृष्टा । (घ)

(नेपथ्ये कलकलः ।)

जयति वृषभकेतुर्दक्षयज्ञस्य हन्ता
तदनु जयति भेत्ता षण्मुखः क्रौञ्चशत्रुः ।
तदनु जयति कृत्स्नां शुभ्रकैलासकेतुं
विनिहतवरवैरी चार्यको गां विशालाम् ॥ ४६ ॥

(प्रविश्य सहसा ।)

शर्विलकः—

हत्वा तं कुनृपमहं हि पालकं भो-
स्तद्राज्ये द्रुतमभिषिच्य चार्यकं तम् ।
तस्याज्ञां शिरसि निधाय शेषभूतां
मोक्ष्येऽहं व्यसनगतं च चारुदत्तम् ॥ ४७ ॥

हत्वा रिपुं तं बलमन्त्रहीनं पौरान्समाश्वास्य पुनः प्रकर्षात् ।
प्राप्तं समग्रं वसुधाधिराज्यं राज्यं बलारेरिव शत्रुराज्यम् ॥ ४८ ॥

(अग्रतो निरूप्य ।) भवतु । अत्र तेन भवितव्यं यत्रायं जनपदसमवायः । अपि नामायमारम्भः क्षितिपतेरार्यकस्यार्यचारुदत्तस्य जीवितेन सफलः स्यात् । (त्वरिततरमुपसृत्य ।) अपयात जाल्माः। (दृष्ट्वा सहर्षम् ।) अपि ध्रियते चारुदत्तः सह वसन्तसेनया । संपूर्णाः खल्वस्मत्स्वामिनो मनोरथाः ।

णिक्कीदे म्हि । तेण अ जूदणिव्वेदेण शक्कशमणके शंवुत्ते म्हि । एशावि अज्जा पवहणविपज्जाशेण पुप्फकलण्डकजिण्णुज्जाणं गदा । तेण अ अणज्जेण ण मं बहु मण्णेशि त्ति बाहुपाशबलक्कालेण मालिदा मए दिट्ठा ।

यिकेच्छानिवृत्तिः । किमेतत्किमेतदिति शत्रूणां क्रूरः कलकलः । **जयतीति।** जयति सर्वोत्कर्षेण वर्तते । [वृषभकेतुः शिवः । षण्मुखः कार्तिकेयः । क्रौञ्चशत्रुः क्रौञ्चाख्यस्य दैत्यस्य हन्ता। तदुक्तं–'क्रौञ्चे क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हेमकन्दरे। स्कन्देन युद्धे सुचिरं चित्रमायी सुमायिना ' इति ।] तदनु जयति आत्मसात्करोति । [शुभ्रः कैलासः केतुरिव यस्याः सा ताम् । मालिनी वृत्तम्] ॥४६॥ **हत्वेति ।** शेषभूतां पुष्पदामायमानाम् । गुणभूतामिति केचित् । [व्यसनगतमापद्ग्रस्तम् । पुष्पिताग्रा वृत्तम्] ॥४७॥ **हत्वेति।** [बलेन सुसैन्येन मन्त्रेण सुनयोपदेशेन च विहीनं रिपुं हत्वा । प्रकर्षात्प्रभावातिशयात् । समग्रवसुधाया आधिराज्यं यस्मिन् तादृक् शत्रुराज्यं बलारेः इन्द्रस्य

---

१ शत्रोः. २ ०वैरां. ३ मन्त्रि, मित्र. ४ आढ्यं. ५ सुरारेः. ६ नामारम्भः. ७ संपूर्णाः... मनोरथः, ८ सत्वरम०.

> दिष्ट्या भो व्यसनमहार्णवादपारा-
> दुत्तीर्णं गुणधृतया सुशीलवत्या ।
> नावेव प्रियतमया चिरान्निरीक्षे
> ज्योत्स्नाढ्यं शशिनमिवोपरागमुक्तम् ॥ ४९ ॥

तत्कृतमहापातकः कथमिवैनमुपसर्पामि । अथ वा सर्वत्रार्जवं शोभते (प्रकाशमुपसृत्य बद्धाञ्जलिः ।) आर्य चारुदत्त ।

चारुदत्तः—ननु को भवान् ।

शर्विलकः—

> येन ते भवनं भित्त्वा न्यासापहरणं कृतम् ।
> सोऽहं कृतमहापापस्त्वामेव शरणं गतः ॥ ५० ॥

चारुदत्तः—सखे मैवम् । त्वयाऽसौ प्रणयः कृतः । (इति कण्ठे गृह्णाति ।)

शर्विलकः—अन्यच्च ।

> आर्यकेणार्यवृत्तेन कुलं मानं च रक्षता ।
> पशुवद्यज्ञवाटस्थो दुरात्मा पालको हतः ॥ ५१ ॥

चारुदत्तः—किम् ।

शर्विलकः—

> त्वद्यानं यः समारुह्य गतस्त्वां शरणं पुरा ।
> पशुवद्वितते यज्ञे हतस्तेनाद्य पालकः ॥ ५२ ॥

चारुदत्तः—शर्विलक योऽसौ पालकेन घोषादानीय निष्कारणं कूटागारे बद्ध आर्यकनामा त्वया मोचितः ।

शर्विलकः—यथाऽऽह तत्रभवान् ।

चारुदत्तः—प्रियं नः प्रियम् ।

राज्यमिव प्राप्तम् । इन्द्रवज्रा वृत्तम्] ॥४८॥ **दिष्ट्येति** । [भो दिष्ट्या सुदैवेन अपारात् व्यसनं महार्णव इव तस्मात् । गुणः रज्जुः तेन पक्षे गुणैः धृतया सुशीलवत्या नावा इव प्रियतमया वसन्सेनया उत्तीर्णमुद्धृतं उपरागो राहुग्रासस्तस्मान्मुक्तं ज्योत्स्नाढ्यं शशिनमिव आर्यचारुदत्तं चिरात् निरीक्षे । उपमारूपकयोः संसृष्टिः । पुष्पिताग्रा वृत्तम्] ॥ ४९ ॥ **येनेति** । [सोऽहं कृतं महापापं येन सः । त्वामेवापकृतमेव] ॥५०॥ **आर्यकेणेति** । [आर्यवृत्तेन उदात्तशीलेन ।] यज्ञवाटो यज्ञस्थानम् । एतच्चापरिच्छिन्नजनसंमर्देन प्रमादस्थानम् । तेन सर्वोत्कटवध इति सूचयितुम् । [तत्र तिष्ठतीति यज्ञवाटस्थः । पशुवच्छागतुल्यं हतः] ॥ ५१ ॥ **त्वद्यानमिति** । वितते प्रसृते यज्ञे पशुवत् ।

---

१ हनाप०. २ त्वया स. ३ कुलमानं. ४ गूढागारे, बन्धनेन बद्धः. ५ प्रियं मः.

शर्विलकः—प्रतिष्ठितमात्रेण तव सुहृदाऽऽर्यकेणोज्जयिन्यां वेणा-तटे कुशावत्यां राज्यमतिसृष्टम् । तत्प्रतिमान्यतां प्रथमः सुहृत्प्रणयः । (परिवृत्य ।) अरे रे आनीयतामयं पापो राष्ट्रियशठः ।

(नेपथ्ये ।)

यथाऽऽज्ञापयति शर्विलकः ।

शर्विलकः—आर्य नन्वयमार्यको राजा विज्ञापयति—इदं मया युष्मद्गुणोपार्जितं राज्यम् । तदुपयुज्यताम् ।

चारुदत्तः—अस्मद्गुणोपार्जितं राज्यम् ।

(नेपथ्ये ।)

अरे रे राष्ट्रियश्यालक एह्येहि । स्वस्याविनयस्य फलमनुभव ।

(ततः प्रविशति पुरुषैरधिष्ठितः पश्चाद्बाहुबद्धः शकारः ।)

शकारः—आश्चर्यम् ।

एवं दूरमतिक्रान्त उद्दाम इव गर्दभः ।
आनीतः खल्वहं बद्धः कुक्कुरोऽन्य इव दुष्करः ॥ ५३ ॥

(दिशोऽवलोक्य ।) समन्तत उपस्थित एष राष्ट्रियबन्धः । तत्कमिदानी-मशरणः शरणं व्रजामि । (विचिन्त्य ।) भवतु । तमेवाभ्युपपन्नशरण-वत्सलं गच्छामि । (इत्युपसृत्य ।) आर्य चारुदत्त परित्रायस्व परि-त्रायस्व । (इति पादयोः पतति ।) (क)

(नेपथ्ये ।)

आर्य चारुदत्त मुञ्च मुञ्च । व्यापादयावैतम् । (ख)

शकारः—(चारुदत्तं प्रति ।) भो अशरणशरण परित्रायस्व । (ग)

चारुदत्तः—(सानुकम्पम् ।) अहह अभयमभयं शरणागतस्य ।

(क) हीमादिके ।

एव्वं दूलमदिक्कन्ते उद्दामे विअ गद्दहे ।
आणीदे क्खु हगे बद्धे हुडे अण्णे व्व दुक्कले ॥

शमन्तदो उवट्ठिदे एशे लश्टिअबन्धे । ता कं दाणिं अशलणे शलणं वजामि । भोदु । तं ज्जेव्व अब्भुववण्णशलणवच्छलं गच्छामि । अज्ज चालुदत्त पलित्ताआहि पलित्ताआहि ।

(ख) अज्ज चालुदत्त मुञ्च मुञ्च । वावादेम्ह एदम् ।

(ग) भो अशलणशलणे पलित्ताआहि ।

अद्य पालकः हतः ॥ ५२ ॥ एवमिति । [उद्दामः छिन्नबन्धः दूरमतिक्रान्तः पलायितः अहं दुष्करः । दुर्ग्रह इत्यर्थः । कुक्कुर इव आनीतः] ॥ ५३ ॥

---

१ वेणी. २ लक्खणं (रक्षणं).

शर्विलकः—(सावेगम् ।) आः अपनीयतामयं चारुदत्तपार्श्वात् । (चारुदत्तं प्रति ।) ननूच्यतां किमस्य पापस्यानुष्ठीयतामिति ।

आकर्षन्तु सुबद्ध्वैनं श्वभिः संखाद्यतामथ ।
शूले वा तिष्ठतामेष पाट्यतां क्रकचेन वा ॥ ५४ ॥

चारुदत्तः—किमहं यद्ब्रवीमि तत्क्रियते ।

शर्विलकः—कोऽत्र संदेहः ।

शकारः—भट्टारक चारुदत्त शरणागतोऽस्मि । तत्परित्रायस्व परित्रायस्व । यत्तव सदृशं तत्कुरु । पुनर्नेदृशं करिष्यामि । (क)

(नेपथ्ये पौराः ।)

व्यापादयतम् । किंनिमित्तं पातकी जीव्यते । (ख)

(वसन्तसेना वध्यमालां चारुदत्तस्य कण्ठादपनीय शकारस्योपरि क्षिपति ।)

शकारः—गर्भदासीपुत्रि प्रसीद प्रसीद । न पुनर्मारयिष्यामि। तत्परित्रायस्व । (ग)

शर्विलकः—अरे रे अपनयत । आर्य चारुदत्त आज्ञाप्यताम्—किमस्य पापस्यानुष्ठीयताम् ।

चारुदत्तः—किमहं यद्ब्रवीमि तत्क्रियते ।

शर्विलकः—कोऽत्र संदेहः ।

चारुदत्तः—सत्यम् ।

शर्विलकः—सत्यम् ।

चारुदत्तः—यद्येवं शीघ्रमयम्—

शर्विलकः—किं हन्यताम् ।

चारुदत्तः—न हि न हि । मुच्यताम् ।

शर्विलकः—किमर्थम् ।

(क) भस्टालआ चालुदत्त शलणागदे म्हि । ता पलित्ताआहि पलित्ताआहि । जं तुए शलिशं तं कलेहि । पुणो ण ईदिशं कलिश्शम् ।

(ख) वावादेध । किंणिमित्तं पादकी जीवावीअदि ।

(ग) गब्भदाशीधीए पशीद पशीद । ण उण मालइश्शम् । ता पलित्ताआहि ।

[राष्ट्रियस्य बन्धः निरोद्धा पुरुषवर्गः ।] आकर्षन्त्विति । [एनं शकारं सुबद्धा चाण्डाला आकर्षन्तु । अयं श्वभिः खाद्यतां वा । क्रकचेन करपत्रेण] ॥ ५४ ॥ शत्रुरिति । [उपकारेण अनुग्रहेण हतः कर्तव्यः । कृतापराधस्य शरणमागतस्य शत्रोः प्राणरक्षणमेव महान्दण्ड इत्यर्थः] ॥ ५५ ॥ [पुरुषैः सह निष्क्रान्तः । अत्र ल० दीक्षिताः–

---

१ असौ. २ आकर्षतु. ३ भिद्यतां. ४ तुज्झ.

चारुदत्तः—

शत्रुः कृतापराधः शरणमुपेत्य पादयोः पतितः ।
शस्त्रेण न हन्तव्यः—

शर्विलकः—एवम् । तर्हि श्वभिः खाद्यताम् ।

चारुदत्तः—न हि ।

—उपकारहतस्तु कर्तव्यः ॥ ५५ ॥

शर्विलकः—अहो आश्चर्यम् । किं करोमि । वदे॑त्वार्यः ।

चारुदत्तः—तन्मुच्यताम् ।

शर्विलकः—मुक्तो भवतु ।

शकारः—आश्चर्यम् । प्रत्युज्जीवितोऽस्मि । (इति पुरुषैः सह निष्क्रान्तः ।) (क)

(नेपथ्ये कलकलः ।)

(पुनर्नेपथ्ये ।)

एषाऽऽर्यचारुदत्तस्य वधूरार्या धूता पदे वसनाञ्चले विलगन्तं दारकमाक्षिपन्ती बाष्पभरितनयनैर्जनैर्निवार्यमाणा प्रज्वलिते पावके प्रविशति । (ख)

शर्विलकः—(आकर्ण्य नेपथ्याभिमुखमवलोक्य ।) कथं चन्दनकः । चन्दनक किमेतत् ।

चन्दनकः—(प्रविश्य ।) किं न पश्यत्यार्यः । महाराजप्रासादं दक्षिणेन महाञ्जनसंमर्दो वर्तते । (' एसा...... ' इत्यादि पुनः पठति ।) कथितं च मया तस्यै यथा—आर्ये मा साहसं कुरुष्व । जीवत्यार्यचारुदत्त इति । परं तु दुःखव्यापृततया कः शृणोति कः प्रत्ययते । (ग)

(क) हीमादिके । पच्चुज्जीविदे म्हि ।

(ख) एसा अज्जचालुदत्तस्स वहुआ अज्जा धूदा पदे वसणञ्चले विलग्गन्तं दारअं आक्खिवन्ती बाप्फभरिदणअणेहिं जणेहिं णिवारिज्जमाणा पज्जलिदे पावए पविसदि ।

(ग) किं ण पेक्खदि अज्जो । महाराअप्पासादं दक्खिणेण महन्तो जणसंमद्दो वट्टदि । कधिदं अ मए तीए जधा—अज्जे मा साहसं करेहि । जीवदि अज्जचारुदत्तो त्ति । परं तु दुक्खवावुडदाए को सुणेदि को पत्तिआएदि ।

इतः परं नीलकण्ठेनापूरि । ' नेपथ्ये कलकलः । पुनर्नेपथ्ये—' इत्यारभ्याग्रे (पृ. २५२) ' शर्वि०-दिष्ट्या जीवितसुहृद्वर्ग आर्यः । चारु०-युष्मत्प्रसादेन-' इत्यन्तं समाप्य ' यत्सूर्योदयभयतः कविनोचितपात्रमेलनं न कृतम् । सुन्दरयुक्तिभिररचयदाचन्दन-

---

१ वदत्यार्यः. २ अतः परं २५२ पृष्ठं यावन्मृच्छकटिकस्थोऽधिको ग्रन्थः.

चारुदत्तः—(सोद्वेगम् ।) हा प्रिये जीवत्यपि मयि किमेतद्व्यवसितम् । (ऊर्ध्वमवलोक्य दीर्घं निःश्वस्य च ।)

न महीतलस्थितिसहानि भवच्चरितानि चारुचरिते यदपि ।
उचितं तथाऽपि परलोकसुखं न पतिव्रते तव विहाय पतिम् ॥५६॥

(इति मोहमुपगतः ।)

शर्विलकः—अहो प्रमादः ।

त्वरया सर्पणं तत्र मोहमार्योऽत्र चागतः ।
हा धिक्प्रयत्नवैफल्यं दृश्यते सर्वतोमुखम् ॥ ५७ ॥

वसन्तसेना—समाश्वसित्वार्यः । तत्र गत्वा जीवयत्वार्याम् । अन्यथाऽधीरत्वेनानर्थः संभाव्यते । (क)

चारुदत्तः—(समाश्वस्य सहसोत्थाय ।) हा प्रिये क्वासि । देहि मे प्रतिवचनम् ।

चन्दनकः—इत इत आर्यः । (ख)

(इति सर्वे परिक्रामन्ति ।)

(ततः प्रविशति यथानिर्दिष्टा धूता चेलाञ्चलमाकर्षन्विदूषकेणानुगम्यमानो रोहसेनो रदनिका च ।)

धूता—(साश्रम् ।) जात मुञ्च माम् । मा विघ्नं कुरुष्व । बिभेम्यार्यपुत्रस्यामङ्गलाकर्णनात् । (इत्युत्थायाञ्चलमाकृष्य पावकाभिमुखं परिक्रामति ।) (ग)

रोहसेनः—मातरार्ये प्रतिपालय माम् । त्वया विना न शक्नोमि जीवितं धर्तुम् । (इति त्वरितमुपसृत्य पुनरञ्चलं गृह्णाति ।) (घ)

विदूषकः—भवत्यास्तावद्ब्राह्मण्या भिन्नत्वेन चिताधिरोहणं पापमुदाहरन्ति ऋषयः । (ङ)

(क) समस्ससिदु अज्जो । तत्त गदुअ जीवावेदु अज्जाम् । अण्णधा अधीरत्तणेण अणत्थो संभावीअदि । (ख) इदो इदो अज्जो । (ग) जाद मुञ्चेहि मम् । मा विग्घं करेहि । भीआमि अज्जउत्तस्स अमङ्गलाकण्णणादो । (घ) माद अज्जए पडिवालेहि मम् । तुए विणा ण सक्कुणोमि जीविदं धारेदुम् । (ङ) भोदीए दाव बम्हणीए भिण्णत्तणेण चिदाधिरोहणं पावं उदाहरन्ति रिसीओ ।

कोक्ति नीलकण्ठस्तत् ॥' इति निजनिर्मितिसूचिकामार्यां विरच्य समापितोऽयमाधिको ग्रन्थ इति ।] [महाराजप्रासादमार्यकप्रासादम्] । **न महीति** । [हे चारुचरिते रमणीवृत्ते यद्यपि भवत्याः चरितानि सत्कृत्यानि महीतलस्थितिसहानि न । स्वर्गोचितान्येवेत्यर्थः । तथाऽपि हे पतिव्रते पतिं विहाय तव परलोकसुखं न उचितम् । प्रमिताक्षरा वृत्तम्] ॥५६॥ **त्वरयेति** । [तत्र त्वरया सर्पणं गमनं उचितम् । अत्र च आर्यो मोहमागतः । हा धिक् सर्वतोमुखं प्रयत्नवैफल्यं दृश्यते] ॥ ५७ ॥

---

१ उपागतः. २ त्वरायाः. ३ सक्कणोमि.

धूता—वरं पापाचरणम् । न पुनरार्यपुत्रस्यामङ्गलाकर्णनम् । (क)

शर्विलकः—(पुरोऽवलोक्य ।) आसन्नहुतवहाऽऽर्या । तत्त्वर्यतां त्वर्यताम् ।

(चारुदत्तस्त्वरितं परिक्रामति ।)

धूता—रदनिके अवलम्बस्व दारकम् । यावदहं समीहितं करोमि । (ख)

चेटी—(सकरुणम् ।) अहमपि यथोपदेशिन्यस्मि भट्टिन्याः । (ग)

धूता—(विदूषकमवलोक्य ।) आर्यस्तावदवलम्बताम् । (घ)

विदूषकः—(सावेगम् ।) समीहितसिद्धयै प्रवृत्तेन ब्राह्मणोऽग्रे कर्तव्यः । अतो भवत्या अहमग्रणीर्भवामि । (ङ)

धूता—कथं प्रत्यादिष्टाऽस्मि द्वाभ्याम् । (बालकमालिङ्ग्य ।) जात त्वमेव पर्यवस्थापयात्मानमस्माकं तिलोदकदानाय । अतिक्रान्ते किं मनोरथैः । (सनिःश्वासम् ।) न खल्वार्यपुत्रस्त्वां पर्यवस्थापयिष्यति । (च)

चारुदत्तः—(आकर्ण्य सहसोपसृत्य ।) अहमेव पर्यवस्थापयामि बालिशम् । (इति बालकं बाहुभ्यामुत्थाप्य वक्षसाऽऽलिङ्गति ।)

धूता—(विलोक्य ।) आश्चर्यम् । आर्यपुत्रस्येव स्वरसंयोगः । (पुनर्निपुणं निरूप्य सहर्षम् ।) दिष्ट्याऽऽर्यपुत्र एवैषः । प्रियं मे प्रियम् । (छ)

बालकः—(विलोक्य सहर्षम् ।) आश्चर्यम् । तातो मां परिष्वजते । (धूतां प्रति ।) आर्ये वर्धसे । तात एव मां पर्यवस्थापयति । (इति प्रत्यालिङ्गति ।) (ज)

(क) वरं पावाचरणे[2] । ण उण अज्जउत्तस्स अमङ्गलाकण्णणम् । (ख) रआणिए अवलम्ब दारअं । जाव अहं समीहिदं करेमि । (ग) अहं पि जधोवदेसिणिम्हि[3] भट्टिणीए । (घ) अज्जो दाव अवलम्बेदु । (ङ) समीहिदसिद्धिए पउत्तेण बम्हणो अग्गदो कादव्वो । अदो भोदीए अहं अग्गणी होमि ।

(च) कधं पच्चादिट्ठम्हि दुवेहिं । जाद तुमं ज्जेव्व पज्जवट्ठावेहि अत्ताणं अम्हाणं तिलोदअदाणाअ । अदिक्कन्ते किं मणोरहेहिं । ण क्खु अज्जउत्तो तुमं पज्जवट्ठाविस्सादि ।

(छ) अम्महे । अज्जउत्तस्स ज्जेव्व सरसंजोओ । दिट्ठिआ अज्जउत्तो ज्जेव्व एसो । पिअं मे पिअम् । (ज) अम्मो । आवुको मं परिस्सजदि । अज्जए वड्ढीअसि । आवुको ज्जेव मं पज्जवट्ठावेदि ।

